श्रीभाष्ये चतुःसूत्री.

(श्रीमद्रामानुजाचार्यप्रणीता)

THE CHATUSSÛTRÎ

FROM

Shrimat Râmânujâchâryâ's

SHRIBHASHYA

EDITED WITH A GLOSS

BY

Pandit Vasudevashastri Abhyankar,
Fergusson College, Poona.

POONA :

Printed and published by Hari Narayan Gokhale
at " Dnyan Prakash " Press.

1904.

Rs 2.

श्रीभाष्ये चतुःसूत्री.

(श्रीमद्रामानुजाचार्यप्रणीता)

अभ्यंकरोपाह्ववासुदेवशास्त्रिकृत

समासोक्तिटीकासहिता ।

सा च

पुण्यपत्तने

ज्ञानप्रकाशनाम्निमुद्रणालयेमुद्रिता

शकाब्दा १८२६

मूल्यम् रूपकद्वयम् (रु० २)

सा च
गोखले इत्युपनामकेन नारायणात्मजेन हरिशर्मणा स्वकीये
ज्ञानप्रकाशनाम्नि मुद्रणालये मुद्रयित्वा प्राकाश्यं नीता ।

भूमिका.

—:o:—

पुरा किलात्मतत्त्वज्ञानं कृतयुगे नारायणाद्विनिष्पन्नमपि त्रेतायां किंचिदन्यथाऽभूत् । द्वापरे च गौतमकविशापदग्धं सदज्ञानस्वरूपमेवाभवत् । ततश्चेन्द्रादयो देवा अपि सङ्कीर्णबुद्धयः सन्तो ब्रह्मेशानौ पुरस्कृत्य नारायणं शरणं जग्मुः । स्वकार्यं च विज्ञापयामासुः । ततो भगवान्पुरुषोत्तमः पराशरात्सत्यवत्यामवतीर्णो भूत्वा ब्रह्मसूत्राणि प्रणिनाय । तेषां च सूत्राणां स्वारसिकमर्थं भगवद्बोधायनप्रणीतवृत्त्यादिष्वालोच्यापि स्वोत्प्रेक्षितार्थानुसारेण केचन मायावादिप्रभृतयः सूत्राक्षराणि व्याकुलयांचक्रुः युक्त्याभासैश्च लोकान्वञ्चयामासुः । अतस्तदनुग्रहाय प्रवृत्ताः श्रीमद्रामानुजाचार्या वृत्तिं द्रमिडभाष्यादिप्रबन्धांश्चानुसृत्यैव सूत्राक्षराणि व्याचिख्यासवः श्रीभाष्यं प्रणिन्युः । तत्र च श्रुति–ब्रह्मसूत्र–जैमिनिसूत्र–पाणिनिसूत्र–भगवद्गीता विष्णुपुराण–नाथमुनि–वार्तिक–वृत्ति–द्रमिडभाष्य–गौडपादकारिकात्मसिद्धि–वाक्यकार–सनत्सुजातीयादिवाक्यानि प्रमाणत्वेन संगृहीतानि । ‘ रामानुजाचार्याश्चेमे शेषावतारभूता द्रविडदेशे प्रेमधुलाख्यायां (पेरंबुदूर इति प्र.) पुरि ग्रहवेदाकाशभू– (१०४९) परिमिते शके केशवभट्टात्कान्तिमत्यां समभूवन् । समुच्चयवादचणो यादवप्रकाशश्चैषां मातुलो विद्यागुरुश्च ’ इति श्रूयते ।

मतं चैषां विशिष्टाद्वैतम् । अत्र च यद्यपि चित् अचित् ईश्वरश्चेति तत्त्वत्रयं तथापि चिदचिद्रूपशरीरविशिष्ट ईश्वर एक एवेत्येतन्मतं ‘ विशिष्टाद्वैत ’ शब्देन व्यवह्रियते । चिदचिद्रूपशरीरविशिष्टस्येश्वरस्याद्वैतमैक्यमित्यर्थः । विशिष्टयोरैक्यमिति वा । सूक्ष्मचिदचिदात्मकशरीरविशिष्ट ईश्वरः कारणम् । स एव स्थूलचिदचिदात्मकशरीरविशिष्टः कार्यमिति विशिष्टयोरैक्यात् । द्वैतेन विशिष्टमद्वैतमिति कर्मधारयो वा । अस्मिन्नद्वैतेऽन्तर्भूतद्वैतस्य सत्वात् । चित्–जीवः । स च सुखादिवैचित्र्यात्प्रतिशरीरं भिन्नः, अणुपरिमाणः, ज्ञानाश्रयश्च । अहं जानामीति प्रत्ययात् । न तु ज्ञानस्वरूपः । अहं ज्ञानामीतिप्रत्ययाभावात् । कर्ता भोक्ता च स एव । ज्ञानस्यैवावस्थाविशेषः कर्तृत्वं

भोक्तृत्वं च । तच्चेश्वराधीनम् । अचित्–जडो घटादिः । स च सत्य एव न तु मायिकः । ईश्वरस्तयोर्नियन्ता परमात्मा । ज्ञानाद्यष्टगुणाश्रयः न तु निर्गुणः । निर्गुणवाक्यैश्च हेय-गुणराहित्यमेव प्रतिपाद्यते । स च विभुः । मोक्षावस्थायामपि न जीवब्रह्मणोरैक्यम् । किं तु साम्यमात्रम् । अधिकं तु जिज्ञासुभिस्तत्तद्ग्रन्थानालोच्य स्वयमूहनीयम् ।

तदिदं श्रीभाष्यं श्रीमत्सुदर्शनाचार्याः श्रुतप्रकाशिकाख्यव्याख्यया समलंचक्रुः । किं त्वत्राभिनिवेशमर्थयमानानामप्यमुष्य भाष्यस्य दुर्बोधतां श्रुतप्रकाशिकायाश्चात्यन्तविस्तृतिमालोच्य मन्दमतीनामस्मान्निवृत्तिमुत्प्रेक्षमाणेन मयाऽनायासेन संक्षेपेण सारभूतार्थबोधिनी समासोक्तिः सिद्धित्रयतत्त्वत्रयश्रुतप्रकाशिकादिग्रन्थानुसारेणैव यथामति वितन्यते । दोषाश्चात्रत्या गुणैकप्रेमशीलैर्विद्वद्भिः क्षन्तव्या इति सविनयं प्रार्थये—

अभ्यंकरोपाह्व–वासुदेवशास्त्री.

शके १८२६ क्रोधीनाम संवत्सरे
अधिकज्येष्ठशुद्धप्रतिपत् ।

आदर्शपुस्तकसंज्ञा.

१ ‘ कलकत्ता ’ राजधान्यां मुद्रितं मूलमात्रं ‘ क ’ इति संज्ञितम् ।

२ काश्यां मुद्रितं श्रुतप्रकाशिकासमेतं ‘ ख ’ इति संज्ञितम् ।

३ तैलङ्गदेशे तैलङ्गलिप्यां मुद्रितं श्रुतप्रकाशिकासमेतं डा. भांडारकर इत्येतेभ्यो लब्धं ‘ ग ’ इति संज्ञितम् ।

श्रीभाष्य--चतुःसूत्र्या अनुक्रमणिका.

इति श्रीभाष्यचतुःसूत्र्या अनुक्रमणिका समाप्ता ॥

श्रीभाष्ये चतुःसूत्री ।

श्रीमते रामानुजाय नमः ।

अखिलभुवनजन्मस्थेमभङ्गादिलीले
विनतविविधभूतव्रातरक्षैकदीक्षे ।
श्रुतिशिरसि विदीप्ते ब्रह्मणि श्रीनिवासे
भवतु मम परस्मिन् शेमुषी भक्तिरूपा ॥ १ ॥

श्रीगणेशाय नमः

अथ श्रीभाष्यव्याख्या समासोक्तिः प्रारभ्यते ।

ध्यायंध्यायं सच्चिदानन्दरूपं स्मारंस्मारं पादपद्मं गुरूणाम् । प्राहुंप्राहुं पूर्वटीकाकृदुक्तीस्तन्मूलैवा प्रथ्यते कापि टीका ॥ १ ॥ श्रीभाष्यसिन्धाववमज्जतां श्रुतप्रकाशिकैकैव तरी विराजते । न लभ्यते सापि च साम्प्रतं नृणामतः समासोक्त्युडुपं प्रकाश्यते ॥ २ ॥ प्रारिप्सितस्य प्रबन्धस्याविघ्नसमाप्तिप्रचयगमनार्थं स्मृत्याचारसिद्धमिष्टदेवतोपासनरूपं मङ्गलमाचरति—**अखिलेति** । भवतीति भुवनं कार्यवर्गः तस्य जन्म उत्पत्तिः स्थेमा स्थितिः भङ्गो नाशः । आदिशब्देन सृष्ट्यौपयिकमन्तःप्रवेशनियमनादि गृह्यते । एतादृशी लीला यस्य । लीलाशब्देन भगवतः परिपूर्णत्वानन्यप्रेर्यत्वस्वच्छन्दचेष्टितत्वादिकमभिप्रेतम् । विशेषेण नताः प्रह्वीभूता अशेषविद्याविशेषनिष्ठा देवमनुष्यादिभेदेन विविधा ये प्राणिनः । भगवज्ज्ञानेन लब्धसत्ताकाः प्राणिनोऽत्र भूतशब्देन गृह्यन्ते । तत्सम्बन्धी व्रातः तस्य रक्षा रक्षणमिष्टप्रापणपर्यन्तानिष्टनिवारणरूपम् । तद्विषयैका प्रधानभूता दीक्षा सङ्कल्पो यस्य । उपासकसम्बन्धिनोऽपि भगवतैव रक्ष्यन्ते इति तत्सम्बन्धी व्रात इत्युक्तम् । तदुक्तम् ' आस्फोटयन्ति पितरः प्रनृत्यन्ति पितामहाः । वैष्णवो नः कुले जातः स नः सन्तारयिष्यति ' इति । श्रूयते नित्यमिति श्रुतिः । अनेनापौरुषेयत्वान्निर्दोषत्वं विवक्षितम् । तस्याः शिरोभूते । शिरःशब्देन श्रुतेरनन्यपरत्वं सूच्यते । विशेषेण दीप्ते ।

पाराशर्यवचःसुधामुपनिषद्दुग्धाब्धिमध्योद्धृतां
संसाराग्निविदीपनव्यपगतप्राणात्मसञ्जीवनीम् ।
पूर्वाचार्यसुरक्षितां बहुमतिव्याघातदूरस्थिता-
मानीतां तु निजाक्षरैः सुमनसो भौमाः पिबन्त्वन्वहम् ॥ २ ॥

भगवद्बोधायनकृतां विस्तीर्णां ब्रह्मसूत्रवृत्तिं पूर्वाचार्याः सञ्चिक्षिपुः,

---

निरतिशयानन्दरूपत्वेन परमपुरुषार्थत्वात् । श्रियो निवासभूते । अनेन नित्यविभूति-मत्वं सूच्यते । एतादृशे परस्मिन्ब्रह्मणि मम भक्तिरूपा शेमुषी बुद्धिर्भवत्वित्यर्थः ।

पाराशर्येति । पाराशर्यो व्यासः । पाराशर्यशब्देन जन्मोत्कर्षः सूचितो भवति । नारायणाद्गुनिष्पन्ने ज्ञाने गौतमऋषेःशापादज्ञानतां गते सति सङ्कीर्णबुद्धयो देवा नारायणं शरणं जग्मुः । ततो भगवान्पुरुषोत्तमः पराशरात्सत्यवत्यामवतीर्ण इति हि स्कान्दे प्रसिद्धम् । तस्य वचस्तदभिमतोऽर्थः । वचःशब्दस्यार्थे तात्पर्यम् । अत-एवाग्निमविशेषणसङ्गतिः । तद्रूपां सुधाम् । ब्रह्मण्युपनिषण्णेत्युपनिषद् । तद्रूपो यो दुग्धाब्धिः । तन्मध्यादुत्धृताम् । दुग्धशब्देन पूर्वभागादप्युपनिषदः सारत्वं सूच्यते । यथा ' आरण्यकं च वेदेभ्यः ' इति । अब्धिशब्देनालोचितानामुपनिषदामानन्त्यं सूच्यते । मध्यशब्देन सर्ववाक्यानां मुख्यार्थापरित्यागःसूच्यते । मध्यस्य सर्वपर्यन्त देशापेक्षया तुल्या ह्यायतिः । उध्दृतशब्देनातिनिम्नदेशनिमग्नोद्धरणमभिदधता निःशे-षार्थग्रहणं सूच्यते । संसारस्य तापत्रयरूपत्वात्तद्रूपो योऽग्निस्तस्य विशेषेण यद्दीपनम् । विद्यालब्धेः पूर्वं कदाचिदप्यनिवार्यत्वात् । तेन व्यपगतप्राणा ये आत्मानो जीवात्मा-नस्तेषां संजीवनीं संसारोन्मोचनकर्त्रीम् । प्राणशब्देनेह परमात्मोच्यते । तस्य व्यप-गमश्च तज्ज्ञानतद्दर्शनतत्प्राप्तिष्वन्यतमस्याप्यभावः । पूर्वाचार्या बोधायनादयस्तैः सुरक्षिताम् । बोधायनो हि व्यासस्य साक्षाच्छिष्यः सूत्रवृत्तिं चकारेति प्रसिद्धम् । बहूनां यन्त्रो वा या मतयस्तासां व्याघातेन परस्परविरोधेन दूरस्थिताम् । कस्यापि सूत्रयथार्थज्ञानाभावात् । निजाक्षरैरानीतां भाष्येण समीपमानीताम् । एतादृशीं वचः-सुधाम् । भौमाः भूमिसम्बन्धिनः । देवादीनामन्यथापि ज्ञानप्राप्तिसम्भवादेतदुक्तिः । सुष्ठु सारासारविवेककृन्मनो येषां ते अन्वहं पिबन्तु । रसस्यातिशयादतृप्तिकरीयं सुधेति भावः ।

भगवदिति । अनेन बोधायनस्य शंकरादिभ्योप्याप्ततमत्वं ध्वन्यते । बोधायनेन ह्यतिविस्तीर्णा वृत्तिः कृता । द्रमिडभाष्यकारादयोऽपि परपक्षप्रतिक्षेपाद्यनादरेणाति-

तन्मतानुसारेण सूत्राक्षराणि व्याख्यास्यन्ते ।

अथातो ब्रह्मजिज्ञासा ॥ १ ॥

अत्रायम् 'अथ' शब्द आनन्तर्ये भवति । 'अतः' शब्दो वृत्तस्य हेतुभावे । अधीतसाङ्गसशिरस्कवेदस्य अधिगताल्पास्थिरफलकेवलकर्मज्ञानतया सञ्जातमोक्षाभिलाषस्य अनन्तास्थिरफलब्रह्मजिज्ञासा हि अनन्तरभाविनी । ब्रह्मणो जिज्ञासा 'ब्रह्मजिज्ञासा'। ब्रह्मण—इति कर्मणि षष्ठी। 'कर्तृकर्मणोः कृति (पा. सू. २।३।६५) इति विशेषविधानात् । यद्यपि सम्बन्धसामान्यपरिग्रहेऽपि जिज्ञासायाः कर्मापेक्षत्वेन कर्मार्थत्वसिद्धिः,

---

संक्षिप्तान्ग्रन्थानरचयन् । अतिविस्तीर्णातिसंकुचितग्रन्थानां साकल्यमायुष्मद्बुद्धिमज्जनप्रचुरेष्वेव भवति । नहीदानींतनपुरुषाणां सर्वेषां शतायुष्ट्वं यावज्जीवं ग्रन्थपरिश्रमः सहजधीविशेषाश्च सन्ति । तस्मात्परमतनिरासाद्यर्थमनतिविस्तरतयासुग्रहत्वार्थं च सूत्रं व्याख्यातव्यम् । **तन्मतानुसारेण** । न तु स्वोत्प्रेक्षितमतान्तरेण । **सूत्राक्षराणि** । सूत्रस्थपदानां प्रकृतिप्रत्ययविभागानुगुणं वदामः । न तु स्वोत्प्रेक्षितार्थेषु सूत्राणि यथाकथंचिद्योजयितव्यानीति भावः । **व्याख्यास्यन्ते** । व्याङ्भ्यामुपसर्गाभ्यामपेक्षितविस्तरसंक्षेपौ द्योतितौ ।

अत्रेति । मङ्गलं तु नाथशब्दवाच्यम् । अपि तु शङ्खस्वनादिवच्छ्रूयमाणोऽथशब्दो मङ्गलावह इत्योंकारस्येवार्थान्तरपरत्वेऽपि मङ्गलत्वं सिध्यति । **आनन्तर्ये इति** । अधिकारार्थत्वं तु न युक्तम् । अधिकारो हि प्रस्तावः । तस्य च 'प्रारभ्यते' इत्युक्तिं विनाऽपि प्रारम्भादेवावगमात् । **अत इति** । वृत्तस्येतीदंशब्दार्थः । हेतुभाव इति तसिल्प्रत्ययार्थः । आनन्तर्यं हेतुभावं चोपपादयति । **अधीतेति** । अल्पमस्थिरं च फलं यस्य तादृशस्य केवलस्य ब्रह्मज्ञानरहितस्य कर्मणो ज्ञानं अधिगतं येनेत्यर्थः । केवलकर्मज्ञानमेव वृत्तं वर्तिष्यमाणब्रह्मजिज्ञासाहेतुः । अनन्तमविनाशि स्थिरं च फलं मोक्षरूपं यस्येति ब्रह्मणो विशेषणम् । जिज्ञासाया अपीदं विशेषणं सम्भवति । तस्या अप्यागमोत्थविवेकादिजन्यज्ञानद्वारेण मोक्षहेतुत्वात् । **कर्त्रिति** । कृत्प्रत्ययप्रकृतिभूतधातुवाच्यक्रियानिरूपितकर्तृकर्मवाचकाच्छब्दाच्छष्ठीति तत्सूत्रार्थः । **यद्यपीति** । ब्रह्मसम्बन्धिजिज्ञासेत्यर्थे किं जिज्ञास्यमिति जिज्ञासायाः कर्माकाङ्क्षायामर्थाद्ब्रह्मण

तथापि आक्षेपतः प्राप्तादाभिधानिकस्यैव ग्राह्यत्वात् कर्मणि षष्ठी गृह्यते न च 'प्रतिपदविधाना षष्ठी न समस्यते' इति कर्मणि षष्ठ्याः समासनिषेधः शङ्कनीयः। 'कृद्योगा षष्ठी समस्यते'–इति प्रतिप्रसवसद्भावात्। 'ब्रह्म' शब्देन स्वभावतो निरस्तनिखिलदोषोऽनवधिकातिशयासंख्येयकल्याणगुणगणः पुरुषोत्तमोऽभिधीयते। सर्वत्र बृहत्त्वगुणयोगेन 'ब्रह्म' शब्दः। बृहत्त्वं च स्वरूपेण गुणैश्च यत्र अनवधिकातिशयं, सोऽस्य मुख्योऽर्थः। स च सर्वेश्वर एव। अतो 'ब्रह्म' शब्दस्तत्रैव मुख्यवृत्तः। तस्मादन्यत्र तद्गुणलेशयोगादौपचारिकः, अनेकार्थकल्पनाऽयोगाद्भगवच्छब्दवत्।

एव कर्मत्वं लभ्यत इति भावः। **तथापीति**। सम्बन्धिषष्ठ्यामपेक्षितः प्राप्तस्यापि कर्मत्वस्य विलम्बोपस्थितिकत्वम्। कर्मणि षष्ठ्यां तु तस्य षष्ठीवाच्यत्वाच्छीघ्रोपस्थितिकत्वामिति तदेव युक्तम्। **प्रतिपदेति**। विशेषविहिता या षष्ठी तदन्तस्य न समास इति तदर्थः। **कृद्योगा**। कर्तृकर्मणोरितिसूत्रेण विहिता। **प्रतिप्रसवः**। अपवादस्यापवादः। ब्रह्मशब्दार्थमाह–**ब्रह्मशब्देनेति**। बद्धजीवस्यापि निरस्तकतिपयदोषत्वात्तद्व्यावृत्त्यर्थं निखिलेत्युक्तिः। तथापि मुक्तेऽतिव्याप्तिरतःस्वभावत इति। **अनवधिकेति**। अत्रापि स्वभावत इति संबध्यते। तेन गुणानामविद्याकल्पितत्वनिरासः। अनवधिकः अतिशयो यस्यैतादृशः असङ्ख्येयः कल्याणकारकः गुणगणो यस्येति बहुव्रीहिगर्भो बहुव्रीहिः। ब्रह्मगुणातिशयस्य च वाङ्मनसागोचरत्वाऽनवधिकत्वम्। अनवधिकातिशयशब्देन नित्यसिद्धव्यावृत्तिः। तद्गुणानां जगद्व्यापारानुगुणत्वेन भगवद्गुणापेक्षया सावधिकातिशयत्वात्। **सर्वत्रेति**। भगवद्व्यतिरिक्तस्थले केवलबृहत्वगुणयोगेन गौणो ब्रह्मशब्दप्रयोगः। मुख्यार्थमाह–**बृहत्वमिति**। बृहत्वं महत्वम्। स्वरूपतो गुणतश्चानवधिकातिशयमहत्वं ब्रह्मशब्दप्रवृत्तिनिमित्तम्। भगवद्गुणानां स्वरूपतस्तादृशमहत्वात्तत्रातिव्याप्तिवारणाय गुणत इति। तावन्मात्रोक्तौ यद्यपि न दोषस्तथापिशब्दशक्तेरसंकोचस्य स्वतः प्राप्तत्वात्तथोक्तिः। **मुख्यवृत्तः**। वाचकः। **औपचारिकः**। लाक्षणिकः। सर्वत्र मुख्यः कुतो न स्यादित्याशङ्क्याह–**अनेकार्थेति**। तदुक्तं गारुडे 'वेदे भूरिप्रयोगाच्च गुणयोगाच्च शार्ङ्गिणि। तस्मिन्नेव ब्रह्मशब्दो मुख्यवृत्तो महामुने। यस्मिन्प्रयुज्यमाने तु गुणयोगः सुपुष्कलः। तत्रैव मुख्यवृत्तोऽयमन्यत्र ह्युपचारतः' इति। **भगवच्छब्दवदिति**। तथा च भगवच्छब्दस्य पुरुषोत्तम एव मुख्यत्वमन्यत्रामुख्यत्वं पराशरेणोक्तम्।

तापत्रयातुरैरमृतत्वाय स एव जिज्ञास्यः। अतः सर्वेश्वरो जिज्ञासाकर्मभूतं ‘ब्रह्म’। ज्ञातुमिच्छा ‘जिज्ञासा’। इच्छाया इष्यमाणप्रधानत्वात्, इष्यमाणं ज्ञानमिह विधीयते।

मीमांसापूर्वभागज्ञातस्य कर्मणोऽल्पास्थिरफलत्वादुपरितनभागावसेयस्य ब्रह्मज्ञानस्य अनन्ताक्षयफलत्वाच्च पूर्ववृत्तात्कर्मज्ञानादनन्तरम्, ‘अत’ एव हेतोः ‘ब्रह्म’ ज्ञातव्यमित्युक्तं भवति। तदाह वृत्तिकारः, वृत्तात्कर्माधिगमादनन्तरं ब्रह्मविविदिषेति। वक्ष्यति च कर्मब्रह्ममीमांसयोरैकशास्त्र्यं,

---

तापत्रयम्। आध्यात्मिकाधिभौतिकाधिदैविकरूपम्। **अमृतत्वाय**। मोक्षाय। **अत इति**। निर्दोषमङ्गलगुणाकरस्य सर्वेश्वरस्यैव तापत्रयातुरैर्जिज्ञास्यत्वादित्यर्थः। **इच्छाया इति**। यथा ‘प्राङ्मुखो भुञ्जीत’ इत्यत्र भुजिधातोर्विधिप्रत्ययान्तत्वाद्भोजनस्य कर्तव्यत्वे प्रतीतेऽपि भोजनस्य रागप्राप्तत्वात्प्राङ्मुखत्वविधावेव तात्पर्यमवगम्यते तथात्रेच्छाया विधेयत्वासम्भवात्तद्विषयभूतविचारात्मकज्ञानविधावेव तात्पर्यमवगम्यते। **इष्यमाणेति**। इष्यमाणं ज्ञानं प्रधानं यस्यास्तत्त्वादित्यर्थः। क्रियायाः कर्मसिध्यर्थत्वेन तच्छेषत्वात्क्रियापेक्षया कर्मणः प्राधान्यं बोध्यम्। **विधीयत इति**। अज्ञातज्ञापनमिह विधिः। नत्वप्रवृत्तप्रवर्तनम्। रागतः प्रवृत्तेर्वक्ष्यमाणत्वात्। अत-स्तेन ग्रन्थेन न विरोधः। रागतः प्रवृत्तस्यापि पूर्वपक्षयुक्त्याऽनारम्भणीयताबुद्धौ सत्यानारम्भणीयत्वज्ञापनमज्ञातज्ञापनम्।

सूत्रस्य वाक्यार्थमाह-**मीमांसेति**। मीमांसाया हि भागद्वयं कर्ममीमांसा ब्रह्ममीमांसा चेति। तत्र कर्ममीमांसा जैमिनिप्रतिपादिता द्वादशाध्यायी पूर्वमीमांसाशब्देन व्यवह्रियते। ब्रह्ममीमांसा त्वियं चतुरध्यायी उत्तरमीमांसाशब्देन व्यवह्रियते। कर्माधिगमस्यैव पूर्ववृत्तत्वमित्यत्र वृत्तिकारोक्तिं प्रमाणयति-**तदाहेति**। न केवलं वृत्तिकारोक्तिरेव प्रमाणं किं तु तदुक्ता युक्तिरपीत्याह-**वक्ष्यति चेति**। **ऐकशास्त्र्यम्**। एकशास्त्रत्वम्। उभयत्रापि धर्मस्यैव प्रतिपाद्यमानत्वात्। अलौकिकं श्रेयः साधनं हि धर्मः। स च साध्यरूपः क्रियादिः पूर्वभागेन प्रतिपाद्यते। सिद्धस्तु ब्रह्मरूपो धर्मोऽनेनोत्तरभागेन प्रतिपाद्यते। सिद्धरूपे वस्तुनि धर्मशब्दप्रयोगो महाभारते दृष्टः। यथा ‘ये च वेदविदो विप्रा ये चाध्यात्मविदो जनाः। ते वदन्ति महात्मानं कृष्णं धर्मं सनातनम्’ इति। यद्यपि कर्मब्रह्ममीमांसयोरैकशास्त्र्यमविवक्षितं जैमिनिना तथापि

संहितमेतच्छारीरकं जैमिनीयेन षोडशलक्षणेनेति शास्त्रैकत्वसिद्धिरिति। अतः, प्रतिपिपादयिषितार्थभेदेन षट्कभेदवदध्यायभेदवच्च पूर्वोत्तरमीमांसयोर्भेदः ।

मीमांसाशास्त्रम्,–'अथातो धर्मजिज्ञासा' (जै. सू. १।१।१) इत्यारभ्य । 'अनावृत्तिः शब्दादनावृत्तिः शब्दात्' (ब्र. सू. ४।४।२२) इत्येवमन्तं सङ्गतिविशेषेण विशिष्टक्रमम् । तथाहि । प्रथमं तावत्, स्वाध्यायोऽध्येतव्य–इत्यध्ययनेनैव स्वाध्यायशब्दवाच्यवेदाख्याक्षरराशेर्ग्रहणं विधी-

---

तदङ्गीकृत्य तदेकशास्त्रतया बादरायणेन ब्रह्मसूत्रप्रणयनं युक्तम् । यतोऽतदर्थतया कृतमपि योग्यमपेक्षितं तादर्थ्यमर्हति । पूर्वसिद्धतडागस्य पश्चात्कल्पितग्रामार्थत्ववत् । न च 'आम्नायस्य क्रियार्थत्वात्' (जै. सू. १।२।१) इति सिद्धपरवाक्यानां क्रियाशेषत्वं जैमिनिना कण्ठोक्तमेकशास्त्रत्वे विरुध्यत इति वाच्यम् । उत्सर्गापवादन्यायेन शास्त्रैक्याविरोधात् । व्याकरणे 'कर्मण्यण्' (पा. सू. ३।२।१) 'आतोऽनुपसर्गे कः' (पा. सू. ३।२।३) इति वत् । सामान्येन सिद्धपरवाक्यानां क्रियाशेषत्वेऽभिहिते सिद्धपरवाक्यविशेषस्य किं विधिशेषत्वं नवेति विचार्य स्वयं पुरुषार्थविरहिणामेव सिद्धपराणां क्रियाशेषत्वं, स्वयं पुरुषार्थपर्यवसायिनां तु सिद्धपरवाक्यानां नतच्छेषत्वमिति हि निर्णेतुं युक्तम् । **शारीरकं** ब्रह्ममीमांसा । जगच्छरीरः परमात्मा शारीरः। 'तस्यैष एव शारीर आत्मा' (तै. २।४।१) इति श्रुतेः। तद्विषयं शास्त्रं शारीरकमित्युच्यते । लक्षणशब्दोऽध्यायवाची । एतच्छारीरकं जैमिनीयेन सह मिलितं सत् षोडशलक्षणेन षोडशाध्यायरूपत्वेन संहितं नियतपौर्वापर्यैकव्याख्येयव्याख्यानरूपतया संगतमिति शास्त्रैकत्वसिद्धिरित्यर्थः । **प्रतिपिपादयिषितेति** । यथा जैमिनीये प्रकृतिविकृतिप्रयोजनभेदेन षट्कभेदः यथा वा प्रमाणाद्यर्थभेदेनाध्यायभेदस्तद्वदत्र साध्यसिद्धरूपधर्मभेदेन पूर्वोत्तरमीमांसयोर्भेदो न तु शास्त्रभेदाद्भेद इति भावः ।

अस्त्वेकशास्त्रत्वं तत्र कथं पौर्वापर्यनियम इति शङ्कां परिहरन् वृत्तिग्रन्थस्थं संहितपदं विवृणोति–**मीमांसाशास्त्रमिति** । पूर्वोत्तररूपभागद्वयघटितमित्यर्थः। **विशिष्टक्रमम्**। क्रमविशेषवत् । **प्रथममिति** । प्राथम्यं च शास्त्रान्तरश्रवणयोग्यावस्थापेक्षया पूर्वभावित्वम्। गर्भाष्टमोपनीतस्य ह्यध्ययनम् । ततः पूर्वं शास्त्रान्तरपरिश्रमानर्हत्वात् । अध्ययनविधिपरतन्त्रस्य साङ्गाध्ययनानन्तरं कर्मविचारावश्यम्भावस्य स्वरससिद्धत्वाच्च। एतेन साधनचतुष्टयादिपूर्ववृत्तान्तरनिष्पादनस्यानवसरग्रस्तत्वं सूचितम् । **अध्ययनेनैवेति** । एवशब्देन नियमविधित्वं द्योतितम् । न तु पुस्तकनिरीक्षणादिनेत्यर्थः ।

यते । तच्च अध्ययनं किंरूपं कथञ्च कर्तव्यमित्यपेक्षायाम्, अष्टवर्षं ब्राह्मणमुपनयीत, तमध्यापयेदित्यनेन,–

श्रावण्यां प्रौष्ठपद्यां वा उपाकृत्य यथाविधि ।

युक्तश्छन्दांस्यधीयीत मासान् विप्रोऽर्धपञ्चमान् ॥

इत्यादिव्रतनियमविशेषोपदेशैश्च अपेक्षितानि विधीयन्ते । एवं सत्सन्तानप्रसूतसदाचारनिष्ठात्मगुणोपेतवेदविदाचार्योपनीतस्य व्रतनियमविशेषयुक्तस्य आचार्योच्चारणानूच्चारणमक्षरराशिग्रहणफलमध्ययनमित्यवगम्यते । अध्ययनञ्च स्वाध्यायसंस्कारः, स्वाध्यायोऽध्येतव्य–इति स्वाध्यायस्य

तत् । स्वाध्यायोध्येतव्य इति वाक्यप्रतिपादितम् । **किं रूपम्** । स्वतन्त्रोच्चारणरूपं परतंत्रोच्चारणरूपं वा, सकृदुच्चारणरूपमसकृदुच्चारणरूपं वेत्यर्थः । **कथम्** । किमङ्गकम् । उपनयनस्याध्ययनाङ्गत्वं दर्शयति–**अष्टवर्षमिति** । **इत्यादीति** । आदिशब्देन ' अत ऊर्ध्वं तु छन्दांसि शुक्लेषु नियतः पठेत् । वेदाङ्गानिच सर्वाणि कृष्णपक्षेषु संपठेत् ' इत्यादिवचनानां संग्रहः । **व्रतम्** । उपाकर्मकाण्डव्रतादि । **नियमः** । देशकालभक्ष्याभक्ष्यादिव्यवस्थारूपः । फलितमाह–**एवमिति** । सत्कुलप्रसूतः सदाचारसंपन्नः आत्मगुणैरक्रोधादिभिर्युक्तः वेदविच्च य आचार्यस्तेनोपनीतस्य पूर्वोक्त व्रतनियमविशेषयुक्तस्य माणवकस्य आचार्यकर्तृकोच्चारणानन्तरभाव्युच्चारणरूपम् अक्षरराशिग्रहणं फलं यस्यैवंभूतमध्ययनमित्यर्थः । आचार्योच्चारणानूच्चारणमित्यनेन परतन्त्रोच्चारणरूपता दर्शिता । अक्षरराशिग्रहणफलमित्यनेनासकृदावृत्तिरूपता दर्शिता । यथा 'व्रीहीनवहन्ति' इत्यत्रावहननस्य वैतुष्यपर्यन्तत्वादश्रुताप्यावृत्तिः सिध्यति तद्वदत्रापि । अनेन द्विविधाऽपि किंरूपमित्याकाङ्क्षा शामिता । वेदविदाचार्योपनीतस्य व्रतनियमविशेषयुक्तस्येत्यनेनच कथमित्याकाङ्क्षा पूरिता । नन्वध्ययनस्य पुरुषसंस्कारत्वेनापूर्वसिध्यर्थतया स्वाध्यायसिध्यर्थत्वाभावादक्षरराशिग्रहणफलकत्वाभावेनावृत्त्यासिद्धिरत आह–**अध्ययनं चेति** । **स्वाध्यायसंस्कारः** । नतु पुरुषसंस्कारः ।

कर्मत्वावगमात् । संस्कारो हि नाम, कार्यान्तरयोग्यताकरणम् । संस्कार्य-त्वञ्च स्वाध्यायस्य युक्तं, धर्मार्थकाममोक्षरूपपुरुषार्थचतुष्टयतत्साधनाववो-धित्वात्, जपादिना स्वरूपेणापि तत्साधनत्वाच्च । एवमध्ययनविधिर्मन्त्रव-न्नियमवदक्षरराशिग्रहणमात्रे पर्यवस्यति । अध्ययनगृहीतस्य स्वाध्यायस्य स्वभावत एव प्रयोजनवदर्थावबोधित्वदर्शनात्, गृहीतात् स्वाध्यायादवगम्य-मानान् प्रयोजनवतोऽर्थानापाततो दृष्ट्वा, तत्स्वरूपप्रकारविशेषनिर्णय-

---

कर्मत्वेति । यद्यपि यद्यत्कर्म तत्तत्संस्कार्यमेवेति न नियमः । उत्पाद्यसंस्कार्यप्राप्यभेदेन कर्मणस्त्रिविधत्वात् । ओदनं पचतीत्याद्यम् । तण्डुलं पचतीति द्वितीयम् । स्थाणुं पश्यतीति तृतीयम् । तथाप्यत्र स्वाध्यायरूपकर्मण उत्पाद्यत्वासम्भवः । न ह्यध्ययनेन वेदराशिरुत्पद्यते । फलान्तरे सम्भवति प्राप्यत्वमात्रपर्यवसानं चायुक्तम् । अतोऽत्र-स्वाध्यायस्य संस्कार्यकर्मत्वमेवेति भावः । **नामेति** । प्रसिद्धौ । **अवबोधित्वात्** । अ-नुष्ठानौपयिकबोधजनकत्वात् । **स्वरूपेणापि** । अर्थज्ञानतदनुष्ठानविरहेणापि । यतः स्वाध्यायस्य स्वरूपतोऽपि धर्मादिसाधनत्वमतोऽध्ययनविधेरर्थज्ञानपर्यन्तं ता-त्पर्यकल्पने मानाभाव इत्याह–**एवमिति** । **मन्त्रवदिति** । यथा ‘शंनो मित्रः’ इत्यादिमंत्राणामर्थाऽज्ञानेपि केवलजपमात्रेणोपकारकत्वम्, यथा च काण्डव्रता-दिनियमेषु तदङ्गभूतमंत्राणां केवलपाठेनोपकारकत्वम्, नहि बालानां मंत्रार्थावबो-धसम्भवस्तद्वदिति भावः । **पर्यवस्यतीति** । स्वाध्यायशब्दश्च नार्थज्ञानवाची अपि तु स्वशाखामात्रवाचीति स्वाध्यायशब्दात्स्वरसतस्तथैव प्रतीतेः । तर्हि कथं स्वाध्याय-स्यानुष्ठानौपयिकबोधजनकत्वं किमर्थं च मीमांसाया आरम्भणीयत्वमित्यत आह–**अ-ध्ययनेति** । **स्वभावतः** । शब्दस्य बोधकत्वशक्तिस्वाभाव्यात् । व्युत्पन्नपदपदार्थं प्रति शब्दस्यार्थावबोधकत्वं स्वाभाविकमिति प्रसिद्धम् । एवकारो विधिनैरपेक्ष्यपरः । **प्रयोजनेति** । अनेनाध्ययनविधेः परम्परया पुरुषार्थपर्यवसायित्वमुक्तम् । साक्षात्प्रयोजनं तु अक्षरराशिग्रहणमेव । मीमांसारम्भे हेतुमाह–**गृहीतादिति** । गृहीतमात्रादित्यर्थः । स्वस्यार्थस्य प्रयोजनं पुरुषार्थरूपं तद्विशिष्टार्थस्यापाततो ज्ञाने सत्यापातप्रतीतेः संशयविपर्ययसहत्वात्तन्निराकरणाय मीमांसेति भावः । **स्वरूपविशेषाः** अङ्गिनः । **प्रकारविशेषाः** अङ्गानि । पूर्वपक्षोक्तस्वरूपप्रकारापेक्षया सिद्धान्त्युक्तस्वरूपप्रकारयोर्वै-षम्यं विशेषशब्देन विवक्षितम् । प्रयोजनवदर्थ- स्वाध्याय वेद-मीमांसाशब्दाः **पूर्वो-**

फलवेदवाक्यविचाररूपमीमांसाश्रवणे अधीतवेदः पुरुषः स्वयमेव प्रवर्तते ।

तत्र कर्मविधिस्वरूपे निरूपिते, कर्मणामल्पास्थिरफलत्वं दृष्ट्वा, अध्ययनगृहीतस्वाध्यायैकदेशोपनिषद्वाक्येषु च अमृतस्वरूपानन्तस्थिरफलापातप्रतीतेः तान्निर्णयफलवेदान्तवाक्यविचाररूपशारीरकमीमांसायामधिकरोति । तथाच, वेदान्तवाक्यानि केवलकर्मफलस्य क्षयित्वं, ब्रह्मज्ञानस्य च अक्षयफलत्वं दर्शयन्ति । 'तद्यथेह कर्मचितो लोकः क्षीयते, एवमेवामुत्र पुण्यचितो लोकः क्षीयते,' 'अन्तवदेवास्य तद्भवति' (बृ. ३।८।१०) 'नह्यध्रुवैः प्राप्यते ध्रुवं कर्मभिः' (का. २।१०) 'प्लवा ह्येते अदृढा यज्ञरूपाः' (मुं. २।७) 'परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायात् । नास्त्यकृतः कृतेन । तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठं,

---

त्तरभागसाधारणाः । **स्वयमेव** । न तु विधिना । पुरुषस्य चेतनत्वात्प्रयोजनवदर्थापातप्रतीतेश्च तन्निर्णयेच्छाजनकत्वादिति भावः ।

एकशास्त्रत्वं रागतः प्रवृत्तिश्चास्तु तत्र कथं पौर्वापर्यनियमस्तत्राह–**तत्रेति** । तत्र वेदे । कर्मभागस्य वेदोपक्रमत्वादधीतक्रमेणैव निरूपणं प्राप्तमिति कर्मविचारस्य पूर्वभावित्वमिति भावः । **अध्ययनेति** । अध्ययनस्य कृत्स्नस्वाध्यायविषयत्वादुपनिषदश्च स्वाध्यायशब्दान्तर्गतत्वादिति भावः । तन्निर्णयः फलं यस्येति विचारविशेषणम् । **अधिकरोति** । अधिकारी भवति । एवं च कर्मविचारकृत्वमेवाधिकारप्रयोजकं न तु साधनचतुष्टयसंपन्नत्वमित्याभिप्रायः । शारीरकमीमांसारम्भणीयत्वप्रयोजकापातप्रतीतिजनकवेदान्तवाक्यान्याह-**तथा चेति** । केवलशब्देन ज्ञानाङ्गकर्मव्यावृत्तिः । **तद्यथेहेति** । ननु पूर्वं कर्मविचारेण कर्मफलक्षयिष्णुत्वस्य निर्णयादिह पुनः किमर्थं तत्प्रतिपादकानि 'तद्यथेह' इत्यादीनि वाक्यान्युदाह्रियन्ते इति चेन्न । अधिगतकर्मणः पुरुषस्य निर्णीतार्थसंवादिवाक्यदर्शनात्कर्मफलास्थिरत्वस्येव ब्रह्मज्ञानफलाक्षय्यत्वस्य प्रामाणिकत्वं सम्भवतीति श्रद्धास्थिरीकरणार्थं दृष्टान्तत्वेन तदुपन्यासात् । **कर्मचितः** । कर्मणा सम्पादितः । **लोकः** । लोक्यते इति लोकः फलम् । **तत्** । ज्ञानरहितं कर्म । **अध्रुवैः** अस्थिरैः । **ध्रुवं** स्थिरं मोक्षादि । **प्लवाः** । विनाशिनः । **अदृढाः** । अस्थिराः । यज्ञादिकर्माणि संसारपारं तारयितुमसमर्थानीति भावः । **परीक्ष्य** । मीमांसान्यायैर्निरूप्य । **ब्राह्मणः** । अधीतसाङ्गसशिरस्कवेदः । **अकृतः** । नित्यः परमात्मा कृतेन कर्मणा न लभ्यते । **गुरुमेवेति** । एवकारेण गुरूपसदननियमो गम्यते । **समित्पाणिः** । न रिक्तपाणिः । **श्रोत्रियं** श्रुतवेदान्तम् । **ब्रह्मनिष्ठं** । ब्रह्मसा-

तस्मै स विद्वानुपसन्नाय सम्यक्प्रशान्तचित्ताय शमान्विताय, येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्याम्' (मुं. १।२।१२-१३) 'ब्रह्मविदाप्नोति परम्' (तै. २।१।१) 'न पुनर्मृत्यवे, तदेकं पश्यति,' 'न पश्यो मृत्युं पश्यति' (छां० ७।२६।२) 'स स्वराड्भवति' (छा. ७।२५।२) 'तमेवं विद्वानमृत इह भवति' (नृ. पू. उ.६) 'तमेवं विदित्वातिमृत्युमेति, नान्यः पन्था अयनाय विद्यते' (श्वे. ३।८) पृथगात्मानं प्रेरितारञ्च मत्वा जुष्टस्ततस्तेनामृतत्वमेति' (श्वे. १।६) इत्यादीनि ।

ननु च, साङ्गवेदाध्ययनादेव कर्मणां स्वर्गादिफलत्वं, स्वर्गादीनाञ्च क्षयित्वं, ब्रह्मोपासनस्य अमृतफलत्वञ्च ज्ञायते एव । अनन्तरं मुमुक्षुर्ब्रह्मजिज्ञासायामेव प्रवर्तताम्, किमर्था धर्मविचारापेक्षा । एवं तर्हि शारीरकमीमांसायामपि न प्रवर्तताम्, साङ्गवेदाध्ययनादेव कृत्स्नस्य ज्ञातत्वात् । सत्यम् । आपाततः प्रतीतिर्विद्यते एव, तथापि न्यायानुगृहीतस्य वाक्यस्यार्थनिश्चा-

---

क्षात्कारवन्तं गुरुमभिगच्छेदेवेत्यन्वयः । **उपसन्नाय** । प्राप्ताय । **शमान्विताय** । बाह्येन्द्रियनियमयुक्ताय । एतेन श्रवणोपयुक्तमवधानं विवक्ष्यते, न तूपासनोपयुक्तमत्यन्तेन्द्रियजयादि । **येन** । विज्ञानेन । **अक्षरं** । स्वरूपेणाविकारम् । अनेन जडव्यावृत्तिः । **सत्यं** गुणद्वाराप्यविकारम् । अनेन जीवव्यावृत्तिः । **प्रोवाच** प्रब्रूयात् । **मृत्युः** प्रमादो मोहोवा । यथावस्थितात्मस्वरूपाज्ञानं प्रमादः । भ्रान्तिज्ञानं मोहः । **पश्यः** । ब्रह्मदर्शी । **स्वराट्** स्वतन्त्रः । कर्मवश्यो न भवतीत्यर्थः । **अयनाय** मोक्षाय । **पृथगिति** । पृथक्शब्देन तदुपासनरूपज्ञानं नात्मैक्यविषयमपि तु पृथक्त्वविषयमिति दर्शितम् । **तेन** परमात्मना । **जुष्टः** प्रीतिविषयीकृतः । **इत्यादीनि** । अस्य 'वेदान्तवाक्यानि' इति पूर्वेणान्वयः ।

एकशास्त्रत्वप्रयोजकीभूतं पूर्वमीमांसाप्रतिपादितसाध्यधर्मविचारस्य ब्रह्मविचारापेक्षया पूर्वत्वमसहमानः पृच्छति–**ननु चेति** । **ब्रह्मजिज्ञासायाम्** । मीमांसोत्तरभागप्रतिपादितायाम् । **धर्मविचारः** । मीमांसापूर्वभागप्रतिपादितः साध्यधर्मविचारः । परिहरति–**एवं तर्हीति** । उदाहृतवाक्यमात्रतृप्तोसि चेदित्यर्थः । **कृत्स्नस्येति** । ब्रह्मणोपीति भावः । पुनः पृच्छति-**सत्यमिति** । अर्धाङ्गीकारे एतदव्ययम् । **आपाततःप्रतीति**-रज्ञाननिवृत्तिमात्रेण संशयविपर्ययसहं ज्ञानम् । विपर्ययो मिथ्याज्ञानम् । **न्यायानुगृहीतस्येति** । अन्यथा 'तान्येवानुविनश्यति' (बृ. २।४।१२) 'असद्वा इदम-

यकत्वादापातप्रतीतोऽप्यर्थः संशयविपर्ययौ नातिवर्तते । अतस्तन्निर्णयाय वेदान्तवाक्यविचारः कर्तव्य--इति चेत्, तथैव धर्मविचारोऽपि कर्तव्य--इति पश्यतु भवान् ।

ननु च, ब्रह्मजिज्ञासा यदेव नियमेन अपेक्षते, तदेव पूर्ववृत्तं वक्तव्यम् । न धर्मविचारापेक्षा ब्रह्मजिज्ञासायाः । अधीतवेदान्तस्यानधिगतकर्मणोऽपि वेदान्तवाक्यार्थविचारोपपत्तेः । कर्माङ्गाश्रयाण्युद्गीथाद्युपासनान्यत्रैव चिन्त्यन्ते । तदनधिगतकर्मणो न शक्यं कर्तुमिति चेत् । अनभिज्ञोहि भवान् शारीरकशास्त्रविज्ञानस्य । अस्मिन् शास्त्रे अनाद्यविद्याकृतविविधभेददर्शननिमित्तजन्मजरामरणादिसांसारिकदुःखसागरनिमग्नस्य निखिलदुःखमूल-

---

ग्रआसीत् ' (तै. २।७।१) इत्यादिश्रुतिष्वात्माऽनित्यत्वादिप्रतीतिर्दुष्परिहरा स्यात् **नातिवर्तते ।** नातिक्रामति । परिहरति--**तथैवेति ।** अत्रापि न्यायानुग्रहाभावे ' अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति ' इत्यादिश्रुतिषु कर्मफलस्थिरत्वप्रतीतिर्दुष्परिहरेति भावः ।

एवं फलद्वारा ज्ञानाय कर्मज्ञानापेक्षा दर्शिता । अथ ' स्वरूपेणोपादानाय च नियमेन कर्मज्ञानापेक्षास्ति ' इति स्वमतं पूर्वोत्तरपक्षद्वारा दृढीकर्तुं ' मुमुक्षोःकर्मणो नियमेनानपेक्षा ' इति लघुपूर्वपक्षमुद्घाटयति--**ननु चेत्यादिना साधनचतुष्टयं पूर्ववृत्तमितिवक्तव्यमित्यन्तेन । अधीतेति ।** वेदान्तवाक्याध्ययनेन तत्रैवापातप्रतीतिर्बुभुत्सा च भवतीति भावः । एवं च ज्ञानाय कर्मज्ञानापेक्षा नास्तीति सिद्धम् । अथोपादानार्थमपि न कर्मापेक्षेत्युपपादयितुं वेदान्तमात्रबुभुत्सोरपि कर्मविचारापेक्षां शङ्कते--**कर्माङ्गाश्रयाणीति** । कर्माङ्गभूतोद्गीथादिविषयाणीत्यर्थः । एकस्य साम्नः पञ्चभागाः प्रस्तावोद्गीथप्रतिहारोपद्रवनिधनाख्याः । तत्र द्वितीय उद्गीथः प्रणवपूर्वं गीयते । तादृशोद्गीथावयवप्रणवोपासनम् ' ओमित्येतदक्षरमुद्गीथमुपासीत ' (छां. १।१।१) इति श्रुतौ विधीयते । अनधिगते कर्मणि उद्गीथादिविषयोपासनचिन्ताया अशक्यत्वात्कर्मविचारोपेक्षित इति भावः । **अत्रैव** । शारीरकमीमांसायामेव (अ. ३ पा.३ सू. ५३) । पूर्वपक्षीपरिहरति--**अनभिज्ञ इति** । अस्मिन्शास्त्रे प्रधानतया प्रतिपाद्यं ज्ञानमिति त्वया न ज्ञातमित्यर्थः । **विविधः** । अवान्तरभेदबहुलः । **भेदः** । ज्ञातृज्ञेयज्ञानरूपः । **मरणादीति** । आदिशब्देन नरकगर्भवासादिग्रहणम् । संसारः प्रकृति-

भूतमिथ्याज्ञाननिबर्हणाय आत्मैकत्वविज्ञानं प्रतिपिपादयिषितम्। **अस्य** हि भेदावलम्बिकर्मज्ञानं क्वोपयुज्यते, प्रत्युत विरुद्धमेव। उद्गीथादिविचारस्तु कर्मशेषभूत एव ज्ञानस्वरूपत्वाविशेषादिहैव क्रियते। स तु न साक्षात् सङ्गतः। अतो यत्प्रधानं शास्त्रं, तदपेक्षितमेव पूर्ववृत्तं किमपि वक्तव्यम्।

बाढं, तदपेक्षितञ्च कर्मविज्ञानमेव। कर्मसमुच्चितात् ज्ञानादपवर्गश्रुतेः। वक्ष्यति च, 'सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्' (ब्र. सू. ३।४।२६) इति। अपेक्षिते च कर्मण्यज्ञाते, केन समुच्चयः केन नेति विभागो न शक्यते ज्ञातुम्। अतस्तदेव पूर्ववृत्तम्।

नैतत् युक्तं, सकलविशेषप्रत्यनीकचिन्मात्रब्रह्मविज्ञानादेव अविद्यानिवृत्तेः। अविद्यानिवृत्तिरेव हि मोक्षः। वर्णाश्रमविशेषसाध्यसाधनेतिकर्त-

---

संबन्धः तत्प्रभवं सांसारिकम्। **मिथ्याज्ञानं** भेददर्शनरूपभ्रान्तिज्ञानम्। तस्य **निबर्हणं** नाशः। **आत्मैकत्वविज्ञानमिति**। सर्पभ्रमस्य हि रज्जुयाथात्म्यज्ञानं निवर्तकं न तु कर्मविशेषः। एवं भेददर्शनस्याविद्याकृतत्वादैक्यज्ञानमेव तन्निवर्तकमिति तत्रैव तात्पर्यं वेदान्तवाक्यानामित्यर्थः। **क्वोप युज्यते**। न कुत्रचित्। ज्ञानस्वरूपोत्पत्तौ तत्फलोत्पत्तौ ज्ञानोत्पत्तिसाधनानुग्रहे वा नोपयुज्यत इत्यर्थः। **ज्ञानस्वरूपत्वाविशेषादिति**। ज्ञानस्वरूपत्वसाम्याद्बुद्धिस्थतया कृतः, न तु प्रधानार्थोपयोगित्वादिति भावः। यत् प्रधानं यस्मिन्निति बहुव्रीहिः। **तदपेक्षितमेव**। तेन प्रधानार्थेनापेक्षितं साधनचतुष्टयमेव। नत्वन्यत्कर्मज्ञानादीत्यर्थः।

अत्र ज्ञानकर्मसमुच्चयवादिनः प्रत्यवतिष्ठन्ते—**बाढमिति**। समुच्चयेऽपिनोभयोः समप्राधान्यं किं तु ज्ञानमेव प्रधानं कर्म तु तदङ्गमिति केचित्। अन्ये तु समप्राधान्यमिच्छन्ति। **सर्वापेक्षेति**। विद्या अग्निहोत्रादिसर्वकर्मापेक्षैव। 'ब्राह्मणा विविदिषन्ति यज्ञेन दानेन' (बृ. ४।४।२२) इत्यादिश्रुतेः। यथा दुरुपगमनसाधनभूतोऽश्वः परिकरबन्धादिकर्मापेक्षस्तद्वदिति तत्सूत्रार्थः। **अपेक्षिते चेति**। नित्यनैमित्तिकयोः समुच्चयो न तु काम्यनिषिद्धयोरिति विभागः कर्माज्ञाने ज्ञातुं न शक्यत इत्यर्थः।

पूर्वपक्षी परिहरति—**नैतदिति**। **सकलविशेषाः**। सजातीयविजातीयस्वगतभेदरूपाः। तेषां प्रत्यनीकं सर्पाद्याकाराणां रज्जुत्वमिव तेषां निवर्तकम्। **चिन्मात्रं** ज्ञानरूपम्। मात्रशब्देन ज्ञातृत्वज्ञेयत्वव्यावृत्तिः। एवकारेण कर्मव्यावृत्तिः। **अविद्यानिवृत्तिरेव**। न ब्रह्मप्राप्तिः। तस्य सिद्धत्वात्। **वर्णेति**। वर्णविशेषा ब्राह्मणादयः। आश्रमविशेषा

व्यतायनन्तविकल्पास्पदं कर्म सकलभेददर्शननिवृत्तिरूपाज्ञाननिवृत्तेः कथमिव साधनं भवेत् । श्रुतयश्च कर्मणामनित्यफलत्वेन मोक्षविरोधित्वं, ज्ञानस्यैव मोक्षसाधनत्वञ्च दर्शयन्ति । ‘अन्तवदेवास्य तद्भवति’ (बृ.३।८।१०) ‘तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते’ ‘ब्रह्मविदाप्नोति परम्’ (तै. २।१।१) ‘ब्रह्मविद् ब्रह्मैव भवति’ ‘तमेव विदित्वातिमृत्युमेति’ (श्वे. ३।८) इत्याद्याः ।

यद्यपि चेदमुक्तं, यज्ञादिकर्मापेक्षा विद्येति । तद्वस्तुविरोधात्, श्रुत्यक्षरपर्यालोचनया च अन्तःकरणनैर्मल्यद्वारेण विविदिषोत्पत्तावुपयुज्यते, न फलोत्पत्तौ । विविदिषन्तीतिश्रवणात् । विविदिषायां जातायां ज्ञानोत्पत्तौ शमादीनामेव अन्तरङ्गोपायतां श्रुतिरेवाह । ‘शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्येत्’ (बृ. ४।४।२३) इति । तदेवं जन्मान्तरशतानुष्ठितानभिसंहितफलविशेषकर्ममृदितकषायस्य विविदिषोत्पत्तौ सत्यां ‘सदेव सोम्येदमग्र आसीत् । एकमेवाद्वितीयम्’ (छां. ६।२।१)

ब्रह्मचर्यादयः । साध्यं स्वर्गादि । साधनं यागादि । इतिकर्तव्यता प्रयाजाद्यङ्गजातम् । आदिशब्देन निषिद्धानि प्रायश्चित्तानि च कर्माणि संगृह्यन्ते । एतादृशा अनन्ता ये विकल्पा भेदास्तदास्पदमित्यर्थः ।

वस्तुविरोधादिति । कर्मणोनन्तभेदास्पदत्वेनानित्यफलदत्वेन च विद्यया सह विरोधादित्यर्थः । **श्रुत्यक्षरपर्यालोचना** । विविदिषन्तीतिक्रियापदस्थसन्प्रत्ययार्थनिरूपणम् । **न फलोत्पत्तौ** । न मोक्षोत्पत्तौ । श्रुतौ हि (बृ० ४।४।२२) यज्ञसाध्यत्वं विविदिषाया एवोक्तं न तु मोक्षस्येति भावः । **शमादीनामेवेति** । अनेन ज्ञानोत्पत्तावपि न कर्मापेक्षेति ध्वन्यते । शमादीनामिन्द्रियव्यापारोपरतिरूपत्वेन यज्ञादिकर्मणश्च तत्प्रवृत्तिरूपत्वेनान्योन्यविरोधित्वात् । **शान्त इति** । शमः मनोनिग्रहः, दमः बाह्येन्द्रियनिग्रहः, उपरतिः संन्यासः, तितिक्षा क्षमा, समाधानं चित्तैकाग्रता एतद्युक्तः आत्मनि जीवात्मनि तदभेदेन परमात्मानं पश्येदित्यर्थः । **जन्मान्तरेति** । जन्मान्तरशतानुष्ठितं फलविशेषाभिसन्धिरहितं यत्कर्म तेन मृदितकषायस्य नष्टपापस्य विविदिषा जायते । स्वर्गादिसाधनस्य कर्मणो विविदिषासाधनत्वानुपपत्तिपरिहारायानभिसंहितफलशब्दः । विविदिषारूपफलाभिसन्धिसत्वाद्विशेषेत्युक्तम् । **सदेवेति** । अनेन ‘का-

'सत्यं ज्ञानमनन्तं ब्रह्म' (तै. २।१।१) 'निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्' (श्वे. ६।१९) 'अयमात्मा ब्रह्म' (बृ. २।५।१९) 'तत्त्वमसि' (छां. ६।८।७) इत्यादिवाक्यजन्यज्ञानादेव अविद्या निवर्तते।

वाक्यार्थज्ञानोपयोगीनि च श्रवणमनननिदिध्यासनानि। श्रवणं नाम, वेदान्तवाक्यान्यात्मैकत्वविद्याप्रतिपादकानीति तत्त्वदर्शिन आचार्यात् न्याययुक्तार्थग्रहणम्। एवमाचार्योपदिष्टार्थस्य स्वात्मन्येवमेव युक्तमिति हेतुतः प्रतिष्ठापनं मननम्। एतद्विरोध्यनादिभेदवासनानिरसनाय अस्यार्थस्य अनवरतभावना निदिध्यासनम्। एवं श्रवणादिभिर्निरस्तसमस्तभेदवासनस्य वाक्यार्थज्ञानमविद्यां निवर्तयतीत्येवंरूपस्य श्रवणस्य अवश्यापेक्षितमेव पूर्ववृत्तं वक्तव्यम्। तच्च नित्यानित्यवस्तुविवेकः, शमदमादिसाधनसम्पत्, इहामुत्रफलोपभोगविरागः, मुमुक्षुत्वञ्चेत्येतत्साधनचतुष्टयम्। अनेन विना जिज्ञासानुपपत्तेरर्थस्वभावादेवेदमेव पूर्ववृत्तमिति ज्ञायते। एतदुक्तं भवति, ब्रह्मस्वरूपाच्छादिकाविद्यामूलमपारमार्थिकं भेददर्शनमेव बन्धमूलम्। बन्धश्च अपारमार्थिकः। स च समूलोऽपारमार्थिकत्वादेव ज्ञानेनैव निव-

---

रणं नास्त्येव' इत्यज्ञानं निवर्तते। **सत्यमिति**। अनेन 'शून्यस्य कारणत्वम्' इत्यज्ञानं निवर्तते। **निष्कलं** निरवयवम्। **निष्क्रियं** क्रियारहितम्। **शान्तम्**। अशनायापिपासाशोकमोहजरामृत्युरूपोर्मिषट्करहितम्। **निरवद्यम्** अनिन्द्यम्। **निरञ्जनं** कर्मतत्फलसम्बन्धरहितम्। अनेन सत्यज्ञानादिवाक्यफलितव्यावृत्तिर्विशदी क्रियते। **अयमात्मा ब्रह्म तत्त्वमसीति**। अनेन जीवब्रह्मभेदरूपाज्ञाननिवृत्तिः।

तर्हि किमर्थं श्रवणादिविधानमित्याशङ्क्याह—**वाक्यार्थेति**। वाक्यार्थज्ञानोत्पत्तिविरोधिनिरसनोपयोगीनीत्यर्थः। **प्रतिपादकानि**। निष्पादनक्षमाणि। **एतद्विरोधिनी**। आत्मैकत्वविद्याविरोधिनी। **इहामुत्रेति**। ऐहिकामुष्मिकफलभोगवैतृष्ण्यमित्यर्थः। **अर्थस्वभावादेव**। अर्थशब्देन साधनचतुष्टयज्ञानकर्मणां ग्रहणम्। एष हि तेषां स्वभावः। नित्यानित्यवस्तुविवेकादनित्यसांसारिकफलोपभोगविरागे नित्यपुरुषार्थेच्छायां च सत्यां श्रवणादौ प्रवृत्तिरवश्यं भवति। शमादीनां च मनोऽवधानहेतुत्वेन तदुपयोगित्वं निवृत्तिरूपत्वेन च प्रवृत्तिरूपकर्मविरोधित्वम्। ज्ञानस्य कर्मानिरपेक्षोपायत्वम्। कर्मणश्च भेदावलम्बित्वेन तद्विरुद्धत्वमितिबोध्यम्। **इदमेव**। साधनचतुष्टयमेव। **बन्धः**। संसारबन्धः। **ज्ञानेनैव**। न तु कर्मणा। एतेन समुच्चयवादो निरस्तः।

र्त्यते । निवर्तकश्च ज्ञानं तत्त्वमस्यादिवाक्यजन्यम् । तस्यैतस्य वाक्यजन्यज्ञानस्य स्वरूपे तदुत्पत्तौ कार्ये वा कर्मणो नोपयोगः । विविदिषायामेव तु कर्मणामुपयोगः । स च पापमूलरजस्तमोनिबर्हण द्वारेण सत्त्वशुध्द्या भवतीति--इममुपयोगमभिप्रेत्य 'ब्राह्मणा विविदिषन्ति' (बृ. ४।४।२२) इत्युक्तमिति । अतः कर्मणो ज्ञानस्यानुपयोगादुक्तमेव साधनचतुष्टयं पूर्ववृत्तमिति वक्तव्यम् ।

अत्रोच्यते । यदुक्तम् , अविद्यानिवृत्तिरेव मोक्षः, सा च ब्रह्मविज्ञानादेव भवतीति । तदभ्युपगम्यते । अविद्यानिवृत्तये वेदान्तवाक्यैर्विधित्सितं ज्ञानं किंरूपमिति विवेचनीयम् । किं वाक्याद्वाक्यार्थज्ञानमात्रम् , उत तन्मूलमुपासनात्मकं ज्ञानमिति । न तावद्वाक्यजन्यं ज्ञानं, तस्य विधानमन्तरेणापि वाक्यादेव सिद्धेः, तावन्मात्रेणाविद्यानिवृत्त्यनुपलब्धेश्च । न च वाच्यं, भेदवासनायामनिरस्तायां वाक्यमविद्यानिवर्तकं ज्ञानं न जनयति । ज्ञाने जातेऽपि सर्वस्य सहसैव भेदज्ञानानिवृत्तिर्न दोषाय । चन्द्रैकत्वे ज्ञातेऽपि द्विचन्द्रज्ञानानिवृत्तिवत् , अनिवृत्तमपि छिन्नमूलत्वेन न बन्धाय भवतीति ।

ज्ञानं प्रत्यपि कर्मणो न साधनत्वमित्याह--**निवर्तकमिति** । **तस्य** । कर्मानिरपेक्षस्य । अतएवेदृशज्ञानस्वरूपे कर्मणो नोपयोगः । समुच्चयवादे तु कर्मसहितज्ञानस्य मोक्षहेतुत्वेन तादृशज्ञानस्वरूपस्य कर्मघटितत्वात्स्यादुपयोगः । **एतस्य** । अद्वैतविषयस्य । **तदुत्पत्तौ** । तादृशज्ञानोत्पत्तौ । **कार्ये** । मोक्षे । **अनुपयोगात्** । हानार्थमुपादानार्थं च कर्मज्ञानस्यानपेक्षितत्वात् ।

लघुसिद्धान्तमारभते--**अत्रोच्यत इति** । **वेदान्तवाक्यैः** । 'प्रज्ञां कुर्वीत' इत्यादि विधिवाक्यैः । **वाक्यात्** । 'तत्त्वमसि' (छां. ६।८।७) इत्यादिवाक्यात् । **विधानमन्तरेणापीति** । प्रमाणज्ञानं वस्तुतन्त्रं न पुरुषतन्त्रमिति न तद्विधेयमिति भावः । **न चेति** । वाक्यादविद्यानिवर्तकज्ञानोत्पत्तौ भेदवासना प्रतिबन्धिकेत्याशयः । **वाक्यं** कर्तृ । 'सनकादीनां ज्ञानित्वेन प्रसिद्धत्वाद्भेदवासनायाः प्रतिबन्धकत्वं नास्ति' इति चेत्तत्राह--**जातेपीति** । उत्पन्नेपि ज्ञाने इत्यर्थः । **सर्वस्येति** । ज्ञानोत्पत्तावपि भेदज्ञाननिवृत्तिः केषांचिदेव भवति न तु सर्वस्येत्यर्थः । 'ज्ञानोत्पत्तौ सत्यां भेदज्ञानं न निवर्तते' इत्यत्र दृष्टान्तमाह--**चन्द्रैकत्व इति** । अनिवृत्तं चेद्भेदज्ञानं बन्धकं स्यादित्यत आह--**अनिवृत्तमपीति** । **छिन्नमूलत्वेन** । छिन्नमविद्याख्यमूलं यस्य

सत्यां सामग्र्यां ज्ञानानुत्पत्त्यनुपपत्तेः । सत्यामपि विपरीतवासनायामाप्तोपदेशलिङ्गादिभिर्बाधकज्ञानोत्पत्तिदर्शनात् । सत्यपि वाक्यार्थज्ञाने अनादिवासनया भेदज्ञानमनुवर्तत—इति भवता न शक्यते वक्तुम् । भेदज्ञानसामग्र्या अपि वासनाया मिथ्यारूपत्वेन ज्ञानोत्पत्त्यैव निवृत्तत्वात् । ज्ञानोत्पत्तावपि मिथ्यारूपायास्तस्या अनिवृत्तौ निवर्तकान्तराभावात् कदाचिदपि नास्या वासनाया निवृत्तिः । वासनाकार्यं भेदज्ञानं छिन्नमूलम्, अथ च अनुवर्तत—इति बालिशभाषितम् । द्विचन्द्रज्ञानादौ तु बाधकसन्निधावपि मिथ्याज्ञानहेतोः परमार्थतिमिरादिदोषस्य ज्ञानबाध्यत्वाभावेन अविनष्टत्वात् मिथ्याज्ञानानुवृत्तिरविरुद्धा । प्रबलप्रमाणबाधितत्वेन भयादिकार्यंतु निवर्तते । अपि च, भेदवासनानिरसनद्वारेण ज्ञानोत्पत्तिमभ्युपगच्छतां कदाचिदपि ज्ञानोत्पत्तिर्न सेत्स्यति । भेदवासनाया अनादिकालोपचितत्वेन अपरिमितत्वात्, तद्विरोधिभावनायाश्च अल्पत्वादनया तन्निरसनानुपपत्तेः । अतो वाक्यार्थज्ञानादन्यदेव ध्यानोपासनादिशब्दवाच्यं ज्ञानं वेदान्तवाक्यै-

---

भेदज्ञानस्य तत्त्वेनेत्यर्थः । यथा कुलालभ्रमितं चक्रं भ्रमयितृव्यापारोपरमेऽपि पूर्ववेगवशात्किंचित्कालं स्वयमेव भ्रमेत् क्रमेण चोपरमेत तद्वत् । इतिशब्दः शङ्कासमाप्तिद्योतकः । प्रथमं ज्ञानानुत्पत्तिं दूषयति—**सत्यामिति** । भेदवासना प्रतिबन्धिकेति चेत्तत्राह—**सत्यामपीति** । निवर्त्याया भेदवासनायाः निवर्तकज्ञानोत्पत्तिप्रतिबन्धकत्वं न सम्भवतीत्यर्थः। आप्तोपदेशः शाब्दज्ञानहेतुः । लिङ्गं चानुमानहेतुः । आदिना प्रत्यक्षप्रमाणसंग्रहः । जातेपीत्याद्युक्तं निरस्यति । **सत्यपीति** । **भवता** । ब्रह्मव्यतिरिक्तकृत्स्नमिथ्यात्ववादिना । **भेदेति** । वासनाया अपि मिथ्यात्वाविशेषात्तस्या अपि ज्ञानेन निवर्त्यत्वमवश्याश्रवणीयमिति भावः। **वासनेति** । 'वासनायाःकार्यं भेदज्ञानं छिन्नाविद्याख्यमूलमनुवर्तते' इति मूर्खोक्तिः । 'छिन्नमूलम्' 'अनुवर्तते' इत्युक्तेर्व्याहतत्वात् । अकारणकार्योत्पत्तिस्वीकारे तु मुक्तिरपि ज्ञाननिरपेक्षा स्यात् । श्रवणादिभिर्विना वाक्यार्थज्ञानं स्यात् । अविद्यया विना जगद्भ्रमश्च स्यात् । अधिष्ठानेन विनाऽविद्यापि कार्यकरी स्यादितिभावः । **बाधकः** । एकश्चन्द्र इत्याप्तोपदेशः । **तिमिरो** नेत्ररोगः । **प्रबलेति** । ऐन्द्रजालिकभ्रमादिषु वस्तुतो भ्रमत्वेपि भ्रमहेतोः प्राबल्याद्सत्यविषयत्वनिश्चयप्रतिबन्धः स्यादिति तद्व्यावृत्त्यर्थं प्रबलप्रमाणशब्दः । **भयादीति** । रज्जुसर्पभ्रान्तिमत्पुरुषापेक्षया भयादिकार्यनिवृत्तिः फलत्वे-

विधित्सितम् । तथा च श्रुतयः, ‘ विज्ञाय प्रज्ञां कुर्वीत ’ (बृ. ४।४।२१) ‘ अनुविद्य विजानाति ’ (छां. ८।७।१) ‘ ओमित्येवात्मानं ध्यायत ’ (मुं. २।२।६) ‘ निचाय्य तन्मृत्युमुखात्प्रमुच्यते ’ (का. ३।१५) ‘ आत्मानमेव लोकमुपासीत ’ (बृ. १।४।१५) ‘ आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः ’ (बृ. २।४।५) ‘ सोऽन्वेष्टव्यः । स विजिज्ञासितव्यः ’ (छां. ८।७।१) इत्येवमाद्याः । अत्र निदिध्यासितव्य–इत्यादिनैकार्थ्यात् अनुविद्य विजानाति, विज्ञाय प्रज्ञां कुर्वीत–इत्येवमादिभिर्वाक्यार्थज्ञानं ध्यानोपकारकत्वात् अनुविद्य विज्ञायेत्यनूद्य, प्रज्ञां कुर्वीत विजानातीति ध्यानं विधीयते ।श्रोतव्य–इति चानुवादः। स्वाध्यायस्यार्थपरत्वेन अधीतवेदः पुरुषः प्रयोजनवदर्थावबोधित्वदर्शनात् तन्निर्णयाय स्वयमेव श्रवणे प्रवर्तेत –इति श्रवणस्य प्राप्तत्वात् । श्रवणप्रतिष्ठार्थत्वान्मननस्य, मन्तव्य–इति चानुवादः । तस्माद्ध्यानमेव विधीयते । वक्ष्यति च, ‘ आवृत्तिरसकृदुपदेशात् ’ (ब्र. सू. ४।१।१) इति ।

नोक्ता । आदिना पलायनम् । **विज्ञायेति** । आत्मानं विज्ञाय ज्ञात्वा प्रज्ञां ध्यानं कुर्वीतेत्यर्थः। **अनुविद्य** । ज्ञात्वा । **विजानाति** । विजानीयात् ध्येयादिति यावत् । **निचाय्येति** । अनेन ज्ञानस्य प्रत्यक्षसमानाकारता दर्शिता । चायृ दर्शने इति हि धातुः । एतेन केवलवाक्यार्थज्ञानस्य मोक्षसाधनत्वं नास्ति किं तु साक्षात्कारप्रयोजकीभूतध्यानस्येति सूचितम् । **निदिध्यासितव्य इति** । सन्प्रत्ययार्थेच्छाया अविधेयत्वात्तत्कर्मीभूतध्यानस्यैव विधेयत्वं बोध्यम् । एवं विजिज्ञासितव्य इत्यत्रापि । ननु प्रज्ञाविजानातिशब्दयोर्ज्ञानसामान्यवाचित्वात्कथं तद्विशेषस्य ध्यानस्य विधानमत आह–**अत्रेति । ऐकार्थ्यम्** । एकार्थप्रतिपादकत्वम् । ननु श्रोतव्य इत्यनेन मन्तव्य इत्यनेन चैकार्थ्यात्प्रज्ञाविजानातिशब्दयोः श्रवणपरत्वं मननपरत्वं वाऽस्त्वित्याशङ्क्याद्ये आह–**श्रोतव्य इति । अर्थपरत्वेन** । अर्थप्रतिपादकत्वेन । **प्रयोजनेति** । स्वाध्यायस्य स्वभावत एव प्रयोजनवदर्थावबोधित्वदर्शनादित्यर्थः । अन्त्ये आह–**श्रवणप्रतिष्ठार्थत्वादिति** । आचार्योपदिष्टस्यार्थस्य स्वात्मन्येवमेव युक्तमिति हेतुतः प्रतिष्ठापनमेवमननमिति भावः । **आवृत्तिरिति**। वेदान्तेषु मोक्षसाधनतया विहितं वेदनमसकृदावृत्तिरूपम् । उपासनारूपमिति यावत् । श्रुतौ विद्युपास्त्योरेकार्थत्वेनोपदेशादिति सूत्रार्थः ।

तदिदमपवर्गोपायतया विधित्सितं वेदनमुपासनमित्यवगम्यते । विद्युपास्त्योरव्यतिरेकेण उपक्रमोपसंहारदर्शनात् । 'मनो ब्रह्मेत्युपासीत' (छां. ३।१८।१) इत्यत्र 'भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य एवं वेद' (छां. ३।१८।३)। 'न स वेद। अकृत्स्नो ह्येषः....आत्मेत्येवोपासीत' (बृ. १।४।७)। 'यस्तद्वेद, यत् स वेद, स मयैतदुक्तः' (छां. ४।१।४)–इत्यत्र 'अनु म एतां भगवो देवतां शाधि यां देवतामुपास्से' (छां.४।२।२) इति। ध्यानञ्च तैलधारावदविच्छिन्नस्मृतिसन्तानरूपम्। 'ध्रुवा स्मृतिः । स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्ष' इति ध्रुवायाः स्मृतेरपवर्गोपायत्वश्रवणात्। सा च स्मृतिर्दर्शनसमानाकारा,–

'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे' (मुं. २।२।८)

तमेवाह–**तदिदमिति । अव्यतिरेकेण** । अभेदेन । **मनोब्रह्मेति** । अत्रोपासीतेत्युपास्तिनोपक्रम्य य एवं वेदेति विदिनोपसंहृतम् । वितरणजन्या कीर्तिः विक्रमजन्यं यश इति कीर्तियशसोर्भेदः। **ब्रह्मवर्चसं** ब्रह्मतेजः। **न स इति**। योऽन्यां देवतामुपास्ते सः न वेद हि यतः एषः अकृत्स्नः अकृत्स्नवित्। किंत्वात्मेत्येवोपासीतेत्यर्थः। अत्रोपक्रमोपसंहारयोरुपासनशब्दः मध्ये वेदनशब्दः। **यस्तदिति**। अत्र वेदेति विदिनोपक्रम्योपास्स इत्युपास्तिनोपसंहारः कृतः। तत् ब्रह्म यः रैक्वः वेद, सः रैक्वः यत् ब्रह्म वेद, एतदुभयं सः रैक्वः एतद् ब्रह्म चेत्येवंलक्षणं तव मयोक्तमित्यर्थः। **अनुम इति**। हे भगवः हे भगवन् त्वं यां देवतामुपास्से एतां देवतां मे अनुशाधि विविच्य ज्ञापयेत्यर्थः। **अविच्छिन्नेति**। अविच्छिन्नत्वं विजातीयप्रत्ययान्तराव्यवहितत्वम्। ध्रुवस्मृतेरविच्छिन्नस्मृतिसन्तानमेव स्वरूपम्। सा ध्रुवा स्मृतिरेव ध्यानमित्यर्थः। **समानाकारेति**। वक्ष्यमाणरीत्या अपरोक्षत्वेनेति भावः। **भिद्यते इति**। हृदयस्य मनसो रागादिग्रन्थिः। यद्वा हृदयस्य तत्स्थजीवस्य ग्रन्थिः प्रकृतिसंबन्धः। हृदयं शरीरं तद्रूपो ग्रन्थिरिति वा । संशयशब्देन देहात्माभिमानादिर्विपर्ययोऽप्युपलक्षणीयः। **कर्माणि**। पुण्यपापरूपाणि। परंचावरं च तस्मिन्ब्रह्माणि इत्यर्थः। अस्मिन्वचने ग्रन्थिभेदहेतुत्वेन ब्रह्मदर्शनमुक्तम्। पूर्वत्र तु स्मृतिरुक्तेत्यनयोरेकवाक्यत्वं न स्यात्।

इत्यनेनैकार्थ्यात् । एवञ्च सति आत्मा वारे द्रष्टव्य—इत्यनेन निदिध्यासनस्य दर्शनरूपता विधीयते । भवति च स्मृतेर्भावनाप्रकर्षात् दर्शनरूपता । वाक्यकारेणैतत्सर्वं प्रपञ्चितम् । वेदनमुपासनं स्यात् तद्विषये श्रवणादिति । सर्वासूपनिषत्सु मोक्षसाधनतया विहितं वेदनमुपासनमित्युक्तम् । सकृत्प्रत्ययं कुर्याच्छब्दार्थस्य कृतत्वात् प्रयाजादिवदिति पूर्वपक्षं कृत्वा, सिध्दन्तूपासनशब्दादिति वेदनमसकृदावृत्तं मोक्षसाधनमिति निर्णीतम् । 'उपासनं स्यात् ध्रुवानुस्मृतिर्दर्शनान्निर्वचनाच्च' इति तस्यैव वेदनस्योपासनरूपस्यासकृदावृत्तस्य ध्रुवानुस्मृतित्वमुपवर्णितम् ।

सेयं स्मृतिर्दर्शनरूपा प्रतिपादिता । दर्शनरूपता च प्रत्यक्षतापत्तिः । एवं प्रत्यक्षतापन्नामपवर्गसाधनभूतां स्मृतिं विशिनष्टि । 'नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन । यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनुं स्वाम्' (का. २।२३) इति । अनेन केवलश्रवणमनननिदिध्यासनानामात्मप्राप्त्यनुपायमुक्त्वा, यमेवैष आत्मा वृणुते तेन लभ्य—

अतः स्मृतिर्दर्शनसमानाकारेत्यङ्गीकर्तव्यमिति भावः । **एवं च सति** । उपायदशापन्नज्ञानस्य दर्शनरूपत्वे सिद्धे सति । **इत्यनेन** । इत्यादिनोपायप्रदर्शनपरेण वाक्येन । स्मृतेरपरोक्षत्वं कथमिति चेत्तत्राह—**भवति चेति । भावना** वासना । दर्शनरूपत्वं च विशदतराभासरूपत्वम् । **वाक्यकारेण** । सूत्रकाराभिप्रायज्ञेन । **प्रपञ्चितम् ।** वाक्यचतुष्टयेन पूर्वपक्षसिद्धान्तरूपेणोक्तमित्यर्थः । **वेदनमिति** । इदं सिद्धान्तवाक्यम् । पूर्वपक्षमाह—**सकृदिति** । यथा प्रयाजादयः सकृदनुष्ठिता दर्शपूर्णमासफलोपकारिणस्तथा सकृत्प्रत्यय एव मोक्षोपकारीति तमेव कुर्यात् न तदावृत्तिरूपं ध्यानम्, तावता शब्दार्थस्य शास्त्रार्थस्य कृतत्वात् शास्त्रस्य कृतार्थत्वादित्यर्थः । **सिद्धन्त्विति** । सिद्धान्तास्त्वित्यर्थः । उपासनशब्दार्थं चतुर्थवाक्येनाह-**उपासनमिति । दर्शनात् ।** लोके तथा दर्शनात् । **निर्वचनम् ।** निष्कृष्टं प्रमाणभूतं वचनं निर्वचनं श्रुतिवाक्यम् । अथवोपासनशब्दस्य निरुक्तिः । उपपूर्वस्यासधातोर्हि विजातीयप्रत्ययान्तराव्यवहितं चिन्तनमर्थः ।

विशिनष्टीति । साक्षात्काररूपत्वेनेत्यर्थः । अग्रिमश्रुतौ 'विवृणुते तनुं स्वाम्' इत्युक्तेः । **प्रवचनेन ।** मननेन । **मेधया ।** निदिध्यासनेन । **यमेवेति ।** एष आत्मा यमेव भक्तं वृणुते स्वीकरोति स्वात्मप्राप्त्यर्थं प्रयतते बुद्धियोगं ददातीति यावत् । तेनैव भक्तेनायमात्मा लभ्यः । एष आत्मा स्वां तनुं तस्य भक्तस्य विवृणुत इत्यर्थः । **केवलेति ।**

इत्युक्तम्। प्रियतम एव हि वरणीयो भवति। यस्यायं निरतिशयप्रियः स एवास्य प्रियतमो भवति। यथाऽयं प्रियतम आत्मानं प्राप्नोति, तथा स्वयमेव भगवान् प्रयतत—इति भगवतैव उक्तम्—

'तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम्।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते' (गी. १०।१०) इति।
'प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः' (गी. ७।१७) इति च।

अतः साक्षात्काररूपा स्मृतिः स्मर्यमाणात्यर्थप्रियत्वेन स्वयमत्यर्थप्रिया यस्य, स एव परेणात्मना वरणीयो भवतीति तेनैव लभ्यते पर आत्मेत्युक्तं भवति। एवंरूपा ध्रुवानुस्मृतिरेव भक्तिशब्देनाभिधीयते, उपासनपर्यायत्वाद्भक्तिशब्दस्य। अत एव श्रुतिस्मृतिभिरेवमभिधीयते—'तमेव विदित्वा अतिमृत्युमेति' (श्वे. ३।८) 'तमेवं विद्वानमृत इह भवति। नान्यः पन्था अयनाय विद्यते' (नृ. पू. उ. ६)

'नाहं वेदैर्न तपसा न दानेन न चेज्यया।
भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन' (गी. ११।५३)
'ज्ञातुं द्रष्टुञ्च तत्त्वेन प्रवेष्टुञ्च परन्तप।
पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया (गी. ११।५४) इति।

केवलत्वं च परमात्मकृतवरणरहितत्वम्। **यस्य**। भक्तस्य। **अयम्**। परमात्मा। **सः** भक्तः। **अस्य**। परमात्मनः। **यथायमिति**। अयम्। भगवति निरतिशयप्रीतिमान्। **प्रियतमः**। निरतिशयभगवत्प्रीतिविषयः। **सततयुक्तानाम्**। सततयोगं काङ्क्षन्ताम्। 'आशंसायां भूतवच्च' (पा० सू० ३।३।१३२) इति कर्तरिक्तः। प्रीतिपूर्वकामिति मध्यमणिन्यायेनोभयान्वयि। **स्मर्यमाणेति**। स्मृतिविषयस्य परमात्मनो निरतिशयप्रियत्वेन स्मृतेरपि निरतिशयप्रियत्वम्। अर्थेनैव विशेषो हि निराकारतया धियामित्युक्तेः। स्वतो निराकारायां बुद्धौ विषयसम्बन्धेनैव विशेष इति तदर्थः। **यस्य**। भक्तस्य। **अतएव**। मोक्षसाधनज्ञानस्य भक्तिरूपत्वादेव। **तमेव**। परमात्मानमेव। विदित्वा मृत्युमत्येतीत्यर्थः। **अयनाय**। मोक्षाय। **इज्यया**। यज्ञेन। अस्त्वेवं वे-

---

१ ख. मप्यत्यर्थं.

एवंरूपाया ध्रुवानुस्मृतेः साधनानि यज्ञादीनि कर्माणीति ' यज्ञादिश्रुतेरश्ववत् ' (ब्र. सू. ३।४।२६) इत्यभिधास्यते । यद्यपि विविदिषन्तीति यज्ञादयो विविदिषोत्पत्तौ विनियुज्यन्ते । तथापि तस्यैव वेदनस्य ध्यानरूपस्याहरहरनुष्ठीयमानस्याभ्यासाधेयातिशयस्य आप्रायणादनुवर्तमानस्य ब्रह्मप्राप्तिसाधनत्वात् तदुत्पत्तये सर्वाण्याश्रमकर्माणि यावज्जीवमनुष्ठेयानि । वक्ष्यति च, ' आप्रायणात् तत्रापि हि दृष्टम् ' (ब्र. सू. ४।१।१२) ' अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात् (ब्र. सू. ४।१।१६) ' सहकारित्वेन च ' (ब्र. सू. ३।४।३३) इत्यादिषु ।

वाक्यकारश्च ध्रुवानुस्मृतेर्विवेकादिभ्य एव निष्पत्तिमाह—तल्लब्धिर्विवेकविमोकाभ्यासक्रियाकल्याणानवसादानुद्धर्षेभ्यः सम्भवान्निर्वचनाच्चेति । विवेकादीनां स्वरूपञ्चाह—जात्याश्रयनिमित्तादुष्टादन्नात्कायशुद्धिर्विवेक—इति । अत्र निर्वचनम् , आहारशुद्धौ सत्त्वशुद्धिः, सत्त्वशुद्धौ ध्रुवा स्मृतिरि-

---

दनस्य भक्तिरूपोपासनत्वं, तस्य कर्मापेक्षा कथमत आह । **एवंरूपाया इति** । मोक्षोपायभूतज्ञानावस्थाविशेषाः कर्मसाध्या इति भावः । ' यज्ञेन विविदिषन्ति ' (बृ. ४।४।२२) इत्यत्र यज्ञस्य पूर्वोक्तवेदनसाधनत्वमेव, नत्विच्छासाधनत्वम् । असिना जिघांसतीतिवत् । इच्छासाधनत्वेऽप्याह—**यद्यपीति** । **अभ्यासेति** । अभ्यासेनाधेयः फलोत्पादनक्षमत्वरूपो विशेषो यस्मिन्नित्यर्थः । **आप्रायणात्** । मरणपर्यन्तम् । अस्मिन्नर्थे सूत्रकारसंमतिमाह—**आप्रायणादिति** । मोक्षसाधनमुपासनमाप्रायणादामरणादनुवर्तनीयम् । हि यतः उपासनोद्योगमारभ्य मरणपर्यंतं यः कालस्तत्र सर्वत्रापि उपासनं ' सखल्वेवं वर्तयन्यावदायुषम् ' (छां. ८।१५।१) इति श्रुतौ दृष्टमिति सूत्रार्थः । **अग्निहोत्रादीति** । अग्निहोत्रादि कर्म तु तेषां विद्याख्यकार्यायैव, ' विविदिषन्ति यज्ञेन ' (बृ. ४।४।२२) इति श्रुतौ तस्य विद्यासाधनत्वदर्शनादिति तदर्थः । **सहकारित्वेनेति** । विद्योत्पत्तिद्वारेण विद्यासहकारितयाप्यनुष्ठेयानि कर्माणीति तदर्थः ।

विवेकादिभ्यः । विवेकादिसप्तसाधनेभ्यः । न तु केवलकर्मणा शमादिना चेत्यर्थः । वाक्यकारग्रन्थमाह—**तल्लब्धिरिति** । ध्रुवानुस्मृतिलब्धिरित्यर्थः । अत्र विवेकादिषु कारणत्वं व्यासज्यवृत्ति, न तु प्रत्येकपर्याप्तमिति बोध्यम् । **निर्वचनम्** । अप्रमाणेभ्यो निष्कृष्टं प्रमाणभूतं वचनं निर्वचनम् । **जातीति** । जातिदुष्टं कलञ्जगृञ्जनादि ।

ति । विमोकः कामानभिष्वङ्ग—इति । ‘शान्त उपासीत’ (छां. ३।१४।१) इति निर्वचनम् । आरम्बणसंशीलनं पुनः पुनरभ्यास—इति । निर्वचनञ्च स्मार्तमुदाहृतं भाष्यकारेण, ‘सदा तद्भावभावितः’ (गी. ८।६) इति । पञ्चमहायज्ञाद्यनुष्टानं शक्तितः क्रियेति । निर्वचनं, क्रियावानेष ब्रह्मविदां वरिष्ठः । ‘तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति, यज्ञेन दानेन तपसानाशकेन’ (बृ. ४।४।२२) इति च । सत्यार्जवदयादानाहिंसानभिध्याः कल्याणानीति । निर्वचनं, ‘सत्येन लभ्यस्तेषामेवैष विरजोब्रह्मलोक’ (प्र. १।१६) इत्यादि । देशकालवैषम्यात् शोकवस्त्वाद्यनुस्मृतेश्च तज्जन्यं दैन्यमभास्वरत्वं मनसोऽवसाद—इति तद्विपर्ययोऽनवसादः । निर्वचनं, ‘नायमात्मा बलहीनेन लभ्यः’ (मुं. ३।२।४) इति । तद्विपर्ययजा तुष्टिरुद्धर्षः, तद्विपर्ययोऽनुद्धर्ष—इति । अतिसन्तोषश्च विरोधीत्यर्थः । निर्वचनमपि, ‘शान्तो दान्त’ (बृ. ४।४।२३) इति ।

एवं नियमयुक्तस्याश्रमविहितकर्मानुष्ठानेनैव विद्यानिष्पत्तिरित्युक्तं भवति । तथा च श्रुत्यन्तरं, ‘विद्याञ्चाविद्याञ्च यस्तद्वेदोभयं, स ह अवि-

---

आश्रयदुष्टं पतितादिस्वामिकम् । निमित्तदुष्टमुच्छिष्टादि । एतत्त्रिविधदोषरहितादन्नात्कायशुद्धिर्विवेक इत्यर्थः । **आरम्बणेति** । आरम्बणमालम्बनं शुभाश्रयस्तस्य पुनः पुनः संशीलनं परिशोधनमित्यर्थः । **भाष्यकारेण** । द्रमिडाचार्येण । **अनाशकेन** । कामानशनयुक्तेन । रागद्वेषप्रयुक्तं यद्विषयसेवनं तदभावः कामानशनम् । यदृच्छालाभसंतुष्टत्वमितियावत् । **सत्येति** । सत्यं भूतहितम् । आर्जवं वाक्कायानामैकरूप्यम् । दया स्वार्थनिरपेक्षपरदुःखासहिष्णुत्वम् । दानं लोभराहित्यम् । अहिंसा कायेन वाचा मनसा च परपीडानिवृत्तिः । अभिध्या परकीये स्वबुद्धिः । यद्वा निष्फलचिन्ता । अथवा परकृतापराधचिन्ता । तद्राहित्यमनभिध्या । **शोकवस्तु** । शोकनिमित्तवस्तु । आदिशब्देन भयसंग्रहः । अतीतविषयः शोकः । आगामिविषयं भयमिति विवेकः । अभास्वरत्वमिति दैन्यशब्दविवरणम् । तच्चाभीष्टकार्यप्रवृत्त्यक्षमत्वरूपम् । **बलहीनेन** । मनोबलहीनेन । **तद्विपर्ययजेति** । देशकालसाद्गुण्यप्रियवस्त्वाद्यनुस्मृतिजन्येत्यर्थः । **तुष्टिः** । सन्तोषः । **अतिसन्तोष इति** । शोकस्येवास्यापि मनःशैथिल्यहेतुत्वादिति भावः ।

एवं नियमयुक्तस्य । विवेकादिसाधनसप्तकयुक्तस्य । **विद्यां चेति** । शंकराचा-

द्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते' (ई. ११) इति । अत अविद्याशब्दाभिहितं वर्णाश्रमविहितं कर्म । अविद्यया कर्मणा मृत्युं ज्ञानोत्पत्तिविरोधि प्राचीनं कर्म तीर्त्वा अपोह्य, विद्यया ज्ञानेनामृतं ब्रह्म अश्नुते प्राप्नोतीत्यर्थः । मृत्युतरणोपायतया प्रतीताऽविद्या विद्येतरत् विहितं कर्मैव । यथोक्तम् ,

'इयाज सोऽपि सुबहून् यज्ञान् ज्ञानव्यपाश्रयः ।

ब्रह्मविद्यामधिष्ठाय तर्तुं मृत्युमविद्यया ' (वि. पु. ६।६।१२) इति ।

ज्ञानविरोधि च कर्म पुण्यपापरूपम् । ब्रह्मज्ञानोत्पत्तिविरोधित्वेनानिष्टफलतया उभयोरपि पापशब्दाभिधेयत्वम् । अस्य च ज्ञानविरोधित्वं ज्ञानोत्पत्तिहेतुभूतशुद्धसत्त्वविरोधिरजस्तमोविवृद्धिद्वारेण । पापस्य च ज्ञानोदयविरोधित्वम् 'एष एवासाधु कर्म कारयति, तं यमधो निनीषति'

यास्तु अविद्याया ज्ञातव्यत्वं च हेयत्वेन । 'अविद्ययाऽज्ञानेन मृत्युं संसारं तीर्त्वा प्राप्य स्थितो विद्ययाऽमृतमश्नुते ' इति व्याचख्युः । तन्निरासार्थमाह–**अत्रेति** । विद्यां चाविद्यां चेत्यस्य विद्यानुबन्धि शमदमादि कर्मानुबन्धि फलाभिसन्धिकर्तृत्वाभिमानराहित्यादिकं चेत्यर्थः। अथवा चशब्दावुक्तार्थविरोधिसमुच्चयपरौ। तथा च विद्या ब्रह्मज्ञानं तद्विरोधि विषयरागद्वेषादिकम् । अविद्या विद्याङ्गं कर्म तद्विरोधि संसारहेतुभूतं फलाभिसन्धिसहितं कर्म । एतदुभयस्य ज्ञातव्यत्वं च हानार्थमित्यर्थः। **प्राचीनं कर्म।** पुण्यपापरूपम् । **अपोह्येति** । तरतेरुत्तरणवाचित्वं स्वरससिद्धम् । प्राप्तिवाचित्वे तु स्वरसभङ्ग इति भावः । **विद्येतरदिति** । अविद्याशब्दस्य विद्येतरत्वं प्रवृत्तिनिमित्तम् । तच्च विहितकर्मण्यस्तीति भावः । 'अविद्यया मृत्युं तीर्त्वा ' इति पदानां स्वोक्तेर्थे संमतिमाह–**इयाजेति** । सः ब्रह्मवेत्ता केशिध्वजो नृपः । **ज्ञानव्यपाश्रयः** । आगमोत्थज्ञानवान् । **ब्रह्मविद्यामधिष्ठाय** । उपासनात्मकं ज्ञानं साध्यत्वेन अवलम्ब्य । अत्र तर्तुमिति तृधातोः प्राप्त्यर्थो नैव संभवति । न हि 'ब्रह्मवेत्ता संसारप्राप्त्यर्थं कर्म करोति ' इति युक्तम् । **अनिष्टफलतयेति** । इदमेव पापशब्दप्रवृत्तिनिमित्तम् । अलौकिकत्वे सत्यनिष्टफलासाधारणकारणत्वं पापत्वम् । अतएव शास्त्रादावीश्वरे च नातिव्याप्तिः। देवेन्द्रत्वस्यापि वासुदेवभक्त्यन्तरायत्वेन निरयतुल्यतया तज्जनकपुण्यस्यापि मुमुक्षुं प्रत्यनिष्टफलदत्वमेवेति बोध्यम् । **अस्य च** । पापस्य च । **असाधु कर्म** । फलाभिसन्धिकर्तृत्वाभिमानसहितं यज्ञादिकं ब्रह्महत्यादिकं च । **अधो निनीषतीति** । अधोनयनं स्वर्गप्रापणं नरकप्रापणं च । यत्समस्तलोकेभ्य उन्नयनमपवर्गप्रापणरूपं तदपे-

(कौ. ३।८) इति श्रुत्यावगम्यते। रजस्तमसोर्यथार्थज्ञानावरणत्वं सत्त्वस्य च यथार्थज्ञानहेतुत्वं भगवतैव प्रतिपादितम्। 'सत्त्वात् सञ्जायते ज्ञानम्' (गी. १४।१७) इत्यादिना। अतश्च ज्ञानोत्पत्तये पापं कर्म्म निरसनीयम्। तन्निरसनञ्चानाभिसंहितफलेनानुष्ठितेन धर्म्मेण। तथाच श्रुतिः 'धर्म्मेण पापमपनुदति' (म. ना. २२।१) इति। तदेवं ब्रह्मप्राप्तिसाधनभूतं ज्ञानं सर्वाश्रमधर्म्मापेक्षम्। अतोऽपेक्षितं कर्म्मस्वरूपज्ञानं केवलकर्म्मणामल्पास्थिरफलत्वज्ञानञ्च कर्म्मीमांसावसेयमिति सैवापेक्षिता ब्रह्ममीमांसायाः पूर्ववृत्ता वक्तव्या।

अपिच, नित्यानित्यवस्तुविवेकादयश्च मीमांसाश्रवणमन्तरेण न सम्पत्स्यन्ते। फलसाधनेतिकर्त्तव्यताधिकारिविशेषनिश्चयादृते कर्म्मस्वरूपतत्फलततस्थिरत्वास्थिरत्वात्मनित्यत्वादीनां दुरवबोधत्वात्। एषां साधनत्वञ्च

क्षया स्वर्गप्रापणस्याप्यधोनयनत्वात्। **अतः**। पापस्य ज्ञानविरोधित्ववचनात्। **पापं कर्म**। पूर्वोक्तमुभयविधम्। **अनभिसंहितफलेनेति**। अनेन स्वर्गादिफलप्रदकर्म व्यावृत्तिः। **अनुष्ठितेन**। न तु ज्ञानमात्रेण। **धर्मेणेति**। 'निष्कामकर्मस्वरूपधर्मेण पूर्वोक्तोभयविधपापस्य नाशः' इत्यर्थः। ज्ञानस्य कर्मसापेक्षत्वं निगमयति—**तदेवमिति**। तत्। श्रुतिस्मृतितदनुग्राहकोपपत्तिसूत्रवाक्यकारवचनेभ्यः। **अतः**। ब्रह्मज्ञानस्य फलाभिसन्धिरहिताश्रमकर्मापेक्षत्वात्। अत्रेदं बोध्यम्। कर्मज्ञानं कर्मण उपादानार्थं हानार्थं च। तत्र स्वरूपेणोपादानं फलद्वारा च हानमिति।

इदानीं साधनचतुष्टयस्य अनपेक्षितत्वेन पूर्ववृत्तत्वं खण्डयति। **अपि चेति**। **नित्यानित्यवस्तुविवेकादयश्चेति**। चकारः प्रत्युतेत्यर्थे। **मीमांसाश्रवणम्**। पूर्वोत्तरभागद्वयरूपमीमांसाश्रवणम्। **फलेति**। फलविशेषो भोगमोक्षरूपः। साधनविशेषो यज्ञोपासनादिः। इतिकर्तव्यताविशेषः प्रयाजादिः साधनसप्तकं च। अधिकारिविशेषो बुभुक्षुर्मुमुक्षुश्च। कर्मस्वरूपं साङ्गं यज्ञात्मकमुपासनात्मकं च। **दुरवबोधत्वादिति**। तथाचैतन्मीमांसाया न साधनचतुष्टयापेक्षा। किंतु साधनचतुष्टयस्यैव मीमांसापेक्षेति भावः। किंच 'तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्येत्' (बृ. ४।४।२३) इति श्रुतिरेवंविच्छब्देन शास्त्रजन्यज्ञानमनूद्य पश्येदिति प्रतिपन्नस्योपासनस्याङ्गतया शमादीनुपदिशति। अतः शमादीनां श्रवणपूर्ववृत्तत्वं श्रुतिविरुद्धम्। 'प्रशान्तचित्ताय' (मुं. १।२।१३) इत्यादि श्रुतिस्तु श्रवणौपयिकावधानानिष्पादनार्थेति बोध्यम्। प्रकारान्तरेण साधनचतुष्टयस्य कर्मविचारापेक्षत्वं दर्शयति—**एषामिति**। शमादीनामित्यर्थः।

विनियोगावसेयम् । विनियोगश्च श्रुतिलिङ्गादिभ्यः । स च तार्त्तीयः । उद्गीथाद्युपासनानि कर्म्मसमृध्यर्थान्यपि ब्रह्मदृष्टिरूपाणीति ब्रह्मज्ञानापेक्षाणीतीहैव चिन्तनीयानि । तान्यपि कर्म्माण्यनभिसंहितफलानि ब्रह्मविद्योत्पादनानीति तत्साद्गुण्यापादनान्येतानि सुतरामिहैव सङ्गतानि । तेषाञ्च कर्म्मस्वरूपाधिगमापेक्षा सर्वसम्मता ।

विनियोगः । अङ्गत्वज्ञापनम् । **श्रुतिलिङ्गादिभ्य इति** । आदिशब्देन वाक्य प्रकरणस्थानसमाख्यानां ग्रहणम् । तत्र निरपेक्षो रवः श्रुतिः । व्रीहीन्प्रोक्षतीत्यत्र द्वितीयाश्रुत्या व्रीहीणां प्रोक्षणाङ्गत्वम् । शब्दसामर्थ्यं लिङ्गम् । बर्हिर्देवसदनं दामीति मन्त्रस्य दाधातोश्छेदनार्थत्वेन कुशच्छेदनाङ्गत्वम् । समभिव्याहारो वाक्यम् । यस्य पर्णमयी जुहूर्भवतीत्यत्र पर्णताजुह्वोः समभिव्याहारेण पर्णताया जुह्वङ्गत्वम् । उभयाकांक्षा प्रकरणम् । प्रयाजादिषु समिधो यजतीत्यत्र फलविशेषस्यानिर्देशात्किमित्यस्त्युपकार्याकाङ्क्षा । दर्शपूर्णमासवाक्ये च कथमित्यस्त्युपकारकाकाङ्क्षा । अतः प्रयाजादीनां दर्शपूर्णमासाङ्गत्वम् । स्थानं क्रमः । ऐन्द्राग्नमेकादशकपालमित्येवं क्रमविहितेष्टिषु इन्द्राग्नीरोचनेत्यादिमन्त्राणां प्रथमस्य प्रथमं द्वितीयस्य द्वितीयमित्येवं क्रमेण विनियोगः । समाख्या यौगिकः शब्दः । आध्वर्यवनामककर्मण आध्वर्यव इति समाख्ययाऽध्वर्युकर्तृकत्वं ज्ञायते । अधिकं पूर्वमीमांसायां तृतीयाध्याये द्रष्टव्यम् । तदेवाह–**तार्तीय इति** । पूर्वमीमांसातृतीयाध्यायोक्त इत्यर्थः । इदमुपलक्षणम् । ब्रह्मविचारस्य कर्मविचारोक्तप्रमाणादिविषयककृत्स्नन्यायसापेक्षत्वात् । अथ ब्रह्मविचारस्य कर्मविचारापेक्षत्वेऽभ्युच्चययुक्तिरुच्यते- **उद्गीथादीत्यादिना सर्वसंमतेत्यन्तेन** । **कर्मसमृध्यर्थानि** । कर्मफलविशेषसम्पादकानि । **ब्रह्मदृष्टिरूपाणीति** । अब्रह्मणि ब्रह्मत्वेन दृष्टिर्ब्रह्मदृष्टिः । **इहैव** । उत्तरमीमांसायामेव । नोद्गीथाद्युपासनानां केवलं ब्रह्मज्ञानापेक्षत्वेनैवेह चिन्तनीयत्वमपि तु ब्रह्मविद्योत्पादकनिष्कामकर्मसाद्गुण्यापादकत्वेनापीत्याह–**तान्यपीति** । यत्समृध्यर्थान्युद्गीथाद्युपासनानि तान्यपीत्यर्थः । प्रबलप्रतिबन्धके सत्यपि शीघ्रफलदत्वं साद्गुण्यापादकत्वम् । अस्तूद्गीथाद्युपासनानामिह चिन्तनीयत्वं तथापि कथं ब्रह्मविचारस्य कर्मविचारापेक्षेत्यत आह–**तेषांचेति** । उद्गीथाद्युपासनानां चेत्यर्थः ।

यदप्याहुरशेषविशेषप्रत्यनीकाचिन्मात्रं ब्रह्मैव परमार्थः। तदतिरेकि नानाविधज्ञातृज्ञेयतत्कृतज्ञानभेदादि सर्वं तस्मिन्नेव परिकल्पितं मिथ्याभूतम्। 'सदेव सोम्येदमग्र आसीत्। एकमेवाद्वितीयम्' (छां. ६।२।१) 'अथ परा यया तदक्षरमधिगम्यते। यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादम्। नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीराः' (मुं. १।१।५-६) 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै. २।१।१)

'निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्' (श्वे. ६।१९)

'यस्यामतं तस्य मतं मतं यस्य न वेद सः।

अथ साधनचतुष्टयपूर्ववृत्तत्ववादिनां शंकरमतानुयायिनां मतं महापूर्वपक्षरूपेणोपक्रमते—**यदप्याहुरिति**। अशेषविशेषा ज्ञात्रादयस्तत्प्रत्यनीकं स्वज्ञानेनैव तन्निवर्तकं शुक्तिरिव रजतस्येत्यर्थः। **चिन्मात्रमिति**। चिच्छब्देन तुच्छत्वव्यावृत्तिः। स्वयंप्रकाशत्वं हि चित्वम्। मात्रशब्देन ज्ञेयत्वव्यावृत्तिः। प्रत्यनीकत्वधर्मोऽप्यनेन व्यावर्त्यते। **ब्रह्मैवेति**। एवकारेण सगुणब्रह्मव्यावृत्तिः। **परमार्थः**। तत्वावेदकप्रमाणविषयः। **तदतिरेकि**। तद्व्यतिरिक्तम्। आदिशब्देन जन्मजरामरणादिसंग्रहः। **तस्मिन्नेवेति**। अनेन निराधिष्ठानभ्रमव्युदासः। एवकारेणाधिष्ठानबहुत्वनिषेधः। तथा सति हि प्रपञ्चस्य तज्ज्ञाननिवर्त्यत्वसिद्धिः। अत्र प्रमाणभूतवाक्यान्युदाहरति—**सदेवेत्यादिना**। हे सोम्य इदमग्रे सृष्टेः पुरा सदेवासीदित्यर्थः। अनेन विजातीयभेदव्यावृत्तिः। **एकमेवेति**। अनेन सजातीयभेदव्यावृत्तिः। **अद्वितीयमिति**। अनेन स्वगतभेदव्यावृत्तिः। **अथेति**। अथ परा विद्या कथ्यते यया परविद्यया तदक्षरं ब्रह्माधिगम्यते इत्यर्थः। **अद्रेश्यं** प्रत्यक्षागोचरम्। **अग्राह्यम्**। अनुमानाद्यगोचरं कर्मेन्द्रियागोचरं वा। **अगोत्रम्**। अनामकम्। **अवर्णं** वर्णो नीलादिस्तद्रहितम्। **अचक्षुःश्रोत्रं** ज्ञानेन्द्रियरहितम्। **अपाणिपादं** कर्मेन्द्रियरहितम्। **नित्यं** कालतः परिमाणरहितम्। **विभुं** देशतः परिमाणरहितम्। **सर्वगतं** सर्वेण जगता अधिष्ठानतया गतमाश्रितम्। अनेन वस्तुपरिच्छेदराहित्यं सूच्यते। अदृश्यत्वादिषु हेतुः—**सुसूक्ष्ममिति**। न तु तुच्छत्वं हेतुरित्याशयः। **भूतयोनिं** भूतानां योनिं मूलकारणम्। **निष्कलमिति**। व्याख्यातं प्राक् (पृ. १४पं.१६)। **यस्येति**। यस्य ब्रह्मविदोऽमतमविज्ञातं ब्रह्मेति मतमभिप्रायो निश्चयस्तस्य मतं ज्ञातं सम्यक् ब्रह्मेत्यभिप्रायः। यस्य पुनर्मतं 'ज्ञातं विदितं मया ब्रह्म' इति निश्चयः स न वेदैव न ब्रह्म विजानाति सः। विद्वदविदुषोर्यथो-

अविज्ञातं विजानतां विज्ञातमविजानताम् ' (के. ११)

' न दृष्टेर्द्रष्टारं पश्येर्न मतेर्मन्तारं मन्वीथाः ' (बृ. ३।४।२) ' आनन्दो ब्रह्म ' (तै. ३।६।१) ' इदं सर्वंयदयमात्मा ' (बृ. २।४।५) ' नेह नानास्ति किञ्चन । मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति ' (बृ. ४।४।१९) ' यत्र हि द्वैतमिव भवति; तदितर इतरं पश्यति । यत्र त्वस्य सर्वमात्मैवाभूत्, तत केन कं पश्येत् तत् केन कं विजानीयात् ' (बृ. २।४।१४) ' वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् ' (छां. ६।१।४) ' यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते, अथ तस्य भयं भवति ' (तै. २।७।१) ' न स्थानतोऽपि, परस्योभयलिङ्गं सर्वत्र हि ' (ब्र. सू. ३।२।११) ' मायामात्रन्तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात् ' (ब्र. सू. ३।२।३)

क्तो पक्षाववधारयति उत्तरार्धेन—**अविज्ञातम**मतमविदितमेव ब्रह्म **विजानतां** विज्ञातमित्यभिमानवताम् । **अविजानतां** तदभिमानरहितानां विदुषां **विज्ञात**मेवेत्यर्थः । अनेन ज्ञेयत्वनिषेधः सूचितः । **न दृष्टेरिति** । अनेन ज्ञातृत्वनिषेधः सूच्यते । भेददर्श्यत्यन्ताज्ञ इति दर्शयति—**मृत्योरिति** । मृत्योः सकाशान्मृत्युं पुनर्मृत्युमित्यर्थः । इवशब्देन नानात्वस्यापारमार्थ्यं दर्शितम् । **वाचारम्भणमिति** । वाचारम्भणं वागालम्बनम् । कोसौ विकारो नामधेयम् । वागालम्बनमात्रं नामैव केवलं न विकारो नाम वस्त्वस्ति । परमार्थतो मृत्तिकैव सत्यं वस्त्वस्तीत्यर्थः । **यदेति** ।एतस्मिन्नात्मनि उत् इति निश्चये अरं स्वल्पमन्तरं भेदं कुरुते मन्यते इत्यर्थः । **न स्थानत इति** । परस्य ब्रह्मणः उभयलिङ्गं सविशेषनिर्विशेषलिङ्गं स्वभावतस्तु नास्त्येव परंतु स्थानतोप्युपाधितोऽपि नास्ति । हि यतः सर्वत्र ब्रह्मस्वरूपप्रतिपादनपरेषु ' अशब्दम् ' (का. ३।१५) इत्यादिवाक्येषु अपास्तसमस्तविशेषमेव ब्रह्मोपदिश्यते इत्यर्थः । **मायामात्रमिति** । स्वाप्नसृष्टिर्मायामात्रमेव, कार्त्स्न्येन परमार्थवस्तुधर्मेण अभिव्यक्तस्वरूपत्वाभावादित्यर्थः । अनेन स्वप्नसृष्टिमिथ्यात्ववज्जगन्मिथ्यात्वं

'प्रत्यस्तमितभेदं यत् सत्तामात्रमगोचरम्।
वचसामात्मसंवेद्यं तज्ज्ञानं ब्रह्मसंज्ञितम्' (वि. पु. ६।७।५३)
'ज्ञानस्वरूपमत्यन्तनिर्मलं परमार्थतः।
तदेवार्थस्वरूपेण भ्रान्तिदर्शनतः स्थितम्' (वि. पु. १।२।६)
'परमार्थस्त्वमेवैको नान्योऽस्ति जगतः पते' (वि. पु. १।४।३८)
'यदेतद् दृश्यते मूर्त्तमेतज्ज्ञानात्मनस्तव।
भ्रान्तिज्ञानेन पश्यन्ति जगद्रूपमयोगिनः॥
ज्ञानस्वरूपमखिलं जगदेतदबुद्धयः।
अर्थस्वरूपं पश्यन्तो भ्राम्यन्ते मोहसंप्लवे॥
ये तु ज्ञानविदः शुद्धचेतसस्तेऽखिलं जगत्।
ज्ञानात्मकं प्रपश्यन्ति त्वद्रूपं परमेश्वर' (वि. पु.१।४।३९-४०-४१)
'तस्यात्मपरदेहेषु सतोऽप्येकमयं हि यत्।
विज्ञानं परमार्थो हि द्वैतमिथ्यात्वदर्शिनः' (वि. पु. २।१४।३१)
'यद्यन्योऽस्ति परः कोऽपि मत्तः पार्थिवसत्तम।
तदैषोऽहमयञ्चान्यो वक्तुमेवमपीष्यते' (वि. पु. २।१३।८५)
'वेणुरन्ध्रविभेदेन भेदः षड्जादिसंज्ञितः।
अभेदव्यापिनो वायोस्तथासौ परमात्मनः' (वि. पु. २।१४।३२)
'सोऽहं स च त्वं स च सर्वमेतदात्मस्वरूपं त्यज भेदमोहम्।
इतीरितस्तेन स राजवर्य्यस्तत्याज भेदं परमार्थदृष्टिः' (वि. पु. २।१६।२४)
'विभेदजनकेऽज्ञाने नाशमात्यन्तिकं गते।
आत्मनो ब्रह्मणो भेदमसन्तं कःकरिष्यति' (वि. पु. ६।७।९४)
'अहमात्मा गुडाकेश सर्वभूताशयस्थितः' (गी. १०।२०)
'क्षेत्रज्ञञ्चापि मां विद्धि सर्वक्षेत्रेषु भारत' (गी. १३।२)

दृष्टान्ततया दर्शितम्। **प्रत्यस्तमितभेदमिति**। सजातीयविजातीयभेदरहितमित्यर्थः। **सत्तामात्रं** स्वगतभेदरहितम्। अत एव वचसामगोचरम्। **वेणुरन्ध्रेति**। यथा

'न तदस्ति विना यत् स्यान्मया भूतञ्चराचरम्' (गी.१०।३९)

इत्यादिभिर्वस्तुस्वरूपोपदेशपरैः शास्त्रैर्निर्विशेषचिन्मात्रं ब्रह्मैव सत्यम्, अन्यत् सर्वं मिथ्या—इत्यभिधानात् । मिथ्यात्वं नाम प्रतीयमानत्वपूर्वकयथावस्थितवस्तुज्ञाननिवर्त्यत्वम् । यथा रज्ज्वाद्यधिष्ठानकसर्पादेः । दोषवशाद्धि तत्र तत्कल्पनम् । एवं चिन्मात्रवपुषि परे ब्रह्मणि दोषपरिकल्पितमिदं देवतिर्यङ्मनुष्यस्थावरादिभेदं सर्वं जगत् यथावस्थितब्रह्मस्वरूपावबोधबाध्यं मिथ्यारूपम् । दोषश्च स्वरूपतिरोधानविविधविचित्रविक्षेपकरी सदसदनिर्वचनीयाऽनाद्यविद्या । 'अनृतेन हि प्रत्यूढाः' (छां. ८।३।२) 'तेषां सत्यानां सतामनृतमपिधानम्' (छां. ८।३।१) 'नासदासीन्नो सदासीत् तदानीम्' (तै. ब्रा.) 'तम आसीत्, तमसा गूढमग्रे

मुरलीवादनादौ । **अभिधानादिति** । अस्य 'अशेषविशेष' (पृ. २६ पं. १) इत्यादिपूर्वप्रतिज्ञावाक्येन सहान्वयः । **मिथ्यात्वमिति** । यथा रज्जौ सर्पस्य मिथ्यात्वम् । तस्य सर्पस्य पूर्वं प्रतीयमानत्वात् । पश्चात् रज्जुरूपयथावस्थितवस्तुनो ज्ञानेन तस्य सर्पस्य निवर्त्यत्वाच्च । दंडनिवर्त्ये घटादावतिव्याप्तिवारणाय ज्ञानशब्दः । प्रबलभ्रान्तिज्ञाननिवर्त्यसत्यरजतादिष्वतिव्याप्तिवारणाय यथावस्थितवस्तुशब्दः । ज्ञानप्रागभावेऽतिव्याप्तिवारणाय प्रतीयमानत्वपूर्वकेति । प्रतीयमानत्वं च नियमेन प्रतीयमानत्वम् । तेन ज्ञानप्रागभावस्य कदाचित्प्रतीयमानत्वेऽपि न क्षतिः । **एवमिति** । न च ब्रह्मणः सर्वज्ञत्वेन तत्र कथमध्यास इति वाच्यम् । सर्वज्ञत्वादिगुणा अपरे ब्रह्मणि । सर्वसाधारणसन्मात्ररूपे परे ब्रह्मणि तु चिन्मात्ररूपतया सर्वज्ञत्वादिगुणानन्वयादध्यासस्य योग्यत्वात् । **दोषश्चेति** । अनाद्यविद्यैव दोषः । सा चाविद्याऽवस्थाभेदेन ब्रह्मस्वरूपतिरोधानहेतुः विविधविचित्रसंसारहेतुश्च भवति । **सदसदिति** । सत्त्वेनासत्त्वेन च निर्वक्तुमशक्येत्यर्थः । एतेनाविद्याया अपरमार्थत्वं सूचितम् । परमार्थत्वे तु ज्ञाननिवर्त्यत्वं न स्यात् । न चापरमार्थत्वे तस्याः कल्पकान्तरापेक्षायामनवस्था स्यादिति वाच्यम् । अनादित्वेनादोषात् । ईदृशाविद्यासत्त्वे प्रमाणमाह—**अनृतेनेत्यादिना** । अनृतं मिथ्याज्ञानम् । तत्प्रयोज्यविषयतृष्णेहानृतशब्देनोच्यते । तेनानृतेन प्रजाः प्रत्यूढाः हृताः । अविद्यादिदोषैः स्वरूपाद्बहिरपकृष्टा इत्यर्थः । **तेषामिति** । तेषां सत्यानामात्मस्थानां कामानां 'ब्रह्मज्ञानिनः संकल्पादेव पित्रादयः समुत्तिष्ठन्ति'

प्रकेतम्' (तै. ब्रा.) 'मायान्तु प्रकृतिं विद्यान्मायिनन्तु महेश्वरम्' (श्वे. ४।१०) 'इन्द्रो मायाभिः पुरुरूप ईयते' (बृ. २।५।१९) 'मम माया दुरत्यया' (गी. ७।१४) 'अनादिमायया सुप्तो यदा जीवः प्रबुध्यते' (गौ. पा. का. १।१६) इत्यादिभिर्निर्विशेषचिन्मात्रं ब्रह्मैवानाद्यविद्यया सदसदनिर्वाच्यया तिरोहितस्वरूपं स्वगतनानात्वं पश्यतीत्यवगम्यते। यथोक्तम्,—

'ज्ञानस्वरूपो भगवान् यतोऽसावशेषमूर्तिर्नतु वस्तुभूतः।
ततो हि शैलाब्धिधरादिभेदान् जानीहि विज्ञानविजृम्भितानि॥
यदा तु शुद्धं निजरूपि सर्वकर्म्मक्षये ज्ञानमपास्तदोषम्।
तदा हि सङ्कल्पतरोः फलानि भवन्ति नो वस्तुषु वस्तुभेदाः॥'

(वि. पु. २।१२।३९-४०)

तस्मान्न विज्ञानमृतेऽस्ति किञ्चित् क्वचित् कदाचित् द्विज वस्तुजातम्।
विज्ञानमेकं निजकर्म्मभेदविभिन्नचित्तैर्बहुधाभ्युपेतम्॥
ज्ञानं विशुद्धं विमलं विशोकमशेषलोभादिनिरस्तसङ्गम्।
एकं सदैकं परमः परेशः स वासुदेवो न यतोऽन्यदस्ति॥

इत्यादिपूर्वोक्तानां अनृतं मिथ्याज्ञानमपिधानमाच्छादनमिवेत्यर्थः। **प्रकेतं** ज्ञानम्। **मायामिति**। जगतः प्रकृतिर्माययैवेति विद्यात्। तथा महेश्वरं मायिनं मायायाः सत्तास्फूर्त्यादिप्रदतयाऽधिष्ठानत्वेन प्रेरयितारं विद्यादित्यर्थः। **इन्द्र इति**। इन्द्रः परमेश्वरो मायाभिर्नामरूपकृतमिथ्याभिमानैर्न तु परमार्थतः पुरुरूपः बहुरूपः ईयते गम्यते एकरूप एव सन्नित्यर्थः। **ब्रह्मैव**। इन्द्रादिशब्देन प्रतिपन्नमपि स्वरूपपरवाक्योपदिष्टं ब्रह्मैवेति भावः। **ज्ञानेति**। शैलाब्ध्यादिसङ्घो न वस्तुभूतः यतोऽसावशेषमूर्तिर्भगवान् ज्ञानस्वरूपएवेत्यर्थः। **विज्ञान**मविद्या। विविधंज्ञायतेऽनेनेति करणव्युत्पत्तेः। **यदेति**। शुद्धमविद्यारहितम्। निजरूपि भेददर्शनरहितम्। दोषाः रागादयः। तद्रहितं ज्ञानं यदा भवति तदा वस्तुषु अविद्यावस्तुषु वस्तुभेदा देवाद्याकारभेदास्तद्रूपाणि सङ्कल्पवृक्षस्य फलानि न भवन्तीत्यर्थः। **निजेति**। स्वस्वकर्मभेदेन भिन्नानि चित्तानि चित्तरूपाणि येषां तैः। **सदैकम्**। जन्मवृध्यादिरहितम्। अयमेव सिद्धान्त इत्याह—

सद्भाव एवं भवतो मयोक्तो ज्ञानं यथा सत्यमसत्यमन्यत् ।
एतत्तु यत् संव्यवहारभूतं तत्रापि चोक्तं भुवनाश्रितं ते'
(वि. पु. २।१२।४३-४४-४५) इति ।

अस्याश्चाविद्याया निर्विशेषचिन्मात्रब्रह्मात्मैकत्वविज्ञानेन निवृत्तिं वदन्ति । न पुनर्मृत्यवे तदेकं पश्यति ', ' न पश्यो मृत्युं पश्यति ' (छां,७।२६।२) ' यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते । अथ सोऽभयं गतो भवति ' (तै. २।७।१)

' भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्म्माणि तस्मिन् दृष्टे परावरे ' (मुं. २।२।८)

' ब्रह्म वेद ब्रह्मैव भवति ' (मुं. ३।२।९) ' तमेव विदित्वातिमृत्युमेति, नान्यः पन्था अयनाय विद्यते ' (श्वे. ३।८) इत्याद्याः श्रुतयः । अत्र मृत्युशब्देनाविद्याभिधीयते । यथा सनत्सुजातवचनम् ' मोहो वै मृत्युः सम्मतो यः कवीनामिति । प्रमादं वै मृत्युमहं ब्रवीमि । सदाऽप्रमादममृतत्वं ब्रवीमि ' (स. १।४) इति । ' सत्यं ज्ञानमनन्तं ब्रह्म ' (तै. २।१।१) ' विज्ञानमानन्दं ब्रह्म ' (बृ. ३।९।२८) इत्यादिशोधकवाक्यावसेयनिर्विशेषचि-

---

सद्भाव इति । सद्रूपो भावः सिद्धान्त इति यावत् । **एतदिति** । भुवनेनाधिष्ठानतयाश्रितं समन्ताद्व्यवहारविषयभूतं यदेतद्वर्तते तत्रापि कारणमविद्येत्युक्तमित्यर्थः । **न पुनरिति** । यस्तदेकं पश्यति स पुनर्मृत्यवेऽविद्यायै न प्रभवति । मृत्युकारणस्य रोगादेरपि निवृत्तिं ज्ञापयति **नपश्य इति** । ' न रोगं नोत दुःखताम् ' इति हि तच्छेषः । **एतस्मिन्** ब्रह्मणि । **अनात्म्ये** अशरीरे । **अनिरुक्ते** नाम्नाऽनिर्वचनीये । **अनिलयने** अनाधारे । **अभयमिति** । अव्ययीभावः। अभयार्थमित्यर्थः । **प्रतिष्ठां** निष्ठाम् । **ब्रह्म वेदेति** । यथोपासनं हि फलम् । ऐक्यज्ञानमेव बन्धनिवर्तकमिति भावः । नन्वत्राविद्यानिवृत्तिर्न प्रतीयते अविद्यावाचिशब्दाश्रवणादित्यत आह–**अत्रेति** । **मोह इति** । वस्तुनः स्वरूपेणाज्ञानं प्रमादः । अन्यस्वरूपेण ज्ञानं मोहः । तत्र मोह एव मृत्युरिति कवीनां संमतमस्ति । परन्त्वहं मोहहेतुः प्रमाद एव मृत्युः इति ब्रवीमीति फलितोर्थः । ननूदाहृतेषु वाक्येषु ज्ञानस्याविद्यानिवर्तकत्वं दृष्टम् । परं तु ब्रह्मणो निर्विशेषचिन्मात्रत्वं तेनात्मन एकत्वविज्ञानं निवर्तकमिति च न प्रतिपन्नमत आह–**सत्यं ज्ञानमिति** । **इत्यादीति** । आदिशब्देनास्थूलमनण्वित्यादिवाक्यसंग्रहः । इ-

न्मात्रस्वरूपब्रह्मात्मैकत्वविज्ञानञ्च 'अथ योऽन्यां देवतामुपास्ते, अन्योऽसावन्योऽहमस्मीति, न स वेद' (बृ. १।४।१०) 'आत्मेत्येवोपासीत' (बृ. १।४।७) 'तत्त्वमसि' (छां. ६।८।७) 'त्वञ्वाहमस्मि भगवो देवते, अहं वै त्वमसि भगवो देवते, तद्योऽहं सोऽसौ, योऽसौ सोऽहम्' इत्यादिवाक्यसिद्धम्। वक्ष्यति चैतदेव 'आत्मेति तूपगच्छन्ति ग्राहयन्ति च' (ब्र. सू. ४।१।३) इति। तथा चाह वाक्यकारः 'आत्मेत्येव तु गृह्णीयात् सर्वस्य तन्निष्पत्तेः' इति। अनेन च ब्रह्मात्मैकत्वविज्ञानेन मिथ्यारूपस्य सकारणस्य बन्धस्य निवृत्तिरुक्ता।

ननु च, सकलभेदनिवृत्तिः प्रत्यक्षविरुद्धा कथमिव शास्त्रार्थजन्यविज्ञानेन क्रियते। कथं वा, रज्जुरेषा न सर्प—इति ज्ञानेन प्रत्यक्षविरुद्धा सर्पनिवृत्तिः क्रियते। तत्र द्वयोः प्रत्यक्षयोर्विरोधः। इह तु प्रत्यक्षमूलस्य शास्त्रस्य प्रत्यक्षस्य चेति, चेत्तुल्ययार्विरोधे कथं बाध्यबाधकभावः।

त्यादिशोधकवाक्यावगम्यमानं यन्निर्विशेषस्वरूपं ब्रह्म तेन सह जीवात्मनः एकत्वविज्ञानं च वक्ष्यमाणवाक्यसिद्धमित्यर्थः। **आत्मेतितूपेति**। आत्मेत्येव परमेश्वरः प्रतिपत्तव्यः। यतो मुमुक्षव उपासने तथाऽभ्युपगच्छन्ति। ग्राहयन्ति च तथा शास्त्राणीति सूत्रार्थः। **तन्निष्पत्तेः**। तत्र ब्रह्मणि कल्पितत्वात्। युक्तिमप्याह—**अनेन चेति**। **मिथ्यारूपस्येति**। हेतुगर्भविशेषणमेतत्।

भेदवादी शङ्कते—**ननु चेति**। **प्रत्यक्षाविरुद्धा**। भेदप्रत्यक्षविरुद्धा। तत्राभेदवादी चोदयति—**कथं वेति**। **प्रत्यक्षविरुद्धा**। सर्पप्रत्यक्षविरुद्धा। न च सर्पप्रत्यक्षस्याभासत्वाद्बाध्यत्वमिति वाच्यम्। प्रतीतिदशायामाभासत्वानवगमात्। पश्चात्प्रमाणभूतरज्जुप्रत्यक्षेण बाधादाभासत्वं ज्ञायत इति चेत्। प्रपंचग्राहिप्रत्यक्षस्यापि तुल्यम्। आभासत्वज्ञानोत्तरं तात्सिद्धिस्तात्सिद्धौ चाभासत्वसिद्धिरित्यन्योन्याश्रयग्रस्तत्वाच्च। पुनर्भेदवादी शङ्कते—**तत्रेति**। **द्वयोःप्रत्यक्षयोः**। रज्जुप्रत्यक्षसर्पप्रत्यक्षयोः। **प्रत्यक्षमूलस्य**। प्रत्यक्षेतरप्रमाणानां प्रत्यक्षमूलकत्वात्। 'प्रत्यक्षेण प्रत्यक्षस्य बाधो हि युक्तः। शास्त्रेण तु स्वप्रयोजकप्रत्यक्षस्य बाधोऽनुचितः शास्त्रस्य प्रत्यक्षसापेक्षत्वात्प्रत्यक्षस्य शास्त्रनिरपेक्षत्वात्' इत्याशयः। अभेदवादी चोदयति—**तुल्ययोरिति**। रज्जुप्रत्यक्षसर्पप्रत्यक्षयोर्मध्ये केन कस्य बाध इति निश्चेतुमशक्यमिति भावः। पुनर्भेदवादी शङ्कते—

पूर्वोत्तरयोर्दुष्टकारणजन्यत्वतदभावाभ्यामिति चेत् । शास्त्रप्रत्यक्षयोरपि समानमेतत् । एतदुक्तं भवति । बाध्यबाधकभावे तुल्यत्वसापेक्षत्वनिरपेक्षत्वादि न कारणं, ज्वालाभेदानुमानेन प्रत्यक्षोपमर्दायोगात् । तत्र हि ज्वालैक्यं प्रत्यक्षेणावगम्यते । एवं सति द्वयोः प्रमाणयोर्विरोधे, यत् सम्भाव्यमानान्यथासिद्धि तद्बाध्यम् । अनन्यथासिद्धमनवकाशमितरद्बाधकमिति सर्वत्र बाध्यबाधकभावनिर्णय—इति । तस्मादनादिनिधनाविच्छिन्नसम्प्रदायासम्भाव्यमानदोषगन्धानवकाशशास्त्रजन्यनिर्विशेषनित्यशुद्धमुक्तबुद्धस्वप्रकाशचिन्मात्रब्रह्मात्मभावावबोधेन सम्भाव्यमानदोषसावकाशप्रत्यक्षादिसिद्धविविधविकल्परूपबन्धनिवृत्तिर्युक्तैव । सम्भाव्यते च, विविधविकल्पभेदप्रपञ्चग्राहिप्रत्यक्षस्यानादिभेदवासनादिरूपाविद्याख्यो दोषः ।

ननु, अनादिनिधनाविच्छिन्नसम्प्रदायतया निर्दोषस्यापि शास्त्रस्य

पूर्वोत्तरयोरिति। पूर्वस्य सर्पप्रत्यक्षस्य दोषजन्यत्वाद्बाध्यत्वमुत्तरस्य रज्जुप्रत्यक्षस्य दोषजन्यत्वाभावाद्बाधकत्वमिति भावः । अभेदवाद्युत्तरयति—**शास्त्रेति** । प्रपञ्चग्राहिभेदप्रत्यक्षस्याविद्यारूपदोषजन्यत्वाच्छास्त्रस्य तदभावात् । एवं च त्वदुक्तशङ्काऽनवकाश इति भावः । **निरपेक्षत्वादीति** । आदिशब्देन दुष्टकारणजन्यत्वतदभावपरोक्षत्वापरोक्षत्वादिसंग्रहः । **ज्वालेति** । अस्यान्यथेत्यादिः । सादृश्यमूलकं ज्वालैक्यप्रत्यक्षं हि निरपेक्षमप्यपरोक्षमपि दुष्टकारणाजन्यमपि तद्विरुद्धेनानुमानेन बाध्यते । एवमन्यत्रापि प्रत्यक्षस्यानुमानेन बाधो द्रष्टव्यः । तर्हि किं बाध्यबाधकभावप्रयोजकमित्यत्राह-**एवं सतीति । संभाव्यमानेति** । यस्य प्रमाणस्य अन्यथा वादयस्तविषयेऽप्रवृत्तौ स्वीकृतायां सत्यामन्यत्र सिद्धिः संभाव्यते तदित्यर्थः । सावकाशमिति यावत् । **तस्मादिति** । न आदिर्निधनं च यस्य, न विच्छिन्नः संप्रदायो यस्य, न संभाव्यमानः दोषगंधो यस्य, न अवकाशो यस्येति चत्वारि शास्त्रविशेषणानि । **निधनं** नाशः । **विच्छिन्नो** भ्रष्टः । **शास्त्रं** श्रुतिः । अविच्छिन्नसंप्रदायत्वादेवानादिनिधनत्वं तनएवासंभाव्यमानदोषगन्धत्वमिति बोध्यम् । **शास्त्रजन्येति** । इदमवबोधविशेषणम् । **नित्यं** कालापरिच्छिन्नम् । **शुद्धम**विद्यारहितम् । **मुक्त**मविद्याकृतजन्मादिरहितम् । **बुद्धं** भासमानम् । **विविधः** देवादिरूपेण, स्वकार्यजन्मजरामरणादिरूपेण च । **विकल्पः** ज्ञातृज्ञेयादिः । **भेदवासनादीति** । आदिशब्देन भेददर्शनम् । तयोश्च **वास**नादर्शनयोः परस्परं हेतुहेतुमद्भावः । अनादित्वाद्बीजाङ्कुरवन्नान्योन्याश्रयः ।

ज्योतिष्टोमेन स्वर्गकामो यजेत—इत्येवमादेर्भेदावलम्बिनो बाध्यत्वं प्रसज्येत। सत्यम्। पूर्वापरापच्छेदे पूर्वशास्त्रवत् मोक्षशास्त्रस्य निरवकाशत्वात्तेन बाध्यत एव। वेदान्तवाक्येष्वपि सगुणब्रह्मोपासनपराणां शास्त्राणामयमेव न्यायः, निर्गुणत्वात् परस्य ब्रह्मणः।

ननु च 'यः सर्वज्ञः सर्ववित्' (मु. १।१।९) 'परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च' (श्वे. ६।८) 'सत्यकामः सत्यसङ्कल्पः' (छां. ८।१।५) इत्यादिब्रह्मस्वरूपप्रतिपादनपराणां कथं बाध्यत्वम्। निर्गुणवाक्यसामर्थ्यादिति ब्रूमः। एतदुक्तं भवति। 'अस्थूलमनण्वह्रस्वम्' (बृ. ३।८।८) 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै. २।१।१) 'निर्गुणम्' (चू. ५।२) निरञ्जनम्' (श्वे. ६।१९) इत्यादिवाक्यानि निरस्तसमस्तविशेषकूटस्थनित्यचैतन्यं ब्रह्मेति प्रतिपादयन्ति। इतराणि च सगुणम्। उभयविधवाक्यानां विरोधे, तेनैवापच्छेदन्यायेन निर्गुणवाक्यानां गुणापेक्षत्वेन परत्वाद्बलीयस्त्वमिति न किञ्चिदवहीनम्।

पूर्वापरापच्छेद इति। अपच्छेदो विच्छेदः। पञ्चर्त्विजः समन्वारब्धाः सर्पन्ति। अध्वर्युं प्रस्तोताऽन्वारभते। प्रस्तोतारं प्रतिहर्ता। प्रतिहर्तारमुद्गाता। उद्गातारं ब्रह्मा। ब्रह्माणं यजमानः। इति विहितस्यान्वारम्भणस्य विच्छेदे प्रायश्चित्तमुच्यते। बहिष्पवमानं प्रसर्पतां यद्युद्गाताऽपच्छिद्येत, अदक्षिणः स यज्ञः संस्थाप्यः। तेन पुनर्यजेत। तत्र तद्दद्याद्यत्पूर्वस्मिन् दास्यन् स्यात्। अथ प्रतिहर्ताऽपच्छिद्येत, सर्ववेदसं दद्यादिति। अत्रोद्गातृप्रतिहर्त्रोरेकस्मिन् प्रयोगे युगपदपच्छेदे उद्गातुः प्राधान्यात्तत्प्रायश्चित्तेनैव निर्वाहः। क्रमेणापच्छेदे तु पूर्वस्य प्रायश्चित्तशास्त्रस्य दौर्बल्यं परस्य प्राबल्यं पूर्वमीमांसायामुक्तम्। अयमाशयः। पूर्वशास्त्रस्योत्पत्तिरविरोधेनैव। तदानीं विरोधिनः परस्याभावात्। परशास्त्रस्योत्पत्तिस्तु विरोधेनैव। तदानीं विरोधिनः पूर्वस्य सत्वादिति विरोधेनोत्पन्नं परमेव प्रबलं भवति। अयमेवापच्छेदन्यायः। **बाध्यत एवेति**। भेदावलम्बि कर्मशास्त्रमिति शेषः। एवं पूर्वोत्तरभागयोर्विरोधः परिहृतः। अधुनोत्तरभागे विरोधपरिहारमाह **वेदान्तवाक्येष्वपीति**।

सर्वज्ञः। सर्वं स्वरूपेण जानाति। **सर्ववित्**। सर्वं प्रकारतो जानाति। **इत्यादिवाक्यानीति**। आदिशब्देन यत्तदद्रेश्यमित्यादि गृह्यते। **इतराणि**। **यः** सर्वज्ञ इत्यादीनि। **सगुणमिति**। प्रतिपादयन्तीत्यनुषज्यते। **गुणापेक्षत्वेन परत्वादिति**।

ननु च, सत्यं ज्ञानमनन्तं ब्रह्म '(तै. २।१।१) इत्यत्र सत्य ज्ञानादयो गुणाः प्रतीयन्ते। नेत्युच्यते। सामानाधिकरण्येनैकार्थत्वप्रतीतेः। अनेकगुणविशिष्टाभिधानेऽप्येकार्थत्वमविरुद्धमिति चेत्। अनभिधानज्ञो हि देवानां प्रियः। एकार्थत्वं नाम सर्वपदानामर्थैक्यम्। विशिष्टपदार्थाभिधाने विशेषणभेदेन पदानामर्थभेदोऽवर्जनीयः। ततश्चैकार्थत्वं न सिध्यति। एवं तर्हि सर्वपदानां पर्य्यायता स्यात्, अविशिष्टार्थाभिधायित्वात्। एकार्थाभिधायित्वेऽपि अपर्य्यायित्वमवहितमनाः शृणु। एकत्वतात्पर्य्यनिश्चयादेकस्यैवार्थस्य तत्तत्पदार्थविरोधिप्रत्यनीकपरत्वेन सर्वपदानामर्थवत्त्वमेकार्थत्वमपर्य्यायता

निषेधस्य निषेध्यसापेक्षत्वेन परत्वमित्यर्थः।

निर्गुणवाक्येषूपात्तस्य ' सत्यं ज्ञानम् ' इति वाक्यस्य सगुणपरत्वबुध्या चोदयति–**ननु चेति**। **सत्यज्ञानादय इति**। भावप्रधानो निर्देशः। सत्यत्वज्ञानत्वादय इत्यर्थः। **सामानाधिकरण्येनेति**। सामानाधिकरण्यं च भिन्नप्रवृत्तिनिमित्तानां शब्दानामेकस्मिन्नर्थे प्रवृत्तिः। उक्तश्रुतौ सत्यादिशब्दानां निषेधमुखप्रवृत्तत्वेन तत्तपदार्थविरोधिप्रत्यनीकपरत्वम्। अतद्व्यावृत्तपरत्वमिति यावत्। तथा च सत्यशब्दस्य सत्येतरव्यावृत्तमित्यर्थः। एवमेव ज्ञानानन्तशब्दयोर्बोध्यम्। तथा च ब्रह्मणः सकलेतराविरोधित्वं प्रतिपादयदिदं शोधकवाक्यं व्यावृत्तिपरमेव भवितुं युक्तमिति नात्र विधिमुखेन प्रवृत्तिः शङ्कनीया। न चानेन वाक्येन ब्रह्मण्यतद्व्यावृत्तिरूपधर्मबोधनेनास्य वाक्यस्य सगुणपरत्वमेवेति वाच्यम्। अभावानामधिकरणात्मकत्वेन भेदरूपाया व्यावृत्तेर्ब्रह्मात्मकत्वेन धर्मधर्मिभावासंभवात्। अतः सत्यादिशब्दानां सामानाधिकरण्येनैकस्मिन् ब्रह्मणि तात्पर्यनिश्चयेनैकब्रह्मरूपार्थकत्वमेवेति सत्यत्वादिगुणानामत्राप्रतीतिरित्यभिप्रायः। एतदभिप्रायमजानानः शङ्कते–**अनेकेति**। यथा सत्यं ज्ञानमित्यत्र सत्यत्वादिगुणविशिष्टस्य ब्रह्मरूपैकार्थस्याभिधानं तथैव यः सर्वज्ञ इत्यादिष्विति शङ्काशयः। शङ्कमुपालभते–**अनभिधानज्ञ इति**। अभिधानमभिधा। वृत्तिरिति यावत्। तदनभिज्ञः देवानांप्रियः मूर्ख इत्यर्थः। **विशिष्टेति**। यथा शूरः सुन्दरो देवदत्त इत्यत्र शूरत्वविशिष्टस्य सुन्दरत्वविशिष्टस्य चैकत्वेऽपि शूरत्वसुन्दरत्वरूपविशेषणयोर्भेदेन शूरादिपदानामर्थभेदोऽवश्यंभावी, तथैव यः सर्वज्ञ इत्यादिष्विति एकार्थत्वाभाव इति भावः। तर्हि सत्यं ज्ञानमित्यत्र विशेषणस्यापि भेदो नास्तीति चेद्घटकुम्भशब्दवत्पर्यायतापत्तिः। ततश्चानेकशब्दोपादानमनर्थकमित्याशयेनाह–**एवं तर्हीति**। स्वाभिप्रायं स्फोटयन्नुत्तरयति–**एकार्थेति**। **अर्थवत्त्वं** सा-

च । एतदुक्तं भवति, लक्षणतः प्रतिपत्तव्यं ब्रह्म सकलेतरपदार्थविरोधिरूपं, तद्विरोधिरूपं सर्वमनेन पदत्रयेण फलतो व्युदस्यते । तत्र सत्यपदं विकारास्पदत्वेनासत्याद्वस्तुनो व्यावृत्तपरम् । ज्ञानपदञ्चान्याधीनप्रकाशाज्जडरूपाद्वस्तुनो व्यावृत्तपरम् । अनन्तपदञ्च देशतः कालतो वस्तुतश्च परिच्छिन्नाद्व्यावृत्तपरम् । नच व्यावृत्तिर्भावरूपोऽभावरूपो वा धर्म्मः अपि । तु सकलेतरविरोधि ब्रह्मैव । यथा शौक्ल्यादेः काष्र्ण्यादिव्यावृत्तिः तत्तत्पदार्थस्वरूपमेव, न धर्म्मान्तरम् । एवमेकस्यैव वस्तुनः सकलेतरविरोध्याकारतामवगमयदर्थवत्तरमेकार्थमपर्य्यायञ्च पदत्रयमिति । तस्मादेकमेव ब्रह्म स्वयंज्योतिर्निर्धूतनिखिलविशेषमित्युक्तं भवति । एवं वाक्यार्थप्रतिपादने सत्येव, सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमित्यादिभिरैकार्थ्यम् । 'यतो वा इमानि भूतानि जायन्ते' (तै. ३।१।१) 'सदेव सोम्येदमग्रआसीत्' (छां. ६।२।१) 'आत्मा वा इदमेक एवाग्र आसीत्' (ऐ. १।१) इत्यादिभिर्जगत्कारणतयोपलक्षितस्य ब्रह्मणः स्वरूपमिदमुच्यते--सत्यं ज्ञानमनन्तं ब्रह्मेति । तत्र सर्वशाखाप्रत्ययन्यायेन कारणवाक्येषु सर्वेषु सजातीयविजातीयव्या-

---

फल्यम् । **लक्षणतः** । स्वरूपलक्षणतः । ननु तटस्थलक्षणतः । **भावरूप इति** । प्राभाकरपक्षे सिध्द्रान्ति-(रामानुज-) मते च व्यावृत्तेर्भावरूपत्वं, वैशेषिकादिमते चाभावरूपत्वम् । स्वरूपस्यैव व्यावृत्तित्वे दृष्टांतमाह-**यथेति** । **इत्युक्तमिति** । सत्यज्ञानादिवाक्येनेति शेषः । सत्यज्ञानादिवाक्यस्य वस्तुमात्रपरत्वे कारणान्तरमाह-**एवमिति** । **इत्यादिभिः** । जगत्कारणत्वप्रतिपादकैर्वाक्यैः । **यतोवेति** । कारणवाक्येष्वेकमेवाद्वितीयमित्यादिशब्दैः सजातीयव्यावृत्ताद्वितीयब्रह्मावगतौ सत्यां तदेकवाक्यतया तादृशकारणवाक्यप्रतिपन्नब्रह्मस्वरूपशोधकस्य सत्यज्ञानादिवाक्यस्यापि सजातीयव्यावृत्ताद्वितीयवस्तुमात्रपरत्वमेवोचितमिति भावः । ननु सर्वेषु कारणवाक्येषु सजातीयव्यावृत्ताद्वितीयब्रह्मावगतिर्नास्ति । 'यतो वा' इत्यत्र तदभावादित्यत आह-**तत्र सर्वेति** । सर्वशाखासु प्रत्ययो ज्ञानमेकरूपमिति न्यायशरीरम् । तेनैकत्रोक्तस्य तत्सदृशोऽन्यत्र संग्रहो भवतीति यतो वेत्यत्रापि तदर्थावगतिरस्तीति भावः ।

वृत्तमद्वितीयं ब्रह्म अवगतम् । जगत्कारणतयोपलक्षितस्य ब्रह्मणोऽद्वितीयस्य प्रतिपिपादयिषितं स्वरूपं तदविरोधेन वक्तव्यम् । अद्वितीयत्वश्रुतिर्गुणतोऽपि सद्वितीयतां न सहते । अन्यथा निरञ्जनं निर्गुणमित्यादिभिश्च विरोधः । अतश्चैतल्लक्षणवाक्यमखण्डैकरसमेव प्रतिपादयति ।

ननु च सत्यज्ञानादिपदानां स्वार्थप्रहाणेन स्वार्थविरोधिव्यावृत्तवस्तुस्वरूपोपस्थापनपरत्वेन लक्षणा स्यात् । नैष दोषः । अभिधानवृत्तेरपि तात्पर्य्यवृत्तेर्बलीयस्त्वात् । सामानाधिकरण्यस्य ह्यैक्य एव तात्पर्य्यमितिसर्वसम्मतम् । ननु च सर्वपदानां लक्षणा न दृष्टचरी । ततः किम् । वाक्यतात्पर्य्यविरोधे सत्येकस्यापि न दृष्टा । समभिव्याहृतपदसमुदायस्यैतत्तात्पर्य्यमिति निश्चिते सति द्वयोस्त्रयाणां सर्वेषां वा तदविरोधायैकस्येव लक्षणा न दोषाय । तथाच शास्त्रज्ञैरभ्युपगम्यते, कार्य्यवाक्यार्थवादिभिर्लौकिकवाक्येषु सर्वेषां पदानां लक्षणा समाश्रीयते । अपूर्वकार्य्ये एव लि-

---

ततः किमित्यत्राह–**जगदिति । प्रतिपिपादयिषितम् ।** तात्पर्यभूमिः । वस्तुमात्र एव तात्पर्यमित्यर्थः । ननु नरपतिरद्वितीय इत्यादिवत्समाभ्यधिकराहित्येप्यद्वितीयत्वमुपपन्नमिति तदैकार्थ्येऽपि न निर्गुणपरत्वसिद्धिरिति चेत्तत्राह–**अद्वितीयत्वेति । अतश्चेति ।** ब्रह्मस्वरूपलक्षणपरं सत्यंज्ञानमित्येतद्वाक्यं निर्विशेषत्वैकस्वभावमेव प्रतिपादयतीत्यर्थः ।

स्वार्थेति । स्वार्थो हि विशेषणद्वारकं विशेष्यं तत्प्रहाणेनेत्यर्थः । **अभिधानेति ।** अभिधानवृत्तिः शक्तिः । तदपेक्षयापि तात्पर्यादागतवृत्तेर्बलीयस्त्वात् । तात्पर्यादागता वृत्तिश्चात्रलक्षणैव । वाक्यतात्पर्यानुगुणत्वात् । अतस्तस्या वाक्यतात्पर्याविरोधिमुख्यवृत्त्यपेक्षयापि बलीयस्त्वमिति भावः । **न दृष्टचरीति ।** क्वाप्यन्यत्र पूर्वं न दृष्टेत्यर्थः । **एकस्यैवेति ।** यथा तात्पर्याविरोधायैकस्य पदस्य लक्षणायां न दोषस्तथैव द्वयोस्त्रयाणां सर्वेषां वा पदानामित्यर्थः । विरोध एव लक्षणास्वीकारे प्रयोजको नत्वेकपदत्वम् । विषं भुङ्क्ष्वेत्यादौ 'मा चास्यगृहे भुङ्क्था' इत्यर्थे सर्वपदलक्षणाया दृष्टत्वादिति भावः । अत्रार्थे संमत्यर्थं गुरुमतमाह–**तथा चेति । कार्येति ।** कार्यं कृतिसाध्यं स एव वाक्यार्थ इतिवदद्भिरित्यर्थः । तेषामयमाशयः। अपूर्वरूपं यत् कार्यं तस्मिन्नर्थे लिङादीनां मुख्यवृत्तत्वम् । शक्तिरिति यावत् । तथा च ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यत्र ज्योतिष्टोमनामकयागविषयकं स्वर्गकामस्यापूर्वरूपं कार्यमिति

ङादेर्मुख्यवृत्तत्वात्, लिङादिभिः क्रियाकार्य्यं लक्षणया प्रतिपाद्यते। कार्य्यान्वितस्वार्थाभिधायिनाञ्चेतरेषां पदानामपूर्वकार्य्यान्वित एव मुख्योऽर्थ इति क्रियाकार्य्यान्वितप्रतिपादनं लाक्षणिकमेव। अतो वाक्यतात्पर्याविरोधाय सर्वपदानां लक्षणापि न दोषः। अत इदमेवार्थजातं प्रतिपादयन्तो वेदान्ताः प्रमाणम्।

प्रत्यक्षादिविरोधे च शास्त्रस्य बलीयस्त्वमुक्तम्। सति च विरोधे बलीयस्त्वं वक्तव्यम्। विरोध एव न दृश्यते। निर्विशेषसन्मात्रग्राहित्वात्प्रत्यक्षस्य। ननु च घटोऽस्ति पटोऽस्तीति नानाकारवस्तुविषयं प्रत्यक्षं कथमिव सन्मात्रग्राहीत्युच्यते। विलक्षणग्रहणाभावे सति सर्वेषां ज्ञानानामेकविषयत्वेन धारावाहिकविज्ञानवदेकव्यवहारहेतुतैव स्यात्। सत्यम्। तथैवात्र विविच्यते। कथम्। घटोऽस्तीत्यत्रास्तित्वं तद्भेदश्च व्यवह्रियते। नच

बोधः। आरोग्यकामो भेषजपानं कुर्यादित्यादिलौकिकप्रयोगे त्वपूर्वरूपवाच्यार्थस्यासंभवाल्लिङादेः क्रियाकार्येऽर्थे लक्षणेति। इतरपदानां लक्षणामुपपादयति—**कार्यान्वितेति**। अन्विताभिधानवादिनये हि घटमानयेत्यत्र घटपदस्यानयनान्वितस्वार्थे शक्तिः। तद्वदत्राप्यारोग्यकामपदस्यापूर्वरूपकार्यान्वितस्वार्थे शक्तिः। तदसंभवादारोग्यकामपदस्य क्रियाकार्यान्वितस्वार्थे लक्षणा स्वीकार्या। एवमेवेतरपदानामपि लक्षणा बोध्या। **अर्थजातमिति**। वस्तुनो निर्विशेषत्वं तस्यैव पारमार्थ्यं तद्व्यतिरिक्तस्य मिथ्यात्वं दोषपरिकल्पितत्वं च दोषस्य सदसदनिर्वचनीयत्वं ज्ञानमात्रनिवर्त्यत्वं चेत्यर्थः।

शास्त्रस्य प्रत्यक्षादिविरोधमङ्गीकृत्यापि शास्त्रस्य प्राबल्यमुक्तम्। इदानीं विरोध एव वस्तुतो नास्तीत्याह—**विरोध एव नेति**। लौकिकघटादिप्रत्यक्षेऽपि निर्विशेषं सन्मात्रं ब्रह्मैव गृह्यते इति भावः। इदमनुभवविरुद्धमित्याशयेनाशङ्कते—**ननु चेति**। **विलक्षणेति**। अयं घटोऽयं सर्प इत्यादीनां सर्वेषां ज्ञानानां घटसर्पादिभिन्नविषयकत्वाभावे एकब्रह्मविषयकत्वेन घटोयं घटोयमितिधारावाहिकज्ञानस्येव प्रवृत्तिव्यवहारहेतुत्वमेवस्यात्, सर्पोऽयं सर्पोऽयमितिधारावाहिकज्ञानस्येव निवृत्तिव्यवहारहेतुत्वमेव वा स्यादिति भावः। **तथैवेति**। यथा सन्मात्रस्यैव प्रत्यक्षत्वमेकव्यवहारहेतुतैव च स्यात्तथैवेत्यर्थः। **अस्तित्वं तद्भेदश्चेति**। घटास्तित्वं घटेतरभेदश्चेत्यर्थः। भिन्न इति व्यवहारे इव घट इति व्यवहारेपि घटस्य पटादिव्यावृत्तत्वेन प्रतीतेरिति भावः।

द्वयोरपि व्यवहारयोः प्रत्यक्षमूलत्वं सम्भवति, तयोर्भिन्नकालज्ञानफलत्वात्। प्रत्यक्षज्ञानस्यैकक्षणवर्त्तित्वात्। तत्र स्वरूपं भेदो वा प्रत्यक्षस्य विषय इति विवेचनीयम्। भेदग्रहणस्य स्वरूपग्रहणतत्प्रतियोगिस्मरणसव्यपेक्षत्वादेव स्वरूपविषयत्वमवश्याश्रयणीयमिति न भेदः प्रत्यक्षेण गृह्यते। अतो भ्रान्तिमूल एव भेदव्यवहारः। किञ्च भेदो नाम कश्चित् पदार्थो न्यायविद्भिर्निरूपयितुं न शक्यते। भेदस्तावन्न वस्तुनः स्वरूपम्। वस्तुस्वरूपे गृहीते स्वरूपव्यवहारवत् सर्वस्मात् भेदव्यवहारप्रसक्तेः। नच वाच्यं स्वरूपे गृहीतेऽपि भिन्न—इति व्यवहारस्य प्रतियोगिसव्यपेक्षत्वात् ततस्मरणाभावेन तदानीमेव न भेदव्यवहार इति। स्वरूपमात्रभेदवादिनो हि प्रतियोगिसव्यपेक्षा च नोत्प्रेक्षितुं क्षमा। स्वरूपभेदयोः स्वरूपत्वाविशेषात्। यथा स्वरूपव्यवहारो न प्रतियोग्यपेक्षः। भेदव्यवहारोऽपि तथैव स्यात्। हस्तः कर इतिवत् घटो भिन्न—इति पर्य्यायत्वञ्च स्यात्। नापि धर्मः। धर्मत्वे सति तस्य स्वरूपात् भेदोऽवश्याश्रयणीयः। अन्यथा स्वरूपमेव स्यात्। भेदे च तस्यापि भेदः तद्धर्मः तस्यापीत्यनवस्था। किञ्च जात्यादिधर्मविशिष्टवस्तुग्रहणे सति भेदग्रहणं, भेदग्रहणे सति जात्यादिधर्मविशिष्टवस्तुग्रहणमित्य-

---

तयोरिति। अस्तित्वव्यवहारप्रयोजकघटस्वरूपप्रत्यक्षानन्तरं घटेतरस्मृतौ सत्यां तादृशेतरप्रतियोगिकभेदप्रत्यक्षसंभव इति गूढाशयः। 'घटोऽस्तीत्यत्र प्रत्यक्षद्वयं जायते' इति त्वनुभवविरुद्धम्। क्षणिकैकप्रत्यक्षाङ्गीकारेऽपि तस्य स्वरूपाविषयकत्वमेव कुतः इत्याह—**तत्रेति**। गूढाशयं स्फोटयति—**भेदग्रहणस्येति**। **न्यायविद्भिः**। नत्वापातप्रतीतिमात्रनृतैः। **सर्वस्मादिति**। भेदस्य वस्तुस्वरूपत्वेन प्रतियोगिनिरपेक्षतया घटस्वरूपे गृहीते पटादिभ्य इव घटादपि भेदप्रसक्तेरित्यर्थः। एतदेव शंकासमाधानेन स्फुटयति—**नचेत्यादिना**। **नापीति**। यथा भेदो न वस्तुस्वरूपं तथैव वस्तुधर्मोपि नेत्यर्थः। **भेदे चेति**। वस्तुधर्मस्य भेदस्य वस्तुस्वरूपाद्भेदे स्वीकृते द्वितीयभेदस्य धर्मिभूतप्रथमभेदधर्मत्वं वाच्यम्। ततश्च धर्मस्य धर्मिस्वरूपाद्भेदाङ्गीकारेण प्रथमभेदप्रतियोगिकः द्वितीयभेदनिष्ठस्तृतीयभेदोऽङ्गीकार्यः। तत्रापि पूर्ववच्चतुर्थभेद इत्यनवस्थेति भावः। **भेदग्रहणे सतीति**। अगृहीते हि घटस्य पटाद्भेदेऽयं घटजातीय इति ज्ञातुमशक्यमिति भावः

न्योऽन्याश्रयणम् । अतो भेदस्यापि दुर्निरूपत्वात् सन्मात्रस्यैव प्रकाशकं प्रत्यक्षम् ।

किञ्च घटोऽस्ति पटोऽस्ति घटोऽनुभूयते पटोऽनुभूयतइति सर्वे पदार्थाः सत्तानुभूतिघटिता एव दृश्यन्ते । अत्र सन्मात्रं सर्वासु प्रतिपत्तिष्वनुवर्त्तमानं दृश्यत इति तदेव परमार्थः । विशेषास्तु व्यावर्त्तमानतया अपरमार्थाः रज्जुसर्पादिवत् । यथा रज्जुरधिष्ठानतयाऽनुवर्त्तमाना सती परमार्था। व्यावर्त्तमानाः सर्पभूदलनाम्बुधारादयोऽपरमार्थाः । ननु च रज्जुसर्पादौ रज्जुरियं न सर्प इत्यादि—रज्ज्वाद्यधिष्ठानयाथार्थ्यज्ञानेन बाधितत्वात् सर्पादेरपारमार्थ्यं न व्यावर्तमानत्वात् । रज्ज्वादेरपि पारमार्थ्यं नानुवर्त्तमानतया, किन्त्वबाधितत्वात् । अत्र तु अबाधितानां घटादीनां कथमपारमार्थ्यम् । उच्यते। घटादौ दृष्टा व्यावृत्तिः सा किंरूपेति विवेचनीयम् । किं घटोऽस्तीत्यत्र पटाभावः। सिद्धं तर्हि घटोऽस्तीत्यनेन पटादीनां बाधितत्वम् । अतो बाधफलभूता विषयनिवृत्तिर्व्यावृत्तिः । सा व्यावर्त्तमानानामपारमार्थ्यं साधयति । रज्जुवत् सन्मात्रमबाधितमनुवर्त्तते । तस्मात् सन्मात्रातिरेकि सर्वमपरमार्थम् । प्रयोगश्च भवति । सत् परमार्थमनुवर्तमानत्वात् रज्जुसर्पादौ रज्ज्वादिवत् । घटादयोऽपरमार्थाः व्यावर्त्तमानत्वात् रज्ज्वाद्यधिष्ठानसर्पादिवदिति ।

सदनुभूत्योरेकत्वं वक्ष्यमाणं हृदिनिधायानुभूतेरनुवृत्तिं दर्शयति—**घटोऽनुभूयत इत्यादिना** । **तदेव** । न तु भेदप्रतीतिजनका घटाद्याकाराः **विशेषाः** भेदाः । **व्यावर्तमानतया** । उत्तरोत्तरप्रतीतिविषयेष्वविद्यमानतया । **सर्पेति** । रज्जौ स्थितायां कदाचिदयं सर्प इति भ्रमो भवति । कदाचिदत्र भूमिर्द्विधा भग्नेति भ्रमो भवति । कदाचिदियमम्बुधारा वहतीति भ्रमो भवति । **सर्पादेरिति** । इदं मध्यमणिन्यायेनोभयान्वयि । **अनुवर्तमानतया** । उत्तरोत्तरप्रतीतिविषयेषु विद्यमानतया । मिथ्यात्वे बाधितत्वं हेतुः सत्यत्वे चाबाधितत्वमिति शङ्काशयः । **घटादाविति** । घटपटादौ पटघटादिव्यावृत्तेस्तवापि सम्मतत्वेन तस्याश्चाभावरूपत्वेन चालनीन्यायेन पटादीनां सर्वेषां बाधितत्वात्तेषामपारमार्थ्यं तवापि गले पतितमित्युत्तराशयः । **प्रयोगः** । अनुमानप्रयोगः । **सदिति** । पक्षनिर्देशः । **परमार्थमिति** । साध्यनिर्देशः ।

एवं सत्यनुवर्त्तमानानुभूतिरेव परमार्था । सैव सती । ननु च सन्मात्रमनुभूतेर्विषयतया ततो भिन्नम् । नैवम् । भेदो हि प्रत्यक्षाविषयत्वाद्दुर्निरूपत्वाच्च पुरस्तादेव (पृ० ३९ पं ४) निरस्तः । अत एव सतोऽनुभूतिविषयभावोऽपि न प्रमाणपदवीमनुसरति । तस्मात् सदनुभूतिरेव । सा च स्वतःसिद्धा । अनुभूतित्वात् । अन्यतः सिद्धौ घटादिवदननुभूतित्वप्रसङ्गः । किञ्चानुभवान्तरापेक्षा चानुभूतेर्न शक्या कल्पयितुम् । स्वसत्तयैव प्रकाशमानत्वात् । नह्यनुभूतिर्वर्त्तमाना घटादिवदप्रकाशा दृश्यते, येन परायत्तप्रकाशाभ्युपगम्येत । अथैवं मनुषे, उत्पन्नायामप्यनुभुतौ विषयमात्रमवभासते घटोऽनुभूयत–इति । नहि कश्चिद्घटोऽयमिति जानंस्तदानीमेवाविषयभूतामनिदम्भावामनुभूतिमप्यनुभवति । तस्माद्घटादिप्रकाशनिष्पत्तौ

शङ्करमतानुसारिणो मायावेदान्तिनो हि केवलज्ञानस्यैव परमार्थत्वं वदन्ति । तदत्र तन्मते प्रस्तुते कथं सतः परमार्थत्वसाधनमित्यत्राह-**एवं सतीति** । **सैव सतीति** । सदनुभूत्योरेकत्वादिति भावः । **विषयतयेति** । घटतज्ज्ञानयोर्विषयविषयिणोर्भेदस्य प्रत्यक्षसिद्धत्वादित्याशयः । **निरस्त इति** । न चैवं घटपटयोरपि भेदो न स्यादिति वाच्यम् । घटपटयोर्वस्तुतोऽपरमार्थत्वेन तद्भेदकथाप्रसङ्गस्यैवाभावात् । **अतएव** । भेदस्य निरस्तत्वादेव । भेदमूलिका हि विषयविषयिभावकल्पनेति भावः । **अनुभूतिविषयभावः** । अनुभवनिष्ठविषयितानिरूपितविषयत्वम् । ननु ज्ञानभिन्नस्य सर्वस्यापरमार्थत्वे ज्ञानस्य ग्राहकाभावात्तस्यापि शून्यत्वं स्यादित्यत आह–**साचेति** । यथा ग्राह्यत्वं ग्राहकत्वं चेति शक्तिद्वयं तेजसस्तथैव ज्ञानस्येत्यर्थः । **सत्तयैवेति** । यथा दीपः सत्तयैव प्रकाशते तद्वदेव ज्ञानं सत्तयैव प्रकाशते इति भावः । एतदसहमानः शङ्कते– **अथैवमित्यादिना स्वात्मस्पर्शवदशक्यत्वादितीत्यन्तेन** । यदि ज्ञानं स्वप्रकाशं स्यात्तर्हि घटादिवत्तस्यापि सर्वत्रावभासोऽवश्यम्भावी । स तु न भवति । न हि यदा घटोऽयमिति जानाति तदानीं ' घटोऽनुभूयते ' इति जानाति कश्चिदिति ज्ञानस्य स्वप्रकाशत्वं नास्तीत्याशयः । **अविषयभूताम्** । घटशब्दार्थव्यतिरिक्ताम् । घटत्वविशिष्टं पृथुबुध्नोदराकारद्रव्यं घटशब्दार्थः । **अनिदम्भावाम्** । अयंशब्दार्थव्यतिरिक्ताम् । सन्निहितदेशवर्तमानकालविशिष्टत्वमिदंशब्दार्थः । एतदुभयव्यतिरिक्तो ह्यनुभवः । स तु घटोऽयमित्यनुभववेलायां नानुभूयत इत्यर्थः । ननु यद्यनुभवो नानुभूयते तर्हि तस्य घटादिप्रकाशकत्वं नस्यात् । न ह्यज्ञातस्य शब्दस्यार्थप्रकाशकत्वं दृष्टमिति चेत्तत्राह-**तस्मादिति** । प्रकाशकं हि किंचित्स्वयमज्ञातमपि सत्तयैव केवलमर्थं

चक्षुरादिकरणसान्निकर्षवदनुभूतेः सद्भाव एव हेतुः । तदनन्तरमर्थगतकादाचित्कप्रकाशातिशयलिङ्गेनानुभूतिरनुमीयते । एवं तर्हि, अनुभूतेरजडाया अर्थवज्जडत्वमापद्येत—इति चेत् । किमिदमजडत्वं नाम । न तावत् स्वसत्तायाः प्रकाशाव्यभिचारः । सुखादिष्वप्येतत्सम्भवात् । न हि कदाचिदपि सुखादयः सन्तो नोपलभ्यन्ते । अतोऽनुभूतिः स्वयमेव नानुभूयते । अर्थान्तरं स्पृशतोप्यङ्गुल्यग्रस्य स्वात्मस्पर्शवदशक्यत्वादिति । तदिदमनाकलितानुभवविभवस्य स्वमतिविजृम्भितम् । अनुभूतिव्यतिरेकिणो विषयधर्म्मस्य प्रकाशस्य रूपादिवदनुपलब्धेः । उभयाभ्युपेतानुभूत्यैवाशेषव्यवहारोपपत्तौ प्रकाशाख्यार्थधर्मकल्पनानुपपत्तेश्च । अतो नानुभूतिरनुमीयते । नापि ज्ञा-

---

प्रकाशयति । यथेन्द्रियाणि तेषां सन्निकर्षश्च, तथैवात्रेति भावः । ननु यद्यनुभवस्य प्रकाश्यत्वं नास्ति तर्हि किं तत्सद्भावे प्रमाणमतमाह—**तदनन्तरमिति** । घटादिविषयगतप्रकाशातिशयस्य कादाचित्कत्वात्कार्यत्वं कार्यत्वाच्च सहेतुकत्वमित्यनुमानेनानुभवो ज्ञायत इत्यर्थः । **एवं तर्हि** । अनुभवस्य न स्वप्रकाशत्वं किंत्वनुमानेन परप्रकाश्यत्वमेवेत्यङ्गीकारे । **सत्तायाः प्रकाशाव्यभिचारः** । विद्यमानदशायां सर्वदाऽनुभूयमानत्वम् । **सुखादिष्विति** । यदि ज्ञानस्य विद्यमानदशायामप्यनुभूयमानत्वाभावेन जडत्वमापद्यते तर्हि सुखादीनां विद्यमानदशायां सर्वदाऽनुभूयमानत्वेनाजडत्वमापद्येत । तच्चानिष्टम् । तथा च न तदजडत्वे तन्त्रमिति भावः । ननु स्वप्रकाशत्वमजडत्वम् । ज्ञानस्य च परप्रकाश्यत्वेन जडत्वापत्तिरित्युच्यते चेदीदृशजडत्वमिष्टमेवेत्याह—**अत इति** । यथाहुः ' अङ्गुल्यग्रं यथात्मानं नात्मना स्प्रष्टुमर्हति । स्वांशेन, ज्ञानमप्येवं नात्मानं ज्ञातुमर्हति ' इति । स्वप्रकाशत्ववाद्युत्तरयति—**तदिदमिति** । **अनाकलितानुभवविभवस्य** । अनुभवमाहात्म्यमजानतः । माहात्म्यं चायमनुभवः स्वातिरिक्तसर्वप्रकाशकः सन्स्वस्मिन्ननन्यापेक्षः । तथाऽयमेवानुभवः ' प्रकाशते ' इति व्यवहारहेतुः, नत्वेतद्भिन्नः कश्चन प्रकाशाख्यो विषयधर्मोऽस्तीत्येवंरूपं बोध्यम् । **अनुभूतीति** । येन घटादिविषयगतप्रकाशरूपलिङ्गेनानुभवोऽनुमीयते सोऽनुभवभिन्नत्वेन त्वदभिमतः प्रकाशः प्रत्यक्षयोग्यो न वा । नाद्य इत्याह—**अनुभूतिव्यतिरेकिण इति** । अनुभवभिन्नस्येत्यर्थः । **रूपादिवदिति** । वैधर्म्येण दृष्टान्तः । नान्त्यः । अप्रत्यक्षेण हेतुनाऽनुमानासंभवात् । तथा च प्रकाशरूपस्यानुभवस्य स्वप्रकाशत्वमेवागत्या स्वीकार्यमिति भावः । नन्वनुभूतेः सुखादिवन्मानसप्रत्यक्षवेद्यत्वमस्त्वित्यत आह—**नापीति** । तथात्वे हि सति

नान्तरसिद्धा। अपि तु, सर्वं साधयन्त्यनुभूतिः स्वयमेव सिध्यति। प्रयोगश्च। अनुभूतिरनन्याधीनस्वधर्म्मव्यवहारा स्वसम्बन्धादर्थान्तरे तद्धर्म्मव्यवहारहेतुत्वात्। यः स्वसम्बन्धादर्थान्तरे तद्धर्म्मव्यवहारहेतुः स तयोः स्वस्मिन्ननन्याधीनो दृष्टः। यथा रूपादिश्चाक्षुषत्वादौ। रूपादिर्हि पृथिव्यादौ स्वसम्बन्धाच्चाक्षुषत्वादि जनयन् स्वस्मिन्न रूपादिसम्बन्धाधीनश्चाक्षुषत्वादौ। अतोऽनुभूतिरात्मनः प्रकाशमानत्वे, प्रकाशत—इति व्यवहारे च स्वयमेव हेतुः। सेयं स्वयंप्रकाशानुभूतिर्नित्या च, प्रागभावाद्यभावात्। तदभावश्च स्वतःसिद्धत्वादेव। नह्यनुभूतेः स्वतःसिद्धायाः प्रागभावः स्वतोऽन्यतो वावगन्तुं शक्यते। अनुभूतिः स्वाभावमवगमयन्ती सती तावन्नावगमयति। तस्याः सत्त्वे विरोधादेव तदभावो नास्तीति कथं स्वाभावमवगमयति। एवमसत्यपि नावगमयति। अनुभूतिः स्वयमसती कथं स्वाभावे प्रमाणं भवेत्। नाप्यन्यतो-

---

नस्यापि मानसप्रत्यक्षस्यान्यमानसप्रत्यक्षग्राह्यत्वमित्येवमनवस्था स्यादिति भावः। अथ स्वयंप्रकाशत्वेऽनुमानमाह—**प्रयोगश्चेति**। **अनुभूतिरिति**। अनुभवः पक्षः। अनन्याधीनस्वधर्मत्वम्, अनन्याधीनस्वव्यवहारत्वं चेति साध्यद्वयम्। स्वसंबंधादर्थान्तरे तद्धर्महेतुत्वं, स्वसंबंधादर्थान्तरे तद्व्यवहारहेतुत्वं चेति क्रमेण हेतुद्वयम्। अनुभूतेः स्वधर्मः प्रकाशमानत्वम्। तच्च नान्याधीनम्। अनुभूतिसंबन्धेनैव घटादौ प्रकाशमानत्वरूपधर्मदर्शनेनानुभूतेस्तादृशधर्महेतुत्वात्। यथा रूपम्। तत्र हि रूपसंबंधेनैव घटादौ चाक्षुषत्वधर्मदर्शनेन रूपस्य तादृशधर्महेतुत्वं, स्वगतचाक्षुषत्वे च तस्य रूपस्यान्यरूपानधीनत्वं दृश्यते। एवमनुभूतेः स्वव्यवहारः 'प्रकाशते' इति। तत्रापि पूर्ववद्बोध्यम्। **तयोः**। धर्मव्यवहारयोः। **स्वस्मिन्निति**। अस्य चाक्षुषत्वादावित्यत्रान्वयः। रूपादिः स्वगतचाक्षुषत्वादावन्यरूपादिसंबन्धाधीनो नेत्यर्थः। अथ ज्ञातृज्ञेयनिरसनं ज्ञानस्य स्वप्रकाशत्वं च बौद्धपक्षेऽपि समानमिति तद्व्यावर्तकं ज्ञानस्य नित्यत्वं साधयति—**सेयमिति**। स्वयंप्रकाशेति हेतुगर्भं विशेषणम्। स्वयंप्रकाशत्वस्य नित्यत्वव्याप्यत्वात्। **स्वतःसिद्धत्वादेव**। स्वयंप्रकाशत्वादेव। **नहीति**। अनुभूतेः प्रागभावोऽनुभूत्यैवावगम्यतेऽन्येन साधनेन वा। प्रथमेऽपि विद्यमानयाऽनुभूत्याऽविद्यमानया वा। आद्ये आह—**अनुभूतिरिति**। **सती**। विद्यमाना। न हि विद्यमानं वस्तु तदानीमेव स्वाभावं बोधयतीति भावः। अन्त्ये आह—**एवमिति**। **असती**। अविद्यमाना। न ह्यविद्यमानं वस्तु कस्यापि ग्राहकं भवतीति भावः। द्वितीये आह—**नापीति**। यथा रूपग्राहकमेव चक्षुस्तदभावं ग्राहयति। न हि रूपाग्राहिणा

ऽवगन्तुं शक्यते। अनुभूतेरनन्यगोचरत्वात्। अस्याः प्रागभावं साधयत् प्रमाणमनुभूतिरियमिति विषयीकृत्य तदभावं साधयेत्। स्वतःसिद्धत्वेनेयमिति विषयीकारानर्हत्वात् तत्प्रागभावो नान्यतः शक्यावगमः। अतोऽस्याः प्रागभावाद्यभावादुत्पत्तिर्न शक्यते वक्तुमिति। उत्पत्तिप्रतिबद्धाश्चान्येऽपि भावविकारास्तस्या न सन्ति। अनुत्पन्नेयमनुभूतिरात्मनि नानात्वमपि न सहते। व्यापकविरुद्धोपलब्धेः। न ह्यनुत्पन्नं नानाभूतं दृष्टम्। भेदादीनामनुभाव्यत्वेन च रूपादेरिवानुभूतिधर्म्मत्वं न सम्भवति। अतोऽनुभूतेरनुभवस्वरूपत्वादेवान्योऽपि कश्चिदनुभाव्यो नास्या धर्म्मः। यतो निर्धूतनिखिलभेदा संवित् अत एव नास्याः स्वरूपातिरिक्त आश्रयो ज्ञाता नाम कश्चिदस्ती-

---

श्रोत्रेण क्वचिदपि रूपाभावो गृह्यते। तथात्रानुभूत्यभावग्राहकं साधनमनुभूतिग्राहकमस्त्येवेति वक्तव्यम्। तच्च पुरस्तादेव (पृ. ४३ पं. २) निराकृतमिति भावः। तदेवाह-**अस्या इति**। ननूत्पत्त्यभावेऽपि प्रागभावस्यैवानुभूतेरनित्यत्वं स्यादत आह-**उत्पत्तिप्रतिबद्धा इति**। उत्पत्तिसापेक्षा इत्यर्थः। 'उत्पत्तिप्रतिबन्धात्' इति पाठे उत्पत्त्यभावादित्यर्थः। **भावविकाराः**। जायतेऽस्ति वर्धते विपरिणमतेऽपक्षीयते नश्यतीत्येवंरूपाः षड् भावविकाराः। तत्रानुभूतौ प्रथमस्यैवाभावेनान्येऽपि न सन्तीत्यर्थः। प्रागभावे तु नैवम्। तस्याभावरूपत्वात्। एतेषां च भावविकारत्वात्। अथ बौद्धाभिमतमनुभूत्यनेकत्वं खण्डयति-**अनुत्पन्नेति**। **आत्मनि**। अनुभूतौ। **व्यापकेति**। नानात्वव्यापकोत्पत्तिविरुद्धानुत्पत्त्युपलब्धेरित्यर्थः। **न हीति**। मायावेदान्तिनां मते ब्रह्मव्यतिरिक्तस्य सर्वस्यासत्त्वेन न परमाणुषु व्यभिचारः। **भेदादीनामिति**। अनुभूतेर्नानात्वे हि तास्वनुभूतिषु मिथो भेदोऽवश्यं वाच्यः। स च न संभवति। रूपादीनामिव भेदस्याप्यनुभाव्यत्वेन तस्यानुभूतिधर्मत्वाभावात्। तथा च प्रयोगः। भेदादयो नानुभूतिधर्माः। अनुभाव्यत्वात्। रूपादिवदिति। **अन्योऽपि**। नित्यत्वैकत्वस्वयंप्रकाशत्वादिरपि धर्मो नास्तीत्यर्थः। पूर्वत्र तथोक्तिस्तु अनित्यत्वनानात्वपरप्रकाश्यत्वादिविरुद्धधर्मनिरासायैव। न तु तस्यास्तत्र नित्यत्वादिधर्मविधौ तात्पर्यमिति बोध्यम्। **यत इति**। सकलभेदनिषेधेन विजातीयभेदोऽपि निषिद्ध इति विजातीयभेदप्रतियो... त्वेन पराभिमतस्य ज्ञातुर्मिथ्यात्वेन न स आत्मा। अपि तु पर... च 'आत्मा आत्मा' इति यो लोके गीयते सोऽनुभूम...र्थमनाऽनुभूतिरेवात्मा। एव...

ति स्वप्रकाशरूपा सैवात्मा । अजडत्वाच्च । अनात्मत्वव्याप्तं जडत्वं संविदि व्यावर्त्तमानमनात्मत्वमपिहि संविदो व्यावर्त्तयति ।

ननु चाहं जानामीति ज्ञातृता प्रतीतिसिद्धा । मैवम् । सा भ्रान्तिसिद्धा । रजततेव शुक्तिशकलस्य । अनुभूतेः स्वात्मनि कर्तृत्वायोगात् । अतो मनुष्योऽहमित्यत्यन्तबहिर्भूतमनुष्यत्वादिविशिष्टपिण्डात्माभिमानवत् ज्ञातृत्वमप्यध्यस्तम् । ज्ञातृत्वं हि ज्ञानक्रियाकर्तृत्वम् । तच्च विक्रियात्मकं जडं विकारिद्रव्याहङ्कारग्रन्थिस्थमविक्रिये साक्षिणि चिन्मात्रात्मनि कथमिव सम्भवति । दृश्यधीनसिद्धित्वादेव रूपादेरिव कर्तृत्वादेर्नात्मधर्म्मत्वम् । सुषुप्तिमूर्छादावहंप्रत्ययाभावेऽप्यात्मानुभवदर्शनेन नात्मनोऽहंप्रत्ययगोचरत्वम् । कर्तृत्वेऽहंप्रत्ययगोचरत्वे चात्मनोऽभ्युपगम्यमाने देहस्येव जडत्वपराक्त्वा-

---

तिस्वरूप एव नानुभूत्याश्रय इति भावः । तत्रैव हेत्वन्तरमाह—**अजडत्वाच्चेति । व्याप्तमिति ।** कर्तरिक्तः । अनात्मत्वस्य व्यापकमित्यर्थः । तथा चानुभूतौ व्यापकस्य जडत्वस्याभावाद्व्याप्यस्यानात्मत्वस्याप्यभाव इत्यात्मत्वं सिद्धमित्यर्थः । **संविदि ।** अनुभूतौ ।

प्रतीतिसिद्धेति । तथा च ज्ञातुर्मिथ्यात्वं न संभवतीति भावः । किमनुभूतिस्वरूपस्यात्मनो ज्ञातृत्वं ब्रूषेऽनुभूतिव्यतिरिक्तस्य वा । नाद्य इत्याह—**अनुभूतेरिति । स्वात्मनि** । अनुभूतौ । स्वनिरूपितकर्तृत्वस्य स्वस्मिन्नेवासंभवादिति भावः । नान्त्यः । अनुभूतिव्यतिरिक्तस्यात्मनः प्रागेव निरस्तत्वात् । पक्षद्वयेऽपि कर्तृत्वायोगमुपपादयति —**ज्ञातृत्वं हीति । विक्रियात्मकमिति** । क्रियाया उत्पत्तिविनाशयोगात्तदाश्रयत्वमपि कादाचित्कमिति तद्विकाररूपमित्यर्थः । **जडं** ज्ञेयम् । अत एव विकारिद्रव्याहङ्कारग्रन्थिस्थम् । अहंकारस्यापि विकारित्वाज्ज्ञेयत्वाच्च । द्रव्यशब्देन ज्ञेयत्वं सूच्यते । द्रव्यत्वस्य ज्ञेयत्वव्याप्यत्वात् । आत्मनश्च द्रव्यत्वानभ्युपगमात् । **साक्षिणीति** । साक्षित्वं च न ज्ञातृत्वम् । किं तु अविद्यानुभवस्वरूपत्वमेव । **चिन्मात्रात्मनि** । स्वयंप्रकाशे । **दृशीति** । दृशिक्रियाधीना सिद्धिर्यस्य तत्वादित्यर्थः । अनेन ' कर्तृत्वादिर्नात्मधर्मः दृशिक्रियाधीनसिद्धित्वात् रूपादिवत्' इत्यनुमानं दर्शितम् । अहमर्थो ह्यात्मा । तेन समानाधिकरणतया प्रतीतो ज्ञाता आत्मा स्यादित्यत्राह—**सुषुप्तीति । अहंप्रत्ययाभावे इति** । ' नाहं खल्वयमेवं संप्रत्यात्मानं जानाति अयमहमस्मीति ' (छां. ८।११।१) इति श्रुतेरिति भावः । **जडत्वेति** । जडत्वं ज्ञेयत्वम् । पराक्त्वं

नात्मत्वादिप्रसङ्गो दुष्परिहरः। अहंप्रत्ययगोचरात्कर्तृतया प्रसिद्धाद्देहात् क्रियाफलस्य स्वर्गादेर्भोक्तुरात्मनोऽन्यत्वं प्रामाणिकानां प्रसिद्धमेव। तथाहमर्थात् ज्ञातुरपि विलक्षणः साक्षी प्रत्यगात्मेति प्रतिपत्तव्यम्। एवमविक्रियानुभवस्वरूपस्यैवाभिव्यञ्जको जडोऽप्यहङ्कारः स्वाश्रयतया तमभिव्यनक्ति। आत्मस्थतयाभिव्यङ्ग्याभिव्यञ्जनमभिव्यञ्जकानां स्वभावः। दर्पणजलखण्डादिर्हि मुखचन्द्रबिम्बगोत्वादिकमात्मस्थतयाभिव्यनक्ति। तत्कृतोऽयं जानाम्यहमिति भ्रमः। स्वप्रकाशाया अनुभूतेः कथमिव तदभिव्यङ्ग्यजडरूपाहङ्कारेणाभिव्यङ्ग्यत्वमिति मा वोचः। रविकरनिकराभिव्यङ्ग्यकरतलस्य तदभिव्यञ्जकत्वोपदर्शनात्। जालकरन्ध्रनिष्क्रान्तद्युमणिकिरणानां तदभिव्यङ्ग्येनापि करतलेन स्फुटतरप्रकाशो हि दृष्टचरः। यतोऽहं जानामीति ज्ञातायमहमर्थः चिन्मात्रात्मनो न पारमार्थिको धर्म्मः, अत एव सुषुप्तिमुक्तयोर्नान्वेति। तत्र ह्यहमुल्लेखविगमेन स्वाभाविकानुभवमात्ररूपेणात्मावभासते। अत एव सुप्तोत्थितः कदाचिन्मामप्यहं न ज्ञातवानिति परामृशति। तस्मात् परमार्थतो निरस्तसमस्तभेदविकल्पनिर्वि-

---

परस्मै भासमानत्वम्। आत्मत्वं देहनियन्तृत्वेन व्यापकत्वम्। तदभावोऽनात्मत्वम्। आदिशब्देन क्षयिष्णुत्वादिसंग्रहः। जडत्वादिप्रसङ्गस्येष्टापत्तिं परिहरति—**अहंप्रत्ययेति। तत्क्रियाफलस्य**। देहकृतयागादिक्रियाफलभूतस्य। **प्रामाणिकानाम्**। चार्वाकातिरिक्तानाम्। स्वर्गादिभोक्तुरात्मत्वे सिद्धे ज्ञातैवात्मा स्यादित्यत्राह—**तथेति**। आत्मा हि शरीरातिरिक्तत्वेन प्रमाणबलादभ्युपगम्यते, तथा ज्ञातृव्यतिरिक्तत्वेनापि प्रमाणबलात्स्वीकार्यः। अहं जानामीति प्रत्ययस्तु भ्रम एवेति भावः। तत्र हेतुमाह—**एवमिति। स्वाश्रयतया**। स्वमाश्रयो यस्य तत्वेन। अहङ्कारः ज्ञानस्वरूपमात्मानं स्वनिष्ठत्वेनाभिव्यनक्तीत्यर्थः। **आत्मस्थतयेति**। अभिव्यञ्जकानामयं स्वभावो यदभिव्यङ्ग्यपदार्थानां स्वनिष्ठत्वेनाभिव्यञ्जनम्। यथा दर्पणादिः स्वनिष्ठत्वेनैव मुखादीनभिव्यनक्ति। तथाऽहङ्कारोऽपि स्वनिष्ठत्वेनैव ज्ञानस्वरूपमात्मानमभिव्यनक्ति। अतश्च युक्तोऽयं भ्रम इति भावः। गवादिसमुदायः खण्डपदार्थः। **स्वप्रकाशाया इति**। अनुभूतेः स्वप्रकाशत्वेन कथमितराभिव्यङ्ग्यत्वम्। कथं च जडस्याहङ्कारस्येतराभिव्यञ्जकत्वम्। कथंतरामनुभूत्याभिव्यङ्ग्यस्याहङ्कारस्य स्वाभिव्यञ्जकानुभूतिव्यञ्जकत्वमित्याशयः। करतलस्य किरणाभिव्यञ्जकत्वं क्व दृष्टमित्यत्राह—**जालेति**। एवं ज्ञातृत्वस्यापारमार्थिकत्वमुक्तम्। एतदेव परमार्थवस्तुभासनवेलायां ज्ञातृत्वानवभासप्रदर्शनेन द्रढयति—**यत इति**। महापूर्वपक्षमुपसंहरति—**तस्मादिति**

शेषाचिन्मात्रैकरसकूटस्थनित्यसंविदेव भ्रान्त्या ज्ञातृज्ञेयज्ञानरूपविविधविचित्रभेदा विवर्त्तत–इति तन्मूलभूताविद्यानिबर्हणाय नित्यशुद्धबुद्धमुक्तस्वभावब्रह्मात्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्त–इति ।

तदिदमौपनिषदपरमपुरुषवरणीयताहेतुगुणविशेषविरहिणामनादिपापवासनादूषिताशेषशेमुषीकाणामनधिगतपदवाक्यस्वरूपतदर्थयाथात्म्यप्रत्यक्षादिसकलप्रमाणवृत्ततत्तदितिकर्त्तव्यतारूपसमीचीनन्यायमार्गाणां विकल्पासहविविधकुतर्ककल्ककल्पितमिति न्यायानुगृहीतवाक्यप्रत्यक्षादिसकलप्रमाणवृत्तयाथात्म्यविद्भिरनादरणीयम् । तथाहि । निर्विशेषवस्तुवादिभिर्निर्विशेषे वस्तुनीदं प्रमाणमिति न शक्यते वक्तुम् । सविशेषवस्तुविषयत्वात्

कूटस्थत्वं निर्विकारत्वं सर्वाधिष्ठानत्वं वा । शुद्धमविद्यारहितम् । बुद्धं स्वयंप्रकाशम् । मुक्तं परमार्थतो भेददर्शनजन्मादिरहितम् । एवंविधब्रह्मात्मैकत्वज्ञानाय सर्वे वेदान्ता आरभ्यन्ते इत्यर्थः ।

अथ महापूर्वपक्षं खण्डयितुं सिद्धान्ती प्रतिजानीते–**तदिदमिति** । उपनिषत्प्रतिपादितः परमात्मा भक्तं वृणुते बुद्धियोगं ददाति तादृशवरणस्य हेतुभूताः ये भक्त्यादयो विशेषगुणास्तद्रहितानामित्यर्थः । मायावादिनो भक्तिरहिता इत्यभिप्रायः । तत्र हेतुगर्भं विशेषणमाह–**अनादीति** । **शेमुषी** । मोक्षोपयोगि ज्ञानम् । दूषितशेमुषीफलं सम्यग्ज्ञानाभावमाह–**अनधिगतेति** । प्रकृतिप्रत्ययप्रयोगेन पदत्वमिति पदस्वरूपम् । अनेकपदार्थसंसर्गविशेषाभिधायित्वं वाक्यस्वरूपम् । तदर्थयाथात्म्यं पदार्थवाक्यार्थतात्पर्यविषयत्वम् । प्रत्यक्षादिसकलप्रमाणैर्वृत्तं बोधनम् । आदिशब्देनानुमानादिसंग्रहः । सकलशब्देन प्रत्यक्षादिव्याप्यानां चाक्षुषादीनां संग्रहः । तेभ्यः प्रमाणेभ्य इति कर्तव्यतायाः रूपं स्वरूपनिश्चयः । समीचीनन्यायमार्गः समीचीनस्तत्तन्न्यायसंचारविषयः । एतत्सर्वमनधिगतमज्ञातं यैस्तेषामित्यर्थः । तर्हि कथं तैर्मायावादिभिर्ग्रन्थाः कृता इत्यत्राह–**विकल्पेति** । विविधा ये कुतर्काः प्रमाणविरुद्धाः मूलशैथिल्यमिथोविरोधादिदोषाक्रान्ताश्च तर्काः ते च विकल्पासहाः एवं वैवं वेति विचार्यमाणे सद्यो विनाशिन इत्यर्थः । ते एव कल्कमसारभूतं कुतर्ककल्पनापटुभिर्बौद्धैरात्तसारं कजीषमित्यर्थः । इतिर्हेतौ । **सविशेषेति** । विशेषरहितस्य वस्तुनो रूपाद्यभावान्न तत्र प्रत्यक्षं क्रमते । नापीतरप्रमाणानि । प्रत्यक्षमूलकत्वात्तेषाम् । ननु विशेषाणां विशेषरहितत्वान्न तेषां प्रमाणविषयत्वम् । विशेषानवगमाच्च सविशेषवस्तुन्यपि न प्र-

सर्वप्रमाणानाम् । यस्तु, स्वानुभवसिद्धमिति स्वगोष्ठीनिष्ठः समयः, सोऽप्यात्मसाक्षिकसविशेषानुभवादेव निरस्तः। इदमहमदर्शमिति केनचिद्विशेषेण विशिष्टविषयत्वात् सर्वेषामनुभवानाम् । सविशेषोऽप्यनुभूयमानोऽनुभवः केनचिद् युक्त्याभासेन निर्विशेष—इति निष्कृष्यमाणः सत्तातिरेकिभिः स्वासाधारणैः स्वभावविशेषैर्निष्क्रष्टव्य—इति निष्कर्षहेतुभूतैः सत्तातिरेकिभिः स्वासाधारणैः स्वभावविशेषैः सविशेष एवावतिष्ठते । अतः कैश्चिद्विशेषैर्विशिष्टस्यैव वस्तुनोऽन्ये विशेषा निरस्यन्त—इति न क्वचिन्निर्विशेषवस्तुसिद्धिः । धियो हि धीत्वं, स्वयंप्रकाशता च । ज्ञातुर्विषयप्रकाशनस्वभावतयोपलब्धेः । स्वापमदमूर्छासु च सविशेष एवानुभव—इति स्वावसरे निपुणतरमुपपादयिष्याम: । स्वाभ्युपगताश्च

माणप्रवृत्तिः स्यादिति चेन्न । विशेषाणामाश्रयद्वारा सविशेषत्वात् । एवं च यद्वस्तु कस्यचिद्धर्मभूतं कस्यचिद्धर्मिभूतं वा न भवति तत्प्रमाणशून्यमिति फलितम् । अतो मायावादिनां मते ब्रह्मणस्तथात्वापत्तिर्दोष इति भावः । ननु न वयं प्रमाणान्तरेण निर्विशेषवस्तुसिद्धिमभ्युपगच्छामः । किंतु स्वानुभवसिद्धमेव तदिति चेत्तत्राह—**यस्त्विति** । **स्वेति** । स्वगोष्ठीषु स्थितः सङ्केत इत्यर्थः । अनेन परवाद्यसंमतत्वं ध्वन्यते । आत्मसाक्षिकानुभवस्य सविशेषत्वं दर्शयति—**इदमहमिति** । इदमित्यनेनानुभवस्य कर्मरूपविशेषवत्त्वं, अहमित्यनेन कर्तृरूपविशेषवत्त्वं, अदर्शमित्यनेनापरोक्षत्वातीतत्वरूपविशेषवत्त्वं च दर्शितम् । ननु न वयमिदमहमदर्शमिति प्रतीतिमपलपामः । किंतु सा तर्कव्यवस्थापितविषया निर्विशेषे प्रमाणमिति चेत्तत्राह—**सविशेषोऽपीति** । **स्वभावविशेषैः** । धर्मविशेषैः । निर्विशेषवस्तुवादिनस्तव निर्विशेषत्वसाधकत्वेनाभिमता धर्मा अवर्जनीया एवेति भावः । **कैश्चिद्विशेषैः** । स्वासाधारणैः प्रामाणिकैर्धर्मैः । **अन्ये विशेषाः** । अप्रामाणिका रूपादयो धर्माः । न तु सर्वे धर्माः । यथाऽग्न्यभाववद्वृत्तिर्धूमः पर्वतादावग्न्यभावमेव निवर्तयति न तु स्वं नाप्याकारान्तरं तद्वदिति भावः । किं च त्वदङ्गीकृतैर्धीत्वादिधर्मैरपि ज्ञानस्य सविशेषत्वमेव सिध्यतीत्याह—**धिय इति** । धीत्वं विषयप्रकाशकत्वं साधनतया त्वयोपन्यस्तम् । स्वप्रकाशतारूपधर्मश्च साध्यतयोपन्यस्तः । **ज्ञातुरिति** । ज्ञातुर्यत् विषयप्रकाशनं अयमेव धियः स्वभाव इत्यर्थः । ननु नोक्तधर्मविशिष्टस्य लौकिकज्ञानस्य निर्विशेषत्वं वदामः । किं तु स्वापाद्यवस्थास्वनुभूतस्यात्मभूतस्यैवेति चेत्तत्राह—**स्वापेति** । **अनुभवः** । आत्मस्फुरणम् । **स्वावसरे** । अहमर्थस्यैवात्मत्वसमर्थने । **निपुणतरम्** ।

नित्यत्वादयो ह्यनेकविशेषाः सन्त्येव । ते च न वस्तुमात्रमिति शक्योपपादनाः । वस्तुमात्राभ्युपगमे सत्यपि विधाभेदविवाददर्शनात् । स्वाभिमततद्विधाभेदैश्च स्वमतोपपादनात् । अतः प्रामाणिकविशेषैर्विशिष्टमेव वस्त्विति वक्तव्यम् ।

शब्दस्य तु विशेषेण सविशेष एव वस्तुन्यभिधानसामर्थ्यम् । पदवाक्यरूपेण प्रवृत्तेः । प्रकृतिप्रत्यययोगेन हि पदत्वम् । प्रकृतिप्रत्यययोरर्थभेदेन पदस्यैव विशिष्टार्थप्रतिपादनमवर्ज्जनीयम् । पदभेदश्चार्थभेदनिबन्धनः । पदसङ्घातरूपस्य वाक्यस्यानेकपदार्थसंसर्गविशेषाभिधायित्वेन निर्विशेषवस्तुप्रतिपादनासामर्थ्यात् न निर्विशेषवस्तुनि शब्दः प्रमाणम् ।

परदर्शितयुक्त्यैव । तत्र ' सुखमहमस्वाप्सं मामप्यहं न ज्ञातवान् ' इति त्वद्दर्शिताकार एव विशेष इति भावः । किं चाहमिति भासमानस्यात्मस्वरूपभूतज्ञानस्य प्रत्यक्त्वादिधर्मैः सविशेषत्वमग्रे वक्ष्यते । **नित्यत्वादय इति** । आदिपदेन स्वयंप्रकाशत्वैकत्वानन्दत्वादिधर्मसंग्रहः । **न शक्योपपादनाः** । वक्तुमशक्याः । **विधाभेदः** । प्रकारभेदः । **स्वाभिमतेति** । बौद्धैरात्मनः क्षणिकत्वमुक्तं त्वया तु नित्यत्वम् । वैशेषिकादिभिश्च जडत्वं बहुत्वं चोक्तं त्वया तु स्वप्रकाशत्वमेकत्वं च । तथा च तैस्सह विवदता त्वया तद्विरुद्धमात्मनि किंचित्साध्यते न वा । आद्ये यत्साध्यते तेनैवात्मनः सविशेषत्वम् । द्वितीये तव केवलं बहुप्रलापित्वापत्तिः । निर्विशेषत्वमेव साध्यते चेन्निर्विशेषत्वरूपधर्मेणैव सविशेषत्वं दुर्वारमिति भावः ।

अथ पूर्वप्रतिज्ञातं प्रमाणानां सविशेषविषयत्वं वक्तुमारभते—**शब्दस्येति** । शब्दस्य हि द्विधा प्रवृत्तिः । पदरूपेण वाक्यरूपेण च । तत्राद्यां विवृणोति—**प्रकृतीति** । यथा पाचक इत्यत्र पच् इति प्रकृतेः पचनमर्थः । ण्वुल्प्रत्ययस्य च कर्तृरूपोर्थः । तयोः संबंधेन पाचकशब्दात्पचनकर्तृत्वं यद् बुध्यते स एव विशेष इति सविशेषमेव वस्तु पाचकशब्देनाभिधीयते । **पदस्यैवेति** । आदौ पदमेव सविशेषवस्तुप्रतिपादकं भवति किमुत वाक्यमित्यनेन सूच्यते । द्वितीयां विवृणोति—**पदभेद इति** । तत्तत्पदार्थसंसर्गो हि वाक्यार्थ इति सविशेषमेव वस्तु वाक्येन प्रतिपाद्यते इति भावः ।

प्रत्यक्षस्य निर्विकल्पकसविकल्पकभेदभिन्नस्य न निर्विशेषवस्तुनि प्रमाणभावः। सविकल्पकं जात्याद्यनेकपदार्थविशिष्टविषयत्वादेव सविशेषविषयम्। निर्विकल्पकमपि सविशेषविषयमेव। सविकल्पके स्वस्मिन्ननुभूतपदार्थविशिष्टप्रतिसन्धानहेतुत्वात्। निर्विकल्पकं नाम केनचिद्विशेषेण वियुक्तस्य ग्रहणं,न सर्वविशेषरहितस्य। तथाभूतस्य कदाचिदपि ग्रहणादर्शनात्। अनुपपत्तेश्च। केनचिद्विशेषेण इदमित्थमिति हि सर्वा प्रतीतिरुपजायते। त्रिकोणसास्नादिसंस्थानविशेषेण विना कस्यचिदपि पदार्थस्य ग्रहणायोगात्। अतो निर्विकल्पकमेकजातीयद्रव्येषु प्रथमपिण्डग्रहणम्। द्वितीयादिपिण्डग्रहणं सविकल्पकमित्युच्यते। तत्र प्रथमपिण्डग्रहणे गोत्वादेरनुवृत्ताकारता न प्रतीयते। दितीयादिपिण्डग्रहणेष्वेवानुवृत्तिप्रतीतिः। प्रथमप्रतीत्यनुसंहितवस्तुसंस्थानरूपगोत्वादेरनुवृत्तिधर्म्मविशिष्टत्वं द्वितीयादिपिण्डग्र-

---

प्रत्यक्षप्रमाणस्य सविशेषविषयत्वं दर्शयति—**प्रत्यक्षस्येति। स्वस्मिन्निति**। स्वस्मिन्निर्विकल्पकेऽनुभूतो यो घटत्वादिपदार्थस्तद्विशिष्टघटादेः सविकल्पके यदनुसंधानं भवति तद्धेतुत्वं निर्विकल्पकस्येत्यर्थः। तथा च यद्याश्रयद्वारापि निर्विशेषं (निर्धर्मिकं) वस्तु निर्विकल्पकज्ञानविषयो भवेत्तर्हि कथं तद्विशिष्टत्वेन सविकल्पके प्रतिसंधानं भवेत्। अथ निर्विशेषमित्यस्य निर्धर्मकमित्येवार्थस्तथापि दोष एव। निर्विकल्पकज्ञानविषयीभूतं घटत्वाद्यपि इदमित्थमित्याकारेणैव तत्र तत्र प्रतीयते इति सविशेषमेव तत्। निर्धर्मके वस्तुनीत्थंताया असम्भवात्। इदं किंचिदिति निर्विकल्पकज्ञानविषयीभूतमपि वस्तु सविशेषमेव। विशेषरहितस्येदंतया बोधासंभवात्। **त्रिकोणं** गोमुखम्। **सास्ना** गोगलकम्बलः। **संस्थानम**वयवरचना। ननु निर्विकल्पकेऽपि सविकल्पकवत्त्रिकोणसास्नादिसंस्थानविशेषप्रतीतौ किं तयोर्भेदकमिति चेत्तत्राह—**अत इति**। अनेकगोव्यक्तिषुमध्ये प्रथमत एव गोव्यक्तेर्यत् ज्ञानं जायते तन्निर्विकल्पकम्। तत्र त्रिकोणसास्नादिसंस्थानरूपगोत्वस्य ज्ञानेपि तस्य गोत्वस्यानुवृत्तत्वेन तत्र ज्ञानाभावात्। अनुवृत्तत्वं चैकरूपेणानेकत्रावस्थितत्वम्। तदनन्तरं गोव्यक्तेर्यत् ज्ञानं जायते तत्सविकल्पकम्। तदानीं तादृशगोत्वस्यानुवृत्तत्वेन ज्ञातत्वात्। अनुवृत्तत्वेन ज्ञाने च प्राथमिकज्ञानजन्यसंस्कारस्य हेतुत्वात्। एवं च गोत्वादेरनुवृत्तत्वेन प्रतीतिरेव सविकल्पकशब्दप्रवृत्तिनिमित्तम्, तस्य तत्वेनाप्रतीतिरेव च निर्विकल्पकशब्दप्रवृत्तिनिमित्तमिति बोध्यम्। **पिण्डः**। व्यक्तिः।

हणावसेयमिति द्वितीयादिग्रहणस्य सविकल्पकत्वम् । सास्नादिवस्तुसंस्थानरूपगोत्वादेरनुवृत्तिः न प्रथमपिण्डग्रहणे गृह्यत–इति प्रथमपिण्डग्रहणस्य निर्विकल्पकत्वम् । न पुनः संस्थानरूपजात्यादेरग्रहणात् । संस्थानरूपजात्यादेरपि ऐन्द्रियकत्वाविशेषात् । संस्थानेन विना संस्थानिनः प्रतीत्यनुपपत्तेश्च प्रथमपिण्डग्रहणेऽपि ससंस्थानमेव वस्त्वित्थमिति गृह्यते । अतो द्वितीयादिपिण्डग्रहणेषु गोत्वादेरनुवृत्तिधर्म्मविशिष्टता संस्थानिवत् संस्थानवच्च सर्वदैव गृह्यत–इति तेषु सविकल्पकत्वमेव । अतः प्रत्यक्षस्य कदाचिदपि न निर्विशेषविषयत्वम् ।

अत एव सर्वत्र भिन्नाभिन्नत्वमपि निरस्तम् । इदमित्थमिति प्रतीताविदमित्थंभावयोरैक्यं कथमिव प्रत्येतुं शक्यते । अत्रेत्थंभावः सास्नादिसंस्थानविशेषस्तद्विशेष्यं द्रव्यमिदमंश–इत्यनयोरैक्यं प्रतीतिपराहतमेव । तथाहि । प्रथममेव वस्तु प्रतीयमानं सकलेतरव्यावृत्तमेव प्रतीयते । व्यावृत्तिश्च गोत्वादिसंस्थानविशेषविशिष्टतया इदमित्थमिति प्रतीतिः ।

ऐन्द्रियकत्वाविशेषादिति । ऐन्द्रियकत्वमिन्द्रियजन्यज्ञानविषयत्वम् । एवं च निर्विकल्पके गोव्यक्तेरिव गोत्वजातेरपि ग्रहणं दुर्वारमितिभावः । **संस्थानिवदिति** । यथा संस्थानिरूपा व्यक्तिः सर्वज्ञानेषु गृह्यते यथा वा व्यक्तिधर्मः संस्थानं सर्वज्ञानेषु गृह्यते तथैवानुवृत्तिरूपः संस्थानधर्मोऽपि द्वितीयादिसर्वज्ञानेषु गृह्यत एवेत्यर्थः ।

प्रसंगाद्भेदाभेदवादं निराकरोति–**अत एवेति** । **सर्वत्रेति** । सजातीयव्यक्तिद्वयमध्ये जातिव्यक्तिमध्ये गुणगुणिमध्ये क्रियातदाश्रयमध्ये कार्यकारणमध्ये चेत्यर्थः । व्यक्तिद्वयमध्ये जात्यात्मनाऽभेदो व्यक्त्यात्मना च भेदः । न चाभेदस्य जातिनिष्ठत्वाद्व्यक्त्योरभेदः कथमिति वाच्यम् । जातिव्यक्त्योरभेदस्याप्यङ्गीकारेण जातिनिष्ठस्यापि व्यक्तिनिष्ठत्वात् । जातिव्यक्तिमध्ये भेदस्तु प्रसिद्ध एव । अभेदस्तु व्यक्तेः प्रथमतो ग्रहणे तयोरभेदेन प्रतीत्योपपादनीय इति तेषामाशयः । तत्र जातिव्यक्त्योर्भेदेनैव प्रतीतेरभेदस्य प्रतीतिविरोधं दर्शयति–**इदमित्थमिति** । इदम्भावो व्यक्त्यंशः । इत्थम्भावो जात्यंशः । **तद्विशेष्यमिति** । सास्नादिसंस्थानविशेषरूपजातेर्विशेष्यभूता व्यक्तिरित्यर्थः । तथा चाभेदे विशेषणविशेष्यभावासम्भवात्प्रथमज्ञानेऽपि जातिव्यक्त्योर्भेदेनैव प्रतीतिरिति भावः । **व्यावृत्तमेवेति** । तथा च व्यावृत्तिप्रयोजकीभूतधर्मस्य जातेस्तत्र विशेषणतया भानमावश्यकमित्याशयः । **व्यावृत्तिश्चेति** । गो-

सर्वत्र विशेषणविशेष्यभावप्रतिपत्तौ तयोरत्यन्तभेदः प्रतीत्यैव सुव्यक्तः। तत्र दण्डकुण्डलादयः पृथक्संस्थानसंस्थिताः स्वनिष्ठाश्च कदाचित् क्वचिद् द्रव्यान्तरविशेषणतयावतिष्ठन्ते। गोत्वादयस्तु द्रव्यसंस्थानतयैव पदार्थभूताः सन्तो द्रव्यविशेषणतयावस्थिताः। उभयत्र विशेषणविशेष्यभावः समानः। अत एव तयोर्भेदप्रतिपत्तिश्च। इयांस्तु विशेषः। पृथक्स्थितिप्रतिपत्तियोग्या दण्डादयः, गोत्वादयस्तु नियमेन तदनर्हा इति। अतो 'वस्तुविरोधः प्रतीतिपराहतः'—इति प्रतीतिप्रकारनिन्हवादेवोच्यते। प्रतीतिप्रकारो हि इदमित्थमित्येव सर्वसम्मतः। तदेतत् सूत्रकारेण, 'नैकस्मिन्न सम्भवात्' (ब्र. सू. २।२।३१) इति सुव्यक्तमुपपादितम्। अतः प्रत्यक्षस्य सविशेषविषयत्वेन प्रत्यक्षादिदृष्टसम्बन्धविशिष्टविषयत्वादनुमानमपि सविशेषविषयमेव। प्रमाणसंख्याविवादेऽपि सर्वाभ्युपगतप्रमाणाना-

---

त्वादिसंस्थानविशेषविशिष्टतया इत्थमिति प्रतीतेर्व्यावृत्तिश्च निश्चीयते इत्यर्थः। **सर्वत्रेति**। एवं च यथा मनुष्यविशेषणीभूता दण्डकुण्डलादयो मनुष्याद्भिन्नास्तथैव जातिरपि व्यक्तेः सकाशाद्भिन्नेति भावः। ननु दण्डतद्वतोरिव जातिव्यक्त्योरपि भेदः स्याच्चेत्तत्रैव कुतः सहोपलम्भनियमो न दण्डतद्वतोरित्यत्राह—**तत्रेति**। **पृथगिति**। विशेष्यभूतमनुष्यादिभ्यः पृथगवयवरचनया स्थिता इत्यर्थः। **द्रव्यसंस्थानतयैवेति**। एतेन व्यक्त्यपेक्षया जातेरपृथक्सिद्धत्वं सूचितम्। एतदेव च सहोपलम्भनियमप्रयोजकं नत्वभेद इत्याशयः। **प्रतिपत्तिः**। ज्ञानम्। पृथक् स्थितेः पृथग् ज्ञानस्य च योग्या इत्यर्थः। **अत इति**। 'वस्तुविरोधः प्रतीतिपराहतः' इति हि भेदाभेदवादिनो वदन्ति। यद्यपि भेदरूपवस्तुनोऽभेदरूपस्य वस्तुनश्चैकत्र विरोधस्तथापि स त्याज्यः। लोके भेदाभेदयोरेकत्र प्रतीतेः। 'न हि दृष्टेऽनुपपन्नं नाम' इति न्यायादिति तस्यार्थः। परं त्वेतद्वास्तविकप्रतीतिप्रकारमपलप्यैव तैरुक्तमिति भावः। **नैकस्मिन्निति**। जैनमतं नोपपद्यते। एकस्मिन्वस्तुन्यस्तित्वनास्तित्वादेर्विरुद्धस्य छायातपवद्युगपदसम्भवादिति तत्सूत्रार्थः। **प्रत्यक्षादीति**। प्रत्यक्षादिदृष्टधूमादिसम्बन्धविशिष्टाग्न्यादिविषयत्वादित्यर्थः। **प्रमाणसंख्येति**। प्रत्यक्षमेकमेव प्रमाणमिति चार्वाकाः। अनुमितिरपीति काणादबौद्धौ। उपमितिरपीति नैयायिकैकदेशिनः। शब्दोऽपीति नैयायिकाः। अर्थापत्तिरपीति प्राभाकराः। अनुपलब्धिरपीति भाट्टवेदान्तिनौ। सम्भवैतिह्यकावपीति पौराणिकाः। चेष्टापीति तान्त्रिकाः। इत्थं प्रमाणसंख्याविवादेऽपि प्रमेयविषये न विवादः। सर्वैरपि प्रायशः स्वस्वाभ्युपगतप्रमाणेष्ववातिरिक्त

मयमेव विषय—इति न केनापि प्रमाणेन निर्विशेषवस्तुसिद्धिः । वस्तुगतस्वभावविशेषैस्तदेव वस्तु निर्विशेषमिति वदन् जननीवन्ध्यात्वप्रतिज्ञावत् स्ववाग्विरोधित्वमपि न जानाति ।

यत्तु, प्रत्यक्षं सन्मात्रग्राहित्वेन न भेदविषयं, भेदश्च विकल्पासहत्वात् दुर्निरूप—इत्युक्तम् (पृ. ३८ पं. ७)। तदपि जात्यादिविशिष्टस्यैव वस्तुनः प्रत्यक्षाविषयत्वात् जात्यादेरेव प्रतियोग्यपेक्षया वस्तुनः स्वस्य च भेदव्यवहारहेतुत्वाच्च दूरोत्सारितम् । संवेदनवद्रूपादिवच्च परत्र व्यवहारविशेषहेतोः स्वस्मिन्नपि तद्व्यवहारहेतुत्वं युष्माभिरभ्युपेतं भेदस्यापि सम्भवत्येव । अत एव नानवस्थान्योन्याश्रयणञ्च । एकक्षणवर्तित्वेऽपि प्रत्यक्षज्ञानस्य तस्मिन्नेव क्षणे वस्तुभेदरूपतत्संस्थानगोत्वादेर्गृहीतत्वात् क्षणान्तरग्राह्यं न किञ्चिदिह तिष्ठति ।

अपि च, सन्मात्रग्राहित्वे घटोऽस्ति पटोऽस्तीति विशिष्टविषया प्रतिपत्तिर्विरुध्यते । यदि च, सन्मात्रातिरेकिवस्तुसंस्थानरूपजात्यादिलक्षणो भेदः प्रत्यक्षेण न गृहीतः, किमित्यश्वार्थी महिषदर्शनेन निवर्तते । सर्वासु प्रतिपत्तिषु सन्मात्रमेव विषयश्चेत्, तत्प्रतिपत्तिविषयसहचारिणः सर्वे शब्दा एकैकप्रतिपत्तिषु किमिति न स्मर्यन्ते । किञ्च, अश्वे हस्तिनि

प्रमाणान्तर्भावस्योक्तत्वात् । **वस्तुगतेति** । सविशेषत्वबाधकतया परोक्तयुक्त्यभ्युपगमेऽपि युक्तिरूपविशेषैः सविशेषत्वमवर्जनीयमिति भावः ।

जात्यादिविशिष्टस्यैवेति । उपपादितमेतत् । एतेन प्रत्यक्षस्य सन्मात्रग्राहित्वं निरस्तम् । **जात्यादेरेवेति** । वस्तुनो घटादिव्यक्तेर्यः पटादिप्रतियोग्यपेक्षया भेदव्यवहारः तथा अवयवसंस्थानरूपज्यात्यादेरेव भेदस्वरूपत्वेन स्वस्य जात्यादेर्यः पटाद्यवयवसंस्थानप्रतियोगिकभेदव्यवहारस्तद्धेतुत्वं जात्यादेरेव । तादृशजात्यादिविशिष्टस्यैव च प्रत्यक्षविषयत्वमिति भेदस्य प्रत्यक्षविषयत्वमर्थात्सिद्धमेवेति भावः । **नानवस्थेति** । भेदस्य दीपवत्स्वस्यैव स्वव्यवहारहेतुत्वेन भेदनिष्ठान्यभेदाङ्गीकारे प्रमाणाभावेन न पूर्वपक्ष्युक्ता—(पृ. ३९ पं. १४) नवस्थादोषः । तथा अवयवसंस्थानरूपजात्यादेरेव भेदस्वरूपत्वेन जात्यादिधर्मविशिष्टवस्तुग्रहणमेव भेदग्रहणमिति नान्योन्याश्रयदोष इत्याशयः ।

च संवेदनयोरेकविषयत्वेनोपरितनस्य गृहीतग्राहित्वात् विशेषाभावाच्च स्मृतिवैलक्षण्यं न स्यात् । प्रतिसंवेदनं विशेषाभ्युपगमे प्रत्यक्षस्य विशिष्टार्थविषयत्वमेवाभ्युपगतं भवति । सर्वेषां संवेदनानामेकविषयतायामेकेनैव संवेदनेनाशेषग्रहणादन्धबाधिराद्यभावश्च प्रसज्येत ।

न च, चक्षुषा सन्मात्रं गृह्यते । तस्य रूपरूपिरूपैकार्थसमवेतपदार्थग्राहित्वात् । नापि त्वचा । स्पर्शवद्वस्तुविषयत्वात् । श्रोत्रादीन्यपि न सन्मात्रविषयाणि । किन्तु शब्दरसगन्धलक्षणविशेषविषयाण्येव । अतः सन्मात्रस्य च ग्राहकं न किञ्चिदिह दृश्यते । निर्विशेषसन्मात्रस्य च प्रत्यक्षेणैव ग्रहणे तद्विषयागमस्य प्राप्तविषयत्वेनानुवादकत्वमेव स्यात् । सन्मात्रब्रह्मणः प्रमेयभावश्च । ततो जडत्वनाशित्वादयस्त्वयैवोक्ताः । अतो वस्तुसंस्थानरूपजात्यादिलक्षणभेदविशिष्टविषयमेव प्रत्यक्षम् । संस्थानातिरेकिणोऽनेकेष्वेकाकारबुद्धिबोध्यस्यादर्शनात् तावतैव गोत्वादिजातिव्यवहारोपपत्तेरतिरेकवादेऽपि संस्थानस्य सम्प्रतिपन्नत्वाच्च संस्थानमेव जातिः । संस्थानं नाम स्वासाधारणरूपमिति यथावस्तु संस्थानमनुसन्धेयम् ।

उपरितनस्येति । अश्वज्ञानानन्तरं जायमानस्य हस्तिज्ञानस्य पूर्वज्ञानगृहीतविषयातिरिक्तविषयाग्राहित्वप्रसक्तौ पूर्वज्ञानजन्यसंस्कारविलक्षणसंस्कारानुत्पत्तिरिति स्मृतिवैलक्षण्यं न स्यात् । **विशेषाभावाच्चेति ।** धारावाहिकस्थले चित्रदर्शनादौ ज्ञानानामेकविषयत्वेपि स्मृतिवैलक्षण्यप्रयोजकं प्रतिक्षणं विशेषदर्शनं भवति, तदप्यत्र नास्ति । भवन्मते प्रत्यक्षस्य सन्मात्रग्राहित्वादिति भावः ।

रूपरूपीति । रूपं शुक्लादि, रूपिणो घटादयः, रूपेण सहैकस्मिन्घटादिरूपेर्थे समवेताश्च ये पटाभावादयः एतत्त्रितयान्यतमग्राहित्वादित्यर्थः । **श्रोत्रादीनीति ।** आदिना जिह्वाघ्राणयोः संग्रहः । **अनुवादकत्वमेव स्यादिति ।** तच्चानिष्टम् । 'शास्त्रं ह्यप्राप्तविषयतयार्थवत् । अतएव भेदस्य लोकसिद्धत्वात्तद्विषयकत्वं शास्त्रस्य' इति तेषामेवोक्तिः । **प्रमेयभावश्चेति ।** प्रमेयत्वं च प्राप्नोतीत्यर्थः । सति हि तस्मिंस्तद्व्यापकजडत्वादिधर्मप्रसङ्गः । **अत इति ।** वस्तुसंस्थानमेव जातिर्जातिरेव च भेद इत्याशयः । तत्र संस्थानमेव जातिरित्युपपादयति—**संस्थानातिरेकिण इति ।** **संप्रतिपन्नत्वाच्च ।** स्वीकृतत्वाच्च । **स्वासाधारणेति ।** स्वस्य घटादेरसाधारणं यत्कम्बुग्रीवादिमत्वं रूपं तदेव तस्य संस्थानम् । न तु द्रव्यत्वम् । तस्य घटसाधारणरूप-

जातिग्रहणेनैव भिन्न–इति व्यवहारसम्भवात् पदार्थान्तरादर्शनादर्थान्तरवादिनाप्यभ्युपगतत्वाच्च गोत्वादिरेव भेदः । ननु च, जात्यादिरेव भेदश्चेत्, तस्मिन् गृहीते तद्व्यवहारवत् भेदव्यवहारोऽपि स्यात् । सत्यम् । भेदश्च व्यवह्रियत एव, गोत्वादिव्यवहारात् । गोत्वादिरेव हि सकलेतरस्य व्यावृत्तिः । गोत्वादौ गृहीते सकलेतरसजातीयबुद्धिव्यवहारयोर्निवृत्तेः । भेदग्रहणेनैव ह्यभेदनिवृत्तिः । अयमस्माद्भिन्न–इति तु व्यवहारे प्रतियोगिनिर्देशस्य तदपेक्षत्वात् प्रतियोग्यपेक्षया भिन्न–इति व्यवहार–इत्युक्तम् ।

यत् पुनः, घटादीनां विशेषाणां व्यावर्तमानत्वेनापारमार्थ्यमुक्तम् (पृ. ४० पं. ५) । तदनालोचितबाध्यबाधकभावव्यावृत्त्यनुवृत्तिविशेषस्य भ्रान्तिप्रकल्पितम् । द्वयोर्ज्ञानयोर्हि विरोधे बाध्यबाधकभावो, बाधितस्यैव व्यावृत्तिः । अत घटपटादिषु देशकालभेदेन विरोध एव नास्ति, यस्मिन देशे यस्मिन् काले यस्य सद्भावः प्रतिपन्नस्तस्मिन् देशे तस्मिन् काले तस्याभावः प्रतिपन्नश्चेत्, तत्र विरोधाद्बलवतो बाधकत्वम्, बाधि

त्वात् । अथ जातिरेव भेद इत्युपपादयति—**जातिग्रहणेनेति** । न च जातेः प्रतियोगिनिरपेक्षत्वेन भेदस्य च प्रतियोगिसापेक्षत्वेन वैषम्यात् कथं तयोरैक्यमिति वाच्यम् । ईदृशवैषम्यस्याप्रयोजकत्वात् । अन्यथा घटाद्यभावाभावस्य घटादिस्वरूपत्वानापत्तावभावानामनवस्था दुर्वारा स्यादिति भावः । दर्शनं च नेत्याह—**पदार्थेति** । ननु तर्हि शशशृङ्गादिवत्तस्य तुच्छत्वमेव स्यादित्यत आह—**अर्थान्तरवादिनेति** । इतरेतराभावरूपो भेदोऽप्यस्तीतिवदतेत्यर्थः । **गोत्वादाविति** । पशुत्वेन गोसजातीया ये महिषादयस्तद्बुद्धिस्तद्व्यवहारश्च संस्थानरूपगोत्वज्ञानेन निवर्तत इति गोत्वमेव व्यावृत्तिरिति भावः । ननु प्रतियोगिनिरपेक्षगोत्वादिस्वरूपस्य भेदस्य कथमयमस्माद्भिन्न इत्यत्र प्रतियोगिसापेक्षत्वमिति चेत्तत्राह—**अयमिति । तदपेक्षत्वात् ।** प्रतियोग्यपेक्षत्वात् । प्रतियोग्यपेक्षायां हि स निर्दिश्यते नान्यथा । एवं च क्वचित्तादृशशाब्दव्यवहारविशेषस्थले भेदस्य प्रतियोगिसापेक्षत्वेऽपि सर्वत्र तथाङ्गीकारे मानाभावः । उक्तयुक्तिसिद्धस्य भेदस्वरूपस्य त्यागानौचित्यादित्याशयः ।

अनालोचितेति । बाध्यबाधकभावस्य व्यावृत्त्यनुवृत्त्योश्च विशेषोऽनालोचितो येन तस्येत्यर्थः । **विरोध एव नास्तीति** । घटे पटस्य व्यावर्तमानत्वेन प्रतीतावपि तस्य घटस्य तस्मिन्काले एवान्यत्र स्थितेन पटेन सह न विरोधः । नापि तस्य घ-

तस्य च निवृत्तिः। देशान्तरकालान्तरसम्बन्धितयानुभूतस्यान्यदेशकालयोरभावप्रतीतौ न विरोध—इति कथमत्र बाध्यबाधकभावः, अन्यत्र निवृत्तस्यान्यत्र निवृत्तिर्वा कथमुच्यते। रज्जुसर्पादिषु तु तद्देशकालसम्बन्धितयैवाभावप्रतीतेर्विरोधो बाधकत्वं व्यावृत्तिश्चेति, देशकालान्तरदृष्टस्य देशकालान्तरव्यावर्त्तमानत्वं मिथ्यात्वव्याप्तं न दृष्टमिति न व्यावर्तमानत्वमात्रमपारमार्थ्ये हेतुः। यत्तु अनुवर्त्तमानत्वात् सत्परमार्थ–(पृ. ४० पं. ४) इति। तत् सिद्धमेवेति न साधनमर्हति। अतो न सन्मात्रमेव वस्तु। अनुभूतितद्विशेषयोश्च विषयविषयिभावेन भेदस्य प्रत्यक्षसिद्धत्वादबाधितत्वाच्च अनुभूतिरेव सतीत्येतदपि निरस्तम्।

यत्तु, अनुभूतेः स्वयंप्रकाशत्वमुक्तं, तद्विषयप्रकाशनवेलायां ज्ञातुरात्मनस्तदेव, न तु सर्वेषां सर्वदा तथैवेति नियमोऽस्ति। परानुभवस्य हानोपादानादिलिङ्गकानुमानज्ञानविषयत्वात्। स्वानुभवस्याप्यतीतस्याज्ञासिषमिति ज्ञानविषयत्वदर्शनाच्च। अतोऽनुभूतिश्चेत् स्वतःसिद्धेति वक्तुं न

टस्य तस्मिन्देशे एवान्यस्मिन्काले स्थितेन पटेन सह विरोधः। किं तु तद्देशे एव तत्काले एव स्थितेन पटेन विरोधः। एवं च यथा रज्ज्वास्तद्देशे एव तत्काले एव प्रतीतेन सर्पेण विरोध इति तत्र सर्पस्य मिथ्यात्वेऽपि नान्यत्र सर्पस्य मिथ्यात्वं तथैव पटादीनामिति भावः। **अन्यत्रेति**। घटे व्यावर्तमानस्य पटस्य पटेऽपि निवृत्तिः कथमुच्यते इत्यर्थः। **न दृष्टमिति**। यत्र व्यावर्तमानत्वं तत्र मिथ्यात्वमिति नियमो नास्ति। घटे पटस्य व्यावर्तमानत्वेऽपि अन्यत्र पटस्य सत्यत्वदर्शनादिति भावः। **न साधनमिति**। प्रतिपक्षमतेन यदसिद्धं तदेव साधनमर्हति। इतरथा तु सिद्धसाधनं दोषाय भवति।

तद्विषयेति। यदा देवदत्तस्य घटज्ञानं जायते तदा तज्ज्ञानं देवदत्तस्य स्वप्रकाशं भवति न तु यज्ञदत्तस्य। न हि देवदत्तस्य घटज्ञानवेलायां 'देवदत्तस्य घटज्ञानं जातम्' इति यज्ञदत्तस्य ज्ञानं जायते। किंतु तज्ज्ञानोत्तरं देवदत्तेन त्यक्ते स्वीकृते वा घटे यज्ञदत्तेन दृष्टे सति तेन लिङ्गेन 'देवदत्तस्य ज्ञानं जातम्' इति यज्ञदत्तोऽनुमिनोति। अतो ज्ञानं न सर्वेषां स्वप्रकाशम्। किं च ज्ञातुरपि न सर्वदा ज्ञानं स्वप्रकाशमित्याह—**स्वानुभवस्येति**। **अत इति**। 'अनुभवस्यानुभवविषयत्वेऽनुभव-

शक्यते, ' अनुभूतेरनुभाव्यत्वेऽननुभूतित्वम् ' इत्यपि दुरुक्तम् । स्वगतातीतानुभवानां परगतानुभवानाञ्चानुभाव्यत्वेनाननुभूतित्वप्रसङ्गात् । परानुभवानुमानानभ्युपगमे च शब्दार्थसम्बन्धग्रहणाभावेन समस्तशब्दव्यवहारोच्छेदप्रसङ्गः । आचार्य्यस्य ज्ञानवत्त्वमनुभूय तदुपसत्तिश्च क्रियते, सा च नोपपद्यते । नचान्यविषयत्वेऽननुभूतित्वम् । अनुभूतित्वं नाम वर्त्तमानतादशायां स्वसत्तयैव स्वाश्रयं प्रति प्रकाशमानत्वं, स्वसत्तयैव स्वविषयसाधनत्वं वा । ते चानुभवान्तरानुभाव्यत्वेऽपि स्वानुभवसिद्धे नापगच्छत इति नानुभूतित्वमपगच्छति । घटादेस्त्वननुभूतित्वमेव । तत्स्वभावविरहात् । नानुभाव्यत्वात् । तथानुभूतेरननुभाव्यत्वेऽपि अननुभूतित्वप्रसङ्गो दुर्वारः । गगनकुसुमादेरननुभाव्यस्याननुभूतित्वात् । गगनकुसुमादेरननुभूतित्वमसत्त्वप्रयुक्तं, नाननुभाव्यत्वप्रयुक्तमिति चेत् एवं तर्हि घटादेरप्यननुभूतित्वनिबन्धनमज्ञानाविरोधित्वमेव नानुभाव्यत्वमित्यास्थीयताम् । अनुभूतेरनुभाव्यत्वेऽज्ञानाविरोधित्वमपि तस्या घटादेरिव प्रसज्यत इति चेत् , अननुभाव्यत्वेऽपि गगनकुसुमादेरिवाज्ञानाविरोधित्वमपि प्रसज्यत एव ।

त्वमेव न स्यात् ' इति यो दोषः परैरुद्भावितः स नास्ति । अनुभवस्य सर्वत्र स्वतः सिद्धत्वस्य वक्तुमशक्यत्वात् । अनुभवत्वानुभवविषयत्वयोर्विरोधस्यैवाभावाच्चेति भावः । **परानुभवेति** । घटादिशब्दस्य तदर्थेन यः संबन्धस्तज्ज्ञानं देवदत्तस्य जातमित्यनुमानादिभिर्निश्चित्यैव तेन देवदत्तेन सह घटमानयेत्यादिशब्दैर्यज्ञदत्तो व्यवहरतीति भावः । **तदुपसत्तिः** । आचार्यसमीपे विद्याप्राप्त्यर्थं गमनम् । **अनुभूतित्वमिति** । अनुभूतिशब्दो ज्ञानमात्रपरः । न तु स्मृतिविलक्षणपरः । **वर्तमानेति** । प्रकाशमानत्वमित्येतावन्मात्रोक्तौ घटादावतिव्याप्तिरतः स्वाश्रयं प्रतीत्युक्तम् । आत्मधर्माणामणुत्वादीनां ज्ञानान्तरप्रकाश्यत्वात्तद्व्यावृत्त्यर्थं स्वसत्तयैवेति । अतीतानुभवव्यावृत्त्यर्थं वर्तमानतादशायामिति । वर्तमानतादशायां स्वसत्तयैव प्रकाशमानत्वमित्युक्ते परानुभवे तदसम्भवात्तद्व्यावृत्त्यर्थं स्वाश्रयं प्रतीत्युक्तम् । **स्वसत्तयैवेति** । स्वाश्रयं प्रति वर्तमानतादशायामिति सम्बध्यते । **साधनत्वम्** । साधकत्वम् । **ते च** । तौ धर्मौ च । नन्वनुभवविषयत्वस्याननुभूतित्वप्रयोजकत्वाभावे कथं घटादेरननुभूतित्वमत आह—**घटादेरिति** । परमते दूषणमाह—**तथेति** । **निबन्धनं** प्रयोजकम् । शङ्कते—**अनुभूतेरिति** । **अननुभाव्यत्वेपीति** । यथा शङ्काकृताऽनुभाव्यत्वमज्ञानाविरोधि-

अतोऽनुभाव्यत्वेऽननुभूतित्वमित्युपहास्यम् ।

यत्तु, संविदः स्वतःसिद्धायाः प्रागभावाद्यभावादुत्पत्तिर्निरस्यते । तदन्धस्य जात्यन्धेन यष्टिः प्रदीयते । प्रागभावस्य ग्राहकाभावादभावो न शक्यते वक्तुम् । अनुभूत्यैव ग्राहणात् । कथमनुभूतिः सती तदानीमेव स्वाभावं विरुद्धमवगमयतीति चेत् । न ह्यनुभूतिः स्वसमानकालवर्त्तिनमेव विषयीकरोतीत्यस्ति नियमः । अतीतानागतयोरविषयत्वप्रसङ्गात् । अथ मन्यसे, अनुभूतिप्रागभावादेः सिध्यतस्तत्समकालभावनियमाऽस्तीति । किं त्वया क्वचिदेवं दृष्टं येन नियमं ब्रवीषि । हन्त, तर्हि तत एव दर्शनात् प्रागभावादिः सिद्ध—इति न तदभावनिह्नवः । तत्प्रागभावश्च तत्समकालवर्तिनमनुन्मत्तः को ब्रवीति । इन्द्रियजन्मनः प्रत्यक्षस्य ह्येष स्वभावनियमो, यत् स्वसमानकालवर्त्तिनः पदार्थस्य ग्राहकत्वं, न सर्वेषां ज्ञानानां प्रमाणानाञ्च । स्मरणानुमानागमयोगिप्रत्यक्षादिषु कालान्तरवर्त्तिनोऽपि ग्रहणदर्शनात् । अत एव च प्रमाणस्य प्रमेयाविनाभावः । न हि प्रमाणस्य स्वकालवर्तिनाऽविनाभावोऽर्थसम्बन्धः । अपि तु यद्देशकालादिस-

---

त्वप्रयोजकमिति घटादिदृष्टान्तेन प्रतिपाद्यते तथा गगनकुसुमादिदृष्टान्तेनाननुभाव्यत्वमपि तत्प्रयोजकमिति कुतो नोच्यते इत्याशयः । **उपहास्यमिति** । समीपस्थेऽपि हास्यमित्यर्थः ।

संविदः । अनुभूतेः । **तदन्धस्येति** । असिद्धमत्यन्तासिद्धेन हेतुना साध्यते इत्यर्थः । **अनुभूतिप्रागभावादेरिति** । अनुभूतिप्रागभावादीन्विषयविशेषान्यदाऽनुभूतिः साधयति तदैव तत्समकालभावनियमो न तु सर्वविषयकानुभूतावित्यर्थः । **न तदभावेति** । अनुभूतिप्रागभावो नास्तीति वक्तुं न शक्यते इत्यर्थः । **योगिप्रत्यक्षादिष्विति** आदिशब्देनेश्वरप्रत्यक्षं गृह्यते । ननु प्रमाणज्ञानेऽपि प्रमेयासद्भावे किं तस्याप्रमाणज्ञानाद्भेदकमिति चेन्न । प्रमेयाविनाभावस्यैव तद्भेदकत्वात् । तदेवोपपादयति—**अत एवेति** । ज्ञानमात्रस्य समकालवर्तिविषयग्राहकत्वनियमाभावेनैव प्रमेयाविनाभावश्च सिद्ध इत्यर्थः । अन्यथा वर्तमानविषयालाभादसमकालवर्तिग्राहिणां तत्तत्प्रमाणानां प्रमेयाविनाभावो न सिध्येदिति भावः । **न हीति** । प्रमाणस्य स्वसमकालवर्तिनार्थेन यः संबन्धः सोऽविनाभावो नेत्यर्थः । **कालादीनि** । आदिशब्देन

म्बन्धितया योऽर्थोऽवभासते तस्य तथाविधाकारमिथ्यात्वप्रत्यनीकता। अत इदमपि निरस्तं, 'स्मृतिर्न बाह्यविषया, नष्टेऽप्यर्थे स्मृतिदर्शनात्' इति। अथोच्येत, न तावत् संवित्प्रागभावः प्रत्यक्षावसेयः। अवर्त्तमानत्वात्। न च प्रमाणान्तरावसेयः। लिङ्गाद्यभावात्। न हि संवित्प्रागभावव्याप्तमिह लिङ्गमुपलभ्यते। नानुपलब्धिरपि कस्यचिद्दृश्यते। न चागमस्तद्विषयो दृष्टचरः। अतस्तत्प्रागभावः प्रमाणाभावादेव न सेत्स्यतीति। यद्येवं स्वतःसिद्धत्वविभवं परित्यज्य प्रमाणाभावेऽवरूढश्चेत, योग्यानुपलब्ध्यैवाभावः समर्थित—इत्युपशाम्यतु भवान्।

किञ्च, प्रत्यक्षज्ञानं स्वविषयं घटादिकं स्वसत्ताकाले सन्तं साधयत तस्य न सर्वदा सत्तामवगमयत् दृश्यत—इति घटादेः पूर्वोत्तरकालसत्ता न प्रतीयते। तदप्रतीतिश्च संवेदनस्य कालपरिच्छिन्नतया प्रतीतेः। घटादिविषयमेव संवेदनं स्वय कालानवच्छिन्नं प्रतीतं चेत्, ततसंवेदनविषयो घटादिरपि

संस्थानसंग्रहः। **तथाविधेति**। तादृशदेशकालविशिष्टाकारस्य यन्मिथ्यात्वं तस्य प्रत्यनीकं शत्रुभूतं प्रमाणं तद्भाव एवाविनाभाव इत्यर्थः। **स्मृतिर्नेति**। बौद्धैकदेशिसम्मतं स्मृतेर्निर्विषयत्वं निरस्तमित्यर्थः। नष्टेऽप्यर्थे तस्यैव स्मृतिविषयत्वात्। **अथोच्येतेति**। यद्यप्यनुभव एवानुभवप्रागभावं गृण्हातीति स्थापितं तथापि तन्न संभवति। निर्विशेषं न सामान्यमिति न्यायात्। अनुभवविशेषस्य प्रत्यक्षादेः कस्याप्यत्रासंभवादित्याशयः। **अवर्तमानत्वादिति**। प्रत्यक्षं हि वर्तमानविषयमेव गृण्हातीति सर्वैरभ्युपेतम्। उत्तरयति—**यद्येवमिति**। स्वयंसिद्धत्वाभिमानेन किमपि वक्तुं प्रवृत्तोऽसि चेत्तर्हि किमपि नास्माभिरुच्यते। अथवा युक्तिविरुद्धमपि ज्ञानस्य स्वयंसिद्धत्वं गृहीत्वा तत एव तस्य सर्वदा प्रकाशमानत्वयोग्यतया प्रागभावो नास्तीति ब्रूषे तर्ह्यप्यस्माभिर्नोच्यते। यदि शास्त्रमर्यादया वक्तुं प्रवृत्तोऽसि तर्ह्युच्यते इत्यर्थः। **योग्येति**। ज्ञानस्य प्रागनुपलंभेन तत्प्रागभावोऽनुपलब्धिप्रमाणेन सिध्यतीति ज्ञानस्य नित्यत्वं नास्तीत्यर्थः।

अर्थापत्तिप्रमाणेनापि तत्सिद्धिमाह—**किं चेति**। स्वं प्रत्यक्षज्ञानम्। **तदप्रतीतिश्चेति**। घटादेः पूर्वोत्तरकालसत्ताया अप्रतीतौ बीजं तु ज्ञानस्य कालपरिच्छिन्नतया प्रतीतिरेव। तथा प्रतीतिश्च ज्ञानस्य नित्यत्वेऽनुपपन्नेत्यर्थात्तदनित्यत्वं सिध्यति। अर्थापत्त्यन्तरमाह—**घटादीति**।

कालानवच्छिन्नः प्रतीयत–इति नित्यः स्यात्। नित्यं चेत् संवेदनं स्वतःसिद्धं, नित्यमित्येव प्रतीयेत। नच तथा प्रतीयते। एवमनुमानादिसंविदोपि कालानवच्छिन्नाः प्रतीताश्चेत्, स्वविषयानपि कालानवच्छिन्नान् प्रकाशयन्तीति ते सर्वे कालानवच्छिन्ना नित्याः स्युः। संविदनुरूपस्वरूपत्वाद्विषयाणाम्। न च निर्विषया संवित् काचिदस्ति। अनुपलब्धेः। विषयप्रकाशनस्वभावतयैवोपलब्धेरेव हि संविदः स्वयंप्रकाशता समर्थिता। संविदो विषयप्रकाशनसत्तास्वभावविरहे सति स्वयंप्रकाशत्वासिद्धेः, अनुभूतेरनुभवान्तराननुभाव्यत्वाच्च संविदः तुच्छतैव स्यात्। न च स्वापमदमूर्छादिषु सर्वविषयशून्या केवलैव संवित् परिस्फुरतीति वाच्यम्। योग्यानुपलब्धिपराकृतत्वात्। तास्वपि दशास्वनुभूतिरनुभूता चेत, तस्याः प्रबोधसमयेऽनुसन्धानं स्यात्। न च तदस्ति। नन्वनुभूतस्य पदार्थस्य स्मरणनियमो न दृष्टचरः। अतः स्मरणाभावः कथमनुभवाभावं साधयेत्। उच्यते। निखिलसंस्कारतिरस्कृतिकरदेहविगमादिप्रबलहेतुविरहेऽप्यस्मरणनियमोऽनुभवाभावमेव साधयति। न केवलमस्मरणनियमादनुभवाभावः। सुप्तोत्थितस्येयन्तं कालं न किञ्चिदहमज्ञासिषमिति प्रत्यवमर्शेनैव सिद्धेः। न च सत्यप्यनुभवे तदस्मरणनियमो विषयावच्छेदविरहादहङ्का-

---

नित्यः स्यादिति। तथा च घटाद्यनित्यत्वस्यान्यथानुपपत्त्या ज्ञानानित्यत्वं सिध्यतीत्यर्थः। पुनरप्यर्थापत्तिमाह–**नित्यमिति**। ज्ञानस्य नित्यत्वसाधनं हि इदमिति ज्ञानं विषयीकृत्यैव कर्तव्यम्। परंतु भवन्नये ज्ञानस्य विषयीकारायोग्यतया स्वयमेव नित्यमिति प्रतीयेत, तथा तु न प्रतीयते। तदन्यथानुपपत्त्या ज्ञानानित्यत्वं सिध्यतीत्यर्थः। अथ निर्विषयानुभूतेर्नित्यत्वमिति पक्षं निराकरोति–**न चेति**। स्वप्रकाशवादिनो मतेऽपि ज्ञानस्य निर्विषयत्वं न सिध्यतीत्याह–**विषयप्रकाशनेति**। **निखिलेति**। निखिला ये स्मरणप्रयोजकाः संस्कारास्तेषां तिरस्कृतिकरा ये देहनाशादयः प्रबलहेतवस्तेषामभावेऽपि यतः स्वापाद्यवस्थास्थानुभूतेः स्मरणं कदापि न भवति अतः सा नैवानुभूतेति निश्चीयते। यद्यपि यत्रयत्रानुभवस्तत्र तत्र स्मरणं भवत्येवेति न नियमः। पथि गच्छता स्पृष्टतृणादेः स्मरणस्यावश्यम्भावादर्शनात्। तथापि यत्र यत्र कदाप्यस्मरणं तत्र तत्र नानुभव इति नियमोऽस्त्येवेत्यर्थः। **न चेति**। अस्मरणनियम-

रविगमाद्वेति शक्यते वक्तुम् । अर्थान्तरानुभवस्यार्थान्तराभावस्य चानुभूतार्थान्तरास्मरणहेतुत्वाभावात् । तास्वपि दशास्वहमर्थोऽनुवर्त्तत–इति च वक्ष्यते । ननु स्वापादिदशास्वपि सविशेषोऽनुभवोऽस्तीति पूर्वमुक्तम् । सत्यमुक्तम् । स तु आत्मानुभवः स च सविशेष एवेतिस्थापयिष्यते । इह तु सकलविषयविरहिणी निराश्रया च संविन्निषिध्यते । केवलैव संविदात्मानुभव–इति चेन्न । सा च साश्रयेति ह्युपपादयिष्यते । अतोऽनुभातिः सती स्वयं स्वप्रागभावं न साधयतीति प्रागभावासिद्धिर्न शक्यते वक्तुम् । अनुभूतेरनुभाव्यत्वसम्भवोपपादनेनान्यतोऽप्यसिद्धिर्निरस्ता । तस्मान्न प्रागभावाद्यसिद्ध्या संविदोऽनुत्पत्तिरुपपत्तिमती ।

यदप्यस्या अनुत्पत्त्या विकारान्तरनिरसनम् । तदप्यनुपपन्नम् । प्रागभावे व्यभिचारात् । तस्य हि जन्माभावेऽपि विनाशो दृश्यते । भावेष्विति विशेषणे तर्ककुशलताविष्कृता भवति । तथा च, भवदभिमता अविद्यानुत्पन्नैव विविधविकारास्पदं तत्वज्ञानोदयादन्तवती चेति तस्यामनैकान्त्यम् । तद्विकाराः सर्वे मिथ्याभूता–इति चेत् , किं भवतः परमार्थभूतोऽप्यस्ति

स्याननुभवो न कारणं किं तु स्वापाद्यवस्थासु विषयसंचन्धराहित्यमहङ्कारनाशो वा कारणमित्याशयः । **अर्थान्तरेति** । घटाननुभवः पटविनाशस्यानुभूतकुड्याद्यस्मरणकारणं न दृष्टमित्यर्थः । एवं च स्वापाद्यवस्थास्वनुभूतिर्नानुभूयत एवेति सिद्धम् । **निराश्रयेति** । ज्ञानमेवात्मेति वदद्भिर्ज्ञानं निराश्रयमेव स्वीकृतमिति भावः । शब्दान्तरेण पूर्वपक्षिमतमेवाङ्गीकृतमित्याशयेनाशङ्कते–**केवलैवेति** । **न साधयतीतीति** । इतिशब्दः प्रागभावासिद्धावन्वेति । नाप्यन्यत इत्यादिप्रागुक्तं (पृ. ४३ पं. ११) खण्डयति–**अनुभूतेरिति** ।

भावेष्विति । यत्र भावेषु जन्माभावस्तत्र विकाराभाव इत्युक्ते यद्यपि प्रागभावे न व्यभिचारस्तस्याभावरूपत्वात् । तथापीयं केवलं तर्ककुशलता । कस्यचिद्वस्तुनः कस्मिंश्चिल्लक्षणे प्रतिपादिते यत्र दोषस्तद्भिन्नत्वेन निवेशे च यद्यपि तल्लक्षणं निर्दुष्टं भवति तथापि न तल्लक्षणं तद्वस्तुस्वरूपपरिचायकं भवतीति भावः । भावेष्वपि व्यभिचारं दर्शयति । **तथा चेति** । भावरूपा चेत्यर्थः । **अनैकान्त्यम्** । व्यभिचारः । शङ्कते–**तद्विकारा इति** । यत्र भावेषु जन्माभावस्तत्र सत्यविकाराभाव इत्येवं विकारस्य सत्यत्वविशेषणे न व्यभिचारः। अविद्याविकाराणां मिथ्याभूतत्वादित्याशयः ।

विकारः, येनैतद्विशेषणमर्थवद्भवति, न ह्यसावभ्युपगम्यते ।

यदप्यनुभूतिरजत्वात् स्वस्मिन् विभागं न सहत–इति । तदपि नोपपद्यते । अजस्यैवात्मनो देहेन्द्रियादिभ्यो विभक्तत्वात् । अनादित्वेन चाभ्युपगताया अविद्याया आत्मनो व्यतिरेकस्यावश्याश्रयणीयत्वात् । स विभागो मिथ्यारूप–इति चेत् , जन्मप्रतिबद्धः परमार्थविभागः किं क्वचित् दृष्टस्त्वया । अविद्याया आत्मनः परमार्थतो विभागाभावे हि वस्तुतो ह्यविद्यैव स्यादात्मा । अबाधितप्रतिपत्तिसिद्धदृश्यभेदसमर्थनेन दर्शनभेदोऽपि समर्थित एव । छेद्यभेदाच्छेदनभेदवत् । यदपि नास्या दृशेर्दृशिस्वरूपायाः दृश्यः कश्चिदपि धर्म्मोऽस्ति । दृश्यत्वादेव तेषां न दृशिधर्म्मत्वमिति च । तदपि स्वाभ्युपगतैः प्रमाणसिद्धैर्नित्यत्वस्वयंप्रकाशत्वादिधर्म्मैरुभयमनैकान्तिकम् । न च ते संवेदनमात्रम् । स्वरूपभेदात् । स्वसत्तयैव स्वाश्रयं प्रति

नह्यसाविति । अद्वैतवादिना त्वया परमार्थविकारस्यानङ्गीकारात ।

अनुत्पन्नेयमित्याद्युक्तं (पृ. ४४ पं. ५) खण्डयति–**यदपीति** । **विभागं** भेदम् । तत्राजेपि विजातीयभेदोऽस्तीति दर्शयति–**अजस्यैवेति** । **अभ्युपगताया इति** । त्वयेत्यादिः । शङ्कते–**सविभाग इति** । यत्राजत्वं तत्र परमार्थतो विभागो नास्तीत्येव नियमः । तेन तत्र मिथ्याविभागसत्त्वेऽपि न क्षातिरिति शङ्काशयः । **जन्मप्रतिबद्धः** । उत्पत्तिव्यातः । प्रागुक्तनियमे हि परमार्थतो विभागः उत्पत्तिसत्वे एव स्यादिति तस्योत्पत्तिव्याप्तत्वम् । **कचिदिति** । पूर्वपक्षिणा परमार्थतो विभागस्य क्वाप्यनङ्गीकारेण प्रतियोग्यप्रसिध्या ‘ परमार्थतो विभागो नास्ति ’ इति वक्तुं न शक्यते इति भावः । विभागस्य मिथ्यात्वे दूषणान्तरमाह–**अविद्याया इति** । अथ सजातीयभेदं दर्शयति–**अबाधितेति** । अबाधिता या घटोऽयं पटोऽयमित्यादिप्रतिपत्तिस्तया सिद्धो यो दृश्यानां घटादीनां भेदस्तत्समर्थनेन ज्ञानभेदोऽपि समर्थित एवेत्यर्थः । अथ स्वगतभेदं दर्शयति–**यदपीति । दृशेः** । अनुभूतेः । अयं पक्षनिर्देशः । **दृशिस्वरूपाया इति** । हेतुनिर्देशः । अनुभूतिर्न दृश्यधर्मवती दृशिस्वरूपत्वात् । यत् दृश्यधर्मवत् तन्न दृशिस्वरूपं यथा घट इति व्यतिरेक्यनुमानम् । अन्वय्यनुमानमाह–**दृश्यत्वादेवेति** । दृश्यो न दृशिधर्मः दृश्यत्वाद्यथा घटत्वम् । एतदुभयविधलिङ्गस्य परोक्तस्य व्यभिचारमाह–**तदपीति** । आदिपदेनैकत्वसंग्रहः । **ते** । नित्यत्वादय

---

१ क. रजडत्वात् २ क. अजडस्यैवा.

कस्यचिद्विषयस्य प्रकाशनं हि संवेदनम् । स्वयंप्रकाशता तु स्वसत्तयैव स्वाश्रयाय प्रकाशमानता । प्रकाशश्च चिदचिदशेषपदार्थसाधारणं व्यवहारानुगुण्यम् । सर्वकालवर्तमानत्वं हि नित्यत्वम् । एकत्वमेकसंख्यावच्छेद-इति । तेषां जडत्वाद्यभावरूपतायामपि तथाभूतैरपि तैश्चैतन्यधर्म्मभूतैरप्यनैकान्त्यमपरिहार्य्यम् । संविदि तु स्वरूपातिरेकेण जडत्वादिप्रत्यनीकत्वमित्यभावरूपो भावरूपो वा धर्म्मो नाभ्युपेतश्चेत् तन्निषेधोक्त्या किमपि नोक्तं भवेत् ।

अपि च, संवित् सिध्यति वा न वा-। सिध्यति चेत्, सधर्म्मता स्यात् । नो चेत्, तुच्छता । गगनकुसुमादिवत् ।सिद्धिरेव संविदिति चेत्, कस्य कं प्रतीति वक्तव्यम् । यदि न कस्यचित् कञ्चितप्रति सा, तर्हि न सिद्धिः। सिद्धिर्हि पुत्रत्वमिव कस्यचित् कञ्चितप्रति भवति । आत्मन इति चेत् कोऽयमात्मा। ननु संविदेवेत्युक्तम् । सत्यमुक्तम् । दुरुक्तन्तु तत् । तथा हि। कस्यचित् पुरुषस्य किञ्चिदर्थजातं प्रति सिद्धिरूपतया तत्सम्बन्धिनी सा संवित् स्वयं कथमिवात्मभावमनुभवेत् । एतदुक्तं भवति। अनु-

---

धर्माः । तेषां मिथ्यात्वं तु न । ज्ञानवृत्तिनित्यत्वस्य मिथ्यात्वे ज्ञानस्यानित्यत्वप्रसङ्गात् । अतस्तेषां ज्ञानस्वरूपत्वं परैरुक्तम् । तदपि न संभवतीत्यर्थः । **प्रकाशश्चेति ।** सर्वे पदार्थास्तदा व्यवहारानुगुणा भवन्ति यदा तद्व्यवहारहेतुषु मध्ये ज्ञानं सन्निधत्ते इत्याशयः । अथ तेषां धर्माणामभावरूपत्वेऽपि व्यभिचारमाह–**तेषामिति** । अभावरूपाणामपि तेषां धर्माणां ज्ञानस्वरूपानतिरिक्तत्वे दूषणमाह–**संविदीति** । **किमपि नोक्तमिति** । तदुक्तं संवित्सिद्धौ । 'न वेद्यं वित्तिधर्मः स्यादिति यत्त्वागुदीरितम् । तेनापि साधितं किंचित्संविदोऽस्ति न वा त्वया । अस्ति चेत् पक्षपातः स्यान्नचेत्ते विफलः श्रमः ' (सं. सि. पृ. ९७) इति ।

अथ ज्ञानस्यात्मत्वं निराकर्तुमारभते–**अपि चेति** । **सिध्यति** । प्रतीयते । **सधर्मतेति** । सर्वप्रमाणानां सविशेषविषयत्वस्य पूर्वमुपपादितत्वात् । सधर्मता च तवानिष्टेति भावः। शङ्कते–**सिद्धिरेवेति** । प्रतीतिरेवेत्यर्थः। तस्याश्च प्रतीत्यन्तरानपेक्षत्वेन न प्रमितिविषयत्वप्रयुक्तं सविशेषत्वं नापि च तुच्छत्वमित्याशयः। तत्रापि सविशेषत्वमाह–**कस्येति** । प्रतीतेराश्रयो विषयश्च वक्तव्य इत्यर्थः। **तत्संबन्धिनीति** ।

भूतिरिति स्वाश्रयं प्रति स्वसद्भावेनैव कस्यचिद्वस्तुनो व्यवहारानुगुण्यापादनस्वभावो ज्ञानावगतिसंविदाद्यपरनामा सकर्मकोऽनुभवितुरात्मनो धर्म्मविशेषः, घटमहं जानामि, इममर्थमवगच्छामि, घटमहं संवेद्मीति सर्वेषामात्मसाक्षिकः प्रसिद्धः। एततस्वभावतया हि तस्याः स्वयंप्रकाशता भवताप्युपपादिता। अस्य सकर्म्मकस्य कर्तृधर्म्मविशेषस्य कर्म्मत्ववत् कर्तृत्वमपि दुर्घटमिति। तथा ह्यस्य कर्त्तुः स्थिरत्वं, कर्त्तृधर्म्मस्य संवेदनाख्यस्य सुखदुःखादेरिवोत्पत्तिस्थितिनिरोधाश्च प्रत्यक्षमीक्ष्यन्ते। कर्तृस्थैर्य्यन्तावत् स एवायमर्थः पूर्वं मयानुभूत–इति प्रत्यभिज्ञासिद्धम्। अहं जानाम्यहमज्ञासिषं, ज्ञातुरेव ममेदानीं ज्ञानं नष्टमिति च संविदुत्पत्त्यादयः प्रत्यक्षसिद्धा–इति कुतस्तदैक्यम्। एवं क्षणभङ्गिन्याः संविद आत्मत्वाभ्युपगमे पूर्वेद्युर्दृष्टमिदमपरेद्युरिदमहमदर्शमिति प्रत्यभिज्ञा च न घटते। अन्येनानुभूतस्य न ह्यन्येन प्रत्यभिज्ञानसम्भवः। किञ्च, अनुभूतेरात्मत्वाभ्युपगमे तस्या नित्यत्वेऽपि प्रतिसन्धानासम्भवस्तदवस्थः। प्रतिसन्धानं हि पूर्वापरकालस्थायिनमनुभवितारमुपस्थापयति, नानुभूतिमात्रम्। अहमेवेदं पूर्वमप्यन्वभूवमिति भवतोऽनुभूतेर्नह्यनुभावितृत्वमिष्टम्। अनुभूतिरनुभूतिमात्रमेव। संविन्नाम काचिन्निराश्रया निर्विषया वा अत्यन्ता-

---

पुरुषसंबन्धिन्याः संविदः पुरुषरूपत्वं दुर्वचमिति भावः। **भवतापीति**। एतेन ज्ञानं द्विविधं सकर्मकमकर्मकं च। तत्राद्यं जडरूपम्। द्वितीयं त्वात्मरूपमितिपरोक्तमपास्तम्। स्वोक्तिविरोधादिति भावः। **अस्येति**। यथा सकर्मकस्य कर्मत्वं नास्ति तथा कर्तृधर्मस्य कर्तृत्वमपि नास्तीति ज्ञानस्यात्मरूपत्वं न संभवतीत्यर्थः। **तथेति**। किंचेत्यर्थः। हिर्हेतौ। ज्ञानस्यास्थिरत्वादपि तस्य स्थिरात्मस्वरूपत्वं नास्तीत्यर्थः। अथ प्रत्यभिज्ञाश्रयत्वेन स्थैर्यं दर्शयति–**एवमिति**। ननु ज्ञानस्य नित्यत्वेन क्षणभङ्गित्वाभावान्नायं दोष इत्यत आह–**किंचेति**। **अनुभूतिमात्रमेवेति**। यथा गमनक्रियाया गन्तृत्वासंभवस्तथैव ज्ञानस्य ज्ञातृत्वासंभव इत्याशयः। ननु न वयं ज्ञानसामान्यस्यात्मत्वं वदामः, किं तु तद्विशेषभूतायाः संविदः। संविच्च निराश्रया निर्विषया आत्मरूपैवेति चेत्तत्राह–**संविन्नामेति**। ननु त्वन्मतेऽपि साश्रया सविषया च संविदङ्गीकार्यैव। तथा च तस्या एव लाघवादात्मत्वमस्तु। किमतिरिक्त-

नुपलब्धेर्न सम्भवतीत्युक्तम् । उभयाभ्युपगता संविदेव आत्मेत्युपलब्धि-पराहतम् । अनुभूतिमात्रमेव परमार्थ इति निष्कर्षहेत्वाभासाश्च निराकृताः ।

ननु चाहं जानामीत्यस्मत्प्रत्यये योऽनिदमंशः प्रकाशैकरसश्चित्-पदार्थः स आत्मा । तस्मिंस्तद्बलनिर्भासिततया युष्मदर्थलक्षणोऽहं जानामीति सिध्यन्नहमर्थश्चिन्मात्रातिरेकी युष्मदर्थ एव । नैतदेवम् । अहं जानामीति धर्मधर्मितया प्रत्यक्षप्रतीतिविरोधादेव । किञ्च,

अहमर्थो न चेदात्मा प्रत्यक्त्वं नात्मनो भवेत् ।
अहंबुद्ध्या परागर्थात् प्रत्यगर्थो हि भिद्यते ॥
निरस्ताखिलदुःखोऽहमनन्तानन्दभाक् स्वराट् ।
भवेयमिति मोक्षार्थी श्रवणादौ प्रवर्तते ॥

धर्मिभूतात्मकल्पनेन । धर्मिकल्पनातो वरं धर्मकल्पनेति न्यायादिति चेत्तत्राह-**उभयेति** । आत्मत्वस्याहं जानामीति ज्ञातृत्वसामानाधिकरण्येनोपलब्ध्या पराहतम् । उक्तलाघवन्यायस्तु कल्पनायामेव न तूपलब्धाविति बोध्यम् । **अनुभूतीति** । ' अनुभूतिमात्रमेव परमार्थः ' इति यो निष्कर्षः सिद्धान्तस्तत्साधकत्वेन पूर्वपक्षिणा प्रदर्शिता ये हेतवस्ते हेत्वाभासा एव ते च प्रागेव निराकृता इति भावः ।

अथ ज्ञानात्मवादी उपलब्धिपराहतत्वं निराकुर्वंश्चोदयति-**ननु चेति । अनिदमंशः** । इदमंशः परागर्थस्तद्व्यतिरिक्तो यः प्रकाशैकरसत्वात्प्रत्यगर्थश्चित्पदार्थो ज्ञानं स एवात्मा नत्वहमर्थ आत्मा । परप्रकाश्यत्वं पराक्त्वम् । स्वप्रकाशत्वं च प्रत्यक्त्वम् । यश्चाहं जानामीति प्रतीतावहमर्थः सिध्यति स तु ज्ञानबलेन निर्भासितः प्रकाशितोऽतएव युष्मदर्थलक्षणः ज्ञानबलप्रकाशितत्वरूपं यद्युष्मदर्थस्य लक्षणं तद्विशिष्टः अतो युष्मदर्थ एव । एवं चाहं जानामीत्यत्र प्रत्यक्त्वलक्षणात्मत्वस्य न ज्ञातृत्वसामानाधिकरण्येनोपलब्धिरिति न तदुपलब्धिपराहतमित्याशयः । **धर्मधर्मितयेति** । ज्ञानं हि यस्यात्मनो भवति स ज्ञानस्वरूप एवेति ज्ञानं ज्ञानस्यैव भवतीति पर्यवसन्नम् । तथा चाहं ज्ञानमिति प्रत्ययेन भाव्यं न त्वहं जानामीति धर्मधर्मितयेति प्रत्यक्षप्रतीतिविरोधोऽस्त्येवेत्यर्थः । **अहमर्थ इति** । प्रत्यक्त्वं च न ज्ञानस्यात्मत्वसाधकं किं तु ज्ञातुरहमर्थस्यैव । यतः प्रत्यक्त्वं स्वस्मै प्रकाशमानत्वम् । पराक्त्वं च परस्मै प्रकाशमानत्वम् । इदंताविशिष्टात्परागर्थादहंबुध्यैव प्रत्यगर्थस्य भेदानुभवात् । ईदृशं प्रत्यक्त्वमहमर्थस्यैव न ज्ञानस्येति ज्ञानात्मवादे एवात्मनः प्रत्यक्त्वं न सिद्ध्यतीत्यर्थः ।

अहमर्थविनाशश्चेन्मोक्ष-इत्यध्यवस्यति ।
अपसर्पेदसौ मोक्षकथाप्रस्तावगन्धतः ॥
मयि नष्टेऽपि मत्तोऽन्या काचिज् ज्ञप्तिरवस्थिता ।
इति तत्प्राप्तये यत्नः कस्यापि न भविष्यति ॥
स्वसम्बन्धितया ह्यस्याः सत्ताविज्ञप्तितादि च ।
स्वसम्बन्धवियोगे तु ज्ञप्तिरेव न सिध्यति ॥
छेत्तुश्छेद्यस्य चाभावे छेदनादेरसिद्धिवत् ।
अतोऽहमर्थो ज्ञातैव प्रत्यगात्मेति निश्चितम् ॥
विज्ञातारमरे केन, जानात्येवेति च श्रुतिः ।
एतद् यो वेत्ति तं प्राहुः क्षेत्रज्ञ—इति च स्मृतिः ॥
नात्मा श्रुतेरित्यारभ्य सूत्रकारोऽपि वक्ष्यति ।
ज्ञोऽत—एवेत्यतो नात्मा ज्ञप्तिमात्रमिति स्थितम् ॥

अहंप्रत्ययसिद्धो ह्यस्मदर्थः । युष्मत्प्रत्ययविषयो युष्मदर्थः । तत्राहं जानामीति सिद्धो ज्ञाता युष्मदर्थ—इति वचनं, जननी मे वन्ध्येतिवत् व्याहतार्थश्च । न चासौ ज्ञाताहमर्थोऽन्याधीनप्रकाशः । स्वयंप्रकाशत्वात् । चैतन्यस्वभावता हि स्वयंप्रकाशता । यः प्रकाशस्वभावः सोऽनन्याधीन-

---

अहमर्थविनाशश्चेदिति । ज्ञानात्मवादेऽनात्मभूतस्याहमर्थस्य मोक्षे विनाशाङ्गीकारात् । अहमर्थस्य नाशेऽपि ज्ञानं नित्यं तिष्ठत्येवेति चेत्तत्राह—**मयीति** । नहि मयि नष्टेऽपि स्तम्भस्तिष्ठतीति बुध्या कृतः शिरश्छेदः पुरुषार्थो भवति । किं च मोक्षप्राप्तयेऽहमर्थस्य या श्रवणादौ प्रवृत्तिर्जायते सा त्वन्मते न स्यात् । न हि कश्चित्स्वनाशाय प्रवर्तते इति भावः । **ज्ञप्तिर्ज्ञानम्** । किं च मोक्षेऽहमर्थस्य विनाशाङ्गीकारे केवलज्ञानस्यास्तित्वमपि न संभवतीत्याह—**स्वसंबन्धितयेति** । **विज्ञप्तिता** । विषयप्रकाशत्वम् । **विज्ञातारमिति** । श्रुतौ विज्ञातारमित्यनेन जानातीत्यनेन च स्मृतौ यो वेत्ति तामित्यनेन सूत्रे च ज्ञ इत्यनेन ज्ञातुरेवात्मत्वं सिध्यतीत्यर्थः । ज्ञोत एवेत्यत्रात्मशब्दानुवृत्तिसूचनार्थं नात्माश्रुतेरित्युपात्तम् ।

दूषणान्तरमाह—**अहंप्रत्ययसिद्धो हीति** । अत्र सिद्धशब्देनास्मदर्थस्य स्वतःसिद्धिः सूच्यते । हिशब्देन प्रसिद्धिं दर्शयति । यतो ज्ञानात्मवादिनापि शारीरभा-

प्रकाशो दीपवत् । न हि दीपादेः स्वप्रभाबलनिर्भासितत्वेन प्रकाशित्व-मन्याधीनप्रकाशत्वञ्च । किं तर्हि, दीपः प्रकाशस्वभावः स्वयमेव प्रकाशते, अन्यानपि प्रकाशयति प्रभया । एतदुक्तं भवति । यथैकमेव तेजोद्रव्यं प्रभाप्रभावद्रूपेणावतिष्ठते । यद्यपि प्रभा प्रभावद्द्रव्यगुणभूता तथापि तेजोद्रव्यमेव । न शौक्ल्यादिवत् गुणः । स्वाश्रयादन्यत्रापि वर्त्तमानत्वात् । रूपवत्त्वाच्च शौक्ल्यादिधर्मवैधर्म्यात् । प्रकाशवत्त्वाच्च तेजोद्रव्यमेव । नार्थान्तरम् । प्रकाशवत्त्वं च स्वस्वरूपस्यान्येषाञ्च प्रकाशकत्वात् । अस्यास्तु गुणत्वव्यवहारो नित्यतदाश्रयत्वतच्छेषत्वनिबन्धनः । न चाश्रयावयवा एव विशीर्णाः प्रचरन्तः प्रभेत्युच्यन्ते । मणिद्युमणिप्रभृतीनां विनाशप्रसंगात् । दीपेऽप्यवयवविप्रतिपत्तिः कदाचिदपि न स्यात् । न हि विशरणस्वभावावयवा दीपाश्चतुरंगुलमात्रनियमेन पिण्डीभूता ऊर्ध्वमुद्गम्य ततः पश्चाद्युगपदेव तिर्य्यगूर्ध्वमधश्चैकरूपा विशीर्णाः प्रचरन्तीति वक्तुं शक्यते । अतः सप्रभाका एव दीपाः प्रतिक्षणमुत्पन्ना विनश्यन्तीति पुष्कलकारण

स्यारम्भे युष्मदस्मत्प्रत्ययगोचरयोरित्युक्तम् । **स्वप्रभेति** । यथा घटादिर्दीपप्रभाया बलेन निर्भासितः सन्नेव प्रकाशते तत एव चान्याधीनप्रकाशो भवति न तथा दीपस्तस्य प्रकाशस्वभावत्वात् । **अन्यानपीति** । विषयप्रकाशनक्षमस्यापि दीपस्य सर्वत्र व्याप्त्यभावेन विषयसंबन्धाभावात्तस्य स्वरूपेण न प्रकाशकत्वं किं तु विषयसंबन्धिनी या स्वपरिकरभूता प्रभा तद्वारेणेत्यर्थः । **एतदुक्तमिति** । यथैकमेव तेजोद्रव्यं प्रभारूपेण प्रभावद्रूपेण चावतिष्ठते तथैवात्मा चिद्रूप एव चैतन्यगुण इति भावः । प्रभाया गुणत्वमाशङ्कते—**यद्यपीति** । प्रभावतो द्रव्यस्य गुणभूता प्रभेत्यर्थः । उत्तरयति—**तथापीति** । **स्वाश्रयादिति** । यं प्रभा तस्या आश्रयभूतो यो दीपस्तस्मादन्यत्र तत्समीपप्रदेशे वर्तमानत्वात् । न हि शौक्ल्यादयो गुणा एवं दृश्यन्ते । किं च तेषां न रूपवत्वं प्रभायास्तु रूपवत्त्वमित्यपि वैधर्म्यम् । अथ विशीर्णाश्रयावयवानां प्रभात्वं प्रतिक्षिपति—**न चेति** । **द्युमणिः** । सूर्यः । दूषणान्तरमाह—**दीपेऽपीति** । दीपावयवानां प्रथमतो यत्पिण्डीभावेनोर्ध्वमुद्गमनं नियमेन भवति तत्तेषां विशरणस्वभावत्वेन न स्यात् । ततश्च दीपज्ञानं न स्यादितिभावः । **पुष्कलेति** । पुष्कलं यत्कारणं महती वर्तिर्बहुतैलमित्यादि तस्य दीपे क्रमेण संबन्धो भवति । अग्निमावयवस्य पूर्वमग्निसंयोगः । ततपश्चात्तनावयवस्य पश्चात् । सर्वेषां च दीप-

क्रमोपनिपातात् तद्विनाशे विनाशाश्चावगम्यते । प्रभायाः स्वाश्रयसमीपे प्रकाशाधिक्यमौष्ण्याधिक्यमित्याद्युपलब्धिव्यवस्थाप्यम् । अग्न्यादीनामौष्ण्यादिवत् । एवमात्मा चिद्रूप एव चैतन्यगुण- इति । चिद्रूपता हि स्वयंप्रकाशता । तथा हि श्रुतयः, ' स यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एव । एवं वा अरे अयमात्मानन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघनः ' (बृ ४।५।१३) ' विज्ञानघनएव ' (बृ. २।४।१२) ' अत्रायं पुरुषः स्वयं ज्योतिर्भवति ' (बृ. ४।३।९) ' न विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते ' (बृ. ४।३।३०) ' अथ यो वेदेदं जिघ्राणीति स आत्मा ' (छां. ८।१२।४) ' कतम आत्मा योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः ' (बृ.४।३।७) ' एष हि द्रष्टा श्रोता रसयिता घ्राता मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुषः ' (प्र. ४।९) ' विज्ञातारमरे केन विजानीयात् ' (बृ. २।४।१४) जानात्येवायं पुरुषः ' ' न पश्यो मृत्युं पश्यति न रोगं नोत दुःखताम् ' (छां. ७।२६।२) ' स उत्तमः पुरुषो नापजनं स्मरन्निदं शरीरम् ' (छां. ८।१२।३)

कारणत्वं वर्तत एव । एकदैव सर्वत्राग्निसंयोगे कृते सर्वत्र दीपोत्पत्तिदर्शनात् । ततश्च यद्येक एव दीपः स्थायी स्यात् तर्हि तस्याग्निमावयवसंबन्धेनैवोत्पत्तौ सत्यामितरावयवसंयोगानपेक्षा स्यात् । चरमावयवसंयोगनाशे दीपनाशश्च न स्यात् । अतो दीपस्य क्षणिकत्वं स्वीकार्यमिति भावः । ननु प्रभाया विशीर्णावयवत्वाभावे दीपसमीपे एवौष्ण्यप्रकाशयोराधिक्यं दूरे च न्यूनत्वं कथमुपलभ्यते इति चेत्तत्राह- **प्रभाया इति । चिद्रूप एवेति ।** ज्ञानस्वरूपस्य धर्मिण आत्मनो गुणोऽपि ज्ञानस्वरूपः । न च धर्मधर्मिणोरुभयोर्ज्ञानस्वरूपत्वं कथमितिवाच्यम् । व्यक्तिभेदेनाविरोधात् । यथा नरस्यैव राज्ञो नरा एव सेवका इति सेव्यसेवकयोर्व्यक्तिभेदेनोभयोरपि नरत्वमविरुद्धं तद्वदित्याहुः । **विज्ञानघन एवेति ।** एवकारेणात्मनि स्वल्पस्यापि जडांशस्य व्यावृत्तिः । ज्ञानगुणकत्वज्ञानस्वरूपत्वप्रतिपादकवाक्यमाह- **एष हीति ।** ज्ञेयं यन्निकृष्टात्मस्वरूपं तत्स्वरूपमाह- **विज्ञातारमिति ।** अनेन ज्ञातृत्वं स्वाभाविकमिति फलितम् । **जानात्येवायमिति ।** एवकारार्थस्यावधारणस्य रूढ्योचे प्रमाणाभावेन सार्वत्रिकत्वान्मुक्तावपि ज्ञातृत्वमस्तीत्यर्थः । मुक्तौ ज्ञाननिषेधश्रुतीनां विषयविभागं दर्शयति- **न पश्य इति, स उत्तम इति च । नोपजनमिति ।** स्त्रीपुंसयो-

' एवमेवास्य परिद्रष्टुरिमाः षोडश कलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छान्ति ' (प्र. ६।५) ' तस्माद्वा एतस्मान्मनोमयादन्योऽन्तर आत्मा विज्ञानमयः (तै. २।४।१) इत्याद्याः । वक्ष्यति च ' ज्ञोऽत एव ' (ब्र. सू. २।३।१९) इति । अतः स्वयंप्रकाशोऽयमात्मा ज्ञातैव, न प्रकाशमात्रम् । प्रकाशत्वादेव कस्यचिदेव भवेत् प्रकाशः प्रदीपादिप्रकाशवत् । तस्मान्नात्मा भवितुमर्हति संवित् । संविदनुभूतिज्ञानादिशब्दाः सम्बन्धिशब्दा— इति च शब्दार्थविदः । न हि लोकवेदयोर्जानात्यादेरकर्मकस्याकर्तृकस्यच प्रयोगो दृष्टचरः ।

यच्चोक्तम् (पृ. ४५ पं. १) अजडत्वात्संविदेवात्मेति । तत्रेदं प्रष्टव्यम् । अजडत्वमिति किमभिप्रेतम् । स्वसत्ताप्रयुक्तप्रकाशत्वमिति चेत् । तथा सति दीपादिष्वनैकान्त्यम् । संविदतिरिक्तप्रकाशधर्मानभ्युपगमेनासिद्धिरिति विरोधश्च । अव्यभिचरितप्रकाशसत्ताकत्वमपि सुखादिषु व्यभिचारान्निरस्तम् । यदुच्येत, सुखादिरव्यभिचरितप्रकाशोऽप्यन्यस्मै प्रकाशमानतया घटादिरिव जडत्वेन नात्मेति । ज्ञानं किं स्वस्मै प्रकाशते

रन्योन्योपगमेन जायते इत्युपजनं शरीरं मुक्तौ न स्मरन्नित्यर्थः । निषेधस्य प्रतियोगिसापेक्षत्वेन मुक्तौ ज्ञातृत्वमस्तीत्येतच्छ्रुतिः सूचयति । **एवमिति** । पुरुषं प्राप्तस्य मुक्तस्य ज्ञातृत्वे सत्येव देहेन्द्रियविगम इत्याशयः । प्राणः १ श्रद्धा २ पंचभूतानि ७ इन्द्रियं ८ मनः ९ अन्नं १० वीर्यं ११ तपः १२ मन्त्राः १३ कर्म १४ लोकाः १५ नाम १६ चेत्येताः षोडशकलाः । पुरुषः अयनं स्थानं यासां ताः पुरुषायणाः । **ज्ञोत एवेति** । अत एव पूर्वोक्तश्रुतिभ्य एवात्मा ज्ञः ज्ञातृस्वरूप एवेति सूत्रार्थः । केवलज्ञानस्यात्मस्वरूपत्वे दूषणान्तरमाह—**संविदिति** । तथा च तत्सम्बन्धित्वेनाश्रयविषयाववश्यं स्वीकार्याविति निराश्रयस्य निर्विषयस्य ज्ञानस्यासिद्धिरिति भावः ।

संविदतिरिक्तेति । स्वसत्ताप्रयुक्तप्रकाशत्वमित्युक्तवता स्वपदग्राह्यात् ज्ञानात्तत्सत्ताप्रयुक्तप्रकाशस्यातिरिक्तत्वमवश्यं स्वीकार्यमेव । तस्य च तेन ज्ञानात्मवादिनाऽनङ्गीकाराद्विरोध इति भावः । **अव्यभिचरितेति** । यस्य सत्तायां प्रकाशनो न व्यभिचरति तत्त्वमजडत्वमित्यर्थः । अथ स्वस्मै प्रकाशमानत्वमेवाजडत्वमित्याशयेनाशङ्कते—**यदुच्येतेति** । उत्तरयति—**ज्ञानं किमिति** ।

तदपि ह्यन्यस्यैवाहमर्थस्य ज्ञातुरवभासते । अहं सुखीतिवत् जानाम्यहमिति । अतः स्वस्मै प्रकाशमानत्वमेवंरूपमजडत्वं संविद्यसिद्धम् । तस्मात्स्वात्मानं प्रति स्वसत्तयैव सिध्यन्नजडोऽहमर्थ एवात्मा । ज्ञानस्यापि प्रकाशता तत्सम्बन्धायत्ता ततूकृतमेव हि ज्ञानस्य सुखादेरिव स्वाश्रयचेतनं प्रति प्रकटत्वमितरंप्रति अप्रकटत्वञ्च । अतो न ज्ञप्तिमात्रमात्मा । अपि तु, ज्ञातैवाहमर्थः ।

अथ यदुक्तम् , (पृ. ४५ पं. ३) अनुभूतिः परमार्थतो निर्विषया निराश्रया च सती भ्रान्त्या ज्ञातृतयावभासते रजततयेव शुक्तिः । निरधिष्ठानभ्रमानुपपत्तेरिति । तदयुक्तम् । तथा सति अनुभवसामानाधिकरण्येनानुभविताहमर्थः प्रतीयेत अनुभूतिरहमिति । पुरोऽवस्थितभास्वरद्रव्याद्याकारतया रजतादिरिव । अत्र तु, पृथगवभासमानैवेयमनुभूतिरर्थान्तरमहमर्थं विशिनष्टि, दण्ड इव देवदत्तम् । तथा ह्यनुभवाम्यहमिति प्रतीतिः । तदेवमस्मदर्थमनुभूतिविशिष्टं प्रकाशयन्ननुभवाम्यहमिति प्रत्ययो दण्डमात्रे दण्डी देवदत्त-इतिप्रत्ययवद्विशेषणभूतानुभूतिमात्रावलम्बनः कथमिव प्रतिज्ञायेत ।

यदप्युक्तम्, (पृ. ४५ पं. ५) स्थूलोऽहमित्यादिदेहात्माभिमानवत एव ज्ञातृत्वप्रतिभासनात् ज्ञातृत्वमपि मिथ्येति । तदयुक्तम् । आत्मतयाभिमताया अनुभूतेरपि मिथ्यात्वं स्यात् । तद्वत एव प्रतीतेः । सकलेतरोपमर्दितत्वज्ञानाबाधितत्वेनानुभूतेर्न मिथ्यात्वमिति चेत् । हन्तैवं सति तदबाधादेव ज्ञातृत्वमपि न मिथ्या ।

तत्संबन्धेति । ज्ञातृसंबन्धेत्यर्थः । ज्ञातृसंबन्धं विना ज्ञानस्फुरणस्यासंभवात् ।

संविदपि मिथ्या किं न स्यादित्यत्राह-**निराधिष्ठानेति । अनुभूतिरहमितीति ।** अत्रानुभूतिः स्वरूपसती विवक्षिता । भ्रमाधिष्ठानभूताया अनुभूतेर्भ्रमे स्वरूपेण ज्ञानासंभवात् । **इतिप्रत्ययवदिति ।** यथा केवले दण्डे दण्डीति प्रत्ययो भ्रान्त्यापि न भवति तथेत्यर्थः ।

अनुभूतेर्मिथ्यात्वे हेतुमाह-**तद्वत एवेति ।** देहात्माभिमानवत एवेत्यर्थः । **तदबाधादिति** । ज्ञातृत्वस्याबाधितत्वं तु 'जानात्येवायं पुरुषः' इति मुक्तावपि ज्ञातृत्वपरश्रुतिवाक्यादवसेयम् ।

यदप्युक्तम् (पृ. ४५ पं. ७) अविक्रियस्यात्मनो ज्ञानक्रियाकर्तृत्वरूपं ज्ञातृत्वं न सम्भवति। अतो ज्ञातृत्वं विक्रियात्मकं जडं विकारास्पदाव्यक्तपरिणामाहङ्कारग्रन्थिस्थमिति न ज्ञातृत्वमात्मनः। अपि त्वन्तःकरणरूपस्याहङ्कारस्य । कर्तृत्वादिर्हि रूपादिवद्दृश्यधर्मः । कर्तृत्वे चाहंप्रत्ययगोचरत्वे चात्मनोऽभ्युपगम्यमाने देहस्येव अनात्मत्वपराक्त्वजडत्वादिप्रसङ्गश्चेति । नैतदुपपद्यते । देहस्येवाचेतनत्वप्रकृतिपरिणामित्वदृश्यत्वपराक्त्वपरार्थत्वादियोगादन्तःकरणरूपस्याहङ्कारस्य, चेतनासाधारणस्वभावत्वाच्च ज्ञातृत्वस्य। एतदुक्तं भवति । यथा देहादिर्दृश्यत्वपराक्त्वादिभिर्हेतुभिस्तत्प्रत्यनीकद्रष्टृत्वप्रत्यक्त्वादेर्विविच्यते, एवमन्तःकरणरूपाहंकारोऽपि तद्दृश्यत्वादेव तैरेव हेतुभिस्तस्माद्विविच्यत–इति । अतो विरोधादेव न ज्ञातृत्वमहङ्कारस्य । दृशित्ववत् । यथा दृशित्वं तत्कर्मणोहङ्कारस्य नाभ्युपगम्यते तथा ज्ञातृत्वमपि न तत्कर्मणोऽभ्युपगन्तव्यम् । न च ज्ञातृत्वं विक्रियात्मकम् । ज्ञातृत्वं हि ज्ञानगुणाश्रयत्वम् । ज्ञानं चास्य नित्यस्य स्वाभाविकधर्मत्वेन नित्यम् । नित्यत्वं चात्मनो, ' नात्मा श्रुतेः ' (ब्र. सू. २।३।१८) इत्यादिषु वक्ष्यति । ' ज्ञोऽत एव ' (ब्र. सू. २।३।१९) इत्यत, ज्ञ– इति व्यपदेशेन ज्ञानगुणाश्रयत्वं च स्वाभाविकमिति वक्ष्यति । अस्य ज्ञानस्वरूपस्यैव म.

ज्ञातृत्वमन्तःकरणस्य धर्म इति दूषयति **देहस्येवेति । तत्प्रत्यनीकेति** । दृश्यत्वस्य प्रत्यनीकं विरुद्धं द्रष्टृत्वम् । पराक्त्वस्य च विरुद्धं प्रत्यक्त्वम् । तादृशद्रष्टृत्वादेः सकाशाद्देहादिर्विविच्यते दूरं तिष्ठति तैर्धर्मैर्न संबध्यते तद्वदेवान्तःकरणमपीति नान्तःकरणस्य द्रष्टृत्वमित्याशयः । ज्ञातृत्वस्य विक्रियात्मकत्वं परोक्तं खण्डयति–**न चेति । नात्मा श्रुतेरिति** । आत्मानोत्पद्यते । ' न जायते म्रियते ' (का० २।१७) इत्यादिश्रुतेः । ताभ्यः ' नित्योनित्यानाम् ' । (का० ५।१३) इत्यादिश्रुतिभ्यः आत्मनो नित्यत्वावगमाच्चेति सूत्रार्थः । **वक्ष्यतीति** । ' यावदात्मभावित्वाच्च ' (ब्र. सू. २।३।३०) इति सूत्रेप्येतत्स्पष्टम् । ज्ञानगुणस्यात्मस्वरूपव्यापकत्वेन श्रुतौ क्वचिदात्मन्यपि ज्ञानशब्दप्रयोगः । वस्तुतः स आत्मगुण एवेति तत्तात्पर्यम् । **ज्ञानस्वरूपस्य** । ज्ञानं स्वरूपं स्वरूपनिरूपणधर्मो यस्य । ज्ञानं स्वाभाविकनित्यधर्मश्चे

णिप्रभृतीनां प्रभाश्रयत्वमिव ज्ञानाश्रयत्वमप्यविरुद्धमित्युक्तम् । स्वयमपरिच्छिन्नमेव ज्ञानं सङ्कोचविकासार्हमित्युपपादयिष्यामः । अतः क्षेत्रज्ञावस्थायां कर्मणा सङ्कुचितस्वरूपं तत्तत्कर्मानुगुणतरतमभावेन वर्तते । तच्चेन्द्रियद्वारेण व्यवस्थितम् । इममिन्द्रियद्वारज्ञानप्रसरमपेक्ष्योदयास्तमयव्यपदेशः प्रवर्तते । ज्ञानप्रसरे तु कर्तृत्वमस्त्येव । तच्च न स्वाभाविकम् । अपितु कर्मकृतमित्यविक्रियस्वरूप एवात्मा । एवं रूपाविक्रियात्मकं ज्ञातृत्वं ज्ञानस्वरूपस्यात्मन एवेति न कदाचिदपि जडस्याहङ्कारस्य ज्ञातृत्वसम्भवः । जडस्वभावस्याहङ्कारस्य चित्सन्निधानेन तच्छायापत्त्या तत्सम्भव इति चेत् । केयं चिच्छायापत्तिः । किमहङ्कारच्छायापत्तिः संविदः, उत संविच्छायापत्तिरहङ्कारस्य । न तावत् संविदः । संविदि ज्ञातृत्वानभ्युपगमात् । नाप्यहङ्कारस्य । तस्य जडस्य उक्तरीत्या ज्ञातृत्वायोगात् । द्वयोरप्यचाक्षुषत्वाच्च । न ह्यचाक्षुषाणां छाया दृष्टा । अथाग्निसम्पर्कादयःपिण्डौष्ण्यवच्चित्सम्पर्कात् ज्ञातृत्वोपलब्धिरिति । नैतत् । संविदि वास्तवज्ञातृत्वानभ्युपगमादेव न तत्सम्पर्कादहङ्कारे ज्ञातृत्वं तदुपलब्धिर्वा । अहङ्कारस्य त्वचेतनस्य ज्ञातृत्वासम्भवादेव सुतरां न तत्सम्पर्कात् संविदि ज्ञातृत्वं तदुपलब्धिर्वा ।

त्सर्वदा सर्वज्ञत्वप्रसङ्ग इत्यत्राह— **स्वयमिति** । **उपपादयिष्याम इति** । जीवात्मनः परं ज्योतिरुपसंपद्य ज्ञानविकासो भवतीति 'संपद्याविर्भावः' (ब्र. सू. ४।४।१) इत्यत्र वक्ष्यते । ननु ज्ञानस्य संकोचविकासार्हत्वे मुक्ताविव विकासः प्रागेव च सङ्कोच इति कुतो नियम इत्यत आह—**कर्मणेति** । सङ्कोचकोपाधिः । क्षेत्रज्ञावस्थायामेव सङ्कोच इत्यर्थः । **प्रवर्तत इति** । ज्ञानमुत्पन्नं ज्ञानं नष्टमिति व्यवहारो विकाससङ्कोचमूलक एवेत्यर्थः । **अस्त्येवेति** । एतेनात्मनोऽकर्तृत्वं निरस्तम् । एतादृशकर्तृत्वस्येष्टत्वात् । आत्मनो मुक्तावचेतनवत्तरिणामाङ्गीकारस्यानुचितत्वात् । नन्वात्मनः कर्तृत्वे विकारापत्तिरत आह—**तच्चेति** । **ज्ञानस्वरूपस्येति** । ज्ञानमेव स्वरूपं स्वाभाविको धर्मो यस्य स ज्ञानस्वरूपः । ज्ञानधर्मकस्यात्मन एव स्वधर्मभूतज्ञानप्रसरणकर्तृत्वं संभवति न जडस्वरूपस्यातद्धर्मकस्याहङ्कारस्येत्यर्थः । शङ्कते—**जडस्वभावस्येति** । **तच्छायापत्त्या** । चिच्छायापत्त्या । **उक्तरीत्येति** । अचेतनस्य प्रकृतिपरिणामभूतस्याहङ्कारस्य चिच्छायायापि ज्ञातृत्वं न संभवतीत्यर्थः ।

यदप्युक्तम्, उभयत्र वस्तुतो न ज्ञातृत्वमस्ति, अहङ्कारस्त्वनुभूतेरभिव्यञ्जकः स्वात्मस्थामेवानुभूतिमभिव्यनक्ति, आदर्शादिवदिति । तदयुक्तम् । आत्मनः स्वयंज्योतिषो जडरूपाहङ्काराभिव्यङ्ग्यत्वायोगात् । तदुक्तम् –

'शान्ताङ्गार इवादित्यमहङ्कारो जडात्मकः ।
स्वयंज्योतिषमात्मानं व्यनक्तीति न युक्तिमत्' (आ. सि. पृ. २७) इति ।

स्वयम्प्रकाशानुभवाधीनसिद्धयो हि सर्वे पदार्थाः । तत्र तदायत्तप्रकाशोऽचिदहङ्कारोऽनुदितानस्तमितस्वरूपप्रकाशमशेषार्थसिद्धिहेतुभूतमनुभवमभिव्यनक्तीत्यात्मविदः परिहसन्ति । किञ्च, अहङ्कारानुभवयोः स्वभावविरोधादनुभूतेरननुभूतित्वप्रसङ्गाच्च न व्यंक्तृव्यङ्ग्यभावः । तथोक्तम्–

'व्यंक्तृव्यङ्ग्यत्वमन्योन्यं न च स्यात् प्रातिकूल्यतः ।
व्यङ्ग्यत्वेऽननुभूतित्वमात्मनि स्याद्यथा घटे' (आ. सि. २७) इति ।

नच रविकरनिकराणां स्वाभिव्यङ्ग्यकरतलाभिव्यङ्ग्यत्ववत् संविदभिव्यङ्ग्याहङ्काराभिव्यङ्ग्यत्वं संविदः साधीयः । तत्रापि रविकरनिकराणां करतलाभिव्यङ्ग्यत्वाभावात् । करतलप्रतिहतगतयो हि रश्मयो बहुलाः स्वयमेव स्फुटतरमुपलभ्यन्त– इति तद्बाहुल्यमात्रहेतुत्वात् करतलस्य नाभिव्यञ्जकत्वम् । किञ्च, अस्य संविद्रूपस्यात्मनोऽहङ्कारनिर्वर्त्याभिव्यक्तिः किंरूपा । न तावदुत्पत्तिः । स्वतःसिद्धतयानन्योत्पाद्यताभ्युपगमात् । नापि त-

---

उभयत्र । अहङ्कारे संविदि च । **अनुभूतेः** । अनुभूतिस्वरूपस्यात्मनः । **तदुक्तमिति** । आत्मसिद्धावित्यर्थः । **शान्ताङ्गार इति** । यथा शान्ताङ्गार आदित्यं व्यनक्तीति न युक्तिसहं तथेत्यर्थः । **परिहसन्तीति** । ईदृशमनुभवमीदृशोऽहङ्कारोऽभिव्यनक्तीत्युक्तवतस्तव त्वदीया एव हसन्तीत्यर्थः । **स्वभावविरोधादिति** । अनुभवस्याशेषार्थसिद्धिहेतुत्वादहङ्कारस्य तदभावादनुभवाधीनसिद्धित्वाच्च विरोधः । **अननुभूतित्वप्रसङ्गाच्चेति** । विमताऽनुभूतिर्नानुभूतिः व्यङ्ग्यत्वाद्घटवदित्यनुमानेनाननुभूतित्वप्रसङ्ग इत्यर्थः । **व्यङ्क्तृव्यङ्ग्यभावः** । व्यञ्जकव्यङ्ग्यभावः । **प्रातिकूल्यतः** । विरोधात् । **बहुला इति** । न चात्रापि संविद्बाहुल्यहेतुत्वमहङ्कारस्य शङ्कनीयम् । तन्त्रये महत्स्वरूपायाः संविदः प्रसरणस्वभावत्वाभावात् । **अहङ्कारनिर्वर्त्या** । अहङ्कारेण जायमाना । **किंरूपेति** । उत्पत्तिरूपा प्रकाशनरूपा अनुभवसाधनानग्रहरूपा वे-

तत्प्रकाशनम् । तस्या अनुभवान्तराननुभाव्यत्वात् । तत एव च न तदनुभवसाधनानुग्रहः । स हि द्विधा, ज्ञेयस्येन्द्रियसम्बन्धहेतुत्वेन वा । यथा जातिनिजमुखादिग्रहणे व्यक्तिदर्पणादीनां नयनादीन्द्रियसम्बन्धहेतुत्वेन । बोद्धृगतकल्मषापनयनेन वा । यथा परतत्त्वावबोधसाधनस्य शास्त्रस्य शमदमादिना । यथोक्तम् –

'करणानामभूमित्वान्न तत्सम्बन्धहेतुता' (आ. सि. पृ. २८) इति ।

किञ्च, अनुभूतेरनुभाव्यत्वाभ्युपगमेऽप्यहमर्थेन न तदनुभवसाधनानुग्रहः सुवचः । स ह्यनुभाव्यानुभवोत्पत्तिप्रतिबन्धकनिरसनेन भवेत । यथा रूपादिग्रहणोत्पत्तिविरोधिसन्तमसनिरसनेन चक्षुषो दीपादिना । न चेह तथाविधं निरसनीयं सम्भाव्यते । न तावत् संविदात्मगतं तज्ज्ञानोत्पत्तिविरोधि किञ्चिदप्यहङ्कारापनेयमस्ति । अस्ति ह्यज्ञानमिति चेत् न । अज्ञानस्याहङ्कारापनोद्यत्वानभ्युपगमात् । ज्ञानमेव ह्यज्ञानस्य निवर्त्तकम् । न च संविदाश्रयत्वमज्ञानस्य सम्भवति । ज्ञानसमानाश्रयत्वात् तत्समानविष-

---

त्यर्थः । **तत्प्रकाशनम्** । संविद्रूपात्मविषयकज्ञानोत्पत्तिः । **अननुभाव्यत्वात्** । अविषयत्वात् । **तत एव** । संविद्रूपात्मविषयकज्ञानोत्पत्तेरसंभवादेव । **द्विधेति** । ज्ञेयगतदोषदूरीकरणद्वारा ज्ञातृगतदोषदूरीकरणद्वारा चेत्याशयः । तदेवाह–**ज्ञेयस्येति** । **अभूमित्वात्** । अविषयत्वात् । संविद्रूपस्यात्मन इन्द्रियाविषयत्वान्नाहङ्कारस्य संविज्ज्ञानजनकेन्द्रियसंबन्धहेतुत्वं नापि बोद्धृगतकल्मषापनयहेतुत्वमिति भावः ।

अनुभाव्येति । अनुभाव्या या अनुभूतिस्तस्या योऽनुभवस्तदुत्पत्तौ यत्प्रतिबन्धकं तन्निरसनमहङ्कारः करोतीत्यर्थः । परं त्वेतादृशं किंचित्प्रतिबन्धकमेवात्र न संभवतीत्याशयः । **संतमसम्** । गाढान्धकारः । **संविदात्मगतमिति** । संविद्रूपो य आत्मा ज्ञेयत्वेनाभिमतस्तन्निष्ठमित्यर्थः । **अस्ति हीति** । संविदाश्रयमज्ञानमेव प्रतिबन्धकमिति शङ्काशयः । अज्ञानस्य संविदाश्रयत्वासंभवेऽपि तुष्यतु दुर्जनन्यायेन तत्स्वीकृत्य प्रकारान्तरेण दूषयति–**अज्ञानस्येति** । **संविदाश्रयत्वमिति** । संविन्निष्ठत्वं संविद्विषयकत्वं चेत्यर्थः । **ज्ञानसमानेति** । यो हि ज्ञानाश्रयो भवति स एव कालविषयादिभेदेनाज्ञानाश्रयो भवति नान्यो ज्ञातृभावरहितो घटादिः । तथा च संविदो ज्ञातृभावरहितत्वेन न तन्निष्ठत्वमज्ञानस्य संभवतीत्यर्थः । **तत्समानेति** । ज्ञानसमानेत्यर्थः । यो हि ज्ञानस्य विषयो भवति स एव कालज्ञात्रादिभेदेनाज्ञा-

यत्वाच्च । ज्ञातृभावविषयभावविरहिते ज्ञानमात्रे साक्षिणि नाज्ञानं सम्भवितुमर्हति । यथा ज्ञानाश्रयत्वप्रसक्तिशून्यत्वेन घटादेर्नाज्ञानाश्रयत्वं, तथा ज्ञानमात्रेऽपि ज्ञानाश्रयत्वाभावेन नाज्ञानाश्रयत्वं स्यात् । संविदोऽज्ञानाश्रयत्वाभ्युपगमेऽप्यात्मतयाभ्युपेतायास्तस्या ज्ञानविषयत्वाभावेन, ज्ञानेन न तद्गताज्ञाननिवृत्तिः । ज्ञानं हि स्वविषय एवाज्ञानं निवर्त्तयति । यथा रज्ज्वादौ । अतो न केनापि कदाचित्संविदाश्रयमज्ञानमुच्छिद्येत । अस्य च सदसदनिर्वचनीयस्याज्ञानस्य स्वरूपमेव दुर्निरूपमित्युपरिष्टाद्वक्ष्यते । ज्ञानप्रागभावरूपस्य चाज्ञानस्य ज्ञानोत्पत्तिविरोधित्वाभावेन न तन्निरसनेन तज्ज्ञानसाधनानुग्रहः । अतो न केनापि प्रकारेणाहङ्कारेणानुभूतेरभिव्यक्तिः ।

न च, स्वाश्रयतयाभिव्यङ्ग्याभिव्यञ्जनमभिव्यञ्जकानां स्वभावः । प्रदीपादिष्वदर्शनात् । यथावस्थितपदार्थप्रतीत्यनुगुणस्वाभाव्याच्च ज्ञानतत्साधनयोरनुग्राहकस्य च । तच्च स्वतःप्रामाण्यं न्यायसिद्धम् ।

नस्य विषयो भवति नान्यो ज्ञानाविषये वन्ध्यापुत्रादिः । तथा च संविदो ज्ञानविषयभावरहितत्वेन न तद्विषयत्वमज्ञानस्य संभवतीत्यर्थः । अथ संविदोऽज्ञानविषयत्वमभ्युपेत्यापि दूषणमाह-**संविद इति** । **स्वविषय एवेति** । यद्यविषयेऽप्यज्ञाननिवृत्तिस्तर्हि शुक्तिज्ञानेनापि सर्वभ्रमनिवृत्तिः स्यात् । किंचाहङ्कारापनोद्यत्वेनोक्तमेतदज्ञानं किं सदसदनिर्वचनीयं ज्ञानप्रागभावरूपं वा । आद्ये आह-**अस्य चेति** । अन्त्ये आह-**ज्ञानप्रागभावेति** । **उत्पत्तिविरोधित्वाभावेन** । उत्पत्तिप्रतिबन्धकत्वाभावेन । न हि घटप्रागभावो घटोत्पत्तिं प्रतिबध्नाति ।

स्वाश्रयतयेति । तद्गुणसंविज्ञानो बहुव्रीहिः । **यथावस्थितेति** । ज्ञानस्य चाक्षुषादेस्तत्साधनस्येन्द्रियादेरनुग्राहकस्य चालोकादेरीदृश एव स्वभावः । ज्ञानस्य स्वतःप्रमाणत्वात् । यथावस्थितपदार्थप्रतीतिजनकत्वमेव प्रमाणत्वं तच्च स्वत एवेति ज्ञानस्य तादृशस्वभावः सिध्यति । ज्ञानस्य तादृशस्वभावत्वे च तत्साधनानुग्राहकयोरपि तादृशस्वभावत्वमर्थादेव सिध्यतीत्यर्थः । **न्यायसिद्धमिति** । यथा जले उष्णस्पर्शस्य न स्वतस्त्वं किं तु परतस्त्वम् । तस्य स्वतस्त्वं तु तेजसि प्रसिद्धम् । तथा ज्ञाने प्रमाणत्वस्य यदि परतस्त्वं स्यात्तर्हि तस्यान्यत्र क्वचिदपि स्वतस्त्वमावश्यकम् । तच्च न संभवति । प्रमाणत्वस्य ज्ञानमात्रनियतत्वात् । अतस्तस्य ज्ञाने स्वतस्त्वमेवाङ्गीकार्यम् ।

न च, दर्पणादिर्मुखादेरभिव्यञ्जकः । अपि तु, चाक्षुषतेजः—प्रतिफलनरूपदोषहेतुः । तद्दोषकृतश्च तत्रान्यथावभासः । अभिव्यञ्जकस्त्वालोकादिरेव । न चेह तथाहङ्कारेण संविदि स्वप्रकाशायां तादृशदोषापादनं सम्भवति । व्यक्तेस्तु जातिराकार इति तदाश्रयतया प्रतीतिः । न तु व्यक्तिव्यङ्ग्यत्वात् । अतोऽन्तःकरणभूताहङ्कारस्थतया संविदुपलब्धेर्वस्तुतो दोषतो वा न किञ्चिदिह कारणमिति नाहङ्कारस्य ज्ञातृत्वं, तथोपलब्धिर्वा । तस्मात् स्वत एव ज्ञातृतया सिध्यन्नहमर्थ एव प्रत्यगात्मा, न ज्ञप्तिमात्रम् । अहंभावविगमे तु ज्ञप्तेरपि न प्रत्यक्त्वसिद्धिरित्युक्तम् । तमोगुणाभिभवात् परागर्थानुभवाभावाच्च अहमर्थस्य विविक्तस्फुटप्रतिभासाभावेऽप्याप्रबोधादहमित्येकाकारेणात्मनः स्फुरणात्सुषुप्तावपि नाहं-

---

अप्रमाणत्वस्य तु परतस्त्वमेव । प्रमाणत्वा-प्रमाणत्वयोः परस्परविरुध्ययोरेकत्र स्वतस्त्वायोगात् । अप्रमाणत्वस्य प्रमाणत्वाभावरूपत्वेन तस्य ज्ञानव्यतिरिक्तस्थलेषु बहुषु प्रसिद्धत्वाच्च । न च वैपरीत्यं किं न स्यादिति वाच्यम् । प्रायोदर्शनं हि स्वाभाविकत्वे तन्त्रम् । ज्ञाने च प्रमाणत्वमेव प्रायो दृश्यते इति तदेव तत्र स्वाभाविकम् । अप्रमाणत्वं तु इदं रजतमित्यादौ क्वचिद्दृश्यते । तत्रापि च रजतांशस्यैवाप्रमाणत्वं नेदमंशस्येत्यंशयोरिति अप्रमाणत्वस्य क्वाचित्कतरत्वात्तस्यैव नैमित्तिकत्वमिति बोध्यम् । ननु मदोषादिष्वदर्शनादित्यसिद्धो हेतुः । दर्पणे व्यक्तौ च दर्शनादिति चेत्तत्राह—**न चेति । तद्दोषेति** । अन्यथाज्ञानहेतुत्वादेव प्रतिफलनस्य दोषत्वमिति भावः । **वस्तुत इति** । यथा जातेर्व्यक्तिनिष्ठत्वेनोपलब्धिर्भवति । तस्याः कारणं वस्तुतस्तयोर्धर्मधर्मिभावः । मुखस्य दर्पणनिष्ठत्वेनोपलब्धिर्भवति । तस्याः कारणं दोषतः प्रतिफलनम् । तथाहङ्कारनिष्ठत्वेन या संविदुपलब्धिर्भवति तस्याः कारणं किंचिन्न संभवतीत्यर्थः । ननु ज्ञानस्य प्रत्यक्त्वात्तस्यैवात्मत्वमस्त्वित्यत आह—**अहंभावेति** । ज्ञानेऽहंभावाभावेन स्वस्मै प्रकाशमानत्वरूपप्रत्यक्त्वाभावान्न प्रत्यक्त्वं ज्ञानस्यात्मत्वसाधकं किं तु अहंताविशिष्टस्य ज्ञातुरेवेत्यर्थः । सुषुप्तावप्यस्फुटोऽहम्भावोऽस्त्येव । तमेव साधयति—**तमोगुणेति । परागर्थः** । इदमर्थः । तस्यानुभवाभावेनाहमर्थस्येतरव्यावृत्तत्वेन किंचिद्विशेषणविशिष्टत्वेन च प्रतिभासो न भवति । इतरव्यावृत्तत्वेन प्रतिभास एव विविक्तप्रतिभासः । विशेषणविशिष्टत्वेन प्रतिभास एव स्फुटावभासः । ननु यदि सुषुप्तावहम्भावोऽस्फुटस्तर्हि तदस्तित्वे किं प्रमाणमिति चेद्बहुसंमतानुभवा-

भावविगमः । भवदभिमताया अनुभूतेरपि तथैव प्रथेति वक्तव्यम् । न हि, सुप्तोत्थितः कश्चिदहंभावविद्युक्तार्थान्तरप्रत्यनीकाकारा ज्ञप्तिरहमज्ञानसाक्षितयावतिष्ठे–इत्येवंविधां स्वापसमकालामनुभूतिं परामृशति । एवं हि सुप्तोत्थितस्य परामर्शः, सुखमहमस्वाप्समिति । अनेन प्रत्यवमर्शेन तदानीमप्यहमर्थस्यैवात्मनः सुखित्वं ज्ञातृत्वं च ज्ञायते । न च वाच्यं, यथेदानीं सुखं भवति, तथा तदानीमस्वाप्समित्येषा प्रतिपत्तिरिति । अतद्रूपत्वात्प्रतिपत्तेः । न चाहमर्थस्यात्मनोऽस्थिरत्वेन तदानीमहमर्थस्य सुखित्वानुसन्धानानुपपत्तिः । यतः सुषुप्तिदशायाः प्रागनुभूतं वस्तु, सुप्तोत्थितो मयेदं कृतं मयेदमनुभूतमहमेवेदमवोचमिति परामृशति । एतावन्तं कालं न किञ्चिदहमज्ञासिषमिति च परामृशतीति चेत्–ततः किम् । न किञ्चिदिति कृत्स्नप्रतिषेध–इति चेन्न । अहमवेदिषमिति वेदितुरहमर्थस्यानुवृत्तेः । वेद्यविषयो हि स प्रतिषेधः । न किञ्चिदिति निषेधस्य कृत्स्नविषयत्वे भवदभिमतानुभूतिरपि प्रतिषिद्धा स्यात् । सुषुप्तिस-

---

वपि तुल्यमेतदित्याह–**भवदिति** । यथा तव ज्ञातृज्ञेयसंबन्धाभावेन ज्ञानस्य सुषुप्तावस्फुटावभासस्तथा ममापि इदमर्थानुभवाभावेनाहमर्थस्यास्फुटावभास इत्याशयः । **अहम्भावावियुक्ता** । ज्ञातृसंबन्धरहिता । **अर्थान्तरप्रत्यनीकाकारा** । ज्ञेयादिसमस्तविशेषरहिता । **ज्ञप्तिरहमिति** । अत्राहंशब्दोपादानं प्रत्यक्त्वसिध्यर्थम् । तथाच परपक्षानुगुणः परामर्शो नास्तीति सिद्धम् । अथ स्वपक्षानुगुणं परामर्शं दर्शयति–**एवं हीति** । **यथेदानीमिति** । पूर्वं कृतात्स्वापादिदानीमहं सुखमनुभवामीत्येव सुखमहमस्वाप्समितिपरामर्शस्यार्थो न तु स्वापकाले इति शङ्काशयः । उत्तरयति–**अतद्रूपत्वादिति** । सुखमहमस्वाप्समिति–वाक्यात्स्वरसतस्त्वदुक्तार्थाप्रतीतेः । न हि मन्दमगच्छमिति–वाक्यादिदानीं यथा मान्द्यं भवति तथा पूर्वमगच्छमित्यर्थः प्रतीयत इति भावः । शङ्कते–**न चेति** । स्वरसतः प्रतीतोऽप्यर्थो नोपपद्यते । अहमर्थस्यात्मनोऽस्थिरत्वात् । अतःसोऽर्थस्त्याज्य एवेत्याशयः । उत्तरयति–**यत इति**। कृतमिति कायिकः परामर्शः । अनुभूतमिति मानसः । अवोचमिति वाचिकः । एभिः परामर्शैरात्मनः स्थिरत्वमेव सिध्यतीति स्वारसिकार्थस्य न काचिदनुपपत्तिरिति भावः। पुनः शङ्कते–**एतावन्तमिति** । उत्तरयति–**ततः किमिति** । अहमर्थो न निषेधविषय इत्याशयः । अमुमाशयमजानानः शङ्कते–**न किंचिदिति** । परिहरति–**नेति। सुषुप्ति-**

मयेऽप्यनुसन्धीयमानमहमर्थमात्मानं ज्ञातारमहमिति परामृश्य, न किञ्चिदवेदिषमिति वेदने तस्य प्रतिषिध्यमाने, तस्मिन् काले प्रतिषिध्यमानाया वित्तेः सिद्धिमनुवर्त्तमानस्य ज्ञातुरहमर्थस्य चासिद्धिमनेनैव न किञ्चिदहमवेदिषमिति परामर्शेन साधयंस्तमिममर्थं देवानामेव प्रियः साधयतु । मामप्यहं न ज्ञातवानित्यहमर्थस्यापि तदानीमननुसन्धानं प्रतीयते—इति चेत्, स्वानुभवस्ववचनयोर्विरोधमपि न जानन्ति भवन्तः । अहं मां न ज्ञातवानिति ह्यनुभववचने, मामिति किं निषिध्यते—इति चेत्, साधु पृष्टं भवता । तदुच्यते । अमहर्थस्य ज्ञातुरनुवृत्तेर्न स्वरूपं निषिध्यते । अपि तु प्रबोधसमयेऽनुसन्धीयमानस्याहमर्थस्यवर्णाश्रमादिविशिष्टता । अहं मां न ज्ञातवानित्युक्तेर्विषयो विवेचनीयः । जागरितावस्थानुसंहितजात्यादिविशिष्टोऽस्मदर्थो मामित्यंशस्य विषयः । स्वापावस्थाप्रसिद्धोऽविशदस्वानुभैवकतानश्चाहमर्थोऽहमित्यंशस्य विषयः । अत्र, सुप्तोऽहमीदृशोऽहमिति च मामपि न ज्ञातवानहमित्येव खल्वनुभवप्रकारः ।

किञ्च, सुषुप्तावात्मा अज्ञानसाक्षित्वेनास्ते—इति हि भवदीया प्रक्रिया । साक्षित्वञ्च साक्षात् ज्ञातृत्वमेव । न ह्यजानतः साक्षित्वम् । ज्ञातैव लोकवेदयोः साक्षीति व्यपदिश्यते, न ज्ञानमात्रम् । स्मरति च भगवान् पाणिनिः 'साक्षाद्द्रष्टरि संज्ञायाम्' (पा. सू. ५।२।९१) इति साक्षात् ज्ञातर्ये-

---

समयेऽपीति । अहं न किंचिद्वेदिषमिति—परामर्शेऽहमर्थो न प्रतिषिध्यते । अहंशब्देन तस्य परामर्शेन तदानीं तस्यानुवर्तमानत्वात् । किं तु तदीयवेदनमेव प्रतिषिध्यते । भवांस्त्वनेनैव परामर्शेन प्रतिषिध्यमानस्यापि वेदनस्य सिद्धिं कल्पयसि । अनुवर्तमानस्याप्यहमर्थस्यासिद्धिं कल्पयसीति विरुद्धं वदन्देवानां प्रियो मूर्ख एवासीत्यर्थः । 'देवानामेव साधयतु' इति पाठे देवाः प्रतिवचनं न ददतीति तदग्रे एव भवान्यथेच्छं वदतु न तु ममाग्रे इत्यर्थः । शङ्कते—**मामपीति** । परिहरति—**स्वानुभवेति** । अनुभवानुसारेण न ब्रवीषीत्यर्थः । पुनः शङ्कते—**अहमिति** । **तदुच्यत इति** । अहंशब्देन कस्यानुवृत्तिः मामित्यनेन च कस्य निषेधस्तदुच्यत इत्यर्थः ।

साक्षाद्द्रष्टरीति । साक्षाच्छब्दादिनिप्रत्ययो भवति द्रष्टर्यर्थे गम्यमाने संज्ञायां म-

न साक्षिशब्दम् । सचायं साक्षी जानामीति प्रतीयमानोऽस्मदर्थ एवेति कुतस्तदानीमहमर्थो न प्रतीयेत । आत्मने स्वयमवभासमानोऽहमित्येवाव- भासते—इति स्वापाद्यवस्थास्वप्यात्मा प्रकाशमानोऽहमित्येवावभासते—इति सिद्धम् ।

यत्तु, मोक्षदशायामहमर्थो नानुवर्त्तते—इति । तदपेशलम् । तथा सत्या- त्मनाश एवापवर्गः प्रकारान्तरेण प्रतिज्ञातः स्यात् । न चाहमर्थो धर्म- मात्रं, येन तद्विगमेऽप्यविद्यानिवृत्ताविव स्वरूपमवतिष्ठेत । प्रत्युत स्वरूप- मेवाहमर्थः आत्मनः । ज्ञानन्तु तस्य धर्मः । अहं जानामि ज्ञानं मे जातमि- ति चाहमर्थधर्मतया ज्ञानप्रतीतेरेव । अपि च, यः परमार्थतो भ्रान्त्या वा आध्यात्मिकादिदुःखैर्दुःखितयात्मानमनुसन्धत्ते—अहं दुःखीति, सर्वमेतद्दुः- खजातमपुनर्भवमपोह्य कथमहमनाकुलः स्वस्थो भवेयमित्युत्पन्नमोक्षरागः स एव तत्साधने प्रवर्त्तते । स साधनानुष्ठानेन यद्यहमेव न भविष्यामीत्य- वगच्छेत् , अपसर्पेदेवासौ मोक्षकथाप्रस्तावात् । ततश्चाधिकारिविरहादेव

त्यामिति सूत्रार्थः । साक्षाद्द्रष्टा साक्षी इत्युदाहरणम् । **आत्मने स्वयमिति** । सुषुप्तौ भासमान आत्मा अहमित्येव भासते स्वस्मै प्रकाशमानत्वात् जाग्रदात्मवदित्यनुमा- नमनेन सूचितम् ।

तथा सतीति । ज्ञानसंतत्युच्छेद एव मोक्ष इति बौद्धमतं स्वरूपनाशस्यापुरुषार्थ- त्वेन दूषयता त्वयापि शब्दान्तरेण स्वरूपनाश एवोक्त इति भावः । **ज्ञानप्रतीतेरेवे- ति** । एवं च मोक्षे ज्ञानरूपधर्मस्य सत्वेन तद्धर्मिणोऽहङ्कारस्यापि सत्वमङ्गीकार्यमि- ति सिद्धम् । प्रत्युत तदनङ्गीकारे बाधकमाह—**अपि चेति** । **भ्रान्त्या वेति** । यथा वा- स्तविकदुःखे दुःखिनः स्वदुःखनाश एवापेक्ष्यते न तु स्वविनाशः । तथा दुःखभ्रमेपि द्विचन्द्रज्ञानादिभ्रान्तिमतः स्वभ्रमनाश एवापेक्ष्यते न तु स्वविनाश इति भावः । **आध्यात्मिकादीति** । आदिशब्देनाधिभौतिकाधिदैविकयोः संग्रहः । आध्यात्मिकं द्विविधं शारीरं मानसं च । शारीरं वातपित्तश्लेष्मणां वैषम्यनिमित्तम् । मानसं कामक्रोधादिनिमित्तम् । आधिभौतिकं मानुषपशुपक्षिसर्पस्थावरादिनिमित्तम् । आधिदैविकं यक्षराक्षसग्रहाद्यावेशनिमित्तम् । **अपुनर्भवमिति** । अपोह्येतिक्रिया- विशेषणमेतत् । न पुनर्भवः पुनरुत्पत्तिर्यत्रेत्यर्थः । **अनाकुलः** । आगामिदुःखशङ्कया मनःक्षोभ आकुलत्वं तद्रहितः । **अपसर्पेदेवेति** । तथा च मोक्षमार्गप्रवृत्त्यन्यथानुपप-

सर्वं मोक्षशास्त्रमप्रमाणं स्यात् । अहमुपलक्षितं प्रकाशमात्रमपवर्गेऽवतिष्ठते—इति चेत् । किमनेन । मयि विनष्टेऽपि किमपि प्रकाशमात्रमवतिष्ठते—इति मत्वा न हि कश्चिद्बुद्धिपूर्वमधिकारी प्रयतते । अतोऽहमर्थस्यैव ज्ञातृतया सिध्यतः प्रत्यगात्मत्वम् ।

स च प्रत्यगात्मा मुक्तावप्यहमित्येव प्रकाशते । स्वस्मै प्रकाशमानत्वात् । यो यः स्वस्मै प्रकाशते, स सर्वोऽहमित्येव प्रकाशते यथा, तथावभासमानत्वेनोभयवादिसम्मतः संसार्यात्मा । यः पुनरहमिति न चकास्ति, नासौ स्वस्मै प्रकाशते—यथा घटादिः । स्वस्मै प्रकाशते[2] चायं मुक्तात्मा । स तस्मादहमित्येव प्रकाशते । न चाहमिति प्रकाशमानत्वेन तस्याज्ञत्वसंसारित्वादिप्रसङ्गः । मोक्षविरोधादज्ञत्वाद्यहेतुत्वाच्चाहंप्रत्ययस्य । अज्ञानं नाम, स्वरूपाज्ञानमन्यथाज्ञानं विपरीतज्ञानं वा । अहमित्येवात्मनः स्वरूपमिति स्वरूपज्ञानरूपोऽहंप्रत्ययो नाज्ञत्वमापादयति, कुतः संसारित्वम् । अपि तु तद्विरोधित्वान्नाशयत्येव । ब्रह्मात्मभावापरोक्षनिर्धूतनिरवशेषाविद्यानामपि वामदेवादीनामहमित्येवात्मानुभवदर्शनाच्च । श्रूयते हि, 'तद्धैतत् पश्य-

---

स्या मोक्षेऽहमर्थोऽनुवर्तत एवेत्यर्थापत्तिप्रमाणेन सिद्धमिति भावः । शङ्कते—**अहमिति** ।

अनुमानमाह—**सचेति** । **संसारित्वादीति** । आदिशब्देन रागद्वेषदुःखादिसंग्रहः । **मोक्षविरोधादिति** । मोक्षेण सहाज्ञत्वादीनां विरोधान्न तत्प्रसङ्ग इत्यर्थः । तथा च श्रुतिः । 'न पश्यो मृत्युं पश्यति न रोगं नोतदुःखताम्' (छां. ७।२६।२) इति । कार्यस्य च कारणव्यापकत्वमस्त्येवेति न नियमः । न हि घटस्य दण्डव्यापकत्वं दृश्यते इत्यहम्भावे सत्यपि न तत्कार्यस्याज्ञत्वादेः प्रसक्तिरिति बोध्यम् । अथ कार्यकारणभावोऽपि नास्तीत्याह—**अज्ञत्वादीति** । संसारित्वाहमर्थत्वयोः सहदर्शनमात्रेण कार्यकारणभावस्वीकारे त्वन्मतेऽपि संसारित्वानुभवयोस्तथात्वापत्तिः । अहंप्रत्ययस्याज्ञत्वाद्यहेतुत्वमुपपादयति—**अज्ञानमिति** । क्वचित्केवलं स्वरूपाज्ञानम् । यथा तमसि घटादेः । क्वचित्तु तत्पूर्वकमन्यथाज्ञानम् । यथा पीतः शङ्ख इति । अत्र पाण्डुरत्वविशिष्टशङ्खस्वरूपस्याज्ञानं वर्तत एव । क्वचिच्च तत्पूर्वकं विपरीतज्ञानम् । यथा शुक्ताविदं रजतमिति । **तत** । अज्ञत्वम् । **ब्रह्मेति** । ब्रह्मात्मभावस्यापरोक्षेण प्रत्यक्षेण निर्धूता निरवशेषा समग्राऽविद्या येषामित्यर्थः । ब्रह्मणोऽपि तथा

---

१ क. स्वस्मै स्वयं प्रका. २ ख. ते तथा चा.

न्नृषिर्वामदेवः प्रतिपेदे अहं मनुरभवं सूर्य्यश्चेति ' (बृ. १।४।१०) अहमेव च संवर्त्तामि भविष्यामीत्यादि । सकलेतराज्ञानविरोधिनः सच्छब्दप्रत्ययमात्रभाजः परस्य ब्रह्मणो व्यवहारोऽप्येवमेव, ' हन्ताहमिमास्तिस्रो देवताः ' (छां. ६।३।२) ' बहु स्यां प्रजायेय ' (छां. ६।२।३)' स ऐक्षत लोकान्नु सृजै ' (ऐ. १।१) इति । तथा–

' यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः ।
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ' (गी. १५।१८)

'अहमात्मा गुडाकेश' (गी. १०।२०) 'न त्वेवाहं जातु नासम्' (गी.२।१२)

' अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा ' (गी. ७।६)
' अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्त्तते ' (गी. १०।८)
' तेषामहं समुद्धर्त्ता मृत्युसंसारसागरात् ' (गी.१२।७)

' अहं वीजप्रदः पिता ' (गी. १४।४) ' वेदाहं समतीतानि ' (गी. ७।२६) इत्यादिषु । यद्यहमित्येवात्मनः स्वरूपम् , कथं तर्ह्यहंकारस्य क्षेत्रान्तर्भावो भगवतैवोपदिश्यते–

' महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव च ' (गी. १३।५) इति ।

उच्यते। स्वरूपोपदेशेषु सर्वेष्वहमित्येवोपदेशात् तथैवात्मस्वरूपप्रतिपत्तेः

प्रतिपत्तिमाह–**सकलेति**। अज्ञानविरोधिनो नाज्ञानवश्यत्वमिति भावः ।न हि विषहन्तुर्गरुडस्य विषवश्यत्वं दृश्यते । **सच्छब्देति** । सच्छब्दः सदिति प्रत्ययश्च तन्मात्रभाजः । मात्रचा नामरूपव्यावृत्तिः । **एवमेव** । अहंप्रत्ययघटित एव । **तिस्रो देवताः** । तेजोबन्नरूपाः अनुप्रविश्य नामरूपे व्याकरवाणीत्यर्थः । एषु श्रुतिस्मृतिवाक्येष्वहंशब्देन चिन्मात्रमुपलक्ष्यते इति चेल्लक्षणैव दोषः । अनेकवचनोपादानं ' महाभूतान्यहङ्कारः ' ' अहङ्कारं बलं दर्पम् ' इत्यादि परमतोपपादकद्वित्रिवचनापेक्षयाधिक्यद्योतनार्थम् । **क्षेत्रान्तर्भाव इति** । ' इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते ' इति पूर्वमुक्त्वा तादृशशरीररूपक्षेत्रेऽहङ्कारस्यान्तर्भावः कृतः । अहङ्कारस्यात्मस्वरूपत्वे तु स न संभवतीत्याशयः । **उच्यत इति** । अहंभावोऽहङ्कारश्च भिन्नः । **तत्राहंभाव** एवात्मस्वरूपम् । अहं अहंभावं करोत्यनेनेत्यहङ्कारः । अभूततद्भावे च्विप्रत्ययः । अनेन ह्यहङ्कारेणानहंभूतेऽनात्मभूते देहादावहंबुद्धिरुत्पद्यते । **अयमहङ्कार** एव क्षेत्रान्तर्भूतो नाहंभाव इति भावः। **अहमित्येव** । नत्वहङ्कार इति ।

श्चाहमित्येव प्रत्यगात्मनः स्वरूपम् । अव्यक्तपरिणामभेदस्याहङ्कारस्य क्षेत्रान्तर्भावो भगवतोपदिश्यते स त्वनात्मनि देहेऽहम्भावकरणहेतुत्वेनाहङ्कार—इत्युच्यते । अस्य त्वहङ्कारशब्दस्याभूततद्भावेऽर्थे च्विप्रत्ययमुत्पाद्य व्युत्पत्तिर्द्रष्टव्या । अयमेव त्वहङ्कार उत्कृष्टजनावमानहेतुर्गर्वापरनामा शास्त्रेषु बहुशो हेयतया प्रतिपाद्यते । तस्माद्बाधकापेताहम्बुद्धिः साक्षादात्मगोचरैव । शरीरगोचरा त्वहम्बुद्धिरविद्यैव । यथोक्तं भगवता पराशरेण—

श्रूयतां चाप्यविद्यायाः स्वरूपं कुलनन्दन ।
अनात्मन्यात्मबुद्धिर्येति (वा. नं.) ।

यदि ज्ञप्तिमात्रमेवात्मा तदानात्मन्यात्माभिमाने शरीरे ज्ञप्तिमात्रप्रतिभासः स्यात्, न ज्ञातृत्वप्रतिभासः । तस्माज्ज्ञाताहमर्थ एवात्मा । तथोक्तम्,

अतः प्रत्यक्षसिद्धत्वादुक्तन्यायागमान्वयात् ।
अविद्यायोगतश्चात्मा ज्ञाताहमिति भासते (आ. सि. पृ. ३२) इति ।

तथा च—

देहेन्द्रियमनःप्राणधीभ्योऽन्योऽनन्यसाधनः ।
नित्यो व्यापी प्रतिक्षेत्रमात्मा भिन्नः स्वतः सुखी (आ. सि. पृ. ६) इति ।

अनन्यसाधनः—स्वप्रकाशः । व्यापी—अतिसूक्ष्मतया सर्वाचेतनान्तःप्रवेशस्वभावः ।

शास्त्रेषु । 'अहङ्कारं बलं दर्पं कामं क्रोधं च संश्रिताः' (गी. १६।१८) इत्यादिषु । तत्र द्वेताहृशान्नराधमान्संसारेषु क्षिपामीत्यग्रे उच्यते इति तेषामहङ्कारादीनां हेयत्वमर्थात्सिध्यति । **बाधकापेता** । बाधकरहिता । उक्तार्थे आत्मसिद्धिग्रन्थमुदाहरति—**अत इति** । प्रत्यक्षसिद्धत्वं धर्मधर्मिभावेन प्रतीतत्वम् । उक्तन्यायः । अर्थापत्तिः । आगमः । उक्तश्रुतिवाक्यानि । अविद्यायोगः । समनन्तरोक्ता शरीरे ज्ञातृत्वभ्रान्तिः । ज्ञानस्यानात्मत्वे चात्मसिद्धिग्रन्थमुदाहरति—**देहेन्द्रियेति** । अत्र धियोऽन्यत्वमात्मनः स्पष्टमेवोक्तम् ।

यदुक्तम् (पृ. ३२) दोषमूलत्वेनान्यथासिद्धिसम्भावनया सकलभेदावलम्बिप्रत्यक्षस्य शास्त्रबाध्यत्वमिति । कोऽयं दोष–इति वक्तव्यम् , यन्मूलतया प्रत्यक्षस्यान्यथासिद्धिः । अनादिभेदवासनैव हि दोष–इति चेत् , भेदवासनायास्तिमिरादिवत् यथावस्थितवस्तुविपरीतज्ञानहेतुत्वं किमन्यत्र ज्ञातपूर्वम् । अनेनैव शास्त्रविरोधेन ज्ञास्यते–इति चेन्न । अन्योऽन्याश्रयणात् । शास्त्रस्य निरस्तनिखिलविशेषवस्तुबोधित्वनिश्चये सति भेदवासनाया दोषत्वनिश्चयो, भेदवासनाया दोषत्वनिश्चये सति शास्त्रस्य निरस्तनिखिलविशेषवस्तुबोधित्वनिश्चय–इति । किञ्च, यदि भेदवासनामूलत्वेन प्रत्यक्षस्य विपरीतार्थत्वं, शास्त्रमपि तन्मूलत्वेन तथैव स्यात् । अथोच्येत दोषमूलत्वेऽपि शास्त्रस्य प्रत्यक्षावगतसकलभेदनिरसनज्ञानहेतुत्वेन परत्वात् , तत् प्रत्यक्षस्य बाधकमिति । तन्न । दोषमूलत्वे ज्ञाते सति परत्वमकिञ्चित्करम् । रज्जुसर्पज्ञाननिमित्तभये सति, भ्रान्तोऽयमिति परिज्ञातेन केनचिन्नायं सर्पो मा भैषीरित्युक्तेऽपि भयानिवृत्तिदर्शनात् । शास्त्रस्य च दोषमूलत्वं श्रवणवेलायामेव ज्ञातम् । श्रवणावगतनिखिलभेदोपमर्दिब्रह्मात्मैकत्वविज्ञानाभ्यासरूपत्वान्मननादेः । अपिचेदं शास्त्रमसम्भाव्यमानदोषम् , प्रत्यक्षन्तु सम्भाव्यमानदोषमिति केनावगतं त्वया । न तावत् स्वतः-

---

शास्त्रबाध्यत्वमिति । अद्वैतशास्त्रेण भेदप्रत्यक्षस्य बाध्यत्वमित्यर्थः । **तिमिरादीति** । आदिशब्देन सादृश्यं गृह्यते । तद्धि ज्वालायामैक्यभ्रमहेतुः । **तन्मूलत्वेनेति** । ब्रह्मव्यतिरिक्तस्य सर्वस्य भेदवासनामूलत्वेन शास्त्रस्यापि तत्त्वं बोध्यम् । भेदवासनामूलत्वेन असत्यमेव शास्त्रं सत्यस्य ब्रह्मज्ञानस्य सूचकमिति मृषावादिनो मतम् । **परत्वादिति** । निषेध्योपस्थापकप्रत्यक्षप्रमाणापेक्षया तन्निषेध्यसापेक्षस्य निषेधकशास्त्रस्य पश्चादुपस्थितिकत्वेन परत्वम् । नेदं रजतमिति परज्ञानस्येदं रजतमिति पूर्वज्ञानबाधकत्वं दृष्टमेव । **भ्रान्तोऽयमितीति** । नायं सर्प इति वदतो वस्तुतो भ्रान्तत्वाभावेऽपि इतरेण स 'भ्रान्त' इति ज्ञात इत्यर्थः । **भयानिवृत्तीति** । उत्तरज्ञानस्य दोषमूलत्वेन प्रामाण्यानिश्चयाद्भयानिवृत्तिः । **श्रवणावगतेति** । शास्त्रस्य भेदवासनामूलत्वं हि तावत्संप्रतिपन्नम् । तस्याश्च दोषत्वं भेदमिथ्यात्वज्ञानादवगम्यते । तन्मिथ्यात्वावगतिर्ज्ञाननिवर्त्यत्वावगमात् । तन्निवर्त्यत्वावगमश्च ब्रह्मात्मैकत्वज्ञा-

सिद्धा निर्धूतनिखिलविशेषानुभूतिरिममर्थमवगमयति। तस्याः सर्वविषय-विरक्तत्वात्। शास्त्रपक्षपातविरहाच्च। नाप्यैन्द्रियकं प्रत्यक्षम्। दोषमूलत्वेन विपरीतार्थत्वात्। तन्मूलत्वादेव नान्यान्यपि प्रमाणानि। अतः स्वपक्षसाधनप्रमाणानभ्युपगमान्न स्वाभिमतार्थसिद्धिः।

ननु, व्यावहारिकप्रमाणप्रमेयव्यवहारोऽस्माकमप्यस्त्येव। कोऽयं व्यावहारिको नाम। आपातप्रतीतिसिद्धो युक्तिभिर्निरूपितो न तथावस्थित–इति चेत्, किन्तेन प्रयोजनम्। प्रमाणतया प्रतिपन्नेऽपि यौक्तिकबाधादेव प्रमाणकार्य्याभावात्। अथोच्येत, शास्त्रप्रत्यक्षयोर्द्वयोरप्यविद्यामूलत्वेऽपि प्रत्यक्षविषयस्य शास्त्रेण बाधो दृश्यते। शास्त्रविषयस्य सदद्वितीयस्य ब्रह्मणः पश्चात्तनबाधादर्शनेन निर्विशेषानुभूतिमात्रं ब्रह्मैव परमार्थ–इति। तदयुक्तम्। अबाधितस्यापि दोषमूलस्यापारमार्थ्यनिश्चयात्। एतदुक्तं भवति। यथा सकलेतरकाचादिदोषरहितपुरुषान्तरागोचरगिरिगुहासु वसतस्तैमिरिकजनस्याज्ञातस्वतिमिरस्य सर्वस्य तिमिरदोषाविशेषेण द्विचन्द्रज्ञानम-

---

नस्य निखिलभेदोपमर्दित्वावगतेः। अत ईदृशनिवर्तकज्ञानाभ्यासरूपमननं कुर्वता शास्त्रस्य दोपमूलत्वमवगतमित्यर्थः। **सर्वविषयविरक्तत्वादिति**। निर्विषयत्वादित्यर्थः। न हि ज्ञानं स्वाविषयं प्रकाशयतीति भावः। **नापीति**। ऐन्द्रियकं प्रत्यक्षमपि इममर्थं नावगमयतीत्यर्थः। **दोषमूलत्वेन**। भेदवासनारूपदोषमूलत्वेन। **तन्मूलत्वादेव**। इतरप्रमाणानां प्रत्यक्षमूलत्वादेव। **प्रमाणानीति**। इममर्थमवगमयन्तीति संबन्धः।

यौक्तिकबाधादेवेति। युक्त्या बाधो यौक्तिकबाधः। धूमबुध्या गृहीतस्य बाष्पस्य वह्निनिश्चयहेतुत्वादर्शनात्। **अथोच्येतेति**। प्रत्यक्षेण ज्ञातस्य घटादेः शास्त्रेण पश्चाद्बाधो दृश्यते। एवं शास्त्रेण ज्ञातस्य ब्रह्मणो न केनापि पश्चाद्बाधो दृश्यते। तादृश ब्रह्मैव परमार्थ इत्याशयः। **काचादीति**। काचो नेत्ररोगः। 'काचबिन्दु' इति प्रसिद्धः। आदिना कामल (कावीळ इति प्र.) संग्रहः। **पुरुषान्तरागोचरेति**। अनेन द्विचन्द्रज्ञानस्य परतोऽबाधितत्वं सूच्यते। **तैमिरिकजनस्येति**। तिमिराख्यनेत्ररोगविशेषविशिष्टजनस्येत्यर्थः। **अज्ञातस्वतिमिरस्येति**। अनेन स्वतोऽप्यबाधितत्वं सू-

---

१ (ख) 'पुरुषागोचर.'

विशिष्टं जायते । तत्र न बाधकप्रत्ययोऽस्तीति न तन्मिथ्या न भवतीति तद्विषयभूतश्चन्द्रद्वित्वमपि मिथ्यैव । दोषोह्ययथार्थज्ञानेहेतुः । तथा ब्रह्मज्ञानमविद्यामूलत्वेन बाधकज्ञानरहितमपि स्वविषयेण ब्रह्मणा सह मिथ्यैवेति । भवन्ति चात्र प्रयोगाः । विवादाध्यासितं ब्रह्म मिथ्या, अविद्यावदुत्पन्नज्ञानविषयत्वात् प्रपञ्चवत् । ब्रह्म मिथ्या, मिथ्याज्ञानविषयत्वात् प्रपञ्चवत् । ब्रह्म मिथ्या, असत्यहेतुजन्यज्ञानविषयत्वात् प्रपञ्चवदेव ।

न च वाच्यम् , स्वाप्नस्य हस्त्यादिज्ञानस्यासत्यस्य परमार्थशुभाशुभप्रतिपत्तिहेतुभाववदविद्यामूलत्वेनासत्यस्यापि शास्त्रस्य परमार्थभूतब्रह्मविषयप्रतिपत्तिहेतुभावो न विरुद्ध—इति । स्वाप्नज्ञानस्यासत्यत्वाभावात् । तत्र हि, विषयाणामेव मिथ्यात्वम् । तेषामेव हि बाधो दृश्यते, न ज्ञानस्य । न हि मया स्वप्नवेलायामनुभूतं ज्ञानमिह न विद्यत—इति कस्यचिदपि प्रत्ययो जायते । ‘ दर्शनन्तु विद्यते, अर्था न सन्ति ’ इति बाधकप्रत्ययः । मायाविनो मन्त्रौषधादिप्रभवं मायामयं ज्ञानं सत्यमेव प्रीतिर्भयस्य च हेतुः । तत्रापि ज्ञानस्याबाधितत्वात् । विषयेन्द्रियादिदोषजन्यं रज्ज्वादौ सर्पादिविज्ञानं सत्यमेव भयादिहेतुः । सत्यैवादष्टेऽपि स्वात्मनि सर्पसन्नि-

---

च्यते । **तत्** । द्विचन्द्रज्ञानम् । मिथ्या न, भवतीति न किं तु मिथ्यैवेत्यर्थः । एवमेव पशुपक्ष्यादीनां देहात्मज्ञानं तद्दृष्ट्याऽबाधितमपि मिथ्यैवेत्यप्यत्र दृष्टान्तत्वेन योजनीयम् । **अविद्यामूलत्वेन** । अविद्याजन्यभेदवासनामूलकशास्त्रजन्यत्वेन । **अविद्यावदिति** । अविद्याऽस्ति यस्य तदविद्यावत् शास्त्रम् । प्रयोजकत्वं षष्ठ्यर्थः । अविद्यामूलकशास्त्रोत्पन्नज्ञानविषयत्वादित्यर्थः । **असत्येति** । असत्यो यः शास्त्ररूपो हेतुस्तज्जन्यज्ञानविषयत्वादित्यर्थः ।

नन्वयमसिद्धो हेतुः । यतोऽसत्यस्यापि सत्योत्पत्तिहेतुत्वं दृश्यत इत्याशयेनाशङ्कते—**न चेति** । परिहरति—**स्वाप्नज्ञानस्येति** । **दर्शनं तु** । ज्ञानं तु । **अर्थाः** । विषयाः । **मायामयं** मिथ्याविषयकम् । **सत्यमेवेति** । मन्त्रौषधादीनां ज्ञानकारणानां सत्यत्वात् । **विषयेन्द्रियादीति** । विषयदोषः सादृश्यादिः । इन्द्रियदोषः काचादिः । आदिशब्देन दूरत्वादिदोषसंग्रहः । न चासत्याद्दोषात्कथं सत्यज्ञानोत्पत्तिरिति वाच्यम् । दोषस्यासत्यत्वाभावात् । **सत्यैवेति** । सर्पसन्निधानं कारणं सत्यम् । दृष्टबुद्धिश्च सत्यैव ।

धानात् दृष्टबुद्धिः। सत्यैव शङ्काविषबुद्धिर्मरणहेतुभूता। वस्तुभूत एव जलादौ मुखादिप्रतिभासो वस्तुभूतमुखगतविशेषनिश्चयहेतुः। एतेषां संवेदनानामुत्पत्तिमत्त्वादर्थक्रियाकारित्वाच्च सत्यत्वमवसीयते। हस्त्यादीनामभावे कथं तद्बुद्धयः सत्या भवन्तीति चेत—न। एतद्बुद्धीनां सालम्बनत्वमात्रनियमात्। अर्थस्य प्रतिभासमानत्वमेव ह्यालम्बनत्वेऽपेक्षितम्। प्रतिभासमानता चास्त्येव दोषवशात्। स तु बाधितोऽसत्य- इत्यवसीयते। अबाधिता हि बुद्धिः सत्यैवेत्युक्तम्। रेखया वर्णप्रतिपत्तावपि नासत्यात् सत्यबुद्धिः। रेखायाः सत्यत्वात्। ननु वर्णात्मना प्रतिपन्ना रेखा वर्णबुद्धिहेतुः। वर्णात्मता त्वसत्या। नैवम। वर्णात्मताया असत्याया उपायत्वायोगात्। असतो निरुपाख्यस्य ह्युपायत्वं न दृष्टमनुपपन्नश्च। अथ तस्यां वर्णबुद्धेरुपायत्वम्। एवं तर्ह्यसत्यात्सत्यबुद्धिर्न स्यात्। बुद्धेः सत्यत्वादेव। उपायोपेययोरैक्य-

---

दंशः परमसत्योऽस्तु नामेति भावः। **वस्त्विति**। जलादि सत्यम्। तत्कृतचाक्षुषतेजःप्रतिघातश्च सत्य एव। **उत्पत्तिमत्त्वादिति**। न हि असत्यं शुक्तिरजतमुत्पत्तिमत्। नापि कार्यकरमिति भावः। ननु स्वप्नादौ ज्ञानकारणीभूतानां हस्त्यादीनां विषयाणामसत्यत्वे कथं तस्मात्सत्यज्ञानोत्पत्तिरित्याशयेनाशङ्कते—**हस्त्यादीनामिति**। परिहरति—**नेति**। **सालम्बनत्वमात्रेति**। सविषयमात्रेत्यर्थः। न तु तस्य विषयस्य सत्यत्वापेक्षेति भावः। मिथ्याभूतस्य कथं विषयत्वमित्यत्राह—**अर्थस्येति**। **प्रतिभासमानता चेति**। प्रतिभासमानतायाः सत्यो दोष एव कारणं नासत्योविषय इत्यर्थः। विषयस्यैव कथमसत्यत्वं न तु दोषस्येत्याह—**सत्विति**। अर्थास्त्वित्यर्थः। एवं चोत्पत्तिहेतुत्वं ज्ञानहेतुत्वं च सत्यस्यैवेति सिद्धम्। **उपायत्वायोगात्**। वर्णबुद्धिहेतुत्वायोगात्। **निरुपाख्यस्य**। तुच्छस्य वन्ध्यापुत्रादेः। **अथेति**। वर्णबुद्धिहेतुत्वेन प्रतिपादिता या वर्णात्मना प्रतिपन्ना रेखा तस्यामस्त्यंशद्वयम्। वर्णात्मता तद्रूपेण बुद्धिश्च। तत्र प्रथमांशस्यासत्यत्वेन हेतुत्वासंभवेऽपि द्वितीयांशस्य सत्यत्वात्तस्यैव हेतुत्वमङ्गीक्रियते इति शङ्काशयः। परिहरति—**एवं तर्हीति**। असत्यात्सत्योत्पत्तिसिध्यर्थं हि त्वया रेखोदाहरणं प्रदर्शितम्। तत्रापि त्वदुक्तरीत्या असत्यात्सत्यबुद्धिर्नोत्पद्यते। कारणभूताया बुद्धेः सत्यत्वादेवेत्यर्थः। **उपायेति**। वर्णबुद्धिरूपद्वितीयांशस्यैव कारणत्वे कार्यकारणयोरैक्यप्रसङ्गः। वर्णबुद्धेरेव कार्यत्वादितिभावः। अथ प्रथमांशस्यैव का-

---

१ (ख) बुद्धिःस्मरण.

प्रसङ्गश्च । उभयोर्वर्णबुद्धित्वाविशेषात् । रेखाया अविद्यमानवर्णात्मना उपायत्वे चैकस्यामेव रेखायामविद्यमानसर्ववर्णात्मकत्वस्य सुलभत्वादेकरेखादर्शनात् सर्ववर्णप्रतिपत्तिः स्यात् । अथ पिण्डविशेषे देवदत्तादिशब्दसङ्केतवत् चक्षुर्ग्राह्यरेखाविशेषे श्रोत्रग्राह्यवर्णविशेषसङ्केतवशात् रेखाविशेषो वर्णविशेषबुद्धिहेतुरिति । हन्त तर्हि सत्यादेव सत्यप्रतिपत्तिः । रेखायाः सङ्केतस्य च सत्यत्वात् । रेखागवयादपि सत्यगवयबुद्धिः सादृश्यनिबन्धना । सादृश्यञ्च सत्यमेव । न चैकरूपस्य शब्दस्य नादविशेषेणार्थविशेषभेदबुद्धिहेतुत्वेऽप्यसत्यात् सत्यप्रतिपत्तिः । नानानादाभिव्यक्तस्यैकस्यैव शब्दस्य तत्तन्नादाभिव्यङ्ग्यस्वरूपेणार्थविशेषैः सह सम्बन्धग्रहणवशादर्थभेदबुद्ध्युत्पत्तिहेतुत्वात् । शब्दस्यैकरूपत्वमपि न साधीयः । गकारादेर्बोधकस्यैव श्रोत्रग्राह्यत्वेन शब्दत्वात् । अतोऽसत्याच्छास्त्रात् सत्यब्रह्मविषयप्रतिपत्तिर्दुरुपपादा ।

ननु, न शास्त्रस्य गगनकुसुमवदसत्यत्वम् । प्रागद्वैतज्ञानात् सद्बुद्धिबोध्यत्वात् । उत्पन्ने तत्त्वज्ञाने ह्यसत्यत्वं शास्त्रस्य । न तदा शास्त्रं निरस्तनिखिलभेदचिन्मात्रब्रह्मज्ञानोपायः । यदोपायस्तदाऽस्त्येव 'शास्त्रमस्ति' इति बुद्धिः । नैवम् । असति शास्त्रे, अस्ति शास्त्रमिति बुद्धेर्मिथ्यात्वात् । ततः किम् । इदम् । ततो मिथ्याभूतशास्त्रजन्यज्ञानस्य मिथ्यात्वेन तद्विषयस्यापि ब्रह्मणो मिथ्यात्वम् । यथा, धूमबुद्ध्या गृहीतबाष्पजन्या-

---

रणत्वे दूषणान्तरमाह—**रेखाया इति** । उदाहरणान्तरं परिहरति—**रेखागवयादिति** । गवयचित्रादित्यर्थः । स्फोटवादाश्रयेणोच्यमानमुदाहरणान्तरं तदाश्रयेणैव प्रथमतः परिहरति—**नचेति** । नादैः स्फोटयत इति व्युत्पत्त्या स्फोटः एकरूपः शब्दः । **नानेति** । कत्वखत्वादि विशेषविशिष्टतत्तन्नादकृतोऽभिव्यक्तिविशेषः सत्यः । तद्विशिष्टः सत्यशब्दोऽर्थज्ञानहेतुः । कत्वादेरारोपेपि तज्ज्ञानं सत्यमेव । तदेव चार्थज्ञानहेतुः इत्याशयः । सम्प्रति स्फोटवादं खण्डयति—**शब्दस्येति** । **बोधकस्यैवेति** । एवकारेण स्फोटव्यावृत्तिः ।

शास्त्रजन्यज्ञानस्य न केनापि पश्चाद्बाधो दृश्यते इति पूर्वपक्ष्युक्तं (पृ. ८४ पं. १०)

ग्निज्ञानस्य मिथ्यात्वेन तद्विषयस्याग्नेरपि मिथ्यात्वम् । पश्चात्तनबाधादर्शनं चासिद्धम् । शून्यमेव तत्त्वमिति वाक्येन तस्यापि बाधदर्शनात् । तत्तु भ्रान्तिमूलमिति चेत् । एतदपि भ्रान्तिमूलमिति त्वयैवोक्तम् । पाश्चात्यबाधादर्शनन्तु तस्यैवेत्यलमप्रतिष्ठितकुतर्कपरिहसनेन ।

यदुक्तम् (पृ. २६) वेदान्तवाक्यानि निर्विशेषज्ञानैकरसवस्तुमात्रप्रतिपादनपराणि । 'सदेव सोम्येदमग्र आसीत्' (छां. ६।२।१) इत्येवमादीनीति । तदयुक्तम् । एकविज्ञानेन सर्वविज्ञानप्रतिज्ञोपपादनमुखेन सच्छब्दवाच्यस्य परस्य ब्रह्मणो जगदुपादानत्वं, जगन्निमित्तत्वं, सर्वज्ञता, सर्वशक्तियोगः, सत्यसंकल्पत्वं, सर्वान्तरत्वं, सर्वाधारता, सर्वनियमनमित्याद्यनेककल्याणगुणविशिष्टतां कृत्स्नस्य जगतस्तदात्मकताञ्च प्रतिपाद्य, एवम्भूतब्रह्मात्मकस्त्वमसीति श्वेतकेतुं प्रत्युपदेशाय प्रवृत्तत्वात् प्रकरणस्य । प्रपञ्चितश्चायमर्थो वेदार्थसंग्रहे । अत्राप्यारम्भणाधिकरणे (२।१।११) निपुणतरमुपपादयिष्यामः । 'अथ परा यया तदक्षरमधिगम्यते' (मुं. १।१।५) इत्यत्रापि प्राकृतान् हेयगुणान् प्रतिषिध्य, नित्यत्वविभुत्वसूक्ष्मत्वसर्वगतत्वाव्ययत्वभूतयोनित्वसर्वज्ञत्वादिकल्याणगुणगणयोगः पर-

---

खण्डयति—**पश्चात्तनेति** । **तस्यापि** । शास्त्रजन्यज्ञानस्यापि । **तत्** । शून्यमेवतत्वमिति । **एतदपि** । शास्त्रजन्यज्ञानमपि । **त्वयेति** । शास्त्रस्याविद्याजन्यभेदवासनामूलकत्वं वदतेत्यर्थः । **तस्यैव** । शून्यमेवतत्त्वमित्यस्यैव । सर्वशून्यवादिनो मते निषेध्याभावेन ततः परं निषेधानुदयादिति भावः ।

ज्ञानैकरसेति । विज्ञानघन इति श्रुतौ ज्ञानैकरसत्वेन प्रतिपादनान्निर्विशेषत्वम् । वस्तुमात्रशब्देन श्रुतेः सगुणे ब्रह्मणि तात्पर्याभावः सूच्यते । **सदेवेति** । पूर्वं 'येनाश्रुतम्' (**छां**० ६।१।३) इति श्रुतौ कृतायाः एकविज्ञानेन सर्वविज्ञानं भवतीति प्रतिज्ञायाः समर्थिकेयं श्रुतिः । घटादिषु या सत्ता सा ब्रह्मसत्तैव ब्रह्म च सत्स्वरूपमेवेति तादृशब्रह्मसत्तयाऽर्थादेव घटादिज्ञानं भवतीति तात्पर्यम् । **एकविज्ञानेनेति** । ब्रह्मणा ज्ञातेन अज्ञातमपि घटादि ज्ञातं भवतीत्येव प्रतिज्ञार्थः । न तु ब्रह्मसत्तया सर्वं ज्ञातं भवतीति । मृदादिदृष्टान्तानुरोधात् । कारणसत्तया कार्यज्ञानायोगाच्च । न हि मृत्पिण्डसत्तया घटज्ञानं भवति । किं तु मृत्पिण्डज्ञानेनेति । तथा च नानया श्रुत्या सन्मात्रस्वरूपब्रह्मसिद्धिः । **अथ परेति** । अस्यामपि श्रुतौ 'अद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुः श्रोत्रं तद-

स्य ब्रह्मणः प्रतिपादितः। सत्यं ज्ञानमनन्तं ब्रह्मेत्यत्रापि सामानाधिकरण्यस्यानेकविशेषणविशिष्टैकार्थाभिधानव्युत्पत्त्या न निर्विशेषवस्तुसिद्धिः। प्रवृत्तिनिमित्तभेदनैकार्थवृत्तित्वं सामानाधिकरण्यम्। तत्र सत्यज्ञानादिपदमुख्यार्थैर्गुणैस्तत्तद्गुणविरोध्याकारप्रत्यनीकाकारैर्वा एकस्मिन्नेवार्थे पदानां प्रवृत्तौ निमित्तभेदोऽवश्याश्रयणीयः। इयांस्तु विशेषः। एकस्मिन् पक्षे पदानां मुख्यार्थता; अपरस्मिंश्च तेषां लक्षणा। न चाज्ञानादीनां प्रत्यनीकता वस्तुस्वरूपमेव। एकेनैव पदेन स्वरूपं प्रतिपन्नमिति पदान्तरप्रयोगवैयर्थ्यात्। तथा सति सामानाधिकरण्यासिद्धिश्च। एकस्मिन् वस्तुनि वर्तमानानां पदानां निमित्तभेदानाश्रयणात्। न चैकस्यैवार्थस्य विशेषणभेदेन विशिष्टताभेदादनेकार्थत्वं पदानां सामानाधिकरण्यविरोधि। एकस्यैव वस्तुनोऽनेकविशेषणविशिष्टताप्रतिपादनपरत्वात् सामानाधिकरण्यस्य।

पाणिपादम्' (मुं. १।१।६) इत्यनेन प्रकृतिसम्बन्धिनो गुणा एव ब्रह्मणि निषिध्यन्ते। न सर्वथा निर्गुणत्वं प्रतिपाद्यते। अत एव तदुत्तरं 'नित्यंविभुम्' (मुं १।१।६) इत्यत्र नित्यत्वादयो गुणा उक्ता इति भावः। **अनेकविशेषणेति**। यथा नीलो घट इत्यत्र नीलत्वविशिष्टः घटत्वविशिष्टश्च य एकोऽर्थो घटरूपस्तस्यैवाभिधानं नीलशब्देन घटशब्देन च क्रियते तथा सत्यं ज्ञानमित्यत्रापि सत्यादिशब्दैः सत्यत्वादिगुणविशिष्टस्यैव ब्रह्मणः प्रतिपादनं न निर्गुणस्येति बोध्यम्। **प्रवृत्तीति**। नीलशब्दस्य नीलत्वं प्रवृत्तिनिमित्तम्। नीलत्वं निमित्तीकृत्यैव नीलशब्दस्य घटाद्यर्थे प्रवृत्तत्वात्। घटशब्दस्य च घटत्वं प्रवृत्तिनिमित्तम्। तादृशप्रवृत्तिनिमित्तभेदेन नीलघटपदयोर्यद्घटरूपैकार्थप्रतिपादकत्वं तदेव सामानाधिकरण्यमित्यर्थः। **मुख्यार्थैरिति**। स्वमतमेतत्। पूर्वपक्षिणा तु सत्यज्ञानादिपदानां तत्तत्पदार्थविरोधिप्रत्यनीकपरत्वं प्रागुक्तम् (पृ. ३५ पं. १३) तदनुसारेऽप्याह—**तत्तद्गुणेति**। **अवश्याश्रयणीय इति**। सिद्धे च प्रवृत्तिनिमित्तभेदे ब्रह्मणः सगुणत्वमर्थादेव सिध्यतीत्याशयः। **न चेति**। सत्यज्ञानादिगुणविरोधिनो येऽसत्वाज्ञानादयस्तत्प्रत्यनीकता या ब्रह्मरूपवस्तुनि वर्तते सा न धर्मान्तरं किंतु वस्तुस्वरूपमेवेति न लक्षणापक्षे सगुणत्वं सिध्यतीति शङ्काशयः। **न चैकस्येति**। सिद्धान्तिमतेऽपि सत्यज्ञानादिपदानां भिन्नभिन्नार्थत्वाद्घटपटपदयोरिव सामानाधिकरण्यं न संभवतीति शङ्काशयः। परिहरति—**एकस्यैवेति**।

भिन्नप्रवृत्तिनिमित्तानां शब्दानामेकस्मिन्नर्थे वृत्तिः सामानाधिकरण्यमिति शाब्दिकाः ।

यदुक्तम् (पृ. २७ पं.३) एकमेवाद्वितीयमित्यत्र अद्वितीयपदं गुणतोऽपि सद्वितीयतां न सहते । अतः सर्वशाखाप्रत्ययन्यायेन कारणवाक्यानामद्वितीयवस्तुप्रतिपादनपरत्वमभ्युपगमनीयम् । कारणतयोपलक्षितस्य तस्याद्वितीयस्य ब्रह्मणो लक्षणमिदमुच्यते—सत्यं ज्ञानमनन्तं ब्रह्मेति । अतो हि लिलक्षयिषितं ब्रह्म निर्गुणमेव । अन्यथा, निर्गुणं निरञ्जनमित्यादिभिर्विरोधश्चेति । तदनुपपन्नम् । जगदुपादानस्य ब्रह्मणः स्वव्यतिरिक्ताधिष्ठात्रन्तरनिवारणेन विचित्रशक्तियोगप्रतिपादनपरत्वादद्वितीयपदस्य । तथैव विचित्रशक्तियोगमेवावगमयति 'तदैक्षत बहुस्यां प्रजायेयेति तत्तेजोऽसृजत' (छां. ६।२।३) इत्यादि । अविशेषेणाद्वितीयमित्युक्ते निमित्तान्तरमात्रनिषेधः कथं ज्ञायत—इति चेत् । सिसृक्षोर्ब्रह्मण उपादानकारणत्वं 'सदेव सोम्येदमग्रआसीदेकमेव' (छां. ६।२।१) इति प्रतिपादितम् । कार्य्योत्पत्तिस्वाभाव्येन बुद्धिस्थं निमित्तान्तरमिति तदेवाद्वितीयपदेन निषिध्यत—इत्यवगम्यते । सर्वनिषेधे हि स्वाभ्युपगताः सिषाधयिषिता नित्यत्वादयश्च निषिद्धाः स्युः । सर्वशाखाप्रत्ययन्यायश्चात्रभवतो विपरीतफलः । सर्वशाखासु कारणान्वयिनां सर्वज्ञत्वादीनां गुणानामतोपसंहारहेतुत्वात् । अतः कारणवाक्यस्वभावादपि 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै. २।१।१) इत्यनेन सविशेषमेव प्रतिपाद्यत—इति विज्ञायते । न च, निर्गुणवाक्यवि-

---

सर्वशाखेति । एतन्न्यायस्वरूपं प्राक् (पृ. २६ पं. २४) उक्तम् । **स्वव्यतिरिक्तेति** । ब्रह्मापेक्षयाऽन्यज्जगत्कारणं नास्ति किंत्वेकमेव ब्रह्म जगदुत्पादनसमर्थमित्येवाद्वितीयपदस्य तात्पर्यम् । **विचित्रशक्तियोगमेवेति** । न तु निर्गुणत्वमित्यर्थः । शङ्कते—**अविशेषेणेति** । **विपरीतफल इति** । सर्वशाखा प्रत्ययन्यायेन हि न श्रुत्युक्तानां गुणानां त्यागो भवति किं त्वनुक्तानां संग्रह एवेति भावः । **न चेति** । निर्गुणब्रह्मवादिनो मते सगुणवाक्यापेक्षया निर्गुणवाक्यस्यापच्छेद[1]न्यायेन बलीयस्त्वान्न निर्गुण-

---

१ अपच्छेदन्यायस्वरूपं प्रागुक्तम् (पृ. ३४ पं. १४).

रोधः। प्राकृतहेयगुणविषयत्वात्तेषां 'निर्गुणं निरञ्जनं निष्कलं निष्क्रियं शान्तम् '(श्वे. ६।१९) इत्यादीनाम्। ज्ञानमात्रस्वरूपवादिन्योऽपि श्रुतयो ब्रह्मणो ज्ञानस्वरूपतामभिदधति। न तावता निर्विशेषज्ञानमात्रमेव तत्त्वम्। ज्ञातुरेव ज्ञानस्वरूपत्वात्। ज्ञानस्वरूपस्यैव तस्य ज्ञानाश्रयत्वं मणिद्युमणिप्रदीपादिवदित्युक्तमेव। ज्ञातृत्वमेव हि सर्वाः श्रुतयो वदन्ति। ' यः सर्वज्ञः सर्ववित् ' (मुं. १।१।९) ' तदैक्षत ' (छां. ६।२।३) ' सेयं देवतैक्षत ' (छां. ६।३।२)' स ऐक्षत लोकान्नु सृजै (ऐ. १।१) इति।

' नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् ' (श्वे. ६।१३) ' ज्ञाज्ञौ द्वावजावीशानीशौ ' (श्वे. १।९)

' तमीश्वराणां परमं महेश्वरं तं दैवतानां परमश्च दैवतम्।
पतिं पतीनां परमं परस्तात् विदाम देवं भुवनेशमीड्यम्॥
न तस्य कार्यं करणञ्च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते।
परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च '

(श्वे.६।७।८)'एष आत्मा अपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्पः' (छां.८।१।५) इत्याद्याः श्रुतयो ज्ञातृत्वप्रमुखान् कल्याणगुणान् ज्ञानस्वरूपस्यैव ब्रह्मणः स्वाभाविकान् वदन्ति,समस्तहेयगुणरहितताञ्च। निर्गुणवाक्यानां सगुणवाक्यानाञ्च विषयमपहतपाप्मे-

---

सगुणवाक्यविरोधः। सगुणब्रह्मवादे तु तथा वक्तुमशक्यत्वात्स्यादेव विरोध इति शङ्काशयः। परिहरति—**प्राकृतेति**। एवं च विषयभेदान्न विरोध इति भावः। **ज्ञानमात्रस्वरूपवादिन्यः**। विज्ञानघन इत्याद्याः। **ज्ञातृत्वमेवेति**। एवकारेण ज्ञातृत्वस्यानन्यथासिद्धिरभिप्रेता। **लोकान्नु सृजा इति**। इति श्रुतयो वदन्तीति संबन्धः। **नित्य इति**। अत्र मंत्रे कामप्रदत्वबहुत्वगुणावप्यात्मनि सूचितौ। **चेतनः**। ज्ञाता। **ज्ञाज्ञाविति**। अत्र ज्ञातृत्वमीश्वरत्वं च सूचितम्। **तमीश्वराणामिति**। अत्रेश्वरत्वदेवतात्वपतित्वानि सूचितानि। ईश्वरत्वं च नियन्तृत्वम्। तेन ज्ञातृत्वं सिध्यति। ज्ञातृत्वमन्तरेण नियन्तृत्वायोगात्। देवतात्वं कर्माराध्यत्वम्। **कार्यं** शरीरम्। **करण**मिन्द्रियादि। **न तत्सम इति**। अस्मिन्विशेषनिषेधे एव अद्वितीयमितिसामान्यनिषेधस्य पर्यवसानं बोध्यम्। अत्र च ज्ञानशक्त्यादीनां स्वाभाविकत्वं स्पष्टमेवोक्तम्। **स्वाभाविकानिति**। अनेन गुणानामविद्याकल्पितत्वनिरासः। **विषयमिति**। अस्य विधि-

त्याद्यपिपास–इत्यन्तेन हेयगुणान् प्रतिषिध्य, सत्यकामः सत्यसङ्कल्प–इति ब्रह्मणः कल्याणगुणान् विदधतीयं श्रुतिरेव विविनक्तीति सगुणनिर्गुणवाक्ययोर्विरोधाभावादन्यतरस्य मिथ्याविषयताश्रयणमपि नाशङ्कनीयम् । 'भीषास्माद्वातः पवते' (तै. २।८।१) इत्यादिना ब्रह्मगुणानारभ्य, 'ते ये शतम्' (तै. २।८।१) इत्यनुक्रमेण क्षेत्रज्ञानन्दातिशयमुक्त्वा, 'यतो वाचो निवर्त्तन्ते, अप्राप्य मनसा सह । आनन्दं ब्रह्मणो विद्वान्' (तै. २।९।१) इति ब्रह्मणः कल्याणगुणानन्त्यमत्यादरेण वदतीयं श्रुतिः । 'सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता' (तै. २।१।१) इति ब्रह्मवेदनफलमवगमयद्वाक्यं परस्य विपश्चितो ब्रह्मणो गुणानन्त्यं ब्रवीति । विपश्चिता ब्रह्मणा सह सर्वान् कामान् अश्नुते । काम्यन्त–इति कामाः कल्याणगुणाः, ब्रह्मणा सह तद्गुणान् सर्वान् अश्नुत–इत्यर्थः । दहरविद्यायां, 'तस्मिन् यदन्तस्तदन्वेष्टव्यम्' (छां. ८।१।१) इति तद्गुणप्राधान्यं व-

---

नक्तीत्यनेन संबन्धः । श्रुतिरेव सगुणनिर्गुणवाक्ययोर्विषयविभागं दर्शयतीत्यर्थः । **मिथ्याविषयतेति** । अविद्याकल्पितत्वेन मिथ्याभूता ये गुणास्तद्विषयकत्वं सगुणवाक्यानां पूर्वपक्षिणा यत्प्रतिपादितं तन्नाशङ्कनीयमित्यर्थः । ननु ब्रह्मणः सगुणत्वे तस्य वागादिविषयत्वेन 'यतो वाच' इति श्रुतिविरोधोऽत आह–**भीषेति** । ब्रह्मणो वागाद्यविषयत्वं तु न निर्गुणत्वमूलकम् । किं तु गुणातिशयमूलकम् । तथैवोपक्रमात् । आदौ भीषास्मादित्यत्राज्ञापयितृत्वगुण उक्तः । ततस्तेये शतमित्यादिना मनुष्यगन्धर्वादिक्रमेणोत्तरोत्तरं ब्रह्मपर्यन्तमानन्दगुणस्य शतगुणाधिकत्वमुक्तम् । यतो वाच इत्यत्र ब्रह्मणो निर्गुणत्वेऽभिधेये तु गुणानां न्यूनतैव प्राक् प्रतिपादितास्यान्नाधिक्यम् । किं च श्रुतिरेव ब्रह्मस्वरूपापेक्षयाऽपि तद्गुणेष्वादराधिक्यं दर्शयति । श्रुतौ ह्यानन्दं ब्रह्मणो विद्वानित्युक्तम् । नत्वानन्दान्वितं ब्रह्म विद्वानिति । **ब्रह्मवेदनफलम्** । ब्रह्मज्ञानस्य फलं सर्वकामप्राप्तिरूपम् । **अवगमयत्** । बोधयत् । **विपश्चितेति** । विपश्चित्वं च ब्रह्मगुण एवात्र भोग्यत्वेनोक्तः । **ब्रह्मणा सहेति** । भोग्यत्वेन ब्रह्मसाहित्यं कामानाम् । न तु भोक्तृत्वेन तच्छब्दवाच्योपासकस्य । अत एवाग्रे सहशब्देन गुणप्राधान्यं वक्ष्यमाणं संगच्छते इति भावः । **तद्गुणानिति** । ब्रह्मगुणानित्यर्थः । कामानश्नुते इत्यत्र किंनिष्ठान्कामानित्याकाङ्क्षायां सन्निधानाद्ब्रह्मनिष्ठानिति प्रतीतेः । **तस्मिन्यदिति** । तस्मिन् ब्रह्मणि यत् अन्तः अन्तर्वर्ति अपहतपाप्मत्वादिगुणजातं तदन्वे-

क्तुं सहशब्दः । फलोपासनयोः प्रकारैक्यं, ' यथाक्रतुरस्मिन् लोके पुरुषो भवति, तथेतः प्रेत्य भवति ' (छां. ३।१४।१) इतिश्रुत्यैव सिद्धम् । ' यस्यामतं तस्य मतम् ....अविज्ञातं विजानताम् ' (के. ११) इति ब्रह्मणो ज्ञानाविषयत्वमुक्तमिति चेत् । ' ब्रह्मविदाप्नोति परम् ' (तै. २।१।१) ' ब्रह्म वेद ब्रह्मैव भवति' (मुं. ३।२।९) इति ज्ञानान्मोक्षोपदेशो न स्यात् ।

' असन्नेव स भवति असद् ब्रह्मेति वेद चेत् ।
अस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो विदुः ' (तै. २।६।१)

इति ब्रह्मविषयज्ञानासद्भावसद्भावाभ्यामात्मनाशमात्मसत्ताञ्च वदति । अतो ब्रह्मविषयवेदनमेवापवर्गाय सर्वाः श्रुतयो विदधति । ज्ञानञ्चोपासनात्मकम्, उपास्यश्च ब्रह्म सगुणमित्युक्तम् । ' यतो वाचो निवर्त्तन्तेऽप्राप्य मनसा सह ' (तै. २।४।१) इति ब्रह्मणोऽनन्तस्यापरिमितगुणस्य वाङ्मनसयोरेतावदिति परिच्छेदायोग्यत्वश्रवणेन ' ब्रह्मैतावत् '

ष्ट्यमिति गुणप्राधान्यं दहरोपासनायां यथोक्तं तथैवात्राप्युपासनायां सहशब्देन गुणप्राधान्यं द्योत्यते । ननु फलप्रतिपादके सोऽश्नुत इत्यादिवाक्ये गुणप्राधान्येऽपि कथमुपासनायां गुणप्राधान्यमत आह–**फलोपासनयोरिति** । **यथाक्रतुः** । यथाकामः । इच्छानुरूपं फलं तथैव चोपासनेति भावः । शङ्कते–**यस्यामतमिति** । ब्रह्मणो निर्गुणत्वे एव तस्य ज्ञानाविषयत्वं संगच्छते इति शङ्काशयः । **न स्यादिति** । ब्रह्मणो ज्ञानाविषयत्वे ब्रह्मज्ञानमेव न संभवतीत्यर्थः । ब्रह्मणो ज्ञानविषयत्वे श्रुतेरादरातिशयं दर्शयति–**असन्नेवेति** । **अत इति** । उक्तश्रुतिषु ब्रह्मज्ञानस्यैव मोक्षसाधनत्वेन सिद्धत्वादित्यर्थः । यद्यपि ' विद्ययामृतमश्नुते ' (ई. ११) इत्यादिषु कासु चिच्छ्रुतिषु सामान्यतः ज्ञानस्यैव मोक्षसाधनत्वमवगम्यते तथापि तत्र ज्ञानं ब्रह्मविषयकमेव न तु प्रपञ्चामिथ्यात्वविषयकम् । ब्रह्मविदाप्नोतीति श्रुतेः । सर्वशाखाप्रत्ययन्यायादितिभावः । अथोपासनात्मकज्ञानाविषयत्वपक्षं दूषयति–**ज्ञानं चेति** । **इत्युक्तमिति** । निर्गुणपरत्वेन पूर्वपक्ष्युक्तायाः सद्विद्याया एव सगुणविषयत्वोपपादनादिति भावः । ननु ब्रह्मणो ज्ञानविषयत्वे ' यतो वाच ' इति श्रुतिविरोध इति चेत्तत्राह–**यतो वाच इति** । **अपरिमितगुणस्येति** । अत एवोक्तम् । ' संख्यातुं नैव शक्यन्ते गुणा दोषाश्च शार्ङ्गिणः । आनन्त्यात्प्रथमोराशिरभावादेव पश्चिमः ' इति । प्रथमो राशिः । गुणराशिः । पश्चिमो दोषराशिः । **परिच्छेदः** । इयत्ताविशेषः ।

इति ब्रह्मपरिच्छेदज्ञानवतां ब्रह्माविज्ञातममतमित्युक्तम् । अपरिच्छिन्नत्वात् ब्रह्मणः । अन्यथा, यस्यामतं तस्य मतं, विज्ञातमविजानतामिति ब्रह्मणो मतत्वविज्ञातत्ववचनं तत्रैव विरुध्यते ।

यत्तु, 'न दृष्टेर्द्रष्टारं न मतेर्मन्तारम्' (बृ. ३।४।२) इति श्रुतिर्दृष्टेर्मतेर्व्यतिरिक्तं द्रष्टारं मन्तारं च प्रतिषेधतीति । तदागन्तुकचैतन्यगुणयोगितया ज्ञातुरज्ञानस्वरूपतां कुतर्कसिद्धां मत्वा, न तथात्मानं पश्येः न मन्वीथाः, अपि तु द्रष्टारं मन्तारमप्यात्मानं दृष्टिमतिरूपमेव पश्येरित्यभिदधातीति परिहृतम् । अथ वा, दृष्टेर्द्रष्टारं मतेर्मन्तारं जीवात्मानं प्रतिषिध्य, सर्वभूतान्तरात्मानं परमात्मानमेवोपास्स्वेति वाक्यार्थः । अन्यथा, 'विज्ञातारमरे केन विजानीयात्' (बृ. २।४।१४) इति ज्ञातृत्वश्रुतिविरोधश्च ।

आनन्दो ब्रह्मेत्यानन्दमात्रमेव ब्रह्मस्वरूपं प्रतीयत—इति यदुक्तम्, तज्ज्ञानाश्रयस्य ब्रह्मणो ज्ञानं स्वरूपमिति परिहृतम् (पृ. ६८ पं. ३) । ज्ञानमेव ह्यनुकूलमानन्द—इत्युच्यते । विज्ञानमानन्दं ब्रह्मेत्यानन्दस्वरूपमेव विज्ञानं ब्रह्मेत्यर्थः । अत एव भवतामेकरसता । अस्य ज्ञानस्वरूपस्यैव ज्ञातृत्वमपि श्रुतिशतसमधिगतमित्युक्तम् । तद्वदेव, 'स एको ब्रह्मण आनन्दः' (तै. २।८।१) 'आनन्दं ब्रह्मणो विद्वान्' (तै. २।४।१) इत्यादिव्यतिरेकनिर्देशाच्च नानन्दमात्रं ब्रह्म, अपित्वानन्दि । ज्ञातृत्वमेव ह्यानन्दित्वम् ।

एवं ज्ञेयत्वनिषेधे परिहृते ज्ञातृत्वनिषेधं परिहरति—**यत्त्विति** । **तदागन्तुकेति** । 'ज्ञातात्मा न ज्ञानस्वरूपः किं तु जडः । ज्ञानं तु तस्यागन्तुको धर्मः' इति नैयायिकाद्युक्तकुतर्कमवलम्ब्य तादृशमात्मानं न पश्येः, अपि तु ज्ञातारमपि ज्ञानस्वरूपमेव पश्येरिति श्रुत्यर्थः । **अन्यथा** । आत्मनो ज्ञातृत्वाभावे ।

आनन्दमात्रमेवेति । आनन्दरूपस्यानन्दाश्रयत्वाभावादित्याशयः । **परिहृतमिति** । ज्ञानानन्दयोरैक्यादिति भावः । तदेवाह—**ज्ञानमेवेति** । तर्हि श्रुतिषु विज्ञानानन्दशब्दयोः सहप्रयोगोऽनुपपन्न इत्यत आह—**विज्ञानमानन्दमिति** । स्वप्रकाशत्वानुकूलत्वरूपप्रवृत्तिनिमित्तभेदात्सहप्रयोग उपपद्यते इति भावः । **अत एवेति** । ज्ञानानन्दशब्दयोरेकविषयत्वादेवात्मन एकरसता भवदभिमता संगच्छते इत्याशयः ।

यदिदमुक्तं, 'यत्र हि द्वैतमिव भवति' (बृ. २।४।१४) 'नेह नानास्ति किञ्चन । मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति' (बृ. ४।४।१९) 'यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत्' (बृ. ४।५।१५) इति भेदनिषेधो बहुधा दृश्यत-इति । तत् कृत्स्नस्य जगतो ब्रह्मकार्य्यतया तदन्तर्यामिकतया च तदात्मकत्वेनैक्यात् तत्प्रत्यनीकनानात्वं प्रतिषिध्यते । न पुनः 'बहुस्यां प्रजायेय' (छां. ६।२।३) इति बहुभवनसङ्कल्पपूर्वकं ब्रह्मणो नानात्वं श्रुतिसिद्धं प्रतिषिध्यत-इति परिहृतम् । नानात्वनिषेधादियमपरमार्थविषयेति चेत्-न । प्रत्यक्षादिसकलप्रमाणानवगतनानात्वं दुरारोहं ब्रह्मणः प्रतिपाद्य, तदेव बाध्यत-इत्युपहास्यमिदम् ।

'यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते, अथ तस्य भयं भवति' (तै. २।७।१) इति ब्रह्मणि नानात्वं पश्यतो भयप्राप्तिरिति यदुक्तम् , तदसत् । 'सर्वं खल्विदं ब्रह्म, तज्जलानिति शान्त उपासीत' (छां. ३।

अथ भेदनिषेधपरत्वेन पूर्वपक्ष्युक्तां श्रुतिं योजयितुमनुवदति-**यदिदमिति** । परिहरति-**तत्कृत्स्नस्येति** । चिदचिद्विशिष्टं ब्रह्मैव जगतः कारणं जगतोऽन्तर्यामि चेति जगतो ब्रह्मात्मकत्वेन ब्रह्मणा सहैक्यम् । एतादृशैक्यस्य प्रत्यनीकं विरुद्धं यन्नानात्वं तदेवोक्तश्रुतिभिर्निषिध्यते । यस्य ब्रह्मकारणं न भवति नाप्यन्तर्यामि भवति तादृशं ब्रह्मभिन्नं वस्तु किंचिदपि नास्तीति यावत् । ब्रह्मकार्यस्य तु नानात्वं बहुस्यामिति श्रुत्यनुरोधेन स्वीकार्यमेवेति भावः । शङ्कते-**नानात्वेति** । नेह नानास्तीति नानात्वनिषेधकश्रुत्यविरोधाय बहुस्यामिति श्रुतेर्मिथ्याभूतकार्यविषयकत्वं कल्प्यते । तथा चानेन नानेतिनिषेधसिध्यर्थं बहुस्यामिति श्रुतौ मिथ्याभूतं नानात्वमनूद्यते । प्रतियोगिप्रसिद्धिं विना निषेधानुदयादित्याशयः । **प्रत्यक्षादीति** । नानात्वस्य मिथ्याभूतत्वेन प्रत्यक्षादिसकलप्रमाणागोचरत्वं तत एव च तस्य दुरारोहत्वं दुर्ज्ञेयत्वम् । ततश्च प्रतिपादनाविषयमपि प्रतिपाद्यते पुनस्तदेव बाध्यते चेत्युपहासास्पदमेतदितिभावः ।

तदसदिति । नानात्वस्य भयप्राप्तिहेतुत्वं नास्ति । ब्रह्मणः कार्यजगद्रूपेण नानात्वानुसन्धानस्य मुक्तिहेतुत्वात् । अत एव श्रुतौ सर्वं खल्विदं ब्रह्मेत्युक्तम् । न तु केवलं

१४।१) इति तन्नानात्वानुसन्धानस्य शान्तिहेतुत्वोपदेशात् । तथा हि । सर्वस्य जगतस्तदुत्पत्तिस्थितिलयकर्मतया तदात्मकत्वानुसन्धानेनात्र शान्तिर्विधीयते । अतो यथावस्थितदेवतिर्यङ्मनुष्यस्थावरादिभेदभिन्नं जगत् ब्रह्मात्मकमित्यनुसन्धानस्य शान्तिहेतुतया अभयप्राप्तिहेतुत्वेन न भयहेतुत्वप्रसङ्गः । एवं तर्हि, अथ तस्य भयं भवतीति किमुच्यते । 'यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते, अथ सोऽभयं गतो भवति' (तै. २।७।१) इत्यभयप्राप्तिहेतुत्वेन ब्रह्मणि या प्रतिष्ठाभिहिता, तस्या विच्छेदे भयं भवतीति । यथोक्तं महर्षिभिः—

'यन्मुहूर्तं क्षणं वापि वासुदेवो न चिन्त्यते ।
सा हानिस्तन्महच्छिद्रं सा भ्रान्तिः सा च विक्रिया'

इत्यादि । ब्रह्मणि प्रतिष्ठाया अन्तरमवकाशो विच्छेद एव ।

यदुक्तम् (पृ.२४पं.९)न स्थानतोऽपीति सर्वविशेषरहितं ब्रह्मेति वक्ष्यतीति । तन्न । सविशेषं ब्रह्मेत्येव हि तत्र वक्ष्यति । मायामात्रं त्विति च स्वाप्नानामप्यर्थानां जागरितावस्थानुभूतपदार्थवैधर्म्येण मायामात्रत्वमुच्यत—इति

ब्रह्मेति । सर्वशब्दश्च विविधभेदप्रपञ्चपरः । तथा च नानार्थानुसन्धानस्य शान्तिहेतुत्वद्वारा समस्तभयनिवृत्तिरूपमोक्षहेतुत्वं सिद्धमिति भेदबुद्धेर्भयप्राप्तिहेतुत्वोक्तिर्विरुद्धेति भावः । **अदृश्ये इति** । अनेनाचिद्व्यावृत्तिः । **अनात्म्ये** । आत्म्यं व्याप्यं कर्मकृतं शरीरं तद्रहिते । **अनिरुक्ते** । अनेन मुक्तव्यावृत्तिः । मुक्तो हि बद्धावस्थायां देवादिशब्दैरुक्तो भवति । **अनिलयने** । निराधारे । अनेन नित्यमुक्तव्यावृत्तिः । तस्य भगवद्रूपाधारसत्वात् । **हानिः** । इष्टहानिः । **छिद्रम्** । अनिष्टप्राप्तिरन्ध्रम् । **भ्रान्तिः** । छिद्रेण कृतं चित्तस्खलनम् । **विक्रिया** । भ्रान्तिमूलको विरुद्धव्यापारः । **अन्तरमवकाश इति** । यदा ह्येवेति श्रुतावन्तरशब्दस्य न भेदोऽर्थः । किं त्ववकाशः । ब्रह्मचिन्तनं विना क्षणमपि न स्थेयम् । तदुक्तम् । एकस्मिन्नप्यतिक्रान्ते मुहूर्ते ध्यानवर्जिते । दस्युभिर्मुषितेनेव युक्तमाक्रन्दितुं पुनरिति । तथा च तादृशावकाशो ब्रह्मप्रतिष्ठाविच्छेद एवेति तस्मिन्सत्येव महद्भयं न तु नानात्वज्ञाने इति बोध्यम् ।

सविशेषमिति । न स्थानतोऽपीति सूत्रस्य ह्ययमर्थः । परस्य परमात्मनः पृथिव्यादिस्थानतोऽपि नापुरुषार्थगन्धः संभवति । हि यतः सर्वत्र श्रुतिस्मृतिषु परं ब्रह्म

पारमार्थिकत्वमेव वक्ष्यति । स्मृतिपुराणयोरपि निर्विशेषज्ञानमात्रमेव परमार्थोऽन्यदपारमार्थिकमिति प्रतीयत—इति यदभिहितं, तदसत् ।

'यो मामजमनादिश्च वेत्ति लोकमहेश्वरम्' (गी. १०।३)

'मत्स्थानि सर्वभूतानि न चाहन्तेष्ववस्थितः ।
न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम् ।
भूतभृन्न च भूतस्थो ममात्मा भूतभावनः' (गी. ९।४-५)

'अहङ्कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा ।
मत्तः परतरं नान्यत् किञ्चिदस्ति धनञ्जय ।
मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव' (गी. ७।६-७)

'विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्' (गी. १०।४२)

'उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥
यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः ।

निर्दोषत्वसगुणत्व-एतदुभयलिङ्गमभिधीयते इति । **पारमार्थिकत्वमेवेति** । मायामात्रमिति सूत्रस्यायमर्थः । स्वप्नसृष्टिर्जीवकृतेति पूर्वपक्षं निरस्यति तुशब्दः । स्वप्नस्थरथादिपदार्थानां स्वरूपं कार्त्स्न्येनाभिव्यक्तं न भवतीति स्वाप्नसृष्टिर्मायामात्रमाश्चर्यरूपेति । तथा चैवंविधाश्चर्यकारकसृष्टेर्जीवकर्तृकत्वं न संभवति, किन्त्वीश्वरकर्तृकत्वमेवेति पारमार्थिकत्वमर्थात्सिध्यतीति भावः । **यो मामजमिति** । अत्राजत्वादिविशेषविशिष्टमेव ब्रह्मेति प्रतीयते । **मत्स्थानि** । मदायत्तस्थितीनि । **न चाहमिति** । अहं तदायत्तस्थितिको नेत्यर्थः । **न च मत्स्थानीति** । जलादीनां घटादिरिव नाहं भूतानामाधारः । अपि तु संकल्पमात्रेण । एतादृशमसाधारणमाश्चर्यकारकं ममैश्वरं योगं पश्य । कोऽसौ योग इत्याह—**भूतभृदिति** । सर्वेषां भूतानां भर्ताऽहं न च तैः कश्चिदपि ममोपकारः क्रियते । ममात्मैव संकल्प एव भूतानां भावयिता धारयिता नियन्ता चेत्यर्थः । **मत्त इति** । मद्व्यतिरिक्तं ज्ञानबलादिगुणान्तर्योगि किंचिदपि नास्ति ! इदं सर्वं चिदचिद्वस्तुजातं कार्यावस्थं, कारणावस्थं च मच्छरीरभूतं सूत्रे मणिगणवत् आत्मतयावस्थिते मयि प्रोतमाश्रितमित्यर्थः । **एकांशेन** । अयुतायुतांशेन संकल्पैकदेशेन वा । **अन्यः** । क्षराक्षरशब्दनिर्दिष्टाभ्यां बद्धमुक्तपुरुषाभ्यामन्यः । अथ पूर्वप-

अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ' (गी. १५।१७-१८)
' स सर्वभूतप्रकृतिं विकारान् गुणादिदोषांश्च मुने व्यतीतः ।
अतीतसर्वावरणोऽखिलात्मा तेनास्तृतं यद्भुवनान्तराले ॥
समस्तकल्याणगुणात्मकोऽसौ स्वशक्तिलेशोध्दृतभूतसर्गः ।
इच्छागृहीताभिमतोरुदेहः संसाधिताशेषजगद्धितोऽसौ ॥
तेजोबलैश्वर्यमहावबोधसुवीर्यशक्त्यादिगुणैकराशिः ।
परः पराणां, सकला न यत्र क्लेशादयः सन्ति परावरेशे ॥
स ईश्वरो व्यष्टिसमष्टिरूपोऽ व्यक्तस्वरूपोऽप्रकटस्वरूपः ।
सर्वेश्वरः सर्वदृक् सर्ववेत्ता समस्तशक्तिः परमेश्वराख्यः ॥
संज्ञायते येन तदस्तदोषं शुद्धं परं निर्मलमेकरूपम् ।
संदृश्यते वाप्यथ गम्यते वा तज्ज्ञानमज्ञानमतोऽन्यदुक्तम् ' (वि. पु. ६।५।८३-८७)

क्षिणा प्रदर्शितस्य प्रत्यस्तमितभेदमिति वचनस्यार्थं व्याचिख्यासुस्तदर्थं तदुपक्रमोपसंहारयोः सविशेषपरत्वं दर्शयिष्यन्नुपक्रमवचनानि दर्शयति—**स सर्वेति** । सर्वभूतप्रकृतिं प्रधानं, विकारान्महदादीन्, सत्वादिगुणहेतुकान् क्लेशादिदोषांश्च विशेषेणातीतस्तत्संबन्धानर्हः । अतीतं सर्वं आवरणं प्रकृतिसम्बन्धकर्मवासनादिकं येन सः । **समस्तेति** । समस्तकल्याणगुणः आत्मा यस्य सः । स्वगुणलवधृतभूतजातः । अवतारद्वारा सम्यक् साधितमशेषजगद्धितं येन सः । तेजोबलैश्वर्यावबोधवीर्यशक्त्यादिगुणानामेकराशिः । अपरिच्छिन्नत्ववाचकोमहच्छब्दः मङ्गलत्ववाचकः सुशब्दश्च सर्वगुणसाधारणः । **पर इति** । पूर्वोक्तरीत्या स्वरूपतो विग्रहतो गुणतश्च परत्वं बोध्यम् । **क्लेशादय इति** । आदिना कर्मविपाकाशयसङ्ग्रहः । विपाका जात्यायुर्भोगाः । आशयो वासना । **व्यष्टीति** । कार्यावस्थश्चेतनवर्गो व्यष्टिः । कारणावस्थश्चेतनवर्गः समष्टिः । एतादृशं रूपं शरीरं यस्य सः । **सर्वदृक्** । स्वरूपतः सर्वज्ञः । **सर्ववेत्ता** । प्रकारतः सर्वज्ञः । **संज्ञायत इति** । दोषरहितं शुद्धं निर्मलमेकरूपं तत्परं ब्रह्म येन शास्त्रजन्यज्ञानेन संज्ञायते । तथा तद्ब्रह्म येनोपासनात्मकेन ज्ञानेन संदृश्यते । तथा तद्ब्रह्म येन भक्तिरूपेण ज्ञानेन प्राप्यते तदेव ज्ञानम् । अन्यत्सर्वमज्ञानमेवेत्यर्थः । **पूर्वं यतो वाच इति** श्रुतिप्रतिपादितं वागविषयत्वं गुणानन्त्यमूलकत्वेन साधितम् । ब्रह्म-

---

१. ख. ग. स्वरूपः प्रकट

' शुद्धे महाविभूत्याख्ये परे ब्रह्मणि शब्द्यते ।
मैत्रेय भगवच्छब्दः सर्वकारणकारणे ॥
सम्भर्त्तेति तथा भर्त्ता भकारोऽर्थद्वयान्वितः ।
नेता गमयिता स्रष्टा गकारार्थस्तथा मुने ॥
ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः ।
ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा ॥
वसन्ति तत्र भूतानि भूतात्मन्यखिलात्मनि ।
स च भूतेष्वशेषेषु वकारार्थस्ततोऽव्ययः ' (वि. पु. ६।५।७२-७५)
' ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः ।
भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः ' (वि. पु. ६।५।७९)
' एवमेष महाशब्दो मैत्रेय भगवानिति ।
परमब्रह्मभूतस्य वासुदेवस्य नान्यगः ॥

णोऽनन्ता गुणा वक्तुं न शक्यन्ते इति तदाशयः । तथा च कतिचिद्गुणैर्वाग्विषयत्वं वर्तत एवेति सिद्धम् । तत्रैव प्रमाणवचनान्याह **शुद्धे इति** । अथ भगवच्छब्दस्यावयवशोऽर्थमाह–**संभर्तेति** । भृधातोर्डप्रत्यये ' भ ' शब्दःसिध्यति । तस्य संभर्ता भर्ता इत्यर्थद्वयम् । संभरणमुपकरणसंविधानम् । प्रकृतिपुरुषकालान् कार्योत्पत्तियोग्यान् यः करोति स संभर्तेत्युच्यते । भर्ता स्वामी । तथा गमेर्ण्यन्ताड्डप्रत्यये 'ग' शब्दः सिध्यति । गमयिता स्थितिकर्ता नेतेत्युच्यते । संगमयिता संहारकर्ता गमयितेत्युच्यते । उद्गमयितोत्पत्तिकर्ता स्रष्टेत्युच्यते । उपसर्गाणां द्योतकत्वेन तदर्थस्य धातुनैवाभिधानात्समुदोरप्रयोगः । भग इत्यक्षरद्वयस्य मिलितेनार्थमाह–**ऐश्वर्यस्येति** । समग्रशब्दः सर्वत्रान्वेति । गुणवत्वेन ख्यातिर्यशः । श्रीर्भाग्यसंपत् । वकारार्थमाह–**वसन्तीति** । वसधातोरधिकरणे कर्तरि वा डप्रत्यये 'व' शब्दःसिध्यति । **भूतात्मनि** । भूतानामात्मनि । **अखिलात्मनि** । अखिलशरीरके । अथ भकारादिवर्णसमुदायशक्तिनिष्पन्नमर्थमाह–**ज्ञानेति** । 'ज्ञानादीनां प्रत्येकं न भगवच्छब्दप्रवृत्तिनिमित्तत्वमपि तु समुच्चित्य' इत्यशेषत इत्यनेन सूच्यते । **महाशब्द इति** । उक्तरीत्याऽवयवशक्त्या समुदायशक्त्या च महतोऽर्थस्य क्रोडी-

---

१ वर्तते इति विष्णुपुराणपुस्तके पाठः

२ ' भगवानिति सत्तम इति विष्णुपुराणपुस्तके पाठः

तत्र पूज्यपदार्थोक्तिपरिभाषासमन्वितः ।
शब्दोऽयं नोपचारेण अन्यत्र ह्युपचारतः' (वि. पु. ६।५।७६-७७)
'समस्ताः शक्तयश्चैता नृप यत्र प्रतिष्ठिताः ।
तद्विश्वरूपवैरूप्यं रूपमन्यद्धरेर्महत् ॥
समस्तशक्तिरूपाणि तत्करोति जनेश्वर ।
देवतिर्यङ्मनुष्याख्याचेष्टावान्ति स्वलीलया ॥
जगतामुपकाराय न सा कर्मनिमित्तजा ।
चेष्टा तस्याप्रमेयस्य व्यापिन्यव्याहतात्मिका' (वि. पु. ६।७।६९-७१)
एवं प्रकारममलं नित्यं व्यापकमक्षयम् ।
समस्तहेयरहितं विष्ण्वाख्यं परमं पदम्' (वि. पु. १।२२।५१)
परः पराणां परमः परमात्मात्मसंस्थितः ।
रूपवर्णादिनिर्देशविशेषणविवर्जितः ॥
अपक्षयविनाशाभ्यां परिणामर्द्धिजन्मभिः ।
वर्जितः शक्यते वक्तुं यः सदास्तीति केवलम् ॥
सर्वत्रासौ समस्तश्च वसत्यत्रेति वै यतः ।
ततः स वासुदेवेति विद्वाद्भिः परिपठ्यते ॥

कारा‌द्भगवच्छब्दस्यमहाशब्दत्वम् । **तत्रेति** । पूज्यानां अवयवीभूतभकारादिपदार्थानामुक्तिः पुज्यपदार्थोक्तिर्योगः । परिभाषा च रूढिः । तथा च योगरूढिभ्यां प्रवृत्तो भगवच्छब्दो मुख्यः । अन्यत्र मुक्तादौ तु लाक्षणिक इति भावः । अथ तस्मिन्नेव योगप्रकरणे उपसंहारेऽपि सविशेषात्मप्रतिपादकवाक्यानि दर्शयति—**समस्ता इति । शक्तयः ।** विष्णुशक्तिरित्यग्रिमश्लोकेवक्ष्यमाणाः । **विश्वरूपवैरूप्यम्** । विलक्षणसन्निवेशयुक्तम् । **जगतामुपकाराय** । न तु स्वकर्मफलभोगाय । **व्यापिनी** । सर्वावतारानुगुणा । **अव्याहतात्मिका** । केनाप्यप्रतिहता । **रूपेति** । रूपं जातिः । वर्णो रूपम् । आदिशब्देन गन्धादिगुणानां क्रियायाश्च संग्रहः । निर्देशः रूपादिप्रतिपादकः शब्दः । तच्छब्दवाच्या रूपादयो विशेषणानि । तै रूपादिभिः कर्मणा संपादितैर्विवर्जितः । जायते अस्तीत्यवस्थाद्वयं जन्मशब्देन विवक्षितम् । षड्भावविकाररहित इत्यर्थः । **सर्वत्रेति** । सर्वत्र वसतीति वासुः । सर्वं वसत्यत्रेतिवा । स चासौ देवश्च वासुदेवः ।

तद्ब्रह्म परमं नित्यमजमक्षयमव्ययम् ।
एकस्वरूपञ्च सदा हेयाभावाच्च निर्मलम् ॥
तदेव सर्वमेवैतद्व्यक्ताव्यक्तस्वरूपवत् ।
तथा पुरुषरूपेण कालरूपेण च स्थितम् ' (वि. पु. १।२।१०-१४)
' प्रकृतिर्या मयाख्याता व्यक्ताव्यक्तस्वरूपिणी ।
पुरुषश्चाप्युभावेतौ लीयेते परमात्मनि ॥
परमात्मा च सर्वेषामाधारः परमेश्वरः ।
विष्णुनामा स वेदेषु वेदान्तेषु च गीयते ' (वि. पु. ६।४।३८-३९)
' द्वे रूपे ब्रह्मणस्तस्य मूर्त्तञ्चामूर्तमेव च ।
क्षराक्षरस्वरूपे ते सर्वभूतेष्ववस्थिते ।
अक्षरं तत्परं ब्रह्म क्षरं सर्वमिदं जगत् ॥
एकदेशस्थितस्याग्नेर्ज्योत्स्ना विस्तारिणी यथा ।
परस्य ब्रह्मणःशक्तिस्तथेदमखिलं जगत् '(वि. पु. १।२२।५३-५५)
' विष्णुशक्तिः परा प्रोक्ता क्षेत्रज्ञाख्या तथापरा ।
अविद्या कर्मसंज्ञान्या तृतीया शक्तिरिष्यते ॥
यया क्षेत्रज्ञशक्तिः सा वेष्टिता नृप सर्वगा ।
संसारतापानखिलानवाप्नोत्यतिसन्ततान् ॥
तया तिरोहितत्वाच्च शक्तिः क्षेत्रज्ञसंज्ञिता ।
सर्वभूतेषु भूपाल तारतम्येन वर्तते ' (वि. पु. ६।७।६१-६३)
' प्रधानञ्च पुमांश्चैव सर्वभूतात्मभूतया ।
विष्णुशक्त्या महाबुद्धे वृतौ संश्रयधर्मिणौ ।

क्षेत्रज्ञाख्या । जीवाख्या । **अविद्येति** । कर्मनामिकाऽविद्याशक्तिस्तृतीया । अनयैव चतुर्मुखादिपिपीलिकान्तसर्वशरीरस्था जीवशक्तिर्वेष्टितेत्यर्थः । **तारतम्येनेति** । कर्मतारतम्यानुगुणज्ञानतारतम्यवती क्षेत्रज्ञशक्तिरित्यर्थः । **प्रधानं चेति** । प्रधानमचित् । पुमांश्चित् । एतौ संश्रयधर्मिणौ भगवदपृथक्स्थितिधर्मकौ सर्वभूतव्यापिकया विष्णोर्नियमन-

---

१ ख. ग. मक्षरमव्ययम्

तयोः सैव पृथग्भावकारणं संश्रयस्य च ' (वि. पु. २।७।२९-३०)

यथा सक्तो जले वातो बिभर्ति कणिकाशतम् ।

शक्तिः सापि तथा विष्णोः प्रधानपुरुषात्मनः ' (वि. पु. २।७।३२)

' तदेतदक्षयं नित्यं जगन्मुनिवराखिलम् ।

आविर्भावतिरोभावजन्मनाशविकल्पवत् ' (वि. पु. १।२२।५९)

इत्यादिना परं ब्रह्म स्वभावत एव निरस्तनिखिलदोषगन्धं समस्तकल्याणगुणात्मकं जगदुत्पत्तिस्थितिसंहारान्तःप्रवेशनियमनादिलीलं प्रतिपाद्य, कृत्स्नस्य चिदचिद्वस्तुनः सर्वावस्थावस्थितस्य पारमार्थिकस्यैव परस्य ब्रह्मणः शरीरतया रूपत्वं शरीररूप¹शक्तिविभूत्यादिशब्दैस्तत्तच्छब्दसामानाधिकरण्येन चाभिधाय, तद्विभूतिभूतस्य चिद्वस्तुनः स्वरूपेणावस्थितिमचिन्मिश्रतया क्षेत्रज्ञरूपेणावस्थितिं चोक्त्वा, क्षेत्रज्ञावस्थायां पुण्यपापात्मककर्मरूपाविद्यावेष्टितत्वेन स्वाभाविकज्ञानरूपत्वाननुसन्धानमचिद्रूपार्थाकारतयानुसन्धानञ्च प्रतिपादितमिति परं ब्रह्म सविशेषं, तद्विभूतिभूतं जगदपि पारमार्थिकमेवेति ज्ञायते ।

शक्त्या व्याप्तावित्यर्थः । महाबुद्धे इति संबोधनम् । **तयोरिति** । तयोश्चिदचितोः संश्रयः सम्बन्धः संसारः । तयोः पृथग्भावो मोक्षः । सा विष्णुशक्तिरेव संसारमोक्षयोः कारणमित्यर्थः । **यथेति** । प्रकृतिपुरुषगतदोषलेशराहित्ये दृष्टान्तः । यथा वायुः कणिकाशतं तत्स्वभावास्पृष्टो बिभर्ति तद्वत् प्रधानमचित् पुरुषः बद्धो जीवः आत्मा मुक्तात्मा एतान् सा शक्तिर्बिभर्तीत्यन्वयः । एवंविधस्य जगतः परमार्थत्वमाह—**तदेतदिति** । मिथ्याभूतं हि वस्तु बाध्यं सदनित्यं भवति, जगत्तु न तथेति भावः । **निरस्तेति** । इदं स सर्वभूतेति श्लोकप्रतिपाद्यम् । **समस्तेति** । इदं समस्तकल्याणेति श्लोकप्रतिपाद्यम् । **जगदुत्पत्तीति** । इदं भगवच्छब्दार्थासिद्धम् । **नियमनादीति** । आदिशब्देनाध्यक्षत्वानुमन्तृत्वसंग्रहः । **चिदचिदिति** । अस्यैव ' सर्वावस्थावस्थितस्य ' इति ' पारमार्थिकस्य ' इति च विशेषणम् । बद्धमुक्तावस्थस्य चिद्वस्तुनः कार्यकारणावस्थस्याचिद्वस्तुन इत्यर्थः । तस्य पारमार्थिकत्वं चात्मनियम्यत्वेन सिद्धम् । तस्य परब्रह्मशरीरत्वं च द्वे रूपे इत्यादिश्लोकेषु शरीर, रूप, शक्ति, विभूत्यादिशब्दैः प्रतिपादितम् ।

---

¹ क. ख. ग. रूप तनु अंश शक्ति

प्रत्यस्तमितभेदमित्यत्र, देवमनुष्यादिप्रकृतिपरिणामविशेषसंसृष्टस्याप्यात्मनः स्वरूपं तद्गतभेदरहितत्वेन तद्भेदवाचिदेवादिशब्दागोचरं ज्ञानसत्तैकलक्षणं स्वसंवेद्यं योगयुङ्मनसो न गोचरमित्युच्यत–इति। अनेन न प्रपञ्चापलापः। कथमिदमवगम्यत–इति चेत् तदुच्यते। अस्मिन् प्रकरणे संसारैकभेषजतया योगमभिधाय, योगावयवान् प्रत्याहारपर्य्यन्तांश्चोक्त्वा धारणासिद्ध्यर्थं शुभाश्रयं वक्तुं परस्य ब्रह्मणो विष्णोः शक्तिशब्दाभिधेयं रूपद्वयं मूर्त्तामूर्त्तविभागेन प्रतिपाद्य, तृतीयशक्तिरूपकर्माख्याविद्यावेष्टितमचिद्विशिष्टं क्षेत्रज्ञं मूर्त्ताख्यविभागं भावनात्रयान्वयादशुभमित्युक्त्वा, द्वितीयस्य कर्माख्याविद्याविरहिणोऽचिद्वियुक्तस्य ज्ञानैकाकारस्यामूर्त्ताख्य-

---

किं च तत्र शरीरादिशब्दानां चिदाचिद्वस्तुनः सामानाधिकरण्यं कृतं ततोऽपि तस्य परब्रह्मशरीरत्वं सिध्यतीति भावः।

अथ पूर्वपक्ष्युदाहृतवचनानि सविशेषपरत्वेन व्याचिख्यासुः प्रथमं प्रत्यस्तमितेति श्लोकं व्याचष्टे–**प्रत्यस्तेति**। देवमनुष्यादिशरीरं दुःखाज्ञानादयश्च प्रकृतिपरिणामविशेषास्तैः संसृष्टस्यापि तद्गतरूपवर्णादिभेदरहितत्वेनेत्यर्थः। अनेन प्रत्यस्तमितभेदमिति व्याख्यातम्। **तद्भेदेति**। अनेन वचसामगोचरमिति व्याख्यातम्। **योगयुगिति**। योगयुक् प्रक्रान्तयोगः सिद्धदशानापन्नो योगी। तस्य यन्मनस्तदविषयमित्यर्थः। एतच्चानुपदमेव स्पष्टीभविष्यति। **संसारैकेति**। तदुक्तम् ' क्लेशानां च क्षयकरं योगादन्यन्न विद्यते ' इति। **योगावयवानिति**। योगाङ्गानीत्यर्थः। तथाहि। ' यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि ' (यो. सू. २।२९)। ' अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमः ' (यो. सू. २।३०)। ' शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमः ' (यो. सू. २।३२)। ' स्थिरसुखमासनम् ' (यो. सू. २।४६)। आस्यतेऽनेनेत्यासनं पद्मासनादि। तद्यदा स्थिरं निष्कम्पं सुखमनुद्वेजनीयं च भवति तदा तद्योगाङ्गतां भजते इत्यर्थः। ' तस्मिन्सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः ' (यो. सू. २।४९)। तस्मिन्सति आसनस्थैर्ये सतीत्यर्थः। ' स्वस्वविषयसंप्रयोगाभावे चित्तस्य स्वरूपानुकार इवेन्द्रियाणां प्रत्याहारः ' (यो. सू. २।५४)। इन्द्रियाणि स्वस्वविषयेभ्यः प्रत्याह्रियन्ते प्रतिकूलतया ह्रियन्ते यस्मिन्निति प्रत्याहारः। चक्षुरादीन्द्रियाणां रूपादिविषयप्रवृत्त्यभावे सति इन्द्रियाणि चित्तस्वरूपमात्रानुकारीणि यद्भवन्ति स प्रत्या-

विभागस्य निष्पन्नयोगिध्येयतया योगयुङ्मनसोऽनालम्बनतया स्वतःशुद्धिविरहाच्च शुभाश्रयत्वं प्रतिषिध्य, परशक्तिरूपमिदममूर्त्तम् (१) अपरशक्तिरूपं क्षेत्रज्ञाख्यं मूर्त्तञ्च (२) परशक्तिरूपस्यात्मनः क्षेत्रज्ञताप्तिहेतुभूततृतीयशक्त्याख्यकर्मरूपाविद्या च (३) इत्येतच्छक्तित्रयाश्रयं भगवदसाधारणम् , आदित्यवर्णमित्यादिवेदान्तसिद्धं मूर्त्तं रूपं शुभाश्रय-

---

हारइत्यर्थः । 'देशबन्धश्चित्तस्य धारणा' (यो. सू. ३।१)। देशे चित्तस्य बन्धो विषयान्तरपरिहारेण यत्स्थिरीकरणं सा चित्तस्य धारणेत्यर्थः। निराधारायाश्चित्तधारणाया असंभवात्तदाश्रयीभूतः कश्चन कल्याणकारको देशोऽवश्यं वाच्यः। अयमेव शुभाश्रय इत्युच्यते। ध्येयस्वरूपमिति यावत्। स च न चतुर्मुखादिः। तस्य जगदन्तःपातित्वेनाविद्यावेष्टितत्वेन शुभाश्रयत्वाभावात्। नापि सिद्धयोगी। तस्य पूर्वं बद्धत्वेन स्वाभाविकशुद्धत्वाभावात्। नापि विष्णोःशक्तिः। सा हि त्रिधा। मूर्तामूर्तकर्मभेदात्। तत्र न तृतीया। तस्या अविद्यास्वरूपत्वेन ध्येयत्वाभावात्। न च प्रथमा। देहविशिष्टोऽविद्यावेष्टितो यो जीवस्तत्स्वरूपा हि सा। तस्याश्च भावनात्रयसंबन्धवत्वेनाशुभत्वात्। त्रिविधा भावना च विष्णुपुराणे (६।७) उक्ता। 'त्रिविधाभावना विप्र विश्वमेतन्निबोधत। ब्रह्माख्या कर्मसंज्ञा च तथा चैवोभयात्मिका' इति। नापि द्वितीया। अविद्यारहिता देहरहिता ज्ञानैकस्वरूपा हि सा। तस्याश्च भगवत्प्रसादैकलभ्यायाः सिद्धदशानापन्नयोगिना ध्यातुमशक्यत्वात्। किंतूक्तशक्तित्रयाश्रयं परमात्मनोऽसाधारणं रूपं यत् 'आदित्यवर्णम्' (श्वे. ३।८) इत्यादिश्रुतिभिः प्रतिपाद्यते तदेव शुभाश्रयः। 'तत्र प्रत्ययैकतानता ध्यानम्' (यो. सू. ३।२) तत्र शुभाश्रये प्रत्ययस्य ज्ञानस्यैकतानता तदालम्बनतयैव निरन्तरमुत्पत्तिर्ध्यानमित्यर्थः। 'तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः' (यो. सू. ३।३) सम्यक् आधीयते एकाग्रीक्रियते यत्र मनः स समाधिरिति बोध्यम्। **निष्पन्नयोगिध्येयतयेति**। निष्पन्नयोगी सिद्धयोगी। ध्येयमित्यत्र शक्यार्थे यत्। नत्वर्हार्थे। एतेनासिद्धयोगिनो ध्यातुमशक्यत्वं सूचितम्। तदेवाह—**योगयुगिति**। असिद्धयोगिमनस इत्यर्थः। **अनालम्बनतयेति**। तथा च तस्याश्रयत्वं नास्तीति शुभाश्रयत्वं न संभवतीति सिद्धम्। शुभत्वमपि नास्तीत्याह—**स्वतःशुद्धिविरहादिति**। अत्र न स्वाभाविकशुद्धिः स्वतः शुद्धिशब्देनोच्यते। किं त्वन्यानपेक्षत्वेन ध्यातृनिष्ठदोषनिराससामर्थ्यम्। तच्च परमात्मन्येव। न तु तदीयायामप्युक्तशक्तौ। तस्या

—इत्युक्तम् । अत्र परिशुद्धात्मस्वरूपस्य शुभाश्रयतानर्हतां वक्तुं 'प्रत्यस्तमितभेदं यत्' इत्याद्युच्यते । तथाहि ।

'न तद्योगयुजा शक्यं नृप चिन्तयितुं यतः ।
द्वितीयं विष्णुसंज्ञस्य योगिध्येयं परं पदम्' (वि. पु. ६।७।५५)
'समस्ताः शक्तयश्चैता नृप यत्र प्रतिष्ठिताः ।
तद्विश्वरूपवैरूप्यं रूपमन्यद्धरेर्महत्' (वि. पु. ६।७।६९) इति ।

तथा चतुर्मुखसनकादीनां जगदन्तर्वर्त्तिनामविद्यावेष्टितत्वेन शुभाश्रयानर्हतामुक्त्वा, बद्धानामेव पश्चाद्योगेनोद्भूतबोधानां स्वस्वरूपमापन्नानाञ्च स्वतःशुद्धिविरहात् भगवता शौनकेन शुभाश्रयता निषिद्धा ।

'आब्रह्मस्तम्बपर्यन्ता जगदन्तर्व्यवस्थिताः ।
प्राणिनः कर्मजनितसंसारवशवर्तिनः ॥
यतस्ततो न ते ध्याने ध्यानिनामुपकारकाः ।
अविद्यान्तर्गताः सर्वे ते हि संसारगोचराः ॥
पश्चादुद्भूतबोधाश्च ध्याने नैवोपकारकाः ।
नैसर्गिको न वै बोधस्तेषामप्यन्यतो यतः ॥
तस्मात्तदमलं ब्रह्म निसर्गादेव बोधवत्'

इत्यादिना परस्य ब्रह्मणो विष्णोः स्वरूपं स्वासाधारणमेव शुभाश्रय—इत्युक्तम् । अतोऽत्र न भेदापलापः प्रतीयते ।

ज्ञानस्वरूपमित्यत्रापि, ज्ञानव्यतिरिक्तार्थजातस्य कृत्स्नस्य न मिथ्यात्वं प्रतिपाद्यते । ज्ञानस्वरूपस्यात्मनो देवमनुष्याद्यर्थाकारेणावभासो भ्रान्तिरित्येतावन्मात्रवचनात् । न हि शुक्तिकाया [१]रजततयावभासो भ्रा-

---

ज्ञानमात्रस्वरूपायाः केनाऽपि सह विरोधाभावेन दोषाविरोधित्वात् । **परिशुद्धात्मस्वरूपस्य** । द्वितीयशक्तेः । **स्तम्बः** । कर्मवश्यो जन्तुः ।

ज्ञानस्वरूपमित्यत्रापि । ज्ञानस्वरूपमत्यन्तनिर्मलमिति प्रागुक्त-(पृ. २८ पं. १) श्लोकेपि । **ज्ञानस्वरूपस्येति** । ज्ञानस्यार्थाकारत्वेन योऽवभासः स भ्रमोऽस्तु

---

१ क. मिथ्यारजततया

न्तिरित्युक्ते, जगति कृत्स्नं रजतजातं मिथ्या भवति । जगद्ब्रह्मणोः सामानाधिकरण्येनैक्यप्रतीतेर्ब्रह्मणो ज्ञानस्वरूपस्यार्थाकारता भ्रान्तिरित्युक्ते सति, अर्थजातस्य कृत्स्नस्य मिथ्यात्वमुक्तं स्यादिति चेत् । तदसत् । अस्मिन् शास्त्रे परस्य ब्रह्मणो विष्णोर्निरस्ताज्ञानादिनिखिलदोषगन्धस्य समस्तकल्याणगुणात्मकस्य महाविभूतेः प्रतिपन्नतया, तस्य भ्रान्तिदर्शनासम्भवात् । सामानाधिकरण्येनैक्यप्रतिपादनञ्च बाधासहमविरुद्धं चेत्येतदनन्तरमेवोपपादयिष्यते । अतोऽयमपि श्लोको नार्थस्वरूपस्य बाधकः । तथाहि । ' यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद्ब्रह्म ' (तै. ३।१।१) इति जगज्जन्मादिकारणं ब्रह्मेत्यवसिते सति,

' इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् ।
बिभेत्यल्पश्रुताद्वेदो मामयं प्रतरिष्यति '

इति शास्त्रेणास्यार्थस्येतिहासपुराणाभ्यामुपबृंहणं कार्यमिति ज्ञायते । उपबृंहणं नाम, विदितसकलवेदतदर्थानां स्वयोगमहिमसाक्षात्कृतवेदतत्त्वार्थानां वाक्यैः स्वावगतवेदवाक्यार्थव्यक्तीकरणम् । सकलशाखानुगतस्य वाक्यार्थस्याल्पभागश्रवणादुरवगमत्वेन, तेन विना निश्चयायोगादुप-

---

नाम । परं त्वर्थस्य योर्थाकारत्वेन भासः स भ्रमो न भवतीत्यर्थः । शङ्कते—**जगद्ब्रह्मणोरिति** । दृष्टान्ते हि शुक्तिसामानाधिकरण्येन भासमानस्य रजतस्य मिथ्यात्वम् । तस्य शुक्त्या सह विरोधात् । तस्यैवाग्रे बाधितत्वाच्च । तस्माच्छुक्तिवैयधिकरण्येन भासमानस्य सत्यत्वम् । अत्र तु सर्वस्य जगतः ब्रह्मसामानाधिकरण्येन भासमानत्वात् सर्वस्य मिथ्यात्वं सिध्यतीत्याशयः । **महाविभूतेरिति** । अनेन जगन्मिथ्यात्वानुपपत्तिः सूचिता । **बाधासहमिति** । यथा शुक्तिरजतं बाधितं भवति तथेदं न भवतीत्यर्थः । **वेदम्** । वेदस्योत्तरभागं वेदान्तरूपम् । पूर्वभागस्य कर्मप्रतिपादकस्य तु धर्मशास्त्रेणोपबृंहणमिति बोध्यम् । **विदितेति** । विदितः सकलवेदस्तदर्थश्च यैस्तेषामित्यर्थः । **स्वयोगेति** । स्वयोगमहिम्ना साक्षात्कृतो वेदतत्त्वभूतोऽर्थो यैस्तेषामित्यर्थः । विवेकजज्ञानवतामिति यावत् । **व्यक्तीकरणम्** । अज्ञातविशेषैःसह स्वाव-

बृंहणं हि कार्यमेव। तत्र पुलस्त्यवसिष्ठवरप्रदानलब्धपरदेवतापारमार्थिकज्ञानवतो भगवतः पराशरात् स्वावगतवेदार्थोपबृंहणमिच्छन् मैत्रेयः परिपप्रच्छ—

' सोऽहमिच्छामि धर्मज्ञ श्रोतुं त्वत्तो यथा जगत्।
बभूव भूयश्च यथा महाभाग भविष्यति ॥
यन्मयञ्च जगद्ब्रह्मन् यतश्चैतच्चराचरम्।
लीनमासीद्यथा यत्र, लयमेष्यति यत्र च ' (वि. पु. १।१।८–९)

इत्यादिना। तत्र ब्रह्मस्वरूपविशेषतद्विभूतिभेदप्रकारतदाराधनस्वरूपफलविशेषाश्च पृष्टाः। ब्रह्मस्वरूपविशेषप्रश्नेषु यतश्चैतच्चराचरमिति निमित्तोपादानयोः पृष्टत्वात् यन्मयमित्यनेन सृष्टिस्थितिलयकर्मभूतं जगत् किमात्मकमिति पृष्टम्। तस्य चोत्तरं–' जगच्च स ' इति। इदञ्च तादात्म्यमन्तर्यामिरूपेणात्मतया व्याप्तिकृतं, न तु व्याप्यव्यापकयोर्वस्त्वैक्यकृतम्। यन्मयमिति प्रश्नस्योत्तरत्वात् जगच्च स–इति सामानाधिकरण्यस्य। यन्मयमिति मयट् न विकारार्थः। पृथक् प्रश्नवैयर्थ्यात्। नापि प्राणमयादिवत्

गतार्थनिष्कर्षः। **पुलस्त्येति**। पराशरस्य परदेवतातत्वज्ञानं पुलस्त्यवसिष्ठकृतवरदानलब्धमित्यर्थः। तदुक्तम् ' अथ तस्य पुलस्त्यस्य वसिष्ठस्य च धीमतः। प्रसादाद्वैष्णवं चक्रे पुराणं वै पराशरः' (लिं. पु. ६४।१२०) इति। **यतश्चैतदिति**। उद्भूतमिति शेषः। **ब्रह्मस्वरूपेति**। स्वरूपशब्दो विभूत्यादिव्यावर्तकः। विभूतिभेदानां प्रकारो विभूतिभेदप्रकारः। ब्रह्मस्वरूपविशेषः, विभूतिभेदप्रकारः, तदाराधनस्वरूपम्, फलविशेषश्च एतद्विषयकप्रश्ना इत्यर्थः। **यतश्चैतदिति**। तथा च यन्मयमिति प्रश्नो न निमित्तोपादानविषयकः। पुनरुक्त्यापत्तेरिति भावः। **स्थितिलयेति**। स्थितिः रक्षणम्। लयः संहारः। यथाश्रुतार्थत्वे जगतस्तत्कर्मत्वासंभवात्। **इदं च तादात्म्यमिति**। ' जगच्च स ' इत्यत्र जगद्ब्रह्मणोः सामानाधिकरण्येन सिद्धमित्यर्थः। **आत्मतयेति**। अन्तः प्रविश्य नियन्तृत्वमेवात्मत्वमिति भावः। **व्याप्यव्यापकयोः**। जगद्ब्रह्मणोः। **यन्मयमिति प्रश्नस्येति**। मयट्प्रत्ययो ह्यत्र प्राचुर्यार्थ इत्यग्रे वक्ष्यते। तथा च जगति प्राचुर्येण किं प्रस्तुतमिति प्रश्नार्थः। तस्य चोत्तरं जगच्च स इति वस्त्वैक्यतात्पर्यकं न संभवतीत्यर्थः। **पृथक् प्रश्नेति**। विकारार्थत्वे हि उपादा-

स्वार्थिकः । जगच्च स–इत्युत्तरानुपपत्तेः । तदा हि, विष्णुरेवेत्युत्तरमभविष्यत् । अतः प्राचुर्यार्थएव 'तत्प्रकृतवचने मयट्' (पा. सू. ५।४।२१) इति मयट् । कृत्स्नञ्च जगत् तच्छरीरतया तत्प्रचुरमेव । तस्मात्तन्मयमित्यस्य प्रतिवचनं जगच्च स–इति सामानाधिकरण्यं जगद्ब्रह्मणोः शरीरात्मभावनिबन्धनमिति निश्चीयते । अन्यथा निर्विशेषवस्तुप्रतिपादनपरे शास्त्रेऽभ्युपगम्यमाने सर्वाण्येतानि प्रश्नप्रतिवचनानि न संगच्छन्ते । तद्विवरणरूपं कृत्स्नञ्च शास्त्रं न संगच्छते । तथा हि सति, प्रपञ्चभ्रमस्य किमधिष्ठानमित्येवंरूपस्यैकस्य प्रश्नस्य निर्विशेषज्ञानमात्रमित्येवंरूपमेवोत्तरं स्यात् । जगद्ब्रह्मणोरेकद्रव्यत्वपरे च सामानाधिकरण्ये सत्यसंकल्पत्वादिकल्याणगुणैकतानता निखिलहेयप्रत्यनीकता च बाध्येत । सर्वाशुभास्पदञ्च ब्रह्म भवेत् । आत्मशरीरभाव एवेदं सामानाधिकरण्यं मुख्यवृत्तमिति स्थाप्यते । अतः–

'विष्णोः सकाशादुद्भूतं जगत्तत्रैव संस्थितम् ।
स्थितिसंयमकर्तासौ जगतोऽस्य जगच्च सः' (वि. पु. १।१।३५)

इति संग्रहेणोक्तमर्थं, परः पराणामित्यारभ्य विस्तरेण वक्तुं परब्रह्मभूतं भगवन्तं विष्णुं स्वेनैव रूपेणावस्थितम् 'अविकाराय' इति श्लोकेन प्रथमं प्रणम्य, तमेव हिरण्यगर्भस्वावतारशङ्कररूपत्रिमूर्तिप्रधानकालक्षेत्रज्ञ-

---

नमेव पृष्टं स्यात् । तच्च यतश्चैतदित्यत्र पृष्टमेवेति भावः । **उत्तरानुपपत्तेरिति ।** मयटः स्वार्थिकत्वे हि यदिदं जगत्तत्किमिति प्रश्नार्थो भवति । तस्य च जगत्किं सत्यमुत मिथ्येत्ययमेवाभिप्रायो वाच्यः । अन्यस्यासंभवात् । तथा च तदनुसारेण जगन्मिथ्येत्याशयेन 'विष्णुरेव' इत्येवोत्तरं वक्तव्यम् । न तु जगद्ब्रह्म एतदाकारद्वयोपस्थापकं सामानाधिकरण्यमित्याशयः । 'जगच्च स' इति सामानाधिकरण्यं वस्त्वैक्यकृतमित्यत्र दूषणान्तरमाह–**जगद्ब्रह्मणोरिति । स्थाप्यते इति ।** अनन्तरमेव स्थापयिष्यते इत्यर्थः । **अत इति ।** उक्तरीत्या शास्त्रस्य सविभूतिकसगुणवस्तुपरत्वावगमात् , सामानाधिकरण्यस्य विशिष्टवस्तुनि मुख्यवृत्तत्वाच्चेत्यर्थः । अस्य नमस्करोतीत्यनेनान्वयः । **अविकारायेतीति ।** 'अविकाराय शुद्धाय नित्याय परमात्मने । सदैकरूपरूपाय विष्णवे सर्वजिष्णवे' (वि. पु. १।२।१) इति श्लोकेनेत्यर्थः । **सदैकरूपरूपायेत्यस्य** सदैकरूपमेकप्रभावं रूपं यस्येत्यर्थः । **स्वावतारः** । विष्णुः । पर-

समष्टिव्यष्टिरूपेणावस्थितश्च नमस्करोति । तत्र, ज्ञानस्वरूपमित्ययं श्लोकः क्षेत्रज्ञव्यष्ट्यात्मनावस्थितस्य परमात्मनः स्वभावमाह । तस्मान्नात्र निर्विशेषवस्तुप्रतीतिः ।

यदि निर्विशेषज्ञानरूपब्रह्माधिष्ठानभ्रमप्रतिपादनपरं शास्त्रम् । तर्हि–

' निर्गुणस्याप्रमेयस्य शुद्धस्याप्यमलात्मनः ।
कथं सर्गादिकर्तृत्वं ब्रह्मणोऽभ्युपगम्यते ' (वि पु. १।३।१)

इति चोद्यम् ,

' शक्तयः सर्वभावानामचिन्त्यज्ञानगोचराः ।
यतोऽतो ब्रह्मणस्तास्तु सर्गाद्या भावशक्तयः ।
भवन्ति तपतां श्रेष्ठ पावकस्य यथोष्णता ' (वि. पु. १।३।२)

इति परिहारश्च न घटते । तथा सति ' निर्गुणस्य ब्रह्मणः कथं सर्गादिकर्तृत्वम् ' ' ब्रह्मणो न पारमार्थिकः सर्गः अपि तु, भ्रान्तिकल्पित'–इति चोद्यपरिहारौ स्याताम् । उत्पत्त्यादिकार्यं सत्त्वादिगुणयुक्तापरिपूर्णकर्मवश्येषु दृष्टमिति सत्त्वादिगुणरहितस्य परिपूर्णस्याकर्मवश्यस्य कर्मसम्बन्धानर्हस्य कथं सर्गादेः कर्तृत्वमभ्युगम्यत–इति चोद्यम् । दृष्टसकलविसजातीयस्य ब्रह्मणो यथोदितस्वभावस्यैव जलादिविसजातीयस्याग्न्यादेरौष्ण्यादिशक्तियोगवत् सर्वशक्तियोगो न विरुध्यत–इति परिहारः ।

मात्मैवतत्तच्छरीरकः सृष्ट्यादिकं करोति । ब्रह्मविष्णुमहेश इति मूर्तित्रयम्, प्रधानम्, कालः, क्षेत्रज्ञसमष्टिः क्षेत्रज्ञव्यष्टिश्चेत्येतद्रूपेणावस्थितमित्यर्थः । **तत्रेति** । परमात्मनः सद्वारक एव श्रमान्वय इत्यर्थः । मूले एवैतत्प्राक् (पृ. १०५ पं. २०) स्पष्टीकृतम् । **भावशक्तयः** । वस्तुशक्तयः । **न घटते इति** । निर्विशेषब्रह्मपक्षेऽयं परिहारो न संभवति । सर्गाद्या भावशक्तय इति शक्तिसंबंधप्रतिपादनादिति भावः । अथ स्वमतेन प्रश्नोत्तरयोस्तात्पर्यमाह––**उत्पत्त्यादीति** । सत्वादिगुणयुक्ताः अपरिपूर्णाः कर्मवश्याश्च ये चतुर्मुखादयो जीवविशेषास्तेष्वेवोत्पत्त्यादि कार्यं दृश्यत इत्यर्थः । **जलादीति** । यथा जलादिविसदृशस्याग्नेरौष्ण्यादिशक्तियोगस्तथा चतुर्मुखादिविसदृशस्य ब्रह्मणः सर्वशक्तियोगः संभवतीत्यर्थः । तथा चाग्निरनुष्णः द्रव्यत्वाज्जलवदि-

'परमार्थस्त्वमेवैक' (पृ. २८ पं. ५)–इत्याद्यपि न कृत्स्नस्यापारमार्थ्यं वदति । अपि तु, कृत्स्नस्य तदात्मकतया तद्व्यतिरेकेणावस्थितस्यापारमार्थ्यम् । तदेवोपपादयति–

'तवैषऽ महिमा येन व्याप्तमेतच्चराचरम् ' इति ।

येन त्वयेदं चराचरं व्याप्तम् , अतस्त्वदात्मकमेवेदं सर्वमिति त्वदन्यः कोऽपि नास्ति । अतः सर्वात्मतया त्वमेवैकः परमार्थः । अत इदमुच्यते, तवैष महिमा या सर्वव्याप्तिरिति । अन्यथा तवैषा भ्रान्तिरिति वक्तव्यम् । जगतः पते त्वमित्यादीनां पदानाञ्च लक्षणा स्यात् । लीलया महीमुद्धरतो भगवतो महावराहस्य स्तुतिप्रकरणविरोधश्च । यतः कृत्स्नं जगत् ज्ञानात्मना त्वया आत्मतया व्याप्तत्वेन तव मूर्त्तं, तस्मात् त्वदात्मकत्वानुभवसाधनयोगविरहिण एतत् केवलं[1] देवमनुष्यादिरूपमिति भ्रान्तिज्ञानेन पश्यन्तीत्याह–' यदेतद्दृश्यत ' इति । न केवलं वस्तुतस्त्वदात्मकं जगत् देवमनुष्याद्यात्मकमिति दर्शनमेव भ्रमः, ज्ञानाकाराणामात्मनां देवमनुष्या-

---

त्यनुमानवत् ' ब्रह्म सत्वादिगुणयुक्तमुत्पत्त्यादिकर्तृत्वाच्चतुर्मुखादिवत् ' इत्यनुमानमप्रयोजकमिति भावः ।

अन्यथेति । व्याप्यस्य जगतः व्याप्तेश्च मिथ्यात्वे सर्वव्याप्तिस्तव महिमेति न वक्तव्यमित्यर्थः । कृत्स्नस्य मिथ्याभूतत्वे दूषणान्तरमाह–**जगत इति** । जगतो मिथ्याभूतत्वे तत्पत्तित्वासंभवान्मिथ्याभूतार्थवाचकपदानां तदधिष्ठाने लक्षणा स्वीकार्या स्यात्तथा त्वं शब्दस्य स्वाभिमुखाहमर्थे लक्षणा स्वीकार्या स्यादिति भावः । **विरोधश्चेति** । मिथ्याभूतार्थस्यान्यत उद्धरणासंभवेनेदृशस्तुतेरसंभवादित्याशयः । **यदेतद्दृश्यते इति** प्रागुक्त–(पृ. २८ पं. ६) श्लोकतात्पर्यमाह–**यत इति । आत्मतया** । अन्तर्यामिरूपेण । **तव मूर्त्तमिति** । दृश्यमानं जगत्तवैवमूर्त्तं रूपमित्यर्थः । **केवलमिति** । एतत्परमात्मनः शरीरमित्यनुसन्धानरहितं स्वतन्त्रमित्यर्थः । अत एवेयं भ्रान्तिः । परमात्मसंबन्धस्य सत एवाज्ञानेन परतन्त्रस्यापि स्वतन्त्रत्वेनाभ्युपगमात् । ज्ञानस्वरूपमिति प्रागुक्त–(पृ. २८ पं. ३) श्लोकतात्पर्यमाह–**न केवलमिति । देवमनुष्यादीति** । देवमनुष्यादयो येऽर्थाः शरीराणि स

---

१ क ख ग केवलंदेव.

द्यर्थाकारत्वदर्शनमपि भ्रम—इत्याह—ज्ञानस्वरूपमखिलमिति । ये पुनर्बुद्धिमन्तो ज्ञानस्वरूपात्मविदः सर्वस्य भगवदात्मकत्वानुभवसाधनयोगयोग्यपरिशुद्धमनसश्च, ते देवमनुष्यादिप्रकृतिपरिणामविशेषशरीररूपमखिलं जगच्छरीरातिरिक्तज्ञानस्वरूपात्मकं त्वच्छरीरञ्च पश्यन्तीत्याह -ये तु ज्ञानविद—इति । अन्यथा श्लोकानां पौनरुक्त्यं, पदानां लक्षणा, अर्थविरोधः, प्रकरणविरोधः, शास्त्रतात्पर्यविरोधश्च ।

तस्यात्मपरदेहेषु सतोऽप्येकमयमित्यत्र, सर्वेष्वात्मसु ज्ञानैकाकारतया समानेषु सत्सु देवमनुष्यादिप्रकृतिपरिणामविशेषरूपपिण्डसंसर्गकृतमात्मसु देवाद्याकारेण द्वैतदर्शनमतथ्यमित्युच्यते । पिण्डगतमात्मगतमपि द्वैतं न प्रतिषिध्यते । देवमनुष्यादिविविधविचितपिण्डेषु वर्तमानं सर्वमा-

---

एवात्मेति ज्ञानं भ्रम इत्यर्थः । ये तु ज्ञानविद इति प्रागुक्त–(पृ. २८ पं. १०) श्लोकं व्याचष्टे–**ये पुनरिति । सर्वस्येति** । सर्वस्य यद्भगवदात्मकत्वं तदनुभवसाधनीभूतो यो योगस्तेन योग्यं परिशुद्धं च मनो येषां तथाभूता इत्यर्थः । **पौनरुक्त्यमिति** । स्वातन्त्र्यभ्रमो देहात्मभ्रमश्चेति विभागाभावेन ' यदेतद्दृश्यते ', ' ज्ञानस्वरूपम् ' इति श्लोकयोः पौनरुक्त्यम् । लक्षणा चानुपदमेव प्रदर्शिता । अर्थविरोधः प्रमाणविरोधः । प्रत्यक्षादिप्रमाणैरबाध्यत्वेन सिध्यतो जगतो मिथ्यात्वाङ्गीकारात् । प्रकरणविरोधः स्तुतिप्रकरणविरोधः । रोमान्तरस्था मुनयः स्तुवन्तीति हि स्तुतिः प्रकृता । स्तोतॄणामद्वैतज्ञानवत्त्वे स्तुतिर्न संभवतीति तद्विरोधः । तदभावे च नितरां शास्त्रतात्पर्यविरोध इति बोध्यम् ।

पूर्वपक्षिणा प्रदर्शितं (पृ. २८ पं. १२) तस्यात्मपरदेहेष्विति श्लोकं व्याचष्टे–**तस्येति** । जीवाः परस्परं भिन्ना एव । किं तु भिन्नानामपि तेषामेकजातीयत्वाज्जीवैक्यमिति व्यवहारः । ऐक्यं तुल्यत्वम् । एको व्रीहिरितिवदेकशब्दस्य तुल्यार्थत्वात् । जीवाद्वैतमिति व्यवहारस्याप्येतदेवतात्पर्यम् । प्रकारविशिष्टानां जीवानां द्वैतेऽपि तद्गतप्रकारस्यैक्यात् । प्रकाराद्वैतमिति यावत् । ब्रह्माद्वैतमिति व्यवहारस्य तु प्रकार्यद्वैतमित्यर्थः । ब्रह्मणः प्रकारीभूता ये जीवास्तेषु द्वैतेपि तद्विशिष्टस्य (प्रकारिणः) ब्रह्मण एकत्वात् । **अतथ्यमिति** । द्वैतमिथ्यात्वदर्शिन इत्यस्य देवमनुष्यादिद्वैतमिथ्यात्वदर्शिन इत्यर्थः । जीवब्रह्मणोर्भेदस्य सत्यत्वात् । न च जीवद्वैतस्यापि सत्यत्वेन कथं तस्य मिथ्यात्वमिति वाच्यम् । तत्र वास्तविकद्वैतस्य सत्यत्वेऽपि देवमनुष्यादिशरीरसंबन्धकृतद्वैतस्य मिथ्यात्वात् । शरीरद्वैतस्य शरीरेष्वेव सत्यात् । साम्ये

त्मवस्तु सममित्यर्थः । यथोक्तं भगवता—

'शुनि चैव श्वपाके च पण्डिताः समदर्शिनः' (गी. ५।१८)

'निर्दोषं हि समं ब्रह्म' (गी. ५।१९) —इत्यादिषु ।

तस्यात्मपरदेहेषु सतोऽपीति देहातिरिक्ते वस्तुनि स्वपरविभागस्योक्तत्वात् ।

यद्यन्योऽस्ति परः कोऽपीत्यत्रापि नात्मैक्यं प्रतीयते । यदि मत्तः परः कोऽप्यऽन्य–इत्येकस्मिन्नर्थे परशब्दान्य-शब्दयोः प्रयोगायोगात् । तत्र, पर-शब्दः स्वव्यतिरिक्तात्मवचनः । अन्य-शब्दः तस्यापि ज्ञानैकाकारत्वात् अन्याकारत्वप्रतिषेधार्थः । एतदुक्तं भवति । यदि मद्व्यतिरिक्तः कोऽप्यात्मा मदाकारभूतज्ञानैकाकारादन्याकारोऽस्ति, तदाहमेवमाकारः, अयश्चान्यादृशाकार–इति शक्यते व्यपदेष्टुम् । न चैवमास्ति । सर्वेषां ज्ञानैकाकारत्वेन समानत्वादेवेति ।

वेणुरन्ध्रविभेदेनेत्यत्रापि आकारवैषम्यमात्मनां न स्वरूपकृतम् , अपि तु देवादिपिण्डप्रवेशकृतमित्युपदिश्यते नात्मैक्यम् । दृष्टान्ते चानेकरन्ध्रवर्तिनां वाय्वंशानां न स्वरूपैक्यम् । अपि तु, आकारसाम्यमेव तेषाम् । वायुत्वेनैकाकाराणां रन्ध्रभेदनिष्क्रमणकृतो हि षड्जादिसंज्ञाभेदः । एवमात्मनां देवादिसंज्ञाभेदः । तैजसाप्यपार्थिवद्रव्यांशभूतानां पदार्थानां त-

---

प्रमाणमाह–**यथोक्तमिति** । **निर्दोषमिति** । ब्रह्म आत्मवस्तु प्रकृतिसंसर्गदोषवियुक्ततया सर्वत्र सममित्यर्थः । ननूक्तश्लोकयोरात्मैक्यप्रतिपादने एव तात्पर्यमास्त्विति चेत्तत्राह–**तस्यात्मेति** ।

अन्याकारत्वेति । देवमनुष्याद्याकारत्वेत्यर्थः । परशब्दे नस्वव्यतिरिक्तं धर्मिणमनूद्य तस्य ज्ञानव्यतिरिक्ताकारसंबन्धो निषिध्यते । अन्यशब्दो ज्ञानव्यतिरिक्ताकारविशिष्टपरः । अस्य श्लोकस्य सर्वथाऽद्वैते तात्पर्यं चेदन्यपरशब्दयोर्मध्ये एकस्य वैयर्थ्यं स्यात् ।

वेणुरन्ध्रेति । स्वतस्तुल्याकाराणामुपाधिवशादवान्तरभेदसद्भावमात्रे दृष्टान्तः । सर्वथा साम्येहि आत्मनो जडत्वादिकमपि प्रसज्येतेत्याशयः । **पिण्डः** । शरीरम् । **न**

त्तदद्रव्यत्वेनैक्यमेव न स्वरूपैक्यम् । तथा वायवीयानामंशानामपि स्वरूपभेदोऽवर्जनीयः ।

सोऽहं स च त्वमिति सर्वात्मनां पूर्वोक्तं ज्ञानाकारं तच्छब्देन परामृश्य तत्सामानाधिकरण्येन, अहंत्वमित्यादीनामर्थानां ज्ञानमेवाकार—इत्युपसंहरन् , देवाद्याकारभेदेनात्मसु भेदमोहं परित्यजेत्याह । अन्यथा, देहाद्यतिरिक्तोपदेश्यस्वरूपे, अहं त्वं सर्वमेतदात्मस्वरूपमिति भेदनिर्देशो न घटते । अहन्त्वमादिशब्दानामुपलक्ष्येण सर्वमेतदात्मस्वरूपमित्यनेन सामानाधिकरण्यादुपलक्षणत्वमपि न सङ्गच्छते । सोऽपि यथोपदेशमकरोदित्याह,—तत्याज भेदं परमार्थदृष्टिरिति । कुतश्चैष निर्णय—इति चेत् । देहात्मविवेकविषयत्वादुपदेशस्य । तच्च,

'पिण्डः पृथग्यतः पुंसः शिरः पाण्यादिलक्षणः'। (वि. पु.२।१३।८४)

इति प्रक्रमात् ।

विभेदजनकेऽज्ञान—इति च नात्मस्वरूपैक्यपरम् । नापि जीवपरयोः । आत्मस्वरूपैक्यमुक्तरीत्या निषिद्धम् । जीवपरयोरपि स्वरूपैक्यं देहात्मनोरिव न सम्भवति । तथा च श्रुतिः ।

'द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति' (मुं. ३।१।१)

स्वरूपैक्यमिति । यथाग्न्यवयवानामनेकस्फुलिङ्गानां स्वरूपसाम्येपि स्वरूपैक्यं न वक्तुं शक्यते तद्वदेवेति भावः ।

भेदमोहमिति । देहगतदेवत्वाद्याकारभेदो य आत्मन्यारोप्यते स भेदमोहः । तथा च नानेन श्लोकेन जीवब्रह्मद्वैतं निषिध्यते । नापि जीवबहुत्वं निषिध्यते । किं तु जीवात्मनां यो देहाद्याकारेण च प्रकारभेदो भासते स देहात्मविवेकप्रतिपादनद्वारा निषिध्यते इति भावः । कृत्स्नभेदनिषेधपरत्वेऽनिष्टमाह—**अन्यथेति** ।

देहात्मनोरिवेति । यथा देहात्मनोर्जडत्वाजडत्वादिविरुद्धधर्मत्वान्नैक्यं तद्वदेव जीवपरयोर्नियम्यत्वनियन्तृत्वादिविरुद्धधर्मत्वान्नैक्यमित्यर्थः । **द्वेति** । द्वा द्वौ जीवेश्वरौ । सुपर्णा सुपर्णौ । शोभनपतनौ । पक्षिसामान्याद्वा । सयुजा । सयुजौ । सहैव सर्वदायुक्तौ । सखाया । सखायौ । समानं वृक्षम् । शरीरम् । पिप्पलम् । कर्मफलम् ।

'ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्द्धे।
छायातपौ ब्रह्मविदो वदन्ति पञ्चाग्नयो ये च त्रिणाचिकेताः' (का. ३।१)

अन्तःप्रविष्टः शास्ता जनानां सर्वात्मेत्याद्या। अस्मिन्नपि शास्त्रे—
'स सर्वभूतप्रकृतिं विकारं गुणादिदोषांश्च मुने व्यतीतः।
अतीतसर्वावरणोऽखिलात्मा तेनास्तृतं यद्भुवनान्तराले॥
समस्तकल्याणगुणात्मकोऽसौ' (वि.पु.६।५।८३-८४)
'परः पराणां सकला न यत्र क्लेशादयः सन्ति परावरेशे' (वि. पु. ६।५।८५)

अविद्याकर्मसंज्ञान्या तृतीया शक्तिरिष्यते।

यया क्षेत्रज्ञशक्तिः सा वेष्टिता नृप सर्वगा' (वि. पु.६।७।६१) इति भेदव्यपदेशात्। 'उभयेऽपि हि भेदेनैनमधीयेत' (ब्र. सू. १।२।२१) 'भेदव्यपदेशाच्चान्यः'। (ब्र. सू. १।१।२२) 'अधिकन्तु भेदनिर्देशात्' (ब्र. सू. २।१।२२) इत्यादिसूत्रेषु च। 'य आत्मनि तिष्ठन्नात्मनोऽन्तरोयमात्मा न वेद। यस्यात्मा शरीरम्। य आत्मानमन्तरोऽयमयाति'

अभिचाकशीति। स्वयमनशनत्वात्परस्याशायितृत्वाच्च भृशं शोभते। **ऋतमिति।** सुकृतस्य कर्मणः ऋतं फलं पिबन्तौ। पिबन्तावित्यत्रशतृप्रत्ययः कर्तरि। कर्ता च प्रयोज्यो जीवः प्रयोजकः परमात्मा च। गुहाम्। हृदयगुहाम्। परार्धे। श्रेष्ठे। छायातपौ। अज्ञसर्वज्ञौ। त्रिनाचिकेताः। त्रिः कृत्वो नाचिकेतोऽग्निश्चितो यैस्ते। कर्मविशेषानिष्ठा इत्यर्थः। **शास्ता**। नियन्ता। तथा च नियम्यनियन्तृभावेन जीवेश्वरयोर्भेदः सिद्ध इत्यर्थः। **अस्मिन्नपि शास्त्रे**। विष्णुपुराणे। **स सर्वेति।** अत्र दोषातीतत्वसमस्तगुणवत्वादिभिः परब्रह्मणो जीवाद्भेदो व्यपदिश्यते। **अविद्येति**। अत्र जीवस्य हेयाम्पदत्वेन तस्य परब्रह्मणः सकाशाद्भेदो व्यपदिश्यते। **उभयेऽपीति**। उभये माध्यन्दिनाः काण्वाश्च एनं शारीरमपि अन्तर्यामिणः सकाशाद्भेदेन नियाम्यत्वेन विभज्याधीयते इति सूत्रार्थः। तथा च श्रुतिः 'य आत्मानमन्तरो यमयति' इति। **भेदव्यपदेशादिति**।'य आदित्ये तिष्ठन्' (बृ. ३।७।९) इत्यादि श्रुतौ आदित्यादिजीवेभ्यः सकाशात्परमात्मनो भेदव्यपदेशात्परमात्मा जीवादन्य इति सूत्रार्थः। **अधिकं त्विति**। ब्रह्म जीवादधिकं भिन्नम्। 'य आत्मनि तिष्ठन्' इति श्रुतौ जीवाद्भेदेन ब्रह्मणो निर्देशादिति सूत्रार्थः। **य आत्मनीति**। अत्रात्मशब्दः

' प्राज्ञेनात्मना संपरिष्वक्तः ' (बृ. ४।३।२१) ' प्राज्ञेनात्मनान्वारूढः ' (बृ. ४।३।३५)इत्यादिभिरुभयोरन्योन्यप्रत्यनीकाकारेण स्वरूपनिर्णयात्। नापि साधनानुष्ठानेन निर्मुक्ताविद्यस्य परेण स्वरूपैक्यसम्भवः। अविद्याश्रयत्वयोग्यस्य तदनर्हत्वासम्भवात्। यथोक्तम्—

' परमात्मात्मनोर्योगः परमार्थ—इतीष्यते ।
मिथ्यैतदन्यद्रव्यं हि नैति तदद्रव्यतां यतः '(वि.पु.२।१४।२७) इति।
मुक्तस्य तु, तद्धर्मतापत्तिरेवेति भगवद्गीतासूक्तम्—
' इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः ।
सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च ' (गी. १४।२) इति।

इहापि—

आत्मभावं नयत्येनं तद्ब्रह्मध्यायिनं मुने ।
विकार्यमात्मनः शक्त्या लोहमाकर्षको यथा (वि. पु ६।७।३०) इति।

आत्मभावमात्मनः स्वभावम्। न ह्याकर्षकस्वरूपापत्तिराकृष्यमाणस्य। वक्ष्यति च ' जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च ' (ब्र. सू. ४।४।१७)

जीवात्मपराः। **प्राज्ञेन**। परेण । **संपरिष्वक्तः**। सम्यगालिङ्गितः । **अन्वारूढः**। अधिष्ठितः। **प्रत्यनीकाकारेण**। विरुद्धाकारेण। **तदनर्हत्वेति**। तदनर्हम् अविद्यासंबन्धानर्हं ब्रह्म। तत्वस्य जीवेऽसंभवादित्यर्थः। **परमात्मेति**। परमात्मात्मनोः परजीवयोर्योगः ऐक्यमेव परमार्थ इति यदिष्यते एतन्मिथ्या, यतोऽन्यद्द्रव्यमन्यद्द्रव्यस्वरूपतां न प्राप्नोतीत्यर्थः। **तद्धर्मतापत्तिरेवेति**। एवशब्देनैक्यव्यावृत्तिः। **इहापीति**। योगसंक्षेपकथनारम्भे इत्यर्थः। **आत्मभावमिति**। यथा आकर्षकोऽयस्कान्तः विकार्यं अवस्थान्तरप्राप्तियोग्यं लोहं आत्मनः स्वस्य शक्त्या आत्मभावं नयति स्वव्यापारं कारयति तथा एतद्ब्रह्म विकार्यं ध्यायिनमुपासकं एनं स्वशक्त्या आत्मभावं आत्मनः स्वभावं निर्दोषत्वं नयतीत्यर्थः । **जगदिति**। जगद्व्यापारो निखिलचेतनाचेतनजगन्नियमनादिरूपस्तद्वर्जं मुक्तस्यैश्वर्यम्। कुतः। प्रकरणात्। परब्रह्मप्रकरणे यतो वेत्यादिश्रुतौ निखिलजगन्नियमनमाम्नायते। यद्येतन्नियमनसामर्थ्यं मुक्तानामपि स्याच्चेत्तस्य ब्रह्मलक्षणत्वं न स्यात्। निखिलजगन्नियमनप्रसङ्गेषु मुक्तस्य सन्निधानाभा-

'भोगमात्रसाम्यलिङ्गाच्च' (ब्र. सू. ४।४।२१) 'मुक्तोपसृप्यव्यपदेशाच्च' (ब्र. सू. १।३।२) इति। वृत्तिरपि, जगद्व्यापारवर्जं समानो ज्योतिषेति। द्रमिडभाष्यकारश्च, देवतासायुज्यादशरीरस्यापि देवतावत् सर्वार्थसिद्धिः स्यादित्याह। श्रुतयश्च 'य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान् कामान्, तेषां सर्वेषु लोकेषु कामचारो भवति' (छां. ८।१।६) 'ब्रह्मविदाप्नोति परम्' (तै. २।१।१) 'सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता' (तै. २।१।१) 'एतमानन्दमयमात्मानमुपसंक्रम्य इमान् लोकान् कामान्नी कामरूप्यनुसञ्चरन्' (तै. ३।१०।५) 'स तत्र पर्येति' (छां. ८।१२।३) 'रसो वै सः। रसꣳ ह्येवायं लब्ध्वानन्दीभवति' (तै. २।७।१)

'यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय।
तथा विद्वान् नामरूपाद्विमुक्तः परात् परं पुरुषमुपैति दिव्यम्' (मुं. ३।२।८)

'तथा विद्वान् पुण्यपापे विधूय
निरञ्जनः परमं साम्यमुपैति' (मुं. ३।१।३) इत्याद्याः।

वाचेति सूत्रार्थः। **भोगेति**। सोऽश्नुत इति श्रुतौ ब्रह्मयाथात्म्यानुभवरूपभोगमात्रेण मुक्तस्य ब्रह्मसाम्यप्रतिपादनाल्लिङ्गान्मुक्तस्यैश्वर्यं जगद्व्यापारवर्जमेवेत्यर्थः। **मुक्तेति**। द्युपृथिव्याद्याश्रयभूतः पुरुषः परमात्मैव। यतो निरंजनः परमं साम्यमुपैतीत्यादिश्रुतावयं पुरुषो मुक्तैरपि प्राप्यतया व्यपदिश्यते इत्यर्थः। **ज्योतिषा**। परब्रह्मणा। **अशरीरस्य**। मुक्तस्य। तस्य कर्मप्राप्यशरीराभावात्। **सिद्धिः**। अनुभवः। मुक्तौ जीवपरयोर्भेदोऽस्तीत्यत्र श्रुतीर्दर्शयति—**श्रुतय इति**। **कामान्नी**। कामतोऽन्नमस्येति कामान्नी। **कामरूपी**। कामतो रूपाण्यस्येति कामरूपी। इमाँल्लोकाननुसंचरन्नित्यन्वयः। अनेन भेदो दर्शितः। **रसो वै स इति**। परमात्मा तृप्तिकरत्वाद्रसस्वरूप इत्यर्थः। **अयं** जीवात्मा। नन्वेताः श्रुतयः सगुणोपासकस्य सगुणब्रह्मप्राप्तिं वदन्ति। निर्गुणविद्याप्रतिपादिकास्त्वन्या एव सदेवसोम्येत्यादयः श्रुतय इति चेत्त-

‘ परविद्यासु सर्वासु सगुणमेव ब्रह्मोपास्यं, फलं चैकरूपमेव अतो विद्याविकल्पः ’–इति सूत्रकारेणैव ‘ आनन्दादयः प्रधानस्य ’ (ब्र. सू. ३।३।११) ‘ विकल्पोऽविशिष्टफलत्वात् ’ (ब्र. सू. ३।३।५७) इत्यादिषूक्तम्। वाक्यकारेण च सगुणस्योपास्यत्वं विद्याविकल्पश्चोक्तः, युक्तं तद्गुणकोपासनादिति। भाष्यकृता व्याख्यातं च ‘ यद्यपि सच्चित्त ’–इत्यादिना। ब्रह्म वेद ब्रह्मैव भवतीत्यत्रापि ‘ नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम् ’ (मुं. ३।२।८) ‘ निरञ्जनः परमं साम्यमुपैति ’ (मुं. ३।१।३) ‘ परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते ’ (छां. ८।३।४) इत्यादिभिरैकार्थ्यात् प्राकृतनामरूपाभ्यां विनिर्मुक्तस्य निरस्ततत्कृतभेदस्य ज्ञानैकाकारतया ब्रह्मप्रकारतोच्यते। प्रकारैक्ये च तत्त्वव्यवहारो मुख्य एव। यथा–सोऽयं गौरिति। अत्रापि—

‘ विज्ञानं प्रापकं प्राप्ये परे ब्रह्मणि पार्थिव।
प्रापणीयस्तथैवात्मा प्रक्षीणाशेषभावनः ’ (वि. पु. ६।७।९१)

आह–**परविद्यास्विति**। परशब्देन ब्रह्मोच्यते। **आनन्दादयः प्रधानस्येति**। सूत्रस्यायमर्थः। अभेदादिति पूर्वसूत्रादनुवर्तते। प्रधानस्य गुणिनो ब्रह्मणः सर्वेषूपासनेष्वभेदादानन्दादयो गुणाः सर्वब्रह्मविद्यासु संग्राह्याः। तस्मात्सर्वासु ब्रह्मविद्यासु सगुणमेव ब्रह्मोपास्यमिति सिद्धम्। **विकल्पोऽविशिष्टफलत्वादिति**। सूत्रस्यायमर्थः। सर्वब्रह्मविद्यानां विकल्प एव। न तासु कयोरपि समुच्चयः ब्रह्मप्राप्तिरूपफलस्य सर्वत्र तुल्यत्वादिति। तस्मात्सर्वत्र फलस्यैकरूपत्वाद्विद्याविकल्प इति सिद्धम्। एवं च निर्गुणविद्याप्रतिपादिकाः श्रुतयो नैव सन्ति। सदेवसोम्येत्यादिश्रुतिष्वपि सविशेषमेव ब्रह्माभिधीयते इति प्रागेवोक्तम् (पृ. ८८ पं. ७)। **युक्तमिति**। गुणयुक्तमेव ब्रह्म प्राप्यम्। तद्गुणकोपासनादित्यर्थः। **सच्चित्तः**। सद्विद्यानिष्ठः। नन्वेवं मुक्तावभेदप्रतिपादिका ब्रह्मवेदेति श्रुतिर्विरुद्धेति चेत्तत्राह–**ब्रह्मेति**। **नामरूपादिति**। प्राकृतनामरूपहानिरनेन सूच्यते। **निरञ्जन इति**। अनेन साम्यं सूच्यते। **परं ज्योतिः**। परं ब्रह्म। अनेन साम्यस्य स्वाभाविकत्वं सूच्यते। **ब्रह्मप्रकारता**। ब्रह्मधर्मत्वम्। ननु तर्हि ब्रह्मवेद ब्रह्मैव भवतीति श्रुतौ द्वितीयब्रह्मशब्दस्य ब्रह्मसदृशार्थकत्वेन गौणत्वं स्यादित्यत आह–**प्रकारैक्य इति**। **अत्रापि**। विष्णुपुराणेऽपि। **विज्ञानमिति**। समाधिजन्यः स्वरूपसाक्षात्कारो विज्ञानम्। आत्मा शुद्धं स्वस्वरूपम्। **यथा**

इति परब्रह्मध्यानादात्मा परब्रह्मवत् प्रक्षीणाशेषभावनः कर्मभावना-ब्रह्मभावनोभयभावनेति भावनात्रयरहितः प्रापणीय—इत्यभिधाय,

‘ क्षेत्रज्ञः करणी ज्ञानं करणं तस्य वै द्विज ।

निष्पाद्य मुक्तिकार्यं वै कृतकृत्यं निवर्तयेत् ’ (वि. पु. ६।७।९२)

इति करणस्य परब्रह्मध्यानरूपस्य प्रक्षीणाशेषभावनात्मस्वरूपप्राप्तया कृतकृत्यत्वेन निवृत्तिवचनात् यावत्सिद्ध्यनुष्ठेयमित्युक्त्वा,

‘ तद्भावभावमापन्नस्तदासौ परमात्मना ।

भवत्यभेदी भेदश्च तस्याज्ञानकृतो भवेत् ’ (वि. पु. ६।७।९३)

इति मुक्तस्य स्वरूपमाह । तद्भावो ब्रह्मणो भावः स्वभावः । न स्वरूपैक्यम् । तद्भावभावमापन्न—इति द्वितीयभावशब्दानन्वयात् पुर्वोक्तार्थविरोधाच्च । यद्ब्रह्मणः प्रक्षीणाशेषभावनत्वं, तदापत्तिः तद्भावभावापत्तिः । यदैवमापन्नः, तदायं परमात्मना अभेदीभवति, भेदरहितो भवति । ज्ञानैकाकारतया परमात्मनैकप्रकारस्यास्य तस्माद्भेदो देवादिरूपः । तदन्वयोऽस्य कर्मरूपाज्ञानमूलः न स्वरूपकृतः । स तु देवादिभेदः परब्रह्मध्यानेन मूलभूताज्ञानरूपे कर्मणि विनष्टे हेत्वभावान्निवर्तत—इत्यभेदी भवति ।

प्रक्षीणाशेषभावनं परब्रह्म प्राप्यं तथा प्रक्षीणाशेषभावनः आत्मा शुद्धं स्वस्वरूपमपि प्राप्यमित्यर्थः । **कर्मभावनेऽति** । भावनानाम ज्ञानविशेषजा वासना । ‘ वयं **कर्मैव कुर्मः** ’ इति कर्मभावना । यथा देवमनुष्यादीनाम् । ‘ वयं ब्रह्मैव चिन्तयामः ’ इति ब्रह्मभावना । यथा सनंदनादीनाम् । ‘ वयं पुनरुभयमिदमनुसन्दध्मः ’ इत्युभयभावना । यथा हिरण्यगर्भादीनामित्यात्मप्रकाशाभिधायां विष्णुपुराणसारविवृतौ स्पष्टम् । **भावनात्रयरहित इति** । ब्रह्मभावनापि साधकावस्थायामेव न सिद्धावस्थायामिति तद्रहितस्यैव प्रापणीयत्वं बोध्यम् । **क्षेत्रज्ञ इति** । यावत्क्षेत्रज्ञावस्थस्तावत्करणी उपासकः । तस्य करणीभूतं ज्ञानमुपासनादिरूपम् । तच्च मुक्तिरूपं कार्यं निष्पाद्य कृतकृत्यं यदा भवति तदैव निवर्तयेन्नतु मुक्तेः प्राक् । तावत्पर्यन्तमुपासनाया अवश्यानुष्ठेयत्वात् । **पूर्वोक्तार्थेति** । मुक्तौ साम्यप्रतिपादकपूर्वोक्तश्रुत्यादिविरोधादित्यर्थः । **भेदो देवादिरूप इति** । अयमेव भेदो ज्ञानेन निरसनीयः । ब्रह्मणो मुक्तात्मनश्चाकारान्तरेण भेदस्य प्रमाणासिद्धत्वात् । **अभेदीभवतीति** ।

यथोक्तम–

' एकस्वरूपभेदस्तु बाह्यकर्मप्रवृत्तिजः ।

देवादिभेदे विध्वस्ते नास्त्यनावरणो हि सः ' इति ।

एतदेव विवृणोति--

' विभेदजनकेऽज्ञाने नाशमात्यन्तिकं गते ।

आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति' (वि. पु. ६।७।९४)इति।

विविधो भेदो विभेदः, देवतिर्यङ्मनुष्यस्थावरात्मकः । यथोक्तं शौनकेनापि—चतुर्विधो विभेदोऽयं मिथ्याज्ञाननिबन्धनः ' इति ।

आत्मनि ज्ञानस्वरूपे देवादिरूपविविधभेदहेतुभूतकर्माख्याज्ञाने परब्रह्मध्यानेनात्यन्तिकं नाशं गते सति, हेत्वभावादसन्तं परस्माद्ब्रह्मण आत्मनो देवादिरूपं भेदं कः करिष्यतीत्यर्थः । अविद्याकर्मसंज्ञान्येत्यत्रैवोक्तम् ।

' क्षेत्रज्ञश्चापि मां विद्धि '(गी. १३।२) इत्यादिनान्तर्यामिरूपेण सर्वस्यात्मतयैक्यविधानम् । अन्यथा,

' क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ।

उत्तमः पुरुषस्त्वन्यः '(गी. १५।१६) इत्यादिभिर्विरोधः । अन्तर्यामिरूपेण सर्वेषामात्मत्वं तत्रैव भगवताऽभिहितम—

' ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ' (गी. १८।६१)

' सर्वस्य चाहं हृदि सन्निविष्टः ' (गी. १५।१५) इति च ।

वस्तुतो भिन्नोऽपि ज्ञानाकारेणाभेदीभवति । ज्ञानाकारेण योऽभेदस्तद्विरुद्धत्वाद्देवादिभेदस्य तादृशभेदप्रतीत्यभावे ज्ञानाकारेणाभेदो भासत इत्यर्थः । **अनावरणः**। कर्मावरणरहितः । **असन्तम्** । अनित्यम् । देवादिरूपेण भेदोहि अनित्यः । तेन स्वाभाविकनित्यभेदव्यावृत्तिः । नित्यभेदस्तु वर्तत एवेत्याशयः । **चतुर्विधः** । देवतिर्यङ्मनुष्यस्थावरभेदेन । अज्ञानस्य कर्मरूपत्वे हेतुमाह–**अविद्येति** ।

ननु क्षेत्रज्ञमित्यत्र जीवब्रह्मणोः सर्वथैक्यं भासत इति चेत्तत्राह–**क्षेत्रज्ञमिति**। **अन्यथा** । क्षेत्रज्ञमित्यत्र सर्वथैक्यप्रतिपादने । **ईश्वर इति** । न चात्र सर्वभूताना-

---

१ क. ख. ग. नास्त्येवावरणो

'अहमात्मा गुडाकेश सर्वभूताशयस्थितः' (गी. १०।२०) इति च तदेवोच्यते। भूतशब्दो ह्यात्मपर्यन्तदेहवचनः। यतः सर्वेषामयमात्मा, तत एव सर्वेषां तच्छरीरतया पृथगवस्थानं प्रतिषिध्यते—'न तदस्ति विना यत् स्यात्' (गी. १०।३९) इति। भगवद्विभूत्युपसंहारश्चायमिति तथैवाभ्युपगन्तव्यम्। तत इदमुच्यते—

'यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा।
तत्तदेवावगच्छ त्वं मम तेजोंऽशसम्भवम्' (गी. १०।४१)
'विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत' (गी. १०।४२) इति।

अतः शास्त्रेषु न निर्विशेषवस्तुप्रतिपादनमस्ति। नाप्यर्थजातस्य भ्रान्तत्वप्रतिपादनम्। नापि चिदचिदीश्वराणां स्वरूपभेदनिषेधः।

यदप्युच्यत, निर्विशेषे स्वयंप्रकाशे वस्तुनि, दोषपरिकल्पितमीश्वरेशितव्याद्यनन्तविकल्पं सर्वं जगत्। दोषश्च स्वरूपतिरोधानविविधविचित्रविक्षेपकरी सदसदनिर्वचनीयानाद्यविद्या। सा चावश्याभ्युपगमनीया। अनृतेन हि प्रत्यूढा—इत्यादिभिः श्रुतिभिः, ब्रह्मणः तत्त्वमस्यादिवाक्यसामानाधिकरण्यावगतजीवैक्यायनुपपत्त्या च। सा तु न सती। भ्रान्तिबाधयो-

---

मित्युक्तत्वात्परमात्मनो भौतिकदेहान्तर्यामित्वेपि न जीवान्तर्यामित्वमिति वाच्यम्। भूतशब्दस्यात्मपर्यन्तदेहवाचित्वात्। अतएव भ्रामयन् सर्वभूतानीत्युत्तरार्धसंगतिः। **तत एवेति**। न त्वैक्यादित्यर्थः। न तदस्तीत्यत्राविनाभावप्रतिपादनात्। अविनाभावो हि संबन्धनियमः। **भगवद्विभूतीति**। न तदस्तीत्यस्य सर्वनिषेधपूर्वकैक्यतात्पर्यकत्वे हि विभूत्युपसंहारत्वं न स्यात्। विभूत्युपसंहारे विभूतेर्निषेधायोगात्। न तदस्तीत्यस्य विभूत्युपसंहारत्वं चोत्तरश्लोकेनावगम्यत इत्याह—**तत इति**। **यद्यदिति**। यद्यद्विभूतिमदीशितव्यसंपन्नं भूतजातं श्रीमत्कांतिमत् धनधान्यसमृद्धं वा, ऊर्जितं कल्याणारम्भेषूद्युक्तं तत्तन्मम तेजोंशसंभवमित्यवगच्छ। तेजः पराभिभवसामर्थ्यं ममाचिन्त्यशक्तेर्नियमनशक्त्येकदेशसंभवमित्यर्थः।

अथाविद्यां दूषयितुमारभते—**यदपीति**। निर्विशेषस्य कथं भ्रमसंभव इत्यत्राह—**दोषेति**। ब्रह्मव्यतिरिक्तस्य दोषस्य सत्वे द्वैतापत्तिरित्यत आह—**दोषश्चेति**। **विक्षेपः**। संसारः। अविद्यायां श्रुतिप्रमाणमाह **अनृतेनेति**। अर्थापत्तिप्रमाणमाह—**ब्रह्मण इति**। **भ्रान्तीति**। भ्रान्तिबाधविषयत्वायोगादित्यर्थः। अविद्या हि ज्ञानिदृष्ट्या

रयोगात् । नाप्यसती । ख्यातिबाधयोश्चायोगात् । अतः कोटिद्वयविनिर्मुक्तेयमविद्येति तत्त्वविद–इति । तदयुक्तम् । सा हि किमाश्रित्य भ्रमं जनयतीति वक्तव्यम् । न तावज्जीवमाश्रित्य । अविद्यापरिकल्पितत्वाज्जीवभावस्य । नापि ब्रह्माश्रित्य । तस्य स्वयंप्रकाशज्ञानरूपत्वेनाविद्याविरोधित्वात् । सा हि ज्ञानबाध्याभिमता ।

ज्ञानरूपं परं ब्रह्म तन्निवर्त्यं मृषात्मकम् ।
अज्ञानञ्चेत्तिरस्कुर्यात् कः प्रभुस्तन्निवर्तने ॥
ज्ञानं ब्रह्मेति चेज्ज्ञानमज्ञानस्य निवर्तकम् ।
ब्रह्मवत्तत्प्रकाशत्वात् तदपि ह्यनिवर्तकम् ॥
ज्ञानं ब्रह्मेति विज्ञानमस्ति चेत्स्यात् प्रमेयता ।
ब्रह्मणोऽननुभूतित्वं त्वदुक्त्यैव प्रसज्यते ॥

भ्रान्तिविषयत्वं बाधविषयत्वं च लभते । **ख्यातीति** । ख्यातिः प्रसिद्धिः । न ह्यसतः शशशृङ्गादेः प्रसिद्धिरस्ति । न वा बाधः । प्रतियोगिप्रसिद्धिं विना तदयोगात् । **तदयुक्तमिति** । आश्रयानुपपत्तितिरोधानानुपपत्तिस्वरूपानुपपत्त्यनिर्वचनीयत्वानुपपत्तिप्रमाणानुपपत्तिनिवर्तकानुपपत्तिनिवर्त्यानुपपत्तिरूपसप्तविधानुपपत्तिदोषसत्त्वादित्याशयः । तत्रादावाश्रयानुपपत्तिमाह–**सा हीति** । **न तावदिति** । जीवे सिद्धेऽविद्यासिद्धिरविद्यासिद्धौ च जीवसिद्धिरित्यन्योन्याश्रयान्न तस्या जीव आश्रय इत्यर्थः । विरोधित्वमुपपादयति–**सा हि ज्ञानेति** । ब्रह्मविषयस्याज्ञानस्य तत्प्रकाशबाध्यत्वाद्विरोध इति भावः । ज्ञानाबाध्यत्वे दोषमाह–**ज्ञानरूपमिति** । मृषात्मकं अत एव तन्निवर्त्यं ज्ञाननिवर्त्यत्वेनाभिमतं यत् अज्ञानं तस्य ज्ञानाबाध्यत्वेन ब्रह्माश्रितत्वे स्वीकृतेऽर्थादेव तेनाज्ञानेन ज्ञानरूपं स्वप्रकाशमपि परं ब्रह्म तिरस्कृतं स्यात् । ततश्चेदृशस्याज्ञानस्य निवर्तने कः प्रभुः समर्थः स्यात् न कोऽपीत्यर्थः । अज्ञानाश्रयब्रह्मनिष्ठस्याज्ञानविरोधिनः कस्याप्यभावात् । न हि शुक्तिरेव स्वाज्ञानं निवर्तयति किं तु शुक्तिज्ञानम् । नन्वत्रादि ‘ ज्ञानस्वरूपं ब्रह्म ’ इत्याकारकं यज्ज्ञानं तदेवाज्ञानस्य निवर्तकमस्त्विति चेन्न । यथा ब्रह्म नाज्ञानस्य निवर्तकं तथा तादृशब्रह्मस्वरूपानतिरिक्तस्य तत्प्रकाशस्याप्यज्ञानानिवर्तकत्वात् । किं च ‘ ज्ञानस्वरूपं ब्रह्म ’ इत्याकारकं यदि ज्ञानमस्ति तर्हि तस्य प्रमेयत्वापत्त्याऽननुभूतित्वं प्रसज्येत । तथा च प्रयोगः । ब्रह्म अनुभूतिभिन्नं प्रमेय-

ज्ञानस्वरूपं ब्रह्मेति ज्ञानं तस्या अविद्याया: बाधकं न स्वरूपभूतं ज्ञानमिति चेत्—न। उभयोरपि ब्रह्मस्वरूपप्रकाशत्वे सति, अन्यतरस्य विरोधित्वमन्यतरस्य नेति विशेषानवगमात्। एतदुक्तं भवति। ज्ञानस्वरूपं ब्रह्मेत्यनेन ज्ञानेन ब्रह्मणि यः स्वभावोऽवगम्यते, स ब्रह्मणः स्वयंप्रकाशत्वेन स्वयमेव प्रकाशत–इत्यविद्याविरोधित्वे न कश्चिद्विशेषः स्वरूपतद्विषयज्ञानयोरिति।

किञ्च, अनुभवस्वरूपस्य ब्रह्मणोऽनुभवान्तराननुभाव्यत्वेन भवतो न तद्विषयं ज्ञानमस्ति। अतो ज्ञानमज्ञानविरोधि चेत्, स्वयमेव विरोधि भवतीति नास्या ब्रह्माश्रयत्वसम्भवः। शुक्त्यादयस्तु, स्वयाथात्म्यप्रकाशे स्वयमसमर्थाः स्वाज्ञानाविरोधिनस्तन्निवर्तने ज्ञानान्तरमपेक्षन्ते। ब्रह्म तु, स्वानुभवसिद्धस्वयाथात्म्यमिति स्वाज्ञानविरोध्येव। तत एव निवर्तकान्तरञ्च नापेक्षते।

अथोच्येत। ब्रह्मव्यतिरिक्तस्य मिथ्यात्वज्ञानमज्ञानविरोधीति। न। इदं ब्रह्मव्यतिरिक्तमिथ्यात्वज्ञानं किं ब्रह्मयाथात्म्याज्ञानविरोधि, उत प्रपञ्चसत्यस्वरूपाज्ञानविरोधीति विवेचनीयम्। न तावत् ब्रह्मयाथात्म्याज्ञानविरोधि। अतद्विषयत्वात्। ज्ञानाज्ञानयोरेकविषयत्वेन हि विरोधः। प्रपञ्चमिथ्यात्वज्ञानञ्च तत्सत्यत्वस्वरूपाज्ञानेन विरुध्यते। तेन प्रपञ्चसत्यत्वरूपाज्ञान-

---

त्वाद्घटवदिति। शङ्कते–**ज्ञानस्वरूपमिति**। ब्रह्मस्वरूपभूतस्य ज्ञानस्य अज्ञानाश्रयत्वेनाज्ञानबाधकत्वाभावेऽपि 'ज्ञानस्वरूपं ब्रह्म' इत्याकारकज्ञानस्याज्ञानबाधकत्वस्वीकारे बाधकाभाव इत्याशयः। **विशेषानवगमादिति**। ननु ब्रह्मणः स्वरूपभूतं ज्ञानं प्रथमम्। ज्ञानस्वरूपं ब्रह्मेत्याकारकं ज्ञानं द्वितीयम्। तत्राज्ञानबाधको यो ब्रह्मस्वभावः सत्यत्वज्ञानत्वादिः स द्वितीयज्ञानेनैव गृह्यते इति तदेवाज्ञानस्य बाधकं न प्रथममिति चेन्न। ब्रह्मणः स्वप्रकाशत्वेन तत्स्वरूपभूते प्रथमज्ञानेऽपि तादृशस्वभावस्य गृहीतत्वात्। तदेवाह–**एतदुक्तमिति**।

अथोच्येतेति। उक्तरीत्या ब्रह्मविषयप्रमाणज्ञानस्य भ्रमनिवर्तकत्वासंभवेऽपि प्रपञ्चमिथ्यात्वविषयकं ज्ञानं भ्रमनिवर्तकमस्त्वित्याशयः। **एकविषयत्वेन हीति**। न हि रजतमिथ्यात्वविषयकं ज्ञानं घटयाथात्म्याज्ञानस्य निवर्तकं भवतीति भावः।

मेव बाधितमिति ब्रह्मस्वरूपाज्ञानं तिष्ठत्येव । ब्रह्मस्वरूपाज्ञानं नाम तस्य सद्वितीयत्वज्ञानमेव । तत्तु, तद्व्यतिरिक्तस्य मिथ्यात्वज्ञानेन निवृत्तम् । स्वरूपन्तु, स्वानुभवसिद्धमिति चेत-न । ब्रह्मणोऽद्वितीयत्वं स्वरूपं स्वानुभवसिद्धमिति तद्विरोधि सद्वितीयत्वरूपाज्ञानं तद्बाधश्च न स्याताम् । अद्वितीयत्वं धर्म-इति चेत-न । अनुभवस्वरूपस्य ब्रह्मणोऽनुभाव्यधर्मविरहस्य भवतैवोपपादितत्वात् । अतो ज्ञानस्वरूपस्य ब्रह्मणो विरोधादेव नाज्ञानाश्रयत्वम् ।

किञ्च, अविद्यया प्रकाशैकस्वरूपं ब्रह्म तिरोहितमिति वदता स्वरूपनाश एवोक्तः स्यात् । प्रकाशतिरोधानं नाम, प्रकाशोत्पत्तिप्रतिबन्धः, विद्यमानस्य विनाशो वा । प्रकाशस्यानुत्पाद्यत्वाभ्युपगमेन प्रकाशतिरोधानं प्रकाशनाश एव ।

अपि च, निर्विषया निराश्रया स्वप्रकाशेयमनुभूतिः स्वाश्रयदोषवशादनन्ताश्रयमनन्तविषयमात्मानमनुभवतीत्यत्र किमयं स्वाश्रयदोषः परमार्थभूतः, उतापरमार्थभूत इति विवेचनीयम् । न तावत् परमार्थोऽनभ्युपगमात् । नाप्यपरमार्थः । तथा हि सति द्रष्टृत्वेन वा दृश्यत्वेन वा दृशित्वेन वा अ-

---

शङ्कते-**ब्रह्मस्वरूपाज्ञानं नामेति** । एवं च प्रपञ्चमिथ्यात्वज्ञानेन ब्रह्मस्वरूपाज्ञानस्य निवृत्तिः फलिता भवतीति भावः । **अद्वितीयत्वं धर्म इति** । तथा च ब्रह्मणः स्वानुभवसिद्धत्वेऽपि तद्धर्मस्याद्वितीयत्वस्य स्वानुभवसिद्धत्वाभावेन प्रपञ्चमिथ्यात्वज्ञाने- नैव स धर्मः प्रतीयत इति ततःप्राक् सद्वितीयत्वरूपाज्ञानं तद्बाधश्च संभवतीत्याशयः ।

अथ द्वितीयां तिरोधानानुपपत्तिमाह-**किं चेति** । **प्रकाशस्येति** । नित्यस्य प्रकाशस्योत्पत्त्यभावेन उत्पत्तिप्रतिबन्धरूपस्याद्यस्य प्रकाशतिरोधानस्यासंभवेन विद्यमानप्रकाशविनाशरूपस्य द्वितीयस्यैव प्रकाशतिरोधानस्य स्वीकर्तव्यतया प्रकाशरूपब्रह्मणः स्वरूपनाश एवोक्तः स्यादित्यर्थः ।

अथ तृतीयां स्वरूपानुपपत्तिमाह- **अपि चेति** । **स्वाश्रयेति** । स्वमाश्रयो यस्येति बहुव्रीहिः । स्वनिष्ठाविद्यारूपदोषवशादित्यर्थः । वस्तुतो निराश्रयाप्यनुभूतिरविद्यारूपदोषेणानन्ताश्रयं स्वस्वरूपमनुभवति । तथा वस्तुतो निर्विषयाऽपि अनन्तविषयं स्वस्वरूपमनुभवतीत्यर्थः । **अनभ्युपगमादिति** । परमार्थत्वस्वीकारे द्वैतापत्तेः । अ-

भ्युपगमनीयः। न तावत् दृशिः। दृशिस्वरूपभेदानभ्युपगमात्। भ्रमाधिष्ठानभूतायास्तु साक्षाद्दृशेर्माध्यमिकपक्षप्रसङ्गेनापारमार्थ्यानभ्युपगमाच्च। द्रष्टृदृश्ययोस्तदवच्छिन्नाया दृशेश्च काल्पनिकत्वेन मूलदोषान्तरापेक्षया अनवस्था स्यात्। अथैतद्दोषपरिजिहीर्षया परमार्थसत्यनुभूतिरेव ब्रह्मस्वरूपा दोष इति चेत्। ब्रह्मैव चेद्दोषः, प्रपञ्चदर्शनस्यैव तन्मूलं स्यात्। किं प्रपञ्चतुल्याविद्यान्तरकल्पनेन। ब्रह्मणो दोषत्वे सति तस्य नित्यत्वेनानिर्मोक्षश्च स्यात्। अतो यावद्ब्रह्मव्यतिरिक्तपारमार्थिकदोषानभ्युपगमः। न तावद्भ्रान्तिरुपपादिता भवति।

अनिर्वचनीयत्वं च किमभिप्रेतम्। सदसद्विलक्षणत्वमिति चेत्। तथाविधस्य वस्तुनः प्रमाणशून्यत्वेनानिर्वचनीयतैव[1] स्यात्। एतदुक्तं भवति।

भ्युपगमनीय इति। अपरमार्थं हि सर्वं जगत् द्रष्टा दृश्यं दृशिश्चेति त्रिविधमुपलभ्यते तथाऽयमनुभूतिनिष्ठो दोषोऽपरमार्थश्चेत्तेषु केनाऽपि रूपेणाभ्युपगमनीय एवेत्यर्थः। दृशिर्द्विविधा 'निरवच्छिन्ना सावच्छिन्ना' च। तत्रादौ निरवच्छिन्नदृशित्वं निराकरोति—**न तावदिति**। **दृशिस्वरूपेति**। अनुभूतिः स्वयं दृशिस्वरूपा, तन्निष्ठदोषोऽपि दृशिस्वरूपश्चेत् दोषभूता दृशिराश्रयदृश्यपेक्षया भिन्नाऽभिन्ना वा। आद्ये दृशिद्वयापत्तेः। देवदत्तादिद्रष्टृभेदेन घटादिदृश्यभेदेन च दृशिभेदेऽपि निरवच्छिन्नदृशेरेकरूपत्वमेवेष्टमिति भावः। अन्त्ये दृशेः परमार्थत्वेन तत्स्वरूपदोषस्यापरमार्थत्वानापत्तिः। दृशेरप्यपरमार्थत्वे तु शून्यवादप्रसङ्गः। **माध्यमिकाः**। शून्यवादिनो बौद्धैकदेशिनः। **अनवस्था स्यादिति**। दोषस्य द्रष्टृत्वादिरूपत्वस्वीकारे द्रष्टृत्वादीनां दृशावेव कल्पितत्वादपरमार्थत्वेन दोषजन्यत्वाद्दोषान्तरं कल्पनीयम्। तद्दोषस्यापि पुनः पूर्ववद्दोषान्तरं कल्पनीयमित्यनवस्थेति भावः। **एतद्दोषपरिजिहीर्षयेति**। दोषस्य परमार्थत्वस्वीकारेण नानवस्था। ब्रह्मस्वरूपत्वस्वीकारेण च न द्वैतापत्तिरिति भावः। **ब्रह्मैवेति**। यद्यविद्यारूपो दोषो ब्रह्मस्वरूप एव तर्हि तादृशदोषात्मकं ब्रह्म प्रपञ्चदर्शनस्यैव कारणं भवेन्नतु तत्वज्ञानस्य। तथा सति तत्कल्पनानर्थक्यम्। **प्रपञ्चेति**। प्रपञ्चतुल्या या प्रपञ्चादन्या ब्रह्मस्वरूपा अविद्या तत्कल्पनेन किमित्यर्थः।

अथ चतुर्थीमनिर्वचनीयत्वानुपपत्तिमाह—**अनिर्वचनीयत्वमिति**। **अनिर्वचनीयतैव स्यादिति**। तथाविधं वस्तु 'सदसद्विलक्षणम्' इति शब्देनापि न प्रति-

---

१ क यतैव न स्यात्.

सर्वं हि वस्तुजातं प्रतीतिव्यवस्थाप्यम् । सर्वा च प्रतीतिः सदसदाकारा । सदसदाकारायाः प्रतीतेः सदसद्विलक्षणं विषय इत्यभ्युपगम्यमाने सर्वं सर्वप्रतीतेर्विषयः स्यादिति ।

अथ स्याद्वस्तुस्वरूपतिरोधानकरमान्तरबाह्यरूपविविधाध्यासोपादानं सदसदनिर्वचनीयमविद्याऽज्ञानादिपदवाच्यं वस्तुयाथात्म्यज्ञाननिवर्त्यं ज्ञानप्रागभावातिरेकेण भावरूपमेव किञ्चिद्वस्तु प्रत्यक्षानुमानाभ्यां प्रतीयते । तदुपहितब्रह्मोपादानश्चाविकारे स्वप्रकाशचिन्मात्रवपुषि तेनैव तिरोहितस्वरूपे प्रत्यगात्मन्यऽहङ्कारज्ञानज्ञेयाविभागरूपोऽध्यासः । तस्यैवावस्थाविशेषेणाध्यासरूपे जगति ज्ञानबाध्यसर्परजतादिवस्तुतज्ज्ञानरूपोऽध्यासोऽपि जायते । कृत्स्नस्य मिथ्यारूपस्य तदुपादानत्वं च मिथ्याभूतस्यार्थस्य मिथ्याभूतमेव कारणं भवितुमर्हतीति हेतुबलादवगम्यते । कारणाज्ञानविषयं प्रत्यक्षं तावदहमज्ञो मामन्यञ्च न जानामीत्यपरोक्षावभासः ।

पाद्येतेत्यर्थः । ‘ अनिर्वचनीयतैव न स्यात् ’ इति पाठे अनिर्वचनीयशब्दप्रतिपाद्यं न स्यादित्यर्थः । व्यवहारस्य प्रतीतिपूर्वकत्वात् सदसद्विलक्षणशब्देनानिर्वचनीयशब्देन चाज्ञानं न व्यवह्रियेत । प्रतीतिर्हि द्विविधैव । काचित्सदाकारा घटादिसद्वस्तुविषया । काचिदसदाकारा शशशृङ्गादितुच्छविषया । सदसद्विलक्षणत्वेन भवतोऽभिप्रेतमज्ञानं तूभयविधाया अपि प्रतीतेरविषयः विरुद्धत्वात् । प्रतीतिविरुद्धस्यापि प्रतीतिविषयत्वे तु सर्वं सर्वप्रतीतेर्विषयः स्यात् । सतोऽपि घटादेरसत्प्रतीतिविषयत्वं स्यात् । असतोऽपि शशशृङ्गादेः सत्प्रतीतिविषयत्वं स्यादिति भावः ।

पूर्वपक्षमुद्घाटयति—**अथ स्यादित्यादिना निरवद्यमितीत्यन्तेन** । अहङ्काराध्यासः घटादिविषयकज्ञानाध्यासश्चान्तरः । ज्ञेयाध्यासो बाह्यः । **तदुपहितेति** । तेनाज्ञानेन उपहितं यत् ब्रह्म तत् उपादानं कारणं यस्येत्यध्यासस्य विशेषणम् । **अविकार इति** । एतेनाज्ञानानुपहितस्य ब्रह्मणोऽध्यासकारणत्वं नास्तीति सूचितम् । ननु स्वप्रकाशस्य कथमध्याससंभव इत्यत्राह—**तेनैवेति** । अज्ञानेनैव तिरोहितस्वरूपे इत्यर्थः । **तस्यैवेति** । तस्य दोषस्यैव कादाचित्कावस्थाविशेषेण व्यवहारदशायां रज्ज्वादौ सर्पाद्यध्यासः आत्मनि तादृशसर्पादिज्ञानाध्यासश्च भवतीत्यर्थः । **अध्यासरूपे** । अध्यस्तरूपे इत्यर्थः । कर्मणि कप्रत्ययः । **तदुपादानत्वम्** । अज्ञानोपादानकत्वम् । अज्ञाने प्रत्यक्षप्रमाणं दर्शयति—**कारणेति** । कारणशब्देन कार्यभूताऽज्ञानस्य निवृत्तिः । अहमज्ञ

अयन्तु न ज्ञानप्रागभावविषयः। स हि षष्ठप्रमाणगोचरः। अयन्त्वहं सुखीतिवदपरोक्षः। अभावस्य प्रत्यक्षत्वाभ्युपगमेऽप्ययमनुभवो नात्मनि ज्ञानाभावविषयः। अनुभववेलायामपि ज्ञानस्य विद्यमानत्वात्। अविद्यमानत्वे ज्ञानाभावप्रतीत्यनुपपत्तेश्च। एतदुक्तं भवति। अहमज्ञ इत्यस्मिन्ननुभवे, अहमित्यात्मनोऽभावधर्मितया ज्ञानस्य च प्रतियोगितयावगतिरस्ति वा, न वा। अस्ति चेत्, विरोधादेव न ज्ञानाभावानुभवसम्भवः। नो चेत्, धर्मिप्रतियोगिज्ञानापेक्षो ज्ञानाभावानुभवः सुतरां न सम्भवति। ज्ञानाभावस्यानुमेयत्वे अभावाख्यप्रमाणविषयत्वे चेयमनुपपत्तिः समाना। अस्याज्ञानस्य भावरूपत्वे धर्मिप्रतियोगिज्ञानसद्भावेऽपि विरोधाभावादयमनुभवो भावरूपाज्ञानविषय एवाभ्युपगन्तव्य इति। ननु च भावरूपमज्ञानं वस्तुयाथात्म्यावभासरूपेण साक्षिचैतन्येन विरुध्यते। मैवम्। साक्षिचैतन्यं न वस्तुयाथात्म्यविषयम्, अपि त्वज्ञानविषयम्। अन्यथा मिथ्यार्थो-

---

इत्यज्ञानस्वरूपकीर्तनम्। तस्य मामन्यं च न जानामीति आच्छादनरूपकार्यकथनम्। ननु ज्ञानप्रागभावेनैव सिद्धे किमर्थं भावरूपमज्ञानमन्यत्स्वीक्रियते इति चेत्तत्राह—**अयं त्विति**। अयमवभास इत्यर्थः। **स हीति**। ज्ञानप्रागभावो हि षष्ठेनानुपलब्धिप्रमाणेन गृह्यत इति भावः। **अपरोक्षः**। प्रत्यक्षः। **अनुभववेलायामिति**। ज्ञानाभावो यदानुभूयते तदानीं ज्ञानं विद्यते न वा। आद्ये ज्ञानाभावरूपाविषयासत्त्वान्न तदनुभवः। अन्त्ये ज्ञानाभावस्यापि ज्ञानं न स्यात्। **विरोधादेवेति**। ज्ञानाभावस्य ज्ञानरूपप्रतियोगिना सह विरोधात्। ज्ञानाभावस्याधिकरणीभूतो य आत्मा तस्यापि ज्ञानस्वरूपत्वेन अधिकरणेनापि सह ज्ञानाभावस्य विरोधादिति भावः। अथवा प्रतियोग्यधिकरणयोर्यज्ज्ञानं तस्य सत्वे प्रतियोगिनः सत्वेन ज्ञानाभावस्य वक्तुमशक्यत्वामिति विरोधो बोध्यः। **धर्मीति**। यथा भूतले घटाभावस्य ज्ञानं भूतलघटयोर्धर्मिप्रतियोगिनोर्ज्ञाने सत्येव जायते तद्वदिति भावः। अभावस्य प्रमाणान्तरविषयत्वेप्युक्तं दूषणमतिदिशति–**ज्ञानाभावस्येति**। **अभावाख्यप्रमाणम्**। अनुपलब्धिप्रमाणम्। **समानेति**। तथा च नेदमज्ञानमभावरूपं किं तु भावरूपमेव स्वीकर्तव्यम्। भावरूपस्य चाज्ञानस्य ज्ञानेन सह विरोधाभावान्नोक्तदूषणावसरः। तदाह–**अस्येति**। सिद्धान्ती चोदयति--**ननु चेति**। **साक्षिचैतन्येन**। साक्षिभूतेन ज्ञानेन। 'अहमज्ञः' इत्याकारकमज्ञानविषयकं यज्ज्ञानं तेनेतियावत्। **विरुध्यते इति**। भावरूपस्याऽज्ञानस्य

वभासानुपपत्तेः। न ह्यज्ञानविषयेण ज्ञानेनाज्ञानं निवर्त्यत इति न विरोधः। ननु चेदं भावरूपमप्यज्ञानं विषयविशेषव्यावृत्तमेव साक्षिचैतन्यस्य विषयो भवति। स विषयः प्रमाणाधीनसिद्धिरिति कथमिव साक्षिचैतन्येनास्मदर्थ-व्यावृत्तमज्ञानं विषयीक्रियते। नैष दोषः। सर्वमेव वस्तुजातं ज्ञाततया अज्ञाततया वा साक्षिचैतन्यस्य विषयभूतम्। तत्र जडत्वेन ज्ञाततया सिध्यत एव प्रमाणव्यवधानापेक्षा। अजडस्य तु प्रत्यग्वस्तुनः स्वयं सिध्यतो न प्रमाणव्यवधानापेक्षेति सदैवाज्ञानव्यावर्तकत्वेनावभासो युज्यते। तस्मान्न्यायोपबृंहितेन प्रत्यक्षेण भावरूपमेवाज्ञानं प्रतीयते। तदिदं भावरूपमज्ञानमनुमानेनापि सिध्यति। विवादाध्यासितं प्रमाणज्ञानं स्वप्रागभावव्यतिरिक्तस्वविषयावरणस्वनिवर्त्यस्वदेशगतवस्त्वन्तरपूर्वकम्, अप्रकाशिता-

---

वस्तुयाथात्म्यज्ञाननिवर्त्यत्वाङ्गीकाराद्विरोधः। सति च विरोधेऽज्ञानस्यावभासो न स्यादिति भावः। साक्षिचैतन्यस्याज्ञानविषयत्वमस्तु, ततः किमित्यत आह—**नहीति।** सिद्धान्ती पुनश्चोदयति—**ननु चेदमिति।** अयं भावः। अहमज्ञ इत्यवभासेऽज्ञानावच्छेदकतया आत्मनः स्फुरणं भवति। तथाचाज्ञानं नास्मदर्थस्यात्मन इत्यस्मदर्थव्यावृत्तमेव तदज्ञानम्। तस्य चास्मदर्थावच्छिन्नाज्ञानस्य साक्षिचैतन्यविषयत्वं वक्तव्यम्। तच्च न संभवति। अस्मदर्थस्यात्मनः साक्षिचैतन्यविषयत्वासंभवात्। यथा दण्डस्याप्रत्यक्षत्वे दण्डीतिविशिष्टप्रत्यक्षं न संभवति तद्वदिति। **विषयविशेषः।** अवच्छेदकविशेषोऽस्मदर्थः। **प्रमाणाधीनेति।** प्रमाणेन सिध्यत एव वस्तुनो विषयत्वादात्मनश्च प्रमातुःप्रमाणेन सिध्यभावान्न तस्य विषयत्वमित्याशयः। **अस्मदर्थव्यावृत्तम्।** अज्ञानव्यावर्तकास्मदर्थावच्छिन्नम्। **प्रमाणज्ञानमिति।** अयं पक्षनिर्देशः। ज्ञानमित्युक्ते ब्रह्मस्वरूपज्ञानस्य वस्त्वन्तरपूर्वकत्वाभावात्तद्व्यावृत्त्यर्थं प्रमाणज्ञानमित्युक्तम्। **स्वप्रागभावेति।** साध्यनिर्देशः। स्वप्रागभावव्यतिरिक्तं, स्वविषयावरणभूतं, स्वनिवर्त्यं, स्वदेशगतं यद्वस्त्वन्तरं तत्पूर्वकमित्यर्थः। स्वविषयावरणभूतम्। स्वस्य प्रमाणज्ञानस्य विषयभूतं यद्ब्रह्म तत्स्वरूपतिरस्कारकम्। स्वदेशगतम्। स्वस्य प्रमाणज्ञानस्य देशः आश्रयः आत्मा तन्निष्ठम्। धर्माधर्मयोः संस्कारस्य च व्यावृत्त्यर्थं स्वनिवर्त्येति। भयादिव्यावृत्त्यर्थं स्वविषयावरणेति। प्रागभावव्यावृत्त्यर्थं स्वप्रागभावव्यतिरिक्तेति। एतादृशं च भावरूपमज्ञानमेवेत्यर्थः। **अप्रकाशितेति।** हेतुनिर्देशः। प्रकाशकत्वादित्येतावन्मात्रोक्तौ धारावाहिकज्ञानस्थले उत्तरोत्तरज्ञानानां

र्थप्रकाशकत्वात्, अन्धकारे प्रथमोत्पन्नप्रदीपप्रभावदिति। आलोकाभावमात्रं रूपदर्शनाभावमात्रं वा तमः न द्रव्यम्। तत् कथं भावरूपाज्ञानसाधने निदर्शनतयोपन्यस्यत इति चेत्। उच्यते। बहुलत्वविरलत्वाद्यवस्थायोगेन रूपवत्तया चोपलब्धेर्द्रव्यान्तरमेव तम इति निरवद्यमिति।

अत्रोच्यते। अहमज्ञो मामन्यश्च न जानामीत्यत्रोपपत्तिसहितेन केवलेन च प्रत्यक्षेण न भावरूपमज्ञानं प्रतीयते। यस्तु ज्ञानप्रागभावविषयत्वे विरोध उक्तः, स हि भावरूपाज्ञानेऽपि तुल्यः। विषयत्वेनाश्रयत्वेन चाज्ञानस्य व्यावर्तकतया प्रत्यगर्थः प्रतिपन्नोऽप्रतिपन्नो वा। प्रतिपन्नश्चेत्, तत्स्वरूपज्ञाननिवर्त्यं तदज्ञानं तस्मिन् प्रतिपन्ने कथमिव तिष्ठति। अप्रतिपन्नश्चेत्, व्यावर्तकाश्रयविषयज्ञानशून्यमज्ञानं कथमनुभूयेत। अथ वि-

---

प्रकाशकत्वेऽपि साध्यधर्माभावाद्व्यभिचारः। अतोऽप्रकाशितार्थेति। प्रकाशकत्वं च साक्षात्परम्परया वा बोध्यम्। दृष्टान्ते दीपप्रभायाः ज्ञानद्वारा वस्तुप्रकाशकत्वात्। द्वितीयदीपप्रभाया अप्रकाशितार्थप्रकाशकत्वाभावात्प्रथमोत्पन्नेत्युक्तम्। प्रथमोत्पन्नाया अपि दीपप्रभाया दिवाऽप्रकाशितार्थप्रकाशकत्वाभावादन्धकार इत्युक्तम्। अन्धकार एव तथाविधं वस्त्वन्तरमिति न दृष्टान्ते साध्यविकलता। अन्धकारस्य भावरूपत्वमसहमानो नैयायिकः शङ्कते-**आलोकेति**। आलोकाभाव एव तमः। न तु द्रव्यान्तरम्। नीलं तमश्चलतीति प्रत्ययस्तु भ्रम एवेति तदाशयः। ननु तमस आलोकाभावस्वरूपत्वे अन्धस्य उलूकादीनां चालोकसत्वे एव कथमन्धकारप्रतीतिरत आह-**रूपेति**। रूपदर्शनाभाव एव तम इत्यर्थः। **बहुलत्वविरलत्वेति**। अत्र गाढान्धकारः, अत्र विरलः इत्याद्यवस्थायोगस्तमसोऽभावरूपत्वे न संभवतीत्यर्थः। तमः ससर्ज भगवान्, **यस्य** तमः शरीरमित्यादिश्रुतयोऽपि तमसो द्रव्यत्वे प्रमाणतयाऽनुसंधेयाः।

अथ सिद्धान्तं वक्तुं पञ्चमीं प्रमाणानुपपत्तिं प्रदर्शयितुं चोपक्रमते-**अत्रोच्यत इति**। तुल्यत्वमुपपादयति-**विषयत्वेनेति**। आत्मस्वरूपं यज्ज्ञानं स एवाज्ञानस्य विषयः। अज्ञानाश्रयश्चात्मैव। स एव चाज्ञानस्य व्यावर्तकः। तस्य ज्ञानस्वरूपस्यात्मनः अहमज्ञ इत्याद्यज्ञानप्रतीतिकाले प्रतीतिरस्ति न वा। आद्येऽज्ञानव्यावर्तकात्मसत्वेनात्मस्वरूपज्ञाननिवर्त्यस्याज्ञानस्यासंभवः। द्वितीये अज्ञानविषयस्याज्ञानाश्रयस्य च ज्ञानाभावेन अज्ञानस्यापि प्रतीतिर्न स्यात्। व्यावर्तकस्यैवात्राज्ञानविषयत्वादज्ञानाश्रयत्वाच्च। शङ्कते-**अथेति**। आत्मप्रतीतिर्हि द्विधा स्फुटाऽस्फुटा च। तत्र स्फुटाया एवाज्ञानव्या-

शदस्वरूपावभासोऽज्ञानविरोधी, अविशदस्वरूपं तु प्रतीयत इत्याश्रयविषयज्ञाने सत्यपि नाज्ञानानुभवविरोध इति । हन्त तर्हि, ज्ञानप्रागभावोऽपि विशदस्वरूपविषयः, आश्रयप्रतियोगिज्ञानं त्वविशदस्वरूपविषयमिति न कश्चिद्विशेषोऽन्यत्राभिनिवेशात् । भावरूपस्याज्ञानस्यापि ह्यज्ञानमिति सिध्यतः प्रागभावसिद्धाविव सापेक्षत्वमस्त्येव । तथाहि । अज्ञानमिति ज्ञानाभावः, तदन्यः, तद्विरोधि वा । त्रयाणामपि तत्स्वरूपज्ञानापेक्षाऽवश्याश्रयणीया । यद्यपि तमःस्वरूपप्रतिपत्तौ प्रकाशापेक्षा न विद्यते । तथापि प्रकाशविरोधीत्यनेनाकारेण प्रतिपत्तौ प्रकाशप्रतिपत्त्यपेक्षास्त्येव । भवदभिमताज्ञानं न कदाचित् स्वरूपेण सिध्यति, अपि त्वज्ञानमित्येव, तथा सति, ज्ञानाभाववत् तदपेक्षत्वं समानम् । ज्ञानप्रागभावस्तु भवताप्यभ्युपगम्यते प्रतीयते चेत्युभयाभ्युपेतो ज्ञानप्रागभाव एव, अहमज्ञो मामन्यश्च न जानामीत्यनुभूयत इत्यभ्युपगन्तव्यम् ।

वर्तकत्वम् । अहमज्ञ इत्याद्यज्ञानप्रतीतिकाले त्वज्ञानस्य विषयतयाऽऽश्रयतया च याऽऽत्मप्रतीतिरस्ति सा न स्फुटेति नाज्ञानं व्यावर्तयतीति नोक्तदोष इत्याशयः । उत्तरयति--**हन्तेति** । पूर्वपक्षिणाऽज्ञानस्य ज्ञानाभावरूपत्वे प्रतियोगिभूतेन ज्ञानेन सह, अधिकरणेन ज्ञानरूपात्मना च सहाज्ञानस्य यो विरोधः प्राक् (पृ. १२६ पं. ६)प्रतिपादितः स न संभवति। ज्ञानाभावस्य प्रतियोगिभूतमधिकरणीभूतं च यज्ज्ञानं तदस्फुटम् । अतस्तत्र ज्ञानस्य सत्वेऽपि स्फुटत्वेनासत्वात्तत्रैव तदभावः संभवतीति विरोधाभावादिति भावः । **अन्यत्राभिनिवेशादिति** । अभिनिवेशं विनेत्यर्थः । अभिनिवेशः आग्रहः भावरूपाज्ञानविषये पक्षपातः स एव विशेषो नान्य इत्याशयः । ननु आत्मनः अप्रतीतौ व्यावर्तकाश्रयविषयशून्यमज्ञानं कथमनुभूयेत इति यदुक्तं (पृ. १२८ पं. १०) तन्न सम्यक् । यथा ज्ञानाभावस्य ज्ञानसापेक्षत्वं न तथा भावरूपस्याज्ञानस्येत्यात्मरूपज्ञानस्याप्रतीतावपि भावरूपमज्ञानमनुभूयेतैवेति चेत्तत्राह— **भावरूपस्येति । तदन्यः** । ज्ञानादन्यः । **तद्विरोधि** । ज्ञानविरोधि । **समानमिति।** तथा चाज्ञानस्याभावरूपत्वमेवास्तु न तु भावरूपत्वमिति भावः । ननु समानत्वे ज्ञानाभावरूपत्वमेवाज्ञानस्येति कोऽभिनिवेश इत्यत्राह–**ज्ञानप्रागभाव इति । भवतापि** । अज्ञानस्य भावरूपत्वं वदतापि ।

नित्यमुक्तस्वप्रकाशचैतन्यैकस्वरूपस्य ब्रह्मणोऽज्ञानानुभवश्च न सम्भवति। स्वानुभवस्वरूपत्वात्। स्वानुभवस्वरूपमपि तिरोहितस्वस्वरूपमज्ञानमनुभवतीति चेत्। किमिदं तिरोहितस्वस्वरूपत्वम्। अप्रकाशितस्वरूपत्वमिति चेत्। स्वानुभवस्वरूपस्य कथमप्रकाशितस्वरूपत्वम्। स्वानुभवस्वरूपस्याप्यन्यतोऽप्रकाशितस्वरूपत्वमापद्यत इति चेत्। एवं तर्हि प्रकाशाख्यधर्मानभ्युपगमेन प्रकाशस्यैव स्वरूपत्वादन्यतः स्वरूपनाश एव स्यादिति पूर्वमेवोक्तम् (पृ. १२३ पं. ८)। किञ्च, ब्रह्मस्वरूपतिरोधानहेतुभूतमेतदज्ञानं स्वयमनुभूतं सत् ब्रह्म तिरस्करोति, ब्रह्म तिरस्कृत्य स्वयं तदनुभवविषयो भवतीत्यन्योन्याश्रयणम्। अनुभूतमेव तिरस्करोतीति चेत्। यद्यतिरोहितस्वरूपमेव ब्रह्म अज्ञानमनुभवतीति तिरोधानकल्पना निष्प्रयोजना स्यात्। अज्ञानस्वरूपकल्पना च। ब्रह्मणोऽज्ञानदर्शनवदज्ञानकार्यतयाभिमतप्रपञ्चदर्शनस्यैव सम्भवात्। किञ्च, ब्रह्मणोऽज्ञानानुभवः किं स्वतोऽन्यतो वा। स्वतश्चेत्, अज्ञानानुभवस्य स्वरूपप्रयुक्तत्वेनानिर्मोक्षः स्यात्। अनुभूतिस्वरूपस्य ब्रह्मणोऽज्ञानानुभवस्वरूपत्वेन मिथ्यारजतबाधकज्ञानेन रजतानुभवस्यापि निवृत्तिवन्निवर्तकज्ञानेनाज्ञानानुभूतिरूपब्रह्मस्वरूपनिवृत्तिर्वा। अन्यतश्चेत्, किं तदन्यत्। अज्ञानान्तरमिति

अथाज्ञानवादिनो मतं प्रतिकूलतर्कपराहतमित्याशयेनाह—**नित्येति**। नित्यमुक्तत्वं परमार्थदोषासंस्पृष्टत्वम्। अतः परमार्थदोषो न संभवति। स्वानुभवस्वरूपत्वाच्चापरमार्थपरानुभवो न संभवतीत्यर्थः। **स्वरूपनाश एवेति**। अप्रकाशितस्वरूपत्वं नाम स्वरूपप्रकाशस्याभावः। नाश इति यावत्। तथा च प्रकाशनाशं वदता त्वया पर्यायेण स्वरूपनाश एवोक्तः स्यात्। प्रकाशश्च न ब्रह्मणो धर्मः किं तु ब्रह्मणः स्वरूपमेवेति त्वयैवोक्तत्वात्। **अनुभूतं सदिति**। न चाज्ञानं स्वरूपसदेव ब्रह्मस्वरूपतिरस्कारकमस्तु न तु ज्ञातमिति वाच्यम्। तथा सत्यज्ञानस्य परमार्थत्वापत्तेः। नह्यपरमार्थस्य स्वरूपसत्वं वक्तुं शक्यते। **अनुभूतमेवेति**। एवकारेण 'तिरोहितस्वरूपस्य ब्रह्मणोऽज्ञानानुभवः' इति प्रागुक्तपक्षनिरासः। **निष्प्रयोजनेति**। तिरोधानकल्पना ह्यज्ञानानुभवार्थैवेति भावः। **अज्ञानस्वरूपकल्पना चेति**। निष्प्रयोजना स्यादिति संबध्यते। यथा स्वरूपतिरोधानं विनाऽपि ब्रह्मणोऽज्ञानानुभवः तथाऽज्ञानं विनापि प्रपञ्चानुभवः स्यादित्याशयः। अनुभवपूर्वकतिरस्कारपक्षे एव दूषणमाह—**किंचेति**।

चेत्, अनवस्था स्यात्। ब्रह्म तिरस्कृत्यैव स्वयमनुभवविषयो भवतीति चेत्। तथा सतीदमज्ञानं काचादिवत् स्वसत्तया ब्रह्म तिरस्करोतीति ज्ञानबाध्यत्वमज्ञानस्य न स्यात्।

अथेदमज्ञानं स्वयमनादि, ब्रह्मणः स्वसाक्षित्वं ब्रह्मस्वरूपतिरस्कृतिं च युगपदेव करोति। अतो नानवस्थादयो दोषा इति। नैतत्। स्वानुभवस्वरूपस्य ब्रह्मणः स्वरूपतिरस्कृतिमन्तरेण साक्षित्वापादनायोगात्। हेत्वन्तरेण तिरस्कृतमिति चेत्। तर्हि अस्यानादित्वमपास्तम्। अनवस्था च पूर्वोक्ता। अतिरस्कृतस्वरूपस्यैव साक्षित्वापादने ब्रह्मणः स्वानुभवैकतानता च न स्यात्। अपि च, अविद्यया ब्रह्मणि तिरोहिते तद्ब्रह्म न किञ्चिदपि प्रकाशते, उत किञ्चित्प्रकाशते। पूर्वस्मिन् कल्पे, प्रकाशमात्रस्वरूपस्य ब्रह्मणोऽप्रकाशे तुच्छतापत्तिरसकृदुक्ता। उत्तरस्मिन् कल्पे सच्चिदानन्दैकरसे ब्रह्मणि कोऽयमंशस्तिरस्क्रियते, को वा प्रकाशते। निरंशे निर्विशेषे प्रकाशमात्रे वस्तुन्याकारद्वयासम्भवेन तिरस्कारः प्रकाशश्च युगपन्न सङ्गच्छेते।

अथ सच्चिदानन्दैकरसं ब्रह्म, अविद्यया तिरोहितस्वरूपमविशदमिवा-

स्वतःपक्षे दूषणद्वयमनिर्मोक्षः ब्रह्मस्वरूपनिवृत्तिश्चेति। **तथा सतीति**। तिरस्कारपूर्वकानुभवपक्षे हि अज्ञानं स्वरूपसदेव ब्रह्मस्वरूपतिरस्कारकं न तु ज्ञातमित्युक्तं स्यात्। स्वरूपसतश्चाज्ञानस्यापरमार्थत्वाभावेन ज्ञानबाध्यत्वं न स्यादिति भावः। **काचादीति**। काचो नेत्ररोगविशेषः। स ह्यज्ञातोऽपि स्वरूपतः सन्नेव दृष्टिं तिरस्करोतीति बोध्यम्।

अथ तिरस्कारानुभवयोर्यौगपद्यं शङ्कते-**अथेदमिति**। **स्वयमनादीति**। अनेनानवस्था परिहृता। **साक्षित्वापादनायोगात्**। अज्ञानानुभवायोगात्। **अपास्तमिति**। अन्येन हेतुना पूर्वं ब्रह्मस्वरूपे तिरोहिते पश्चादज्ञानमनुभूयते इत्युच्यमानेऽज्ञानस्यानादित्वेन किं कृतं स्यादित्यर्थः। **निर्विशेषे इति**। एतेन 'ब्रह्मणः स्वतो निरंशत्वेऽपि नानाविधः कश्चिद्विशेषः प्रकाशते कश्चिन्न' इति 'किंचित्प्रकाशते' इत्यस्य तात्पर्यमित्यपास्तम्। **प्रकाशमात्रे**। कस्याप्यविषयभूते।

शङ्कते। **अथेति**। **अविशदमिवालक्ष्यत इति**। अविशदमिवेत्यनेन तिरस्कारः सूचितः। आलक्ष्यत इत्यनेन प्रकाशश्च सूचितः। एवं च तिरस्कारप्रकाशयोर्युगपत्सं-

लक्ष्यत इति। प्रकाशमात्रस्वरूपस्य विशदता अविशदता वा किंरूपा। एतदुक्तं भवति। यः सांशः सविशेषः प्रकाशविषयस्तस्य सकलावभासो विशदावभासः कतिपयविशेषरहित[1]श्चाविशदावभासः। तत्र य आकारोऽप्रतिपन्नस्तस्मिन्नंशे प्रकाशाभावादेव प्रकाशवैशद्यं न विद्यते। यश्चांशः प्रतिपन्नस्तस्मिन्नंशे तद्विषयप्रकाशो विशद एव। अतः सर्वत्र प्रकाशांशेऽवैशद्यं न सम्भवति। विषयेऽपि स्वरूपे प्रतीयमाने तद्गतकतिपयविशेषाप्रतीतिरेवावैशद्यम्। तस्मादविषये निर्विशेषे प्रकाशमात्रे ब्रह्मणि स्वरूपे प्रकाशमाने कतिपयविशेषाप्रतिपत्तिरूपावैशद्यं नामाज्ञानकार्यं न सम्भवतीति। अपि चेदमविद्याकार्यमवैशद्यं तत्त्वज्ञानोदयान्निवर्तते न वा। अनिवृत्तावपवर्गाभावः। निवृत्तौ च वस्तु किंरूपमिति विवेचनीयम्। विशदस्वरूपमिति चेत्, तद्विशदस्वरूपं प्रागस्ति वा न वा। अस्ति चेत्, अविद्याकार्यमवैशद्यं तन्निवृत्तिश्च न स्याताम्। नो चेत्, मोक्षस्य कार्यतयाऽनित्यता स्यात्। अस्याज्ञानस्याश्रयानिरूपणादेवासम्भवः पूर्वमेवोक्तः (पृ. १२१ पं. ३)। अपि चापरमार्थदोषमूलभ्रमवादिना निरधिष्ठा-

---

भवोस्तीति भावः। परिहरति–**प्रकाशमात्रेति। यः सांश इति**। सांशः सविशेषश्च यो घटादिः पदार्थः प्रकाशविषयो भवति तस्यांशविशेषसहितस्य योऽवभासः स विशदावभासः। कतिपयांशरहितस्य कतिपयविशेषरहितस्य वा योऽवभासः सोऽविशदावभास इत्येवंरीत्यैव सांशसविशेषपदार्थविषये विशदावभासाविशदावभासयोः संभवः। नत्ववभासस्य वैशद्यमवैशद्यं वा। अवभासो हि प्रकाशः। लोकेऽपि घटादिप्रकाशस्य नावैशद्यं संभवति। घटादिषु योंऽशोऽज्ञातस्तत्र प्रकाशस्यावैशद्यं वक्तव्यम्। तच्च व्याहतम्। अज्ञाते प्रकाशस्यासत्वात्। धर्मिणः प्रकाशस्यासत्वे तद्धर्मभूतमवैशद्यं दुर्वचमेव। एवं च प्रकाशमात्रस्वरूपे परमात्मनि न कथमप्यवैशद्यमिति तात्पर्यम्। **न स्यातामिति**। विशदस्वरूपस्याविद्याविरोधित्वादिति भावः। अथाज्ञानविषये परोक्तस्य प्रत्यक्षप्रमाणस्य प्रतिकूलतर्कमाह–**अस्येति। पूर्वमेवोक्त इति**। तथा च अहमज्ञ इत्याकारकमज्ञानस्य प्रत्यक्षं न संभवतीत्यर्थः। प्रतिकूलतर्कान्तरमाह। **अपि चेति**। निर्विशेषब्रह्मवादी पूर्वपक्षी निरधिष्ठानभ्रमासंभवं मन्यमानो भ्रमाधिष्ठानत्वेन

---

१ ख. ग. रहितावभासश्चा.

नभ्रमासम्भवो दुरूपपादः। भ्रमहेतुभूतदोषदोषाश्रयवदधिष्ठानापारमार्थ्येऽपि भ्रमोपपत्तेः। ततश्च सर्वशून्यत्वमेव स्यात्।

यदुक्तम् (पृ. १२७ पं. ९) अनुमानेनापि भावरूपमज्ञानं सिध्यतीति। तदयुक्तम्। अनुमानासम्भवात्। ननु उक्तमनुमानम्। सत्यमुक्तम्। दुरुक्तं तु तत्। अज्ञानेप्यनभिमताज्ञानान्तरसाधनेन विरुद्धत्वाद्धेतोः। तत्राज्ञानान्तरासाधने हेतोरनैकान्त्यम्। साधने च तदज्ञानमज्ञानसाक्षित्वं निवारयति। ततश्चाज्ञानकल्पना निष्फला स्यात्। दृष्टान्तश्च साधनविकलः। प्रदीपप्रभाया अप्रकाशितार्थप्रकाशकत्वाभावात्। सर्वत्र हि ज्ञानस्यैव प्रकाशकत्वम्। सत्यपि दीपे विज्ञानेन विना विषयप्रकाशाभावात्। इन्द्रियाणामपि ज्ञानो-

---

ब्रह्मणः सिद्धिं प्रतिपादयति। परंतु तद्दुरुपपादम्। यथा भ्रमस्य मूलभूतोऽज्ञानरूपो दोषोऽपरमार्थः। यथा च तादृशदोषाश्रयत्वेनाभ्युपगतो जीवो जीवस्वरूपेणापरमार्थ इति तयोरपरमार्थत्वेऽपि भवता भ्रमोऽभ्युपगतः तथैव भ्रमाधिष्ठानभूतस्य ब्रह्मणोऽपरमार्थत्वेऽपि भ्रमाभ्युपगमे बाधकाभावात्। ब्रह्मणश्चापरमार्थत्वे शून्यवादप्रसङ्गः। तथा चाश्रयाभावेन ' अहमज्ञः ' इत्याकारकमज्ञानस्य प्रत्यक्षं न संभवतीत्याशयः।

अनभिमतेति। यथाऽप्रकाशितार्थप्रकाशकत्वेन हेतुना प्रमाणज्ञानस्य वस्त्वन्तरपूर्वकत्वं साध्यते तथा तादृशवस्त्वन्तरस्याज्ञानस्यापि अप्रकाशितप्रपञ्चरूपार्थप्रकाशकत्वेन वस्त्वन्तरपूर्वकत्वापत्तौ अज्ञानान्तरं सिध्येत्। तच्च तवानभिमतमिति भावः। **अनैकान्त्यम्**। व्यभिचारः। **तदज्ञानम्**। प्रथमाज्ञानेन साधितं द्वितीयाज्ञानम्। **अज्ञानसाक्षित्वम्**। ब्रह्मणः प्रथमाज्ञानानुभवितृत्वम्। **निवारयतीति**। पूर्वपक्ष्युक्तानुमाने साध्यकोटौ वस्त्वन्तरस्य स्वविषयावरणेति विशेषणोपादानात्। स्वं प्रथमाज्ञानं तद्विषयः प्रपञ्चः स यदि द्वितीयाज्ञानेनावृतस्तर्ह्यर्थादेव ब्रह्मणा तादृशं प्रथमाज्ञानं नानुभूयेत। निर्विषयस्याज्ञानस्यानुभवायोगात्। अननुभूतेन च तेन ब्रह्मस्वरूपं नाच्छाद्येत। अपरमार्थस्याप्रतीयमानस्य कार्यकारित्वायोगात्। तथा च प्रथमाज्ञानकल्पना व्यर्था स्यादिति भावः। **अप्रकाशितार्थप्रकाशकत्वाभावादिति**। परम्परया प्रकाशकत्वे गृहीते तु परम्परया प्रकाशकेष्विन्द्रियेषु व्यभिचारः। तेषां स्वनिवर्त्यवस्त्वन्तरपूर्वकत्वाभावात्। वस्तुतो दीपप्रभायाः परम्परयापि प्रकाशक-

त्पत्तिहेतुत्वमेव। न प्रकाशकत्वम्। प्रदीपप्रभायास्तु चक्षुरिन्द्रियस्य ज्ञानमुत्पादयतो विरोधितमोनिरसनद्वारेणोपकारकत्वमात्रमेव। प्रकाशकज्ञानोत्पत्तौ व्याप्रियमाणचक्षुरिन्द्रियोपकारकत्वमपेक्ष्य दीपस्य प्रकाशकत्वव्यवहारः। नास्माभिर्ज्ञानतुल्यप्रकाशकत्वाभ्युपगमेन प्रदीपप्रभा निदर्शिता। अपितु ज्ञानस्यैव स्वविषयावरणनिरसनपूर्वप्रकाशकत्वमङ्गीकृत्येति चेत्, न। नहि विरोधिनिरसनमात्रं प्रकाशकत्वम्। अपि त्वर्थपरिच्छेदः। व्यवहारयोग्यतापादनमिति यावत्। तत्तु ज्ञानस्यैव। यद्युपकारकाणामप्यप्रकाशितार्थप्रकाशकत्वमङ्गीकृतम्। तर्हीन्द्रियाणामुपकारकतमत्वेनाप्रकाशितार्थप्रकाशकत्वमङ्गीकरणीयम्। तथा सति तेषां स्वनिवर्त्यवस्त्वन्तरपूर्वकत्वाभावात् हेतोरनैकान्त्यमित्यलमनेन।

प्रतिप्रयोगाश्च, १ विवादाध्यासितमज्ञानं न ज्ञानमात्रब्रह्माश्रयम् अज्ञानत्वाच्छुक्तिकाद्यज्ञानवत्, ज्ञात्राश्रयं हि तत्। २ विवादाध्यासितमज्ञानं न ज्ञानावरणम्, अज्ञानत्वाच्छुक्तिकाद्यज्ञानवत् विषयावरणं हि तत्। ३ विवादाध्यासितमज्ञानं न ज्ञाननिवर्त्यं, ज्ञानविषयानावरणत्वात्, यज्ज्ञाननिवर्त्यमज्ञानं, तज्ज्ञानविषयावरणं, यथा शुक्तिकाद्यज्ञानम्। ४ ब्रह्म

त्वं नास्तीत्याह—**प्रदीपप्रभायास्त्विति**। शङ्कते—**नास्माभिरिति**। स्वविषयावरणनिरासकत्वमेव प्रकाशकत्वमिति भावः। **निरसनपूर्वकप्रकाशकत्वमिति**। निरसनद्वारा प्रकाशकत्वमित्यर्थः।

अथ विरुद्धानुमानान्याह—**प्रतिप्रयोगाश्चेति**। तत्रादावनुमानत्रयेऽज्ञानं पक्षः। ततोऽनुमानत्रये ब्रह्म पक्षः। पूर्वपक्ष्युक्तानुमाने साध्यकोटौ वस्त्वन्तरस्य 'स्वदेशगत' इति यद्विशेषणं तस्य प्रथमं चतुर्थं चानुमानं प्रतिकूलम्। द्वितीयं पञ्चमं च 'स्वविषयावरण' इति विशेषणस्य प्रतिकूलम्। तृतीयं षष्ठमष्टमं नवमं च 'स्वनिवर्त्य' इति विशेषणस्य प्रतिकूलम्। सप्तमं च 'स्वप्रागभावव्यतिरिक्त' इति विशेषणस्य प्रतिकूलम्। **ज्ञानमात्रब्रह्मेति**। यद्यपि स्वमते ब्रह्मणो ज्ञानमात्रत्वं नास्ति तथापि पूर्वपक्षिमतं तन्मतेनैव दूषणीयमिति ज्ञानमात्रब्रह्मेत्युक्तम्। **...तू**। शुक्तिकाद्यज्ञानम्। **न ज्ञानावरणमिति**। यद्यपि पूर्वपक्षिणाऽज्ञानं ज्ञानविषयब्रह्मावरणमित्युक्तं तथापि तन्मते ब्रह्मणः ज्ञानस्वरूपत्वाज्ज्ञानविषयत्वाभावादज्ञानं ज्ञानावरणमेव भवति न तु ज्ञानवि-

नाज्ञानास्पदं ज्ञातृत्वविरहाद्घटादिवत् । ५ ब्रह्म नाज्ञानावरणं ज्ञानाविषयत्वात् , यदज्ञानावरणं तज्ज्ञानविषयभूतम् यथा शुक्तिकादि । ६ ब्रह्म न ज्ञाननिवर्त्याज्ञानं ज्ञानाविषयत्वात् , यज्ज्ञाननिवर्त्याज्ञानं तज्ज्ञानविषयभूतम् , यथा शुक्तिकादि । ७ विवादाध्यासितं प्रमाणज्ञानं, स्वप्रागभावातिरिक्ताज्ञानपूर्वकं न भवति प्रमाणज्ञानत्वाद्भवदभिमताज्ञानसाधनप्रमाणज्ञानवत् । ८ ज्ञानं न वस्तुनो विनाशकं, शक्तिविशेषोपबृंहणविरहे सति ज्ञानत्वात् , यद्वस्तुनो विनाशकं तच्छक्तिविशेषोपबृंहितं ज्ञानमज्ञानञ्च दृष्टम् , यथेश्वरयोगिप्रभृतिज्ञानम् , यथा च मुद्गरादि । ९ भावरूपमज्ञानं न ज्ञानविनाश्यं, भावरूपत्वात् घटादिवदिति ।

अथोच्येत । बाधकज्ञानेन पूर्वज्ञानोत्पन्नानां भयादीनां विनाशो दृश्यत इति । नैवम् । न हि ज्ञानेन तेषां विनाशः । क्षणिकत्वेन तेषां स्वयमेव विनाशात् । कारणनिवृत्त्या च पश्चादनुत्पत्तेः । क्षणिकत्वञ्च तेषां ज्ञानवदुत्पत्तिकारणसन्निधान एवोपलब्धेरन्यथानुपलब्धेश्चावगम्यते । अक्षणिकत्वे च तेषां भयादीनां भयादिहेतुभूतज्ञानसन्ततावविशेषेण सर्वेषां ज्ञानानां

षयावरणमित्याशयः । **ब्रह्म नाज्ञानावरणमिति** । कर्मणि ल्युट् । अज्ञानेन ब्रह्म नाव्रियते इत्यर्थः । **ज्ञानाविषयत्वादिति** । पूर्वपक्षिणा ब्रह्मणि ज्ञानाविषयत्वस्य स्वीकृतत्वात् । **ज्ञाननिवर्त्याज्ञानमिति** । ज्ञानेन निवर्त्यमज्ञानं यस्येति बहुव्रीहिः । विषयत्वं षष्ठ्यर्थः । **भवदभिमतेति** । भवता भावरूपमज्ञानं येनानुमानरूपप्रमाणज्ञानेन साध्यते तस्य स्वप्रागभावातिरिक्ताज्ञानपूर्वकत्वाभावात् । ननु तस्यापि तथाविधाज्ञानपूर्वकत्वं कल्प्यत इति चेत् । तत्र प्रमाणमस्ति न वा । अन्त्ये भवदुक्तासिद्धिः । आद्ये कल्पितस्य प्रमाणज्ञानस्यापि तथाविधाज्ञानपूर्वकत्वं कल्प्यमित्यनवस्थेति भावः । **वस्तुनः** । भावरूपस्याज्ञानस्य । भावरूपस्य वस्तुनो विनाशकं हि द्विधा । विशेषसामर्थ्ययुक्तं ज्ञानं, ज्ञानभिन्नं च । आद्यमीश्वरादीनाम् । तेन हि प्रलये सर्वनाशो भवति । द्वितीयं दण्डादि । तेन हि घटादिनाशो भवति ।

---

१ ब्रह्म नाज्ञाननिवर्तकं ज्ञानाविषयत्वात् । यदज्ञाननिवर्तकं तज्ज्ञानविषयीभूतम् । यथा शुक्तिकादि ।

भयाद्युत्पत्तिहेतुत्वेनानेकभयोलब्धिप्रसङ्गाच्च । स्वप्रागभावव्यतिरिक्तवस्त्वन्तरपूर्वकमिति व्यर्थविशेषणोपादानेन प्रयोगकुशलता चाविष्कृता । अतो नानुमानेनापि भावरूपाज्ञानसिद्धिः । श्रुतितदर्थापत्तिभ्यामज्ञानासिद्धिरनन्तरमेव (पृ. १४६) वक्ष्यते । मिथ्यार्थस्य मिथ्यैवोपादानं भवितुमर्हतीत्येतदपि (पृ. १२५ पं. १०) 'न विलक्षणत्वात्' (ब्र. सू. २।१।४) इत्येतदधिकरणन्यायेन परिह्रियते । अतोऽनिर्वचनीयाज्ञानविषया न काचिदपि प्रतीतिरस्ति । प्रतीतिभ्रान्तिबाधैरपि न तथाभ्युपगमनीयम् । प्रतीयमानमेव हि प्रतीतिभ्रान्तिबाधविषयः । आभिः प्रतीतिभिः प्रतीत्यन्तरेण चानुपलब्धमासां विषय इति न युज्यते कल्पयितुम् ।

शुक्त्यादिषु रजतादिप्रतीतेः, प्रतीतिकालेऽपि तन्नास्तीति बाधेन चान्यस्यान्यथावभासायोगाच्च सदसदनिर्वचनीयमपूर्वमेवेदं रजतं दोषवशा-

---

अनेकभयोपलब्धीति । स्थायिनां घटादीनां यदा प्रतिक्षणमुत्पत्तिर्भवति तदा ते बहवो युगपदुपलभ्यन्ते तद्वत् । **व्यर्थेति** । भाववाचिवस्तुशब्देनैव सिद्धौ 'स्वप्रागभावातिरिक्त अन्तर' एतच्छब्दद्वयव्यर्थ्यमित्याशयः । **न विलक्षणत्वादिति** । यथा माक्षिकादेः सकाशात्तद्विलक्षणस्य कृम्यादेरुत्पत्तिस्तथा ब्रह्मणः सकाशादचेतनत्वादिविशिष्टस्य विलक्षणस्यापि जगत उत्पत्तिर्भवितुमर्हतीति तदधिकरणतात्पर्यम् । **प्रतीतिभ्रान्तीति** । प्रतीतिश्च भ्रान्त्यभ्रान्तिसाधारणरूपा । भ्रान्तिस्तु विद्यमानभेदाग्रहणपूर्वकसाधारणाकारग्रहणजन्या स्वविषयान्यथात्वविशेषिता प्रवृत्त्यादिहेतुभूता । बाधस्त्वारोपितविरुद्धाधिष्ठानाकारावगाहिनी बुद्धिः । तत्र जगत्स्वरूपं यद्भावरूपाज्ञानं तस्य प्रतीतिः सर्वेषां प्राणिनां प्रायोऽस्त्येव । भ्रान्तिश्च तत्राज्ञानिनां भवत्येव । बाधोऽपि तस्य तत्वदृष्ट्याऽस्त्येव । यदि तद्भावरूपाज्ञानं वस्तुतः सत्स्यात्तर्हि तस्य बाधो न स्यात् । यद्यसत्स्यात्तर्हि तस्य प्रतीतिर्भ्रान्तिश्च न स्यात् । सत एव रजतस्यान्यत्र भ्रमदर्शनात् । अतस्तद्भावरूपाज्ञानं न सन्नाप्यसदिति तस्यानिर्वचनीयत्वसिद्धिरिति पूर्वपक्ष्याशयः । **तथा** । अनिर्वचनीयत्वेन । **प्रतियमानमेव हीति** । यदि भावरूपाज्ञानस्य प्रतीत्यादिविषयत्वं तर्हि तस्य प्रतीयमानत्वमेव स्यान्नत्वनिर्वचनीयत्वम् । अथ यद्यनिर्वचनीयत्वं तर्हि तस्य केनापि प्रमाणेनोपलंभाभावेन प्रतीत्यादिविषयत्वं न स्यादित्यर्थः ।

शङ्कते—**शुक्त्यादिष्विति** । भ्रान्तदृष्ट्या रजतं प्रतीयते इति न तदसत् । तदानीमेवेतरदृष्ट्या बाध्यते इति न सत् । अरजतं रजतरूपेण प्रकाशते इत्यपि न वक्तुं शक्य-

---

१ ख. ग. नान्यथा

त् प्रतीयत इति कल्पनीयमिति चेत् , न । तत्कल्पनायामप्यन्यस्यान्यथावभासस्यावर्जनीयत्वात् । अन्यथावभासाभ्युपगमादेव ख्यातिप्रवृत्तिबाधभ्रमत्वानामुपपत्तेः । अत्यन्तापरिदृष्टाकारणकवस्तुकल्पनायोगात् । कल्प्यमानं हीदमनिर्वचनीयम् । न च तदानीमनिर्वचनीयमिति प्रतीयते । अपि तु परमार्थरजतमित्येव । अनिर्वचनीयमित्येव प्रतीतश्चेत् , भ्रान्तिबाधयोः प्रवृत्तेरप्यसम्भवः । अतोऽन्यस्यान्यथावभासविरहे प्रतीतिप्रवृत्तिबाधभ्रमत्वानामनुपपत्तेः, तस्यापरिहार्यत्वाच्च, शुक्त्यादिरेव रजताद्याकारेणावभासत इति भवताभ्युपगन्तव्यम् ।

ख्यात्यन्तरवादिनाश्च सुदूरमपि गत्वा अन्यथावभासोवश्याश्रयणीयः । असत्ख्यातिपक्षे सदात्मना, आत्मख्यातिपक्षे चार्थात्मना, अख्यातिपक्षे-

---

म् । अन्यस्यान्यरूपेणावभासायोगात् । अतोऽगत्याऽनिर्वचनीयमेव रजतं तत्र कल्पनीयम् । तद्वदेव भावरूपाज्ञानविषयेऽपीति शङ्काशयः । **तत्कल्पनायामपीति** । अनिर्वचनीयकल्पनायामपि तस्यानिर्वचनीयस्य निर्वचनीयत्वेनावभासोऽवश्याश्रयणीय एव । इतरथा हि कथमपि तस्य निर्वक्तुमशक्यत्वेन प्रतीतिविषयत्वं, प्रवृत्तिविषयत्वं बाधविषयत्वं भ्रमविषयत्वं च तस्य न स्यात् । नन्वत्र प्रतीत्यादयः कारणं विनैव कल्प्यन्तामिति चेत्तत्राह—**अत्यन्तेति** । उक्तमेव विशदयति—**कल्प्यमानं हीति । तस्यापरिहार्यत्वाच्चेति** । अन्यत्रान्यावभासस्यावश्यकत्वाच्चेत्यर्थः ।

ख्यात्यन्तरेति ! तत्र सत्ख्यातिः सर्वैरङ्गीकृतैव । सर्वैरपि स्वस्वमतानुसारेण यत्सद्वस्तु स्वीक्रियते तदुपलम्भरूपत्वात्तस्याः । सतः ख्यातिः प्रतीतिरित्यर्थः । असद्विषये तु चत्वारः पक्षाः । अन्यथा ख्यातिः, असत्ख्यातिः, आत्मख्यातिः, अख्यातिश्चेति । अन्यस्यान्यरूपेण या प्रतीतिः सान्यथाख्यातिः । सा च नैयायिकैः स्वीकृता । तत्रान्यथावभासो वर्तत एव । ख्यात्यन्तरेष्वपि अयं तुल्यः । तत्रासत्ख्यातिः शून्यवादिभिर्बौद्धैर्मायावेदान्तिभिर्माध्वैश्चाङ्गीकृता । असतः ख्यातिः प्रतीतिरित्यर्थः । तत्रासतो या प्रतीतिः साऽसत्वेन भवति सत्वेन वा । असत्वेन चेत्तत्र भ्रमः प्रवृत्तिश्च न सम्भवति । सत्वेन चेदन्यथाऽवभास एव । आत्मख्यातिस्तु विज्ञानवादिभिर्योगाचारैरङ्गीकृता । आत्मनः विज्ञानस्य ख्यातिः प्रतीतिरित्यर्थः । तत्र विज्ञानस्य या प्रतीतिः सा विज्ञानत्वेन भवति अर्थत्वेन वा । विज्ञानत्वेन चेद् भ्रमादि न सम्भवति । अर्थत्वेन चेदन्यथाऽवभासएव । अख्यातिस्तु कैश्चिदेकदेशिभिरङ्गीकृता । न ख्यातिः अख्यातिः अप्रतीतिरित्यर्थः । इदं रजतमित्यत्रेदमंश एव चक्षुषा प्रतीयते । रजतमिति तु

ऽप्यन्यविशेषणमन्यविशेषणत्वेन ज्ञानद्वयमेकत्वेन च । विषयासद्भावप-क्षेऽपि विद्यमानत्वेन । किञ्च, अनिर्वचनीयमपूर्वरजतमत्र जातमिति वद-ता तस्य जन्मकारणं वक्तव्यम् । न तावत्प्रतीतिः । तस्यास्तद्विषयत्वेन त-दुत्पत्तेः प्रागात्मलाभायोगात् । निर्विषया जाता तदुत्पाद्य तदेव विषयी-करोतीति महतामिदमुपपादनम् । अथेन्द्रियादिगतो दोषः । तन्न । तस्य पुरुषाश्रयत्वेनार्थगतकार्यस्योत्पादकत्वायोगात् । नापीन्द्रियाणि । तेषां ज्ञा-नकारणत्वात् । नापि दुष्टानीन्द्रियाणि । तेषामपि स्वकार्यभूते ज्ञान एव हि विशेषकरत्वम् । अनादिमिथ्याज्ञानोपादानत्वं तु पूर्वमेव निरस्तम् ।

किञ्च, अपूर्वमनिर्वचनीयमिदं वस्तुजातं रजतादिबुद्धिशब्दाभ्यां कथ-मिव विषयीक्रियते, न घटादिबुद्धिशब्दाभ्याम् । रजतादिसादृश्यादिति चेत् । तर्हि तत्सदृशमित्येव प्रतीतिशब्दौ स्याताम् । रजतादिजातियोगादि-ति चेत् । सा किं परमार्थभूता, उतापरमार्थभूता वा । न तावत्परमार्थभू-

---

सत्यरजतस्यैव स्मृत्याकारदर्शनम् । तत्तु केवलं स्मर्यते इति तन्मतम् । तत्रेदं रजत-मिति वस्तुत एकं ज्ञानं ज्ञानद्वयं वा । एकज्ञानपक्षे अविशेषणमपि रजतमिदमंशवि-शेषणत्वेन प्रतीयत इति अन्यथावभासः । ज्ञानद्वयपक्षे तज्ज्ञानद्वयं ज्ञानद्वयत्वेन प्रती-यते एकज्ञानत्वेन वा । आद्ये भ्रमप्रवृत्त्यादि न सम्भवति । अन्त्येऽन्यथावभासः । **विषयेति** । अविद्यमान एव विषयो भासते इति मतेऽपि अविद्यमानस्य विद्यमानत्वे-न भासनादन्यथावभासो वर्तत एवेत्यर्थः । **तस्याः** । प्रत्यक्षप्रतीतेः । **तद्विषयत्वे-न** । विद्यमानविषयजन्यत्वेन । **महतामिति** । परिहासोक्तिः । **दोष इति** । अनिर्व-चनीयरजतकारणमिति संबध्यते । **अर्थगतकार्यस्य** । शुक्तावनिर्वचनीयरजतस्य । अथ विषयगतो दोषः कारणमिति चेत् स दोषः किं विषयमात्रनिष्ठः विषयपुरुषो-भयनिष्ठो वा । आद्ये पुरुषस्य सर्वथा निर्दोषत्वेन भ्रमासम्भवः । अन्त्ये उभयनिष्ठदो-षस्य केवलविषये कार्योत्पादकत्वं न संभवतीति बोध्यम् ।

न घटादीति । शुक्तिरजतस्थले रजतस्यानिर्वचनीयत्वे तत्र इदं रजतमित्येव बुद्धिर्नत्वयं घट इत्येवं नियमो न संभवति । तथा तत्र रजतशब्देनैव व्यवहारो न घटशब्देनेति च नियमो न संभवतीति भावः । शङ्कते—**रजतादिसादृश्यादिति** । पुनः शङ्कते—**रजतादिजातीति** । **सा किमिति** । परमार्थापरमार्थ एतदुभयविधरजतनिष्ठा

ता। तस्या अपरमार्थान्वयायोगात्। नाप्यपरमार्थभूता। परमार्थान्वयायोगात्। अपरमार्थे परमार्थबुद्धिशब्दयोर्निर्वाहकत्वायोगाच्चेत्यलमपरिणतकुतर्कनिरसनेन।

अथवा, यथार्थं सर्वविज्ञानमिति वेदविदां मतम्।
श्रुतिस्मृतिभ्यः सर्वस्य सर्वात्मत्वप्रतीतितः॥
बहु स्यामिति सङ्कल्पपूर्वसृष्ट्याद्युपक्रमे।
'तासां त्रिवृतमेकैकाम्' (छां. ६।३।३) इति श्रुत्यैव चोदितम्॥
त्रिवृत्करणमेवं हि प्रत्यक्षेणोपलभ्यते॥
यदग्नेरोहितं रूपं तेजसस्तदपामपि।
शुक्लं कृष्णं पृथिव्याश्चेत्यग्नावेव त्रिरूपता॥
श्रुत्यैव दर्शिता तस्मात् सर्वे सर्वत्र सङ्गताः।
पुराणे चैवमेवोक्तं वैष्णवे सृष्ट्युपक्रमे॥
'नानावीर्याः पृथग्भूतास्ततस्ते संहतिं विना।
नाशक्नुवन् प्रजाः स्रष्टुमसमागम्य कृत्स्नशः॥
समेत्यान्योन्यसंयोगं परस्परसमाश्रयाः।

जातिः स्वयं किं परमार्थभूता उतापरमार्थभूतेत्यर्थः। **अपरमार्थेति**। अपरमार्थभूतव्यक्त्या सह सम्बन्धासम्भवादित्यर्थः। **निर्वाहकत्वायोगात्**। प्रयोजकत्वायोगात्। नह्यपरमार्थं परमार्थस्य कारणं भवति।

अथ सर्वत्र सत्ख्यातिरेवेति स्वसिद्धान्तं दर्शयति—**अथ वेति**। **वेदविदाम्**। वृत्तिकारादीनाम्। **सर्वस्येति**। सर्वस्य पृथिव्यादेः सर्वात्मत्वं पृथिव्यादित्वं त्रिवृत्करणेन बोध्यम्। त्रिवृत्करणं च पृथिव्यादित्रयाणां परस्परं मिश्रणम्। **सृष्ट्यादीति**। आदिशब्देन नामरूपव्याकरणसंग्रहः। सृष्ट्यादिरुपक्रमो यस्य प्रकरणस्य तस्मिन्नित्यर्थः। **तासाम्**। पृथिव्यप्तेजोदेवतानाम्। **यदग्नेरिति**। अग्नेर्यद्रोहितं रूपं तत्तेजसः। अग्नेर्यच्छुक्लं रूपं तदपाम्। तथाग्नेर्यत्कृष्णं रूपं तत्पृथिव्याः। **संगता इति**। तथाचास्य प्रमाणसिद्धस्य रूपस्यापरमार्थता वक्तुमशक्येति भावः। **ते**। आकाशादयः। अयं पञ्चीकरणप्रकारः। **परस्परेति**। सर्वेषां सर्वत्र मिश्रणेपि घटादिषु पृथिव्यंशस्याधिक्यात्तत्र पृथिवी आश्रयः। इतरे आश्रिताः। आधिक्या-

महदाद्या विशेषान्ता ह्यण्डम्' (वि. पु. १।२।५२-५३)इत्यादिना ततः॥
सूत्रकारोऽपि भूतानां त्रिरूपत्वं तथावदत्।
'त्र्यात्मकत्वात्तु भूयस्त्वात्' (ब्र. सू. ३।१।२) इति तेनाभिधाभिदा॥
सोमाभावे च पूतीकग्रहणं श्रुतिचोदितम्।
सोमावयवसद्भावादिति न्यायविदो विदुः॥
व्रीह्यभावे च नीवारग्रहणं व्रीहिभावतः।
तदेव सदृशं तस्य यत्तद्द्रव्यैकदेशभाक्॥
शुक्त्यादौ रजतादेश्च भावः श्रुत्यैव चोदितः।
रूप्यशुक्त्यादिनिर्देशभेदो भूयस्त्वहेतुकः॥
रूप्यादिसदृशश्चायं शुक्त्यादिरुपलभ्यते।
अतस्तस्यात्र सद्भावः प्रतीतेरपि निश्चितः॥
कदाचिच्चक्षुरादेस्तु दोषाच्छुक्त्यंशवर्जितः।
रजतांशो गृहीतोऽतो रजतार्थी प्रवर्तते॥
दोषहानौ तु शुक्त्यंशे गृहीते तन्निवर्तते।

देव च पृथिवीशब्देन व्यवहारः। एवमन्येष्वपि। **विशेषान्ता इति**। शान्तत्वम् घोरत्वम् मूढत्वं च विशेषः। **अण्डमिति**। उत्पादयन्तीति संबन्धः। **त्र्यात्मकत्वादिति**। केवलाभिरद्भिर्न देहारंभः। अपां त्र्यात्मकत्वात् पृथिव्यप्तेजःस्वरूपत्वात्। 'आपः पुरुषवचसः' (छां. ५।३।३) इति श्रुतौ अपामेव श्रवणं तु भूयस्त्वात् तदंशबाहुल्यादिति सूत्रार्थः। **अभिधाभिदा**। नामभेदः। पृथिव्यादिनामभेदस्तत्तदंशबाहुल्यादित्यर्थः। नन्वेवमाकाशादीनां सत्वेन तत्र सत्ख्यातिसिद्धावपि शुक्तिरजतादेरसत्वेन तत्र कथं सत्ख्यातिरिति चेन्न। शुक्तावपि रजतांशस्य सत्वेन तस्य तत्रासत्वायोगात्। स्वसदृशे वस्तुनि स्वांशस्य सत्वात्। एतदेव दृष्टान्तेन विशदयति—**सोमाभावे इति। पूतीकग्रहणम्**। वल्लीविशेषग्रहणम्। **श्रुत्यैवेति**। सोमाद्यभावे तत्सदृशवस्तुग्रहणं बोधयन्ती श्रुतिरेव सदृशयोर्वस्तुनोः परस्परांशसत्वं बोधयतीत्यर्थः। यद्वा त्रिवृत्करणश्रुतिरेव शुक्तिकादौ तेजसो रूप्यस्यांशतः सत्वं बोधयतीत्यर्थः। ननु शुक्तिरूप्ययोः प्रत्येकं शुक्तिरूप्य एतच्छब्दद्वयव्यवहारः स्यादित्यत आह—**रूप्येति**। ननु शुक्तिज्ञानेन रजतज्ञानस्य बाधो न स्यादित्यत आह—

अतो यथार्थं रूप्यादिविज्ञानं शुक्तिकादिषु ॥
बाध्यबाधकभावोऽपि भूयस्त्वेनोपपद्यते ।
शुक्तिभूयस्त्ववैकल्यसाकल्यग्रहरूपतः ॥
नातो मिथ्यार्थसत्यार्थविषयत्वनिबन्धनः ।
एवं सर्वस्य सर्वत्वे व्यवहारव्यवस्थितिः ॥

स्वप्ने च प्राणिनां पुण्यपापानुगुणा भगवतैव तत्तत्पुरुषमात्रानुभाव्यास्तत्तत्कालावसानास्तथाभूताश्चार्थाः सृज्यन्ते । तथा हि श्रुतिः स्वप्नविषया । 'न तत्र रथा न रथयोगा न पन्थानो भवन्ति । अथ रथान् रथयोगान् पथः सृजते । न तत्रानन्दा मुदः प्रमुदो भवन्ति । अथानन्दान्मुदः प्रमुदः सृजते । न तत्र वेशान्ताः पुष्करिण्यः स्रवन्त्यो भवन्ति अथ वेशान्तान् पुष्करिण्यः स्रवन्त्यः सृजते । स हि कर्ता ' (बृ. ४।३।१०) इति । यद्यपि सकलेतरपुरुषानुभाव्यतया तदानीं न भवन्ति, अथापि तत्तत्पुरुषमात्रानुभाव्यतया तथाविधार्थानीश्वरः सृजति, स हि कर्ता, तस्य सत्यसंकल्पस्याश्चर्यशक्तेस्तथाविधं कर्तृत्वं सम्भवतीत्यर्थः ।

'य एष सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाणः ।
तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते ।
तस्मिंल्लोकाः श्रिताः सर्वे तदु नात्येति कश्चन ' (का. ५।८)इति ।

बाध्येति । ज्ञानस्य मिथ्यार्थविषयत्वं न बाध्यत्वे प्रयोजकम् । किं तु भूयस्त्ववैकल्येन ग्रह एव । तथा सत्यार्थविषयत्वं न बाधकत्वे प्रयोजकम् । किं तु भूयस्त्वसाकल्येन ग्रह इति भावः ।

अथ स्वप्ने सत्ख्यातिसिद्धये स्वाप्नपदार्थानां सत्यत्वमुपपादयति—**स्वप्ने चेति** । **तत्तत्पुरुषेति** । अत एवान्येषां पुरुषाणां तत्पदार्थानुपलब्धिः । **तत्तत्कालेति** । अत एव सदा नोपलब्धिः । **रथयोगाः** । रथे युज्यन्त इति रथयोगाः अश्वाः । **आनन्दा इति** । साधारणभोग्यदर्शनजा प्रीतिर्मुत् । असाधारणभोग्यदर्शनजा प्रीतिः प्रमुत् । विनियोगजा प्रीतिरानन्दः । वेशान्ता गृहाः अल्पसरांसि वा । पुष्करिण्यस्तडागाः । स्रवन्त्यो नद्यः । स्वप्नार्थसृष्टेरीश्वरकर्तृकत्वस्फुटीकरणार्थं श्रुत्यन्तरमाह—**य एष इति** । **सुप्तेषु** । प्राणेषु सुप्तेषु सत्सु । **शुक्रम्** । शुद्धम् ।

सूत्रकारोऽपि 'सन्ध्ये सृष्टिराह हि' (ब्र. सू. ३।२।१) 'निर्मातारञ्चैके पुत्रादयश्च' (ब्र. सू. ३।२।२) इति सूत्रद्वयेन स्वाप्नेष्वर्थेषु जीवस्य स्रष्टृत्वमाशङ्क्य—'मायामात्रन्तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात्' (ब्र. सू. ३।२।३) इत्यादिना, न जीवस्य संकल्पमात्रेण स्रष्टृत्वमुपपद्यते, जीवस्य स्वाभाविकसत्यसंकल्पादेः कृत्स्नस्य संसारदशायामनभिव्यक्तस्वरूपत्वादीश्वरस्यैव तत्तत्पुरुषानुभाव्यतया आश्चर्यभूता सृष्टिरियम्

'तस्मिंल्लोकाः श्रिताः सर्वे तदु नात्येति कश्चन' (का. ५।८)

इति परमात्मैव स्रष्टेत्यवगम्यत इति परिहरति। अपवरकादिषु शयानस्य स्वप्नदृशः स्वदेहेनैव देशान्तरगमनराज्याभिषेकशिरश्छेदादयः पुण्यपापफलभूताः शयानदेहसरूपसंस्थानदेहान्तरसृष्ट्या उपपद्यन्ते।

पीतशङ्खादौ तु नयनवर्तिपित्तद्रव्यसंभिन्ना नायनरश्मयः शङ्खादिभिः संयुज्यन्ते। तत्र पित्तद्रव्यगतपीतिमाभिभूतः शङ्खगतशुक्तिमा न गृह्यते। अतः सुवर्णानुलिप्तशङ्खवत् पीतः शङ्ख इति प्रतीयते। पित्तद्रव्यं तद्गतपीतिमा चातिसूक्ष्मतया पार्श्वस्थैर्न गृह्यते। पित्तोपहतेन तु

सन्ध्ये इति। सन्ध्ये स्वप्ने सृष्टिर्जीवेनैव क्रियते। हि यतः 'स हि कर्ता' (बृ ४।३।१०) इति श्रुतिस्तथैवाह। तत्र हि जीव एव प्रतीयते इति सूत्रार्थः **निर्मातारमिति**। किं चैनं जीवं स्वप्ने कामानां निर्मातारमेके शाखिनोऽधीयते 'य एष सुप्तेषु' (का. ५।८) इति। एतत्सूत्रद्वयं पूर्वपक्षिणः। **मायामात्रमिति**। एतत्सिद्धान्तसूत्रम्। तुशब्दः पूर्वपक्षं व्यावर्तयति। स्वप्नसृष्टिर्मायामात्रमाश्चर्यमात्रं परमपुरुषसृष्टमिति यावत्। एवंविधाश्चर्यभूतसृष्टेर्जीवकर्तृकत्वं न संभवति। जीवस्य संसारदशायां कार्त्स्न्येन साकल्येनाभिव्यक्तस्वरूपत्वाभावादिति सूत्रार्थः। उक्तश्रुत्योस्तु तच्छब्देन पुरुषशब्देन च परमात्मैव ग्राह्यः, प्रकरणादिति भावः। **इत्यादिनेति**। अस्य परिहरतीत्यत्रान्वयः। ननु गृहे शयानः स्वप्ने यदन्यत्र गच्छति तत्र कथं परमार्थत्वमित्यत्राह—**अपवरकादिष्विति**। गृहादिष्वित्यर्थः। **शयानेति**। शयानो यो देहस्तेन सरूपं संस्थानं यस्य तादृशस्य देहान्तरस्य सृष्ट्येत्यर्थः। संस्थानमवयवरचना। स्वाप्नरथादिवत्स्वाप्नदेहोऽप्यन्य एवेश्वरेण क्रियते। तत्र शयानदेहत्वव्यवहारस्तु द्वयोर्देहयोर्भेदस्याज्ञानात् भवति नत्वन्यथा ख्यात्येति बोध्यम्।

अथ पीतशङ्खादौ सत्यख्यातिं दर्शयति—**पीतेति**। **संभिन्नाः**। मिश्रिताः। ननु

स्वनयननिष्क्रान्ततया अतिसामीप्यात् सूक्ष्ममपि गृह्यते । तद्ग्रहणजनितसंस्कारसचिवनायनरश्मिभिर्दूरस्थमपि गृह्यते । जपाकुसुमसमीपवर्तिस्फटिकमणिरपि तत्प्रभाभिभूततया रक्त इति गृह्यते । जपाकुसुमप्रभा विततापि स्वच्छद्रव्यसंयुक्ता स्फुटतरमुपलभ्यत इत्युपलब्धिव्यवस्थाप्यमिदम् ।

मरीचिकाजलज्ञानेऽपि तेजःपृथिव्योरप्यम्बुनो विद्यमानत्वादिन्द्रियदोषेण तेजःपृथिव्योरग्रहणाच्चादृष्टवशाच्चाम्बुनो ग्रहणात् यथार्थत्वम् । अलातचक्रेऽप्यलातस्य द्रुततरंगमनेन सर्वदेशसंयोगादन्तरालाग्रहणात् तथाप्रतीतिरुपपद्यते । चक्रप्रतीतावप्यन्तरालाग्रहणपूर्वकं तत्तद्देशसंयुक्ततत्तद्वस्तुग्रहणमेव । क्वचिदन्तरालाभावादन्तरालाग्रहणं, क्वचिच्छैघ्र्यादग्रहणमिति विशेषः । अतस्तदपि यथार्थम् । दर्पणादिषु निजमुखादिप्रतीतिरपि यथार्था । दर्पणादिप्रतिहतगतयो हि नायनरश्मयो दर्पणादिदेशग्रहणपूर्वकं निजमुखादि गृह्णन्ति । तत्राप्यातिशैघ्र्यादन्तरालाग्रहणात्

दूरस्थशङ्खस्यातिसामीप्याभावात्तत्रस्थं पित्तद्रव्यं पित्तोपहतेनापि पुरुषेण न गृह्येतेत्यत आह–**तद्ग्रहणेति** । पित्तोपहतेन पुरुषेण स्वनयननिष्क्रान्तपित्तद्रव्यज्ञानजनितसंस्कारसहायेन शङ्खस्थं पित्तद्रव्यं दूरस्थमपि स्वचाक्षुपरश्मिभिर्ज्ञायते । यथा आकाशेऽतिदूरगतः पक्षी न द्रष्टुं शक्यते । परंतु स्वसमीपदेशोत्पतनकालादारभ्य सततं दृश्यमानस्तत्संस्कारसहायेन चक्षुषा दूरगतोऽपि ज्ञायते तद्वदिति भावः ।

मरीचिका । मृगतृष्णा । **तेज इति** । त्रिवृत्करणेन तेजसि पृथिव्यां च जलांशस्य विद्यमानत्वादित्यर्थः । **अदृष्टवशादिति** । स्व्यात्यन्तरवादिभिरपि कदाचिदेव क्वचिदेव च भ्रमस्य स्वीकृततया तन्नियामकत्वमदृष्टस्याङ्गीकर्तव्यमेव । **अलातेति** । अलातमुल्मुकम् । तद्यदा चक्रवद्भ्राम्यते तदा वस्तुतस्तत्प्रतिक्षणमेकैकदिक्संयुक्तमपि सर्वदिक्संयुक्तमिव वर्तुलाकारं दृश्यते । तत्र पूर्वोत्तरकालभाविनोस्तत्तत्प्रदेशविशेषालातसंयोगयोरन्तरालं क्रमस्तदग्रहणाच्चक्रवत्प्रतीतिर्भवतीत्यर्थः । **चक्रप्रतीतावपि** । वस्तुतश्चक्रप्रतीतावपि । वास्तविकचक्रेऽपि या वर्तुलाकारा प्रतीतिर्भवति सा अन्तरालाग्रहणादेव । इयांस्तु विशेषः । वास्तविकचक्रे चक्रस्य वस्तुतः सर्वदिक्संयुक्तत्वेनान्तरालाभावादेव तदग्रहणम् । अलातचक्रे तु अन्तरालसत्त्वेऽपि शैघ्र्यात्तदग्रहण-

तथाप्रतीतिः । दिङ्मोहेऽपि दिगन्तरस्य अस्यां दिशि विद्यमानत्वाददृष्टवशेनैतद्दिगंशवियुक्तो दिगन्तरांशो गृह्यते । अतो दिगन्तरप्रतीतिर्यथार्थैव।

द्विचन्द्रज्ञानादावप्यङ्गुल्यवष्टम्भतिमिरादिभिर्नायनतेजोगतिभेदेन सामग्रीभेदात् सामग्रीद्वयमन्योन्यनिरपेक्षं चन्द्रग्रहणद्वयहेतुर्भवति । तत्रैका सामग्री स्वदेशविशिष्टं चन्द्रं गृह्णाति । द्वितीया तु किञ्चिद्वक्रगतिश्चन्द्रसमीपदेशग्रहणपूर्वकं चन्द्रं स्वदेशवियुक्तं गृह्णाति । अतः सामग्रीद्वयेन युगपद्देशद्वयविशिष्टचन्द्रग्रहणेऽपि, ग्रहणभेदेन ग्राह्याकारभेदादेकत्वग्रहणाभावाच्च द्वौ चन्द्राविति भवति प्रतीतिविशेषः । देशान्तरस्य तद्विशेषणत्वम, देशान्तरस्य चागृहीतस्वदेशचन्द्रस्य च निरन्तरग्रहणेन भवति। तत्र सामग्रीद्वित्वं पारमार्थिकम् । तेन देशद्वयविशिष्टचन्द्रग्रहणद्वयं च परमार्थिकम् । ग्रहणद्वित्वेन चन्द्रस्यैव ग्राह्याकारद्वित्वञ्च पारमार्थिकम् । तत्र विशेषणद्वयविशिष्टचन्द्रग्रहणद्वयस्यैक एव चन्द्रो ग्राह्य इति ग्रहणे प्रत्यभिज्ञावत् केवलचक्षुषः सामर्थ्याभावाच्चाक्षुषं ज्ञानं तथैवावतिष्ठते ।

मिति । **तथा प्रतीतिरिति** । दर्पणमुखयोर्यदन्तरालं तदग्रहणात्स्वमुखस्यैवाभिमुख्येन प्रतीतिरित्यर्थः । **अस्यां दिशीति** । पूर्वदिशः पश्चिमदिक्त्वेन ज्ञानमपि यथार्थमेव । पूर्वदिशि पश्चिमदिगंशस्य वस्तुतः सत्वात् । वस्तुतो दिश एकत्वात् । दिग्भेदस्योपाधिकत्वात् । यो ग्रामस्तत्पश्चिमदिक्स्थैः पूर्वदिक्स्थ इति व्यवह्रियते स एव तत्पूर्वदिक्स्थैः पश्चिमदिक्स्थ इति व्यवह्रियते । एवं सर्वदिक्षु बोध्यम् ।

अङ्गुल्यवष्टम्भः । अङ्गुल्या नेत्रनिरोधः । **तिमिरः** । नेत्ररोगः । **तेजोगतीति** । तेजोगतिरेव चन्द्रग्रहणसामग्री । सा च द्विधा । एका स्वाभाविकी ऋजुः । द्वितीया त्वङ्गुलीनिरोधादिमूलिका वक्रभूता । ननु तथापि कथं चन्द्रद्वयप्रतीतिरत आह— **अत इति । ग्रहणभेदेन ग्राह्याकारभेदात्** । ज्ञानभेदेन ज्ञेयाकारभेदात् । **देशान्तरस्येति** । यत्र देशे चन्द्रास्तिष्ठति स प्रथमः । तत्समीपो देशो द्वितीयः । तत्र द्वितीयस्य यद्यपि चन्द्रानधिकरणतया चन्द्रविशेषणत्वं न युज्यते तथापि तयोर्देशयोरन्तराग्रहणेन तत्सुलभम् । **देशान्तरस्य** । द्वितीयदेशस्य । **अगृहीतस्वदेशचन्द्रस्य** । चन्द्राधिकरणत्वेनाज्ञातस्य प्रथमदेशस्य । द्वितीयसामग्र्या चन्द्रस्य प्रथमदेशस्थत्वेनाग्रहणात् । अत एव तया द्वितीयसामग्र्या चन्द्रस्य द्वितीयदेशस्थत्वेन ग्रहणम् । **तत्रेति** । 'यद्देशद्वयसंबन्धि चन्द्रज्ञानद्वयं तदेकचन्द्रज्ञानमेव' इति निश्चयः केवल-

द्वयोश्चक्षुषोरेकसामग्र्यन्तर्भावेऽपि तिमिरादिदोषभिन्नं चाक्षुषं तेजः सामग्रीद्वयं भवतीति कार्यकल्प्यम् । अपगते तु दोषे स्वदेशविशिष्टस्य चन्द्रस्यैकग्रहणवेद्यत्वादेकश्चन्द्र इति भवति प्रत्ययः । दोषकृतन्तु सामग्रीद्वित्वम्, तत्कृतं ग्रहणद्वित्वम्, तत्कृतं ग्राह्याकारद्वित्वञ्चेतिनिरवद्यम् । अतः सर्वं विज्ञानजातं यथार्थमिति सिद्धम् ।

ख्यात्यन्तराणां दूषणानि तैस्तैर्वादिभिरेव प्रपञ्चितानीति न तत्र यत्नः क्रियते । अथवा किमनेन बहुनोपपादनप्रकारेण । प्रत्यक्षानुमानागमाख्यं प्रमाणजातम् । आगमगम्यञ्च निरस्तनिखिलदोषगन्धमनवधिकातिशयासंख्येयकल्याणगुणगणं सर्वज्ञं सत्यसङ्कल्पं परं ब्रह्माभ्युपगच्छतां किं न सेत्स्यति, किं नोपपद्यते । भगवता हि परेण ब्रह्मणा क्षेत्रज्ञपुण्यपापानुगुणं तद्भोग्यत्वायाखिलं जगत् सृजता सुखदुःखोपेक्षाफलानुभवानुभाव्याः पदार्थाः सर्वसाधारणानुभवविषयाः, केचन तत्तत्पुरुषमात्रानुभवविषयास्तत्तत्कालावसानास्तथा तथानुभाव्याः सृज्यन्ते । तत्र बाध्यबाधकभावः सर्वानुभवविषयतया तद्रहिततया चोपपद्यत इति सर्वं समञ्जसम् ।

चक्षुषा कर्तुं न शक्यते किंत्वङ्गुलीनिरोधादिरहितेनैव । यथा 'सोऽयं देवदत्तः' इति प्रत्यभिज्ञा केवलचक्षुषा न जायते, किं तु पूर्वानुभवजन्यसंस्कारसहितेनैव तद्वदिति भावः । नन्वेकसामग्रीभूतयोश्चक्षुषोः कथं द्विसामग्रीत्वमित्यत आह—**द्वयोरिति** । स्वतो निर्दोषस्येन्द्रियस्य यथा कार्यानुरोधेन सदोषत्वं कल्प्यते तथा तदनुरोधेन सामग्रीद्वित्वमपि कल्प्यते इति भावः ।

क्षेत्रज्ञेति । क्षेत्रज्ञो जीवस्तस्य पुण्यपापयोरनुरूपमित्यर्थः । **अखिलमिति** । तथा च श्रुतिः । 'इदं सर्वमसृजत, यदिदं किं च' (तै २।६।१) इति । **सुखेति** । सुखदुःखोपेक्षारूपफलत्रयस्य योऽनुभवस्तद्विषया इत्यर्थः । **केचन** । स्वप्नस्थाः पदार्थाः । **सर्वेति** । सर्वानुभवविषयभूतं बाधकं तद्रहितत्वाच्छुक्तिरजतादि स्वप्नस्थरथादि च बाध्यम् । नह्येकपुरुषानुभवविषयत्वेन तत्तत्कालावसायित्वेन वा वस्तु मिथ्या भवति । तत्तत्पुरुषानुभाव्यानां सुखादीनां, विद्युत्पातादीनां क्षणिकानां च मिथ्यात्वादर्शनादिति भावः ।

यत् पुनः, सदसदनिर्वचनीयमज्ञानं श्रुतिसिद्धमिति (पृ. २९ पं. ८)। तदसत्। 'अनृतेन हि प्रत्यूढाः' (छां. ८।३।२) इत्यादिष्वनृतशब्दस्यानिर्वचनीयानभिधायित्वात्। ऋतेतरविषयो ह्यनृतशब्दः। ऋतमिति कर्मवाचि। 'ऋतं पिबन्तौ' (का. ३।१) इति वचनात्। ऋतं कर्म फलाभिसन्धिरहितम्, परमपुरुषाराधनवेषं तत्प्राप्तिफलम्। अत्र तद्व्यतिरिक्तं सांसारिकफलं कर्मानृतं ब्रह्मप्राप्तिविरोधि। 'एतं ब्रह्मलोकं न विन्दन्त्यनृतेन हि प्रत्यूढाः' (छां. ८।३।२) इति वचनात्। 'नासदासीन्नो सदासीत्तदानीम्' (तै. ब्रा. २।८।९।३) इत्यत्रापि सदसच्छब्दौ चिदचिद्व्यष्टिविषयौ। उत्पत्तिवेलायां सत्त्यच्छब्दाभिहितयोश्चिदचिद्व्यष्टिभूतयोर्वस्तुनोरप्ययकालेऽचित्समष्टिभूते तमःशब्दाभिधेये वस्तुनि प्रलयप्रतिपादनपरत्वादस्य वाक्यस्य, नात्र कस्यचित् सदसदनिर्वचनीयतोच्यते। सदसतोः कालविशेषेऽसदभावमात्रवचनात्। अत्र तमःशब्दाभिहितस्याचित्समष्टित्वं श्रुत्यन्तरादवगम्यते। 'अव्यक्तमक्षरे लीयते, अक्षरं तमसि लीयते, तमः परे देवे एकीभवति' इति। सत्यम्, तमःशब्देनाचित्समष्टिरूपायाः प्रकृतेः सूक्ष्मावस्थोच्यते। तस्यास्तु, मायान्तु प्रकृतिं विद्यादिति मायाशब्देनाभिधानादनिर्वचनीयत्वमिति चेत्। नैतदेवम्। मायाशब्दस्यानिर्वचनीयवाचित्वं न दृष्टमिति। मायाशब्दस्य मिथ्यापर्यायत्वेनानि-

---

कर्मवाचि। पुण्यकर्मवाचि। न तु सत्यवाचि। **परमेति**। परमपुरुषाराधनमेव वेषः स्वरूपं यस्येत्यर्थः। परमपुरुषाराधनविषयमिति वा पाठः। **इतिवचनादिति**। तथा चानृतशब्दस्य ब्रह्मप्राप्तिविरोध्यर्थप्रतिपादकत्वेनार्थादेव ऋतशब्दस्य बन्धकेतरकर्मवाचित्वं सिध्यतीति भावः। **नासदिति**। तदानीं प्रलयकाले सन् चिद्व्यष्टिर्नासीत् तथा असन् अचिद्व्यष्टिर्नासीत् किंतु तत्सर्वं तमसि अचित्समष्टौ लीनमित्यर्थः। 'सच्च त्यच्चाभवत्' (तै.२।६।१) इत्युत्पत्तिप्रतिपादकवाक्ये सच्छब्देन चिद्व्यष्टेस्त्यच्छब्देन चाचिद्व्यष्टेरुत्पत्तिप्रतिपादनादत्र तस्यैव लयो बोध्यते इति नात्र सदसदनिर्वचनीयमज्ञानं प्रतीयते इति भावः। **सदसतोरिति**। नासदासीदितिश्रुत्या प्रलयकाले सदसतोरसद्भाव एवोच्यते इत्यर्थः। शङ्कते **सत्यमिति**। पुनः शङ्कते—**मायाशब्दस्य मिथ्येति**। ऐन्द्रजालिकादिषु मायाविशब्दप्रयोगदर्शनान्मायामिथ्याशब्दयोः पर्याय-

र्वचनीयत्वमिति चेत् । तदपि नास्ति । नहि सर्वत्र मायाशब्दो मिथ्याविषयः । असुरराक्षसशस्त्रादिषु सत्येष्वेव मायाशब्दप्रयोगात् । यथोक्तम्,

'तेन मायासहस्रन्तच्छम्बरस्याशुगामिना ।
बालस्य रक्षता देहमेकैकांशेन सूदितम्' (वि. पु. १।१९।२०) इति।

अतो मायाशब्दो विचित्रार्थसर्गकराभिधायी । प्रकृतेश्च मायाशब्दाभिधानं विचित्रार्थसर्गकरत्वादेव ।

'अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया सन्निरुद्धः'(श्वे. ४।९)

इति मायाशब्दवाच्यायाः प्रकृतेर्विचित्रार्थसर्गकरत्वं दर्शयति । परमपुरुषस्य च तद्वत्तामात्रेण मायित्वमुच्यते, नाज्ञत्वेन । जीवस्यैव हि मायया निरोधः श्रूयते, 'तस्मिंश्चान्यो मायया सन्निरुद्धः' इति । 'अनादिमायया सुप्तो यदा जीवः प्रबुध्यते' (गौ. १।१६) इति च । 'इन्द्रो मायाभिः पुरुरूप ईयते' (बृ. २।५।१९) इत्यत्रापि विचित्राः शक्तयोऽभिधीयन्ते । अत एव हि, भूरि त्वष्टेह राजतीत्युच्यते । नहि मिथ्याभूतः कश्चिद्विराजते । 'मम माया दुरत्यया' (गी. ७।१४) इत्यत्रापि गुणमयीति वचनात् सैव त्रिगुणात्मिका प्रकृतिरुच्यत इति न श्रुतिभिः सदसदनिर्वचनीयाज्ञानप्रतिपादनम् ।

नाप्यैक्योपदेशानुपपत्त्या । नहि 'तत्त्वमसि' (छां ६।८।७) इति जी-

---

त्वादनिर्वाच्यस्य मिथ्यात्वाच्च मायाशब्दवाच्यत्वमित्यभिप्रायः । **सर्वत्र** । क्वापि । **तेनेति** । बालस्य प्रल्हादस्य देहं रक्षता आशुगामिना तेन विष्णुचक्रेण शम्बरस्य प्रल्हादनाशार्थं हिरण्यकशिपुप्रेषितस्य शम्बरनामकदैत्यस्य तत् मायासहस्रं एकैकांशेन स्वीयैकैकावयवेन सूदितं नाशितमित्यर्थः । अत्र न मायाशब्दस्यानिर्वचनीयार्थकत्वम् । तस्य ज्ञानबाध्यस्य शस्त्रच्छेद्यत्वासंभवात् । **अस्मात्** । प्रकृताक्षरात् । **मायी** । ईश्वरः । **अन्यः** । जीवः । ननूक्तश्रुतौ मायी इति शब्देन भगवतोऽपि मायावश्यत्वं प्राप्तमितिचेत्तत्राह–**परमपुरुषस्य चेति** । **तद्वत्तामात्रेण** । केवलेन मायासंबन्धेन । न तु मायया निरोध्यत्वेन । **अभिधीयन्ते इति** । मायाभिरिति बहुवचनं चास्मिन्नर्थे स्वरसतः संगच्छते ।

अथानिर्वचनीयाज्ञानसाधकार्थापत्तिप्रमाणं दूषयति–**नापीति** । जीवपरयोर्वस्तु-

वपरयोरैक्योपदेशे सति, सर्वज्ञसत्यसङ्कल्पे सकलजगत्सर्गस्थितिविनाशहेतुभूते तच्छब्दावगते प्रकृते ब्रह्मणि विरुद्धाज्ञानपरिकल्पनाहेतुभूता काचिदप्यनुपपत्तिर्दृश्यते । ऐक्योपदेशस्तु त्वं-शब्देनापि जीवशरीरकस्य ब्रह्मण एवाभिधानादुपपन्नतरः । 'अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि' (छां. ६।३।२) इति सर्वस्य वस्तुनः परमात्मपर्यन्तस्यैव हि नामरूपभाक्त्वमुक्तम् । अतो न ब्रह्माज्ञानपरिकल्पनम् ।

इतिहासपुराणयोरपि, न ब्रह्माज्ञानवादः क्वचिदपि दृश्यते । ननु 'ज्योतींषि विष्णुः' (वि. पु. २।१२।३८) इति ब्रह्मैकमेव तत्त्वमिति प्रतिज्ञाय, 'ज्ञानस्वरूपो भगवान् यतोऽसौ' (वि. पु. २।१२।३९) इति शैलाब्धिधरादिभेदभिन्नस्य जगतो ज्ञानैकस्वरूपब्रह्माज्ञानविजृम्भितत्वमेवाभिधाय, 'यदा तु शुद्धं निजरूपि' (वि. पु. २।१२।४०) इति ज्ञानभूतस्यैव ब्रह्मणः स्वस्वरूपावस्थितिवेलायां वस्तुभेदाभावदर्शनेनाज्ञानविजृम्भितत्वमेव स्थिरीकृत्य, 'वस्त्वस्ति किं' 'मही घटत्वम्' (वि. पु. २।१२।४१-४२) इति श्लोकद्वयेन जगदुपलब्धिप्रकारेणापि वस्तुभेदानामसत्यत्वमुपपाद्य, 'तस्मान्न विज्ञानमृते' (वि. पु. २।१२।४३) इति प्रतिज्ञातं ब्रह्मव्यतिरिक्तस्यासत्यत्वमुपसंहृत्य, 'विज्ञानमेकम्' (वि. पु. २।१२।४३) इति ज्ञानस्वरूपे ब्रह्मणि भेददर्शननिमित्ताज्ञानमूलं निजकर्मैवेति

तो भेदे तत्त्वमसीति तयोरैक्योपदेशो न सम्भवतीत्यतो भेदस्य काल्पनिकत्वमेव वाच्यम् । तदन्यथानुपपत्त्या तादृशभेदज्ञानजनकत्वेनानिर्वचनीयाज्ञानं सिध्यतीति पूर्वपक्ष्याशयः । ऐक्योपदेशानुपपत्त्यापि अनिर्वचनीयाज्ञानं न सिध्यतीत्यर्थः । **उपपन्नतरः** । युक्ततरः । **परमात्मपर्यन्तस्यैवेति** । न तु परमात्मसंबन्धरहितस्येत्यर्थः ।

ज्योतींषि विष्णुरिति । ज्योतींषि विष्णुर्भुवनानि विष्णुर्वनानि विष्णुर्गिरयो दिशश्च । नद्यः समुद्राश्च स एव सर्वो यदस्ति यन्नास्ति च विप्रवर्य ॥ यदस्ति यन्नास्ति, भावरूपेणाभावरूपेण च यत्प्रतीतमित्यर्थः । **ज्ञानैकेति** । ज्ञानैकस्वरूपस्य ब्रह्मणो यदज्ञानं तस्य विजृम्भितत्वमित्यर्थः । ज्ञानस्वरूप इति श्लोके विज्ञानशब्दः करणसाधनः । विविधं विपरीतं वा ज्ञायतेऽनेनेति विज्ञानमविद्येत्यर्थः । **वस्त्वस्ति किमिति** । वस्त्वस्ति किं कुत्र चिदादिमध्यपर्यन्तहीनं सततैकरूपम् । यथान्यथात्वं

स्फुटीकृत्य, 'ज्ञानं विशुद्धम्' (वि. पु. २।१२।४४) इति ज्ञानस्वरूपस्य ब्रह्मणः स्वरूपं विशोध्य, 'सद्भाव एवं भवतो मयोक्तः' (वि. पु. २।१२। ४५) इति ज्ञानस्वरूपस्य ब्रह्मण एव सत्यत्वं नान्यस्य, अन्यस्य चासत्यत्वमेव, तस्य भुवनादेः सत्यत्वं व्यावहारिकमिति तत्त्वं तवोपदिष्टमेवेत्युपदेशो हि दृश्यते ।

नैतदेवम् । अत्र भुवनकोशस्य विस्तीर्णं स्वरूपमुक्त्वा, पूर्वमनुक्तं रूपान्तरं संक्षेपतः श्रूयतामित्यारभ्याभिधीयते । चिदचिन्मिश्रे जगति चिदंशो वाङ्मनसागोचरस्वसंवेद्यस्वरूपभेदो ज्ञानैकाकारतया अस्पष्टप्राकृतभेदोऽविनाशित्वेनाऽस्ति-शब्दवाच्यः। अचिदंशस्तु चिदंशकर्मनिमित्तपरिणामभेदो विनाशीति नास्ति-शब्दाभिधेयः। उभयन्तु परब्रह्मभूतवासुदेवशरीरतया तदात्मकमित्येतद्रूपं संक्षेपेणात्राभिहितम् । तथा हि—

'यदम्बु वैष्णवः कायस्ततो विप्र वसुन्धरा ।
पद्माकारा समुद्भूता पर्वताब्ध्यादिसंयुता' (वि. पु. २।१२।३७)

इत्यम्बुनो विष्णुशरीरत्वेनाम्बुपरिणामभूतं ब्रह्माण्डमपि विष्णोः कायः

द्विज याति भूयो न तत्तथा कुत्र कुतो हि तत्वम् ॥ अनेन श्लोकेनार्थस्वभाव उक्तः। मही घटत्वं घटतः कपालिका कपालिकाचूर्णरजस्ततोऽणवः। जनैः स्वकर्मास्तिमितात्मनिश्चयैरालक्ष्यते ब्रूहि किमत्र वस्तु ॥ अनेन श्लोकेन पूर्वश्लोकोक्तस्वभावस्योदाहरणं दर्शितम् । अवशिष्टाः श्लोकाः प्राक् (पृ. ३०) दृश्याः।

अत्र। विष्णुपुराणे द्वितीयांशे । **विस्तीर्णमिति**। उत्तरत्र मिथ्यात्वं विवक्षितं चेत् पूर्वं विस्तरेण कथनं नोपपद्यते । न हि पूर्वमेव भ्रान्तस्य भ्रमान्तरापादनं कर्तुं युज्यते । **स्वरूपम्**। स्थूलं परस्परसंसृष्टं च । **रूपान्तरम्**। सूक्ष्मं परस्परावियुक्तं च। **परिणामभेद इति**। परिणामित्वमेव नास्तिशब्दवाच्यम् । अरूत्यादिशब्दानामप्ययमेवार्थो न तु ज्ञानबाध्य इति । **उभयमिति**। चिद्रूपमचिद्रूपं च स्थूलं सूक्ष्मं च परस्परसंसृष्टमसंसृष्टं चेत्यर्थः। असंसृष्टस्यापि भगवच्छरीरत्वेन मुक्तावस्थायामपि जीवस्य भगवच्छरीरत्वसिद्धिः। **यदिति**। विष्णोर्यज्जलरूपं शरीरं तस्मात्सर्वा पृथ्वी समुत्पन्नेत्यर्थः। तथा च प्रकृतिभूतजलस्य विष्णुशरीरत्वे तद्विकारभूतपृथिव्या अपि वि-

---

१ अद्वैतब्रह्मसिद्धौ गृहीतेस्मिन्श्लोके 'स्वकर्मारतमितात्मदर्शनैः' इति पाठो दृश्यते।

तस्य च विष्णुरात्मेति सकलश्रुतिगततादात्म्योपदेशोपबृंहणरूपस्य सामानाधिकरण्यस्य ज्योतींषि विष्णुरित्यारभ्य वक्ष्यमाणस्य शरीरात्मभाव एव निबन्धनमित्याह । अस्मिन् शास्त्रे पूर्वमप्येतदसकृदुक्तम्, 'तानि सर्वाणि तद्वपुः' (वि. पु. १।२२।८४) 'तत् सर्वं वै हरेस्तनुः' (वि. पु. १। २२।३७) स एव सर्वभूतात्मा प्रधानपुरुषात्मनः । 'विश्वरूपो यतोऽव्ययः' (वि. पु.१।२।६८) इति ।

तदिदं शरीरात्मभावापन्नं तादात्म्यं सामानाधिकरण्येन व्यपदिशति, ज्योतींषि विष्णुरिति । अत्रास्त्यात्मकं नास्त्यात्मकं च जगदन्तर्गतं वस्तु विष्णोः कायतया विष्ण्वात्मकमित्युक्तम् ।

इदमस्त्यात्मकमिदं नास्त्यात्मकमस्य च नास्त्यात्मकत्वे हेतुरयमित्याह —ज्ञानस्वरूपो भगवान् यतोऽसाविति। अशेषक्षेत्रज्ञात्मनावस्थितस्य भगवता ज्ञानमेव स्वाभाविकं रूपम्। न देवमनुष्यादिवस्तुरूपम् । यत एवं तत एवाचिद्रूपदेवमनुष्यशैलाब्धिधरादयश्च तद्विज्ञानविजृम्भिताः । तस्य

ष्णुशरीरत्वमेवोचितं न तु तत्स्वरूपैक्यम् । न हि बाल्ये चेतनशरीरभूतस्य वस्तुनोऽवस्थान्तरे चेतनेन स्वरूपैक्यं भवतीति भावः । **उपबृंहणरूपस्येति** । उपबृंहणं नाम सर्वश्रुतिषु प्रतिपादितस्य तादात्म्यस्य शरीरशरीरिभावे एव तात्पर्यमिति ज्ञापनम् ।

ज्योतींषि विष्णुरिति । अयं श्लोकः प्राक् (पृ. १४८ पं. २२) दृश्यः । अत्र पादत्रयेण व्यष्टिव्यवस्थयोः परस्परसंसृष्टयोश्चिदचितोः भगवदात्मकत्वमुक्तम् । चतुर्थपादेन तु परस्परासंसृष्टयोरपि तयोस्तदात्मकत्वमुक्तम् । तदात्मकत्वं तु तच्छरीरत्वेनेव । यदम्बुवैष्णवः काय इत्युक्तत्वात् ।

ज्ञानस्वरूप इति । अयं श्लोकः प्राक् (पृ. ३० पं. ७) दृश्यः । **अशेषक्षेत्रज्ञेति** । श्लोकेऽशेषशब्देन चिदंशो जीव एव गृह्यते न तु अचिदंशः । अशेषमूर्तिर्ज्ञानस्वरूप इत्युक्तत्वात् । अचिदंशस्य ज्ञानस्वरूपत्वाभावात् । न चाशेषशब्देन जीवस्य विवक्षितत्वेऽपि अशेषमूर्तिरिति बहुव्रीह्यर्थस्य चिदचिदुभयशरीरकस्य ज्ञानस्वरूपत्वाभावः । चिदंशस्य तथात्वेप्यचिदंशस्यातथात्वादिति वाच्यम् । ज्ञानस्वरूपत्वस्य जीवविशिष्टे विशेष्येऽसंभवेन विशेषणीभूते जीव एव पर्यवसानात् । 'विधिप्रतिषेधौ विशेषणे पर्यवस्यतः सति विशेष्ये बाधे' इति न्यायात् । न तु वस्तुभूत इत्यस्यार्थमाह— **न देवेति** ।

ज्ञानैकाकारस्य सतो देवाद्याकारेण स्वात्मवैविध्यानुसन्धानमूला देवाद्याकारानुसन्धानमूलकर्ममूला इत्यर्थः । यतश्चाचिद्वस्तु क्षेत्रज्ञकर्मानुगुणं परिणामास्पदं, ततस्तन्नास्तिशब्दाभिधेयम् , इतरदास्तिशब्दाभिधेयमित्यर्थादुक्तं भवति ।

तदेव विवृणोति—यदा तु शुद्धं निजरूपीति । यदैतत् ज्ञानैकाकारमात्मवस्तु देवाद्याकारेण स्वात्मनि वैविध्यानुसन्धानमूलसर्वकर्मक्षयान्निर्दोषं परिशुद्धं निजरूपि भवति, तदा देवाद्याकारेणैकीकृत्यात्मकल्पनमूलकर्मफलभूतास्तद्भोगार्थवस्तुषु वस्तुभेदा न भवन्ति । ये देवादिवस्तुष्वात्मतयाभिमतेषु भोग्यभूता देवमनुष्यशैलाब्धिधरादिवस्तुभेदाः, ते तन्मूलभूतकर्मसु विनष्टेषु न भवन्तीत्याचिद्वस्तुनः कादाचित्कावस्थायोगितया नास्तिशब्दाभिधेयत्वमितरस्य सर्वदा निजसिद्धज्ञानैकाकारत्वेनास्तिशब्दाभिधेयत्वमित्यर्थः ।

प्रतिक्षणमन्यथाभूततया कादाचित्कावस्थायोगिनोऽचिद्वस्तुनो नास्ति-शब्दाभिधेयत्वमेवेत्याह—वस्त्वस्ति किमिति । अस्ति-शब्दाभिधेयो ह्यादिमध्यपर्यन्तहीनः सततैकरूपः पदार्थः । तस्य कदाचिदपि नास्तिबुध्यनर्हत्वात् । अचिद्वस्तु किंचित् क्वचिदपि तथाभूतं न दृष्टचरम् । ततः किमित्यत्राह—यच्चान्यथात्वमिति । यद्वस्तु प्रतिक्षणमन्यथात्वं याति, तदुत्तरोत्तरावस्थाप्राप्तया पूर्वपूर्वावस्थां जहातीति तस्य पूर्वावस्थस्योत्तरावस्थायां न प्रतिसन्धानमस्ति । अतः सर्वदा तस्य नास्ति-शब्दाभिधेयत्वमेव ।

यदा त्विति । अयं श्लोकः प्राक् (पृ. ३० पं. ९) दृश्यः । **निर्दोषम्** । शरीरसंबन्धरहितम् । **परिशुद्धम्** । तत्कृतरागद्वेषसुखदुःखादिरहितम् । **निजरूपि** । आविर्भूतस्वरूपम् । संकल्पतरोरिति व्याचष्टे—**देवादीनि** । एकीकृत्य कल्पनं हि संकल्पः । समित्यस्यैकीकरणमर्थः । **देवाद्याकारेण** । अचिदंशेन ।

वस्त्वस्ति किमिति । अयं श्लोकः प्राक् (पृ. १४८ पं. २७) दृश्यः । **तथाभूतम्** । नास्तिबुध्यनर्हम् । श्लोकस्थस्य कुत्र कुतो हि तत्त्वमित्यस्य ' अचिद्रूपे कस्मिन्वस्तुनि कस्मात् पूर्वावस्थात्वं दृश्यते, किं तु क्वापि नास्ति ' इत्यर्थः ।

---

१ क. स्वात्मनि.

तथा ह्युपलभ्यत इत्याह—मही घटत्वमिति । स्वकर्मणा देवमनुष्यादिभावेन स्तिमितात्मनिश्चयैः स्वभोग्यभूतमचिद्वस्तु प्रतिक्षणमन्यथाभूतमालक्ष्यते अनुभूयते इत्यर्थः । एवं सति किमप्यचिद्वस्तु, अस्ति—शब्दार्हमादिमध्यपर्यन्तहीनं सततैकरूपमालक्षितमस्ति किम् , न ह्यस्तीत्यभिप्रायः ।

यस्मादेवं, तस्मात् ज्ञानस्वरूपात्मव्यतिरिक्तमचिद्वस्तु कदाचित् क्वचित् केवलास्ति—शब्दवाच्यं न भवतीत्याह—तस्मान्न विज्ञानमृत इति । आत्मा तु सर्वत्र ज्ञानैकाकारतया देवादिभेदप्रत्यनीकस्वरूपोऽपि देवादिशरीरप्रवेशहेतुभूतस्वकृतविविधकर्ममूलदेवादिभेदभिन्नात्मबुद्धिभिस्तेन तेन रूपेण बहुधानुसंहित इति तद्भेदानुसन्धानं नात्मस्वरूपप्रयुक्तमित्याह—विज्ञानमेकमिति ।

आत्मस्वरूपन्तु कर्मरहितम् , तत एव मलरूपप्रकृतिस्पर्शरहितम् , ततश्च तत्प्रयुक्तशोकमोहलोभाद्यशेषहेयगुणासङ्गि उपचयापचयानर्हतया एकम् , तत एव सदैकरूपम् , तच्च वासुदेवशरीरमिति तदात्मकम् । अतदात्मकस्य कस्यचिदप्यभावादित्याह,—ज्ञानं विशुद्धमिति ।

महीघटत्वमिति । अयं श्लोकःप्राक् (पृ. १४५ पं. १६) द्रष्टव्यः । **देवमनुष्यादिभावेन** । देवादिदेहसंसर्गेण ।

यस्मादेवं तस्मादिति । परिणामित्वादेव न तु ज्ञानबाध्यत्वादित्यर्थः । **केवलेति** । अचिद्वस्तुनि योऽस्तिशब्दः स सोपाधिकः । इदानीमस्मिन्देशे घटोऽस्तीत्यादि । निरुपाधिकास्तिशब्दस्तु भगवत्येवेत्यर्थः । **तस्मान्नेति** । अयं श्लोकः प्राक् (पृ. ३० पं. १२) द्रष्टव्यः । श्लोकस्थैकशब्दं व्याचष्टे—**ज्ञानैकेति** । ज्ञानशब्दो ज्ञानत्वपरः । एको व्रीहिः सुनिष्पन्नः सुपुष्टं कुरुते जनमितिवदेकशब्द आकारैक्यपरः । **बहुधाभ्युपेतमिति** प्रकारार्थधाप्रत्ययान्तबहुधाशब्दोपादानेन वस्तुत एकाकारत्वस्यैव प्रतीतेः । स चाकारोऽत्र ज्ञानत्वमेव । **भेदेति** । एकस्वरूपत्वाद्भेदप्रत्यनीकत्वम् ।

ज्ञानं विशुद्धमिति प्रागुक्त—(पृ. ३० पं. १४) श्लोकं व्याचष्टे—**आत्मस्वरूपमिति** । विमलपदार्थमाह—**मलरूपेति** । मलरूपो यः प्रकृतिस्पर्शस्तद्रहितमित्यर्थः । **उपचयेति** । उपचयो वृद्धिः । अपचयः क्षयः । तदनर्हत्वं च निरवयवत्वात् । निरवयवत्वमेव चैकत्वमित्याशयः । एषु ज्ञानस्वरूपमित्यादिषट्श्लोकेषु आद्यं श्लोकद्वयं चिदचित्साधारणम् । वास्त्वित्यादि सार्धश्लोकद्वयमचिद्साधारणम् । विज्ञानमित्या-

चिदंशः सदैकरूपतया सर्वदास्ति-शब्दवाच्यः। अचिदंशस्तु प्रतिक्षणपरिणामित्वेन सर्वदा नाशगर्भ इति सर्वदा नास्तिशब्दाभिधेयः। एवंरूपं चिदचिदात्मकं जगत् वासुदेवशरीरं तदात्मकमिति जगद्याथात्म्यं सम्यगुक्तमित्याह–सद्भाव एवमिति। अत्र सत्यमसत्यमिति यदस्ति यन्नास्तीति प्रक्रान्तस्योपसंहारः। एवं ज्ञानैकाकारतया सममशब्दगोचरस्वरूपभेदमेवाचिन्मिश्रं भुवनाश्रितं देवमनुष्यादिरूपेण सम्यगव्यवहारार्हभेदं यद्वर्तते, तत्र हेतुः कर्मैवेत्युक्तमित्याह–एतत् तु यदिति।

तदेव विवृणोति–' यज्ञः पशुः ' (वि. पु. २।१२।४६) इति।

जगद्याथार्थ्यज्ञानप्रयोजनं मोक्षोपाययतनमित्याह–' यच्चैतत् ' (वि. पु. २।१२।४७) इति।

अत्र निर्विशेषे परे ब्रह्मणि तदाश्रये सदसदनिर्वचनीये चाज्ञाने जग-

---

दिसार्धश्लोकश्चिदसाधारण इति बोध्यम्।

सद्भाव इति प्रागुक्त–(पृ. ३१ पं. १) श्लोकं व्याचष्टे–**चिदंश इति**। श्लोकस्थयथाशब्दस्य येन प्रकारेण परिणामित्वापरिणामित्वरूपेणेत्यर्थः। न तु ज्ञानबाध्यत्वाबाध्यत्वरूपेणेति। **ज्ञानैकाकारतया सममिति**। प्रत्यस्तमितभेदमित्युक्तत्वात्। **अशब्दगोचरस्वरूपभेदमिति**। वचसामगोचरमित्युक्तत्वात्। एवशब्दो विरोधद्योतकः। वस्तुत एवंरूपमपि कर्मणा विपरीतं भवतीत्यर्थः। **भुवनाश्रितम्**। अण्डान्तर्गतम्। भोगस्थानगतमित्यर्थः।

यज्ञः पशुरिति। यज्ञः पशुर्वन्हिरशेषऋत्विक् संवत्सराः स्वर्गमयश्च कामः। इत्यादिकर्माश्रितमार्गदृष्टं भूरादिभोगाश्च फलानि तेषाम्॥ स्वर्गमयः कामः। स्वर्गविषयकेच्छा। आश्रितमार्गदृष्टम्। तैस्तैराश्रिता मार्गाः वर्णाश्रमास्तेषु दृष्टमिति कर्मविशेषणम्।

जगदिति। मोक्षोपायविषयको यत्न एव जगद्याथार्थ्यज्ञानस्य प्रयोजनमित्यर्थः। **यच्चैतदिति**। यच्चैतद्भुवनगतं मया तवोक्तं सर्वत्र व्रजति हि कर्मवश्य एकः। ज्ञात्वैकं ध्रुवमचलं सदैकरूपं तत्कुर्याद्विशति हि येन वासुदेवम्॥ सदैकरूपम्। स्वरूपतो गुणतो रूपतश्चैकरूपम्।

अथैषां श्लोकानां परोक्तार्थाननुगुणत्वमुपपादयति–**अत्रेति**। **तदाश्रये इति**। बहुव्रीहिः। नन्वस्तिनास्त्यादिशब्दाः सामानाधिकरण्यं चानुगुणमिति चेत्तत्राह–

तस्ततकल्पितत्वे वानुगुणं किञ्चिदपि पदं न दृश्यते। अस्ति-नास्ति-शब्दाभिधेयं चिदचिदात्मकं कृत्स्नं जगत् परमस्य परेशस्य ब्रह्मणो विष्णोः कायत्वेन तदात्मकम्। ज्ञानैकाकारस्यात्मनो देवादिविविधाकारानुभवे अचित्परिणामे च हेतुर्वस्तुयाथात्म्यज्ञानविरोधिक्षेत्रज्ञानां कर्मैवेति प्रतिपादनात्। अस्ति-नास्ति-सत्यासत्यशब्दानाञ्च सदसदनिर्वचनीयवस्त्वभिधानासामर्थ्याच्च। नास्त्यसत्यशब्दावस्ति-सत्यशब्दविरोधिनौ। अतश्चैताभ्यामसत्यत्वं हि प्रतीयते, नानिर्वचनीयत्वम्। अत्र चाचिद्वस्तुनि नास्त्यसत्यशब्दौ न तुच्छत्वमिथ्यात्वपरौ प्रयुक्तौ। अपि तु विनाशित्वपरौ। वस्त्वस्ति किं—मही घटत्वमित्यत्र विनाशित्वमेव ह्युपपादितम्। न निष्प्रमाणकत्वं ज्ञानबाध्यत्वं वा। एकेनाकारेणैकस्मिन् कालेऽनुभूतस्य कालान्तरे परिणामविशेषेणान्यथोपलब्ध्या नास्तित्वोपपादनात्। तुच्छत्वं हि प्रमाणसम्बन्धानर्हत्वम्। बाधोऽपि यद्देशकालादिसम्बन्धितया यदस्तीत्युपलब्धं तस्य तद्देशकालादिसम्बन्धितया नास्तीत्युपलब्धिः। न तु कालान्तरेऽनुभूतस्य कालान्तरे परिणामादिना नास्तीत्युपलब्धिः, कालभेदेन विरोधाभावात्। अतो न मिथ्यात्वम्। एतदुक्तं भवति। ज्ञानस्वरूपमात्मवस्तु आदिमध्यपर्यन्तरहितं सततैकरूपमिति स्वत एव सदास्ति-शब्दवाच्यम्। अचेतनन्तु क्षेत्रज्ञभोग्यभूतं तत्कर्मानुगुणपरिणामि विनाशीति सर्वदा नास्त्यर्थगर्भमिति नास्त्यसत्यशब्दाभिधेयमिति। यथोक्तम्—

'यत्तु कालान्तरेणापि नान्यसंज्ञामुपैति वै।

अस्तिनास्तिशब्देति। अस्तिनास्तिसत्येति। अस्तिसत्यशब्दयोरुपादानं दृष्टान्तार्थम्। यथास्तिसत्यशब्दौ न सद्विलक्षणपरौ तथा नास्त्यसत्यशब्दावपि नासद्विलक्षणपरावित्यर्थः। ननु विनाशित्वमेव मिथ्यात्वमिति चेत्तत्राह—**एकेनेति। अतो नेति।** घटादेः प्रमाणसंबन्धार्हत्वेन तुच्छत्वाभावादस्तीत्युपलब्धिविषयस्य च तस्य घटादेस्तद्देशतत्कालसंबन्धित्वेन नास्तीत्युपलब्धेरभावाच्च न मिथ्यात्वमिति भावः। **एतदुक्तमिति।** सदैकरूपत्वमस्तिशब्दप्रवृत्तिनिमित्तं विनाशगर्भत्वं च नास्तिशब्दप्रवृत्तिनिमित्तमित्यर्थः। घटावस्थायां पिण्डो नास्ति कपालावस्थायां घटो नास्ति

परिणामादिसम्भूतां तद्वस्तु नृप तच्च किम् '(वि. पु. २।१३।९५)
' अनाशी परमार्थश्च प्राज्ञैरभ्युपगम्यते ।
'तत्तु नाशि न सन्देहो नाशिद्रव्योपपादितम' (वि. पु. २।१४।२४)

इति देशकालकर्मविशेषापेक्षयास्तित्व-नास्तित्व-योगिनि वस्तुनि केवलास्ति-बुद्धिबोध्यत्वमपरमार्थ इति ह्यपरमार्थ इत्युक्तम्, आत्मन एव केवलास्तिबुद्धिबोध्यत्वमिति स परमार्थ इत्युक्तम् । श्रोतुश्च मैत्रेयस्य –

' विष्ण्वाधारं यथा चैतत् त्रैलोक्यं समवस्थितम् ।
परमार्थश्च मे प्रोक्तो यथा ज्ञानं प्रधानतः ' (वि. पु. २।१३।२)

इत्यनुभाषणाच्च । ज्योतींषि विष्णुरित्यादिसामानाधिकरण्यस्यात्मशरीरभाव एव निबन्धनम् , चिदचिद्वस्तुनोश्चास्ति-नास्ति शब्दयोगनिबन्धनं, ज्ञानस्याकर्मनिमित्तस्वाभाविकस्वरूपत्वेन स्वरूपप्राधान्यम् । अचिद्वस्तुनश्च, तत्तत्कर्मनिमित्तपरिणामित्वेनाप्राधान्यमिति प्रतीयते ।

यदुक्तं (पृ. ३१ पं. ४) निर्विशेषब्रह्मज्ञानादेवाविद्यानिवृत्तिं वदन्ति श्रुतय इति । तदसत् । ' वेदाहमेतं पुरुषं महान्तम् । आदित्यवर्णं तमसः परस्तात् ' (श्वे. ३।८) ' तमेवं विद्वानमृत इह भवति । नान्यः पन्था विद्यते अयनाय ' (नृ. पू. उ. ६) ' सर्वे निमेषा जज्ञिरे विद्युतः पुरुषा-

---

चूर्णावस्थायां न कपालस्य घटस्य च सत्तेति सदा नाशगर्भत्वम् । **तत्त्विति** । समिदाज्यकुशादिभिर्विनाशिद्रव्यैरुपपादितं तत्स्वर्गादिकं विनाश्येव, तत्र न सन्देह इत्यर्थः । **कर्मविशेषेति** । पालनादिकर्मकृद्राजास्तीति व्यवह्रियते । स एव तेन कर्मणा रहितो नास्तीति व्यवह्रियते इत्याशयः । **केवलास्तिबुद्धिः** । देशकालाद्युपाधिरहितास्तिबुद्धिः । **परमार्थश्चेति** । प्रधानत इति सार्वविभक्तिकस्तसिः । प्रधानमित्यर्थः । ज्ञानमेव प्रधानमिति परमार्थो मम प्रोक्त इत्यर्थः । ज्ञानस्य कर्मनिमित्तकत्वाभावेन स्वाभाविकस्वरूपत्वात्प्राधान्यम् । **अनुभाषणम्** । अनुवादः ।

अथ पूर्वोक्तसप्तविधानुपपत्तिमध्ये षष्ठीं निवर्तकानुपपत्तिं प्रदर्शयति–**यदुक्तमिति** । ज्ञानस्य निर्विशेषविषयत्वं खण्डयितुं सविशेषवाक्यानि दर्शयति–**वेदाहमिति** । **एवम्** । उक्तगुणविशिष्टम् । **सर्वे इति** । निमेषः सूक्ष्मकालः । विद्युतः वि-

---

१ ख. तत्तु नास्ति न २ परमार्थस्तु तं.

दधि । न तस्येशे कश्चन । तस्य नाम महद्यशः । य एनं विदुरमृतास्ते भवन्ति ' (म. ना. १।८–१०–११) इत्याद्यनेकवाक्यविरोधात् । ब्रह्मणः सविशेषत्वादेव सर्वाण्यपि वाक्यानि सविशेषज्ञानादेव मोक्षं वदन्ति । शोधकवाक्यान्यपि सविशेषमेव ब्रह्म प्रतिपादयन्तीत्युक्तम् । तत्त्वमस्यादिवाक्येषु सामानाधिकरण्यं न निर्विशेषवस्त्वैक्यपरम् । तत्त्वं-पदयोः सविशेषब्रह्माभिधायित्वात् । ततपदं हि सर्वज्ञं सत्यसङ्कल्पं जगत्कारणं ब्रह्म परामृशति । तदैक्षत बहु स्यामित्यादिषु तस्यैव प्रकृतत्वात् । तत्समानाधिकरणं त्वंपदञ्चाचिद्विशिष्टजीवशरीरकं ब्रह्म प्रतिपादयति । प्रकारद्वयावस्थितैकवस्तुपरत्वात्सामामानाधिकरण्यस्य । प्रकारद्वयपरित्यागे प्रवृत्तिनिमित्तभेदासम्भवेन सामानाधिकरण्यमेव परित्यक्तं स्यात् । द्वयोः पदयोर्लक्षणा च । सोऽयं देवदत्त इत्यत्रापि न लक्षणा । भूतवर्तमानकालसम्बन्धितयैक्यप्रतीत्यविरोधात् । देशभेदविरोधश्च कालभेदेन परिहृतः ।

द्युद्दूर्णात्पुरुषात्सर्वे निमेषा अधिजज्ञिरे समुत्पन्ना इत्यर्थः । **न तस्येति** । कश्चन पुरुषः तस्य परमात्मनः नेशे नियन्तुं न समर्थः । अत एव तस्य परमात्मनः **महद्यश** इति नाम संपन्नम् । अत्यन्तस्वतंत्रत्वेन तदीययशसोऽभ्यधिकत्वादित्यर्थः । **सर्वाण्यपि** । सदेव सोम्य एकमेवाद्वितीयमित्यादीन्यपि । ननु तत्त्वमसीति वाक्यप्रतिपादितसामानाधिकरण्यान्यथानुपपत्त्या निर्विशेषवस्तुसिद्धिरिति चेत्तत्राह–**तत्त्वमसीति । अचिद्विशिष्टेति** । त्वंपदप्रवृत्तिनिमित्तसंबोधनीयार्थहृदाभिमुख्यविशेषप्रयोजकोपलक्षणाभिप्रायेणेदमुक्तम् । **प्रकारद्वयावस्थितेति** । यथा नीलो घट इति । अत्र हि एकमेव घटरूपं वस्तु नीलगुणविशिष्टत्वेन घटत्वजातिविशिष्टत्वेन चावस्थितम् । **लक्षणा चेति** । सर्वज्ञत्वादिविशिष्टार्थवाचकतत्पदस्य किंचिज्ज्ञत्वादिविशिष्टार्थवाचकत्वंपदस्य च केवलचिद्रूपेऽर्थे लक्षणेति परैरुक्तत्वात्तेषां लक्षणारूपो दोषो नास्माकमित्याशयः । ननु सोऽयं देवदत्त इत्यादिप्रत्यभिज्ञावाक्ये लक्षणा स्वीकृतैवेति चेत्तत्राह–**सोऽयमिति । भूतेति** । यथा शूरोऽस्माकं राजेत्यादौ राज्ञ्येव शूरत्वं प्रतीयते न तद्विशेषणीभूतास्मदादिष्विति केवलराज्ञ एव शूर इति विशेषणं न विशेषणविशिष्टस्य, तथात्र न वर्तमानकालविशिष्टे देवदत्ते भूतकालविशिष्टत्वविशेषणं किं तु केवले देवदत्ते एवेति न विरोध इति भावः । **देशभेदेति** । न हि किंचित्कालविशिष्टे भिन्नदेशद्वयान्वयः । येनैकस्यैकदा भिन्नदेशद्वयासंभवेन विरोधः स्यात् । किं तु के-

तदैक्षत बहु स्यामित्युपक्रमविरोधश्च । एकविज्ञानेन सर्वविज्ञानप्रतिज्ञा च न घटते । ज्ञानस्वरूपस्य निरस्तनिखिलदोषस्य सर्वज्ञस्य समस्तकल्याणगुणात्मकस्याज्ञानतत्कार्यानन्तापुरुषार्थाश्रयत्वं च न सम्भवति ।

बाधार्थत्वे च सामानाधिकरण्यस्य तत्त्वं-पदयोरधिष्ठानलक्षणा निवृत्तिलक्षणा चेति लक्षणादयस्त एव दोषाः । इयांस्तु विशेषः । नेदं रजतमितिवदप्रतिपन्नस्यैव बाधस्यागत्या परिकल्पनम् । तत्पदेनाधिष्ठानातिरेकिधर्मानुपस्थापनेन बाधानुपपत्तिश्च । अधिष्ठानं तु, प्राक्तिरोहितमतिरोहितस्वरूपं तत्पदेनोपस्थाप्यत इति चेत्–न । अधिष्ठानाप्रकाशे तदाश्र-

---

बले देवदत्ते एव। तथा च कालभेदेन भिन्नदेशसंबन्धः संभवत्येवेति देशभेदविरोधः परिहृत इत्याशयः । **तदैक्षतेति ।** अस्मिन्नुपक्रमवाक्ये (छां ६।२।३) बहु स्यामिति प्रकारनानात्वं प्रतिपाद्यते । तथा च ' तत्त्वमसि ' (छां. ६।८।७) इति वाक्यस्य निर्विशेषवस्त्वैक्यप्रतिपादकत्वे उपक्रमविरोधः स्पष्ट एव । **न घटते इति ।** सूक्ष्मावस्थचिदचिद्विशिष्टं कारणं तदेव स्थूलावस्थचिदचिद्विशिष्टं कार्यमिति कारणज्ञानेन कार्यज्ञानात्प्रतिज्ञा सिध्यति । मृषावादिनस्तु सर्वस्य जगतो मिथ्यात्वेन ज्ञानविषयत्वायोगात्प्रतिज्ञा न सिध्यतीत्याशयः । श्रुत्यन्तरविरोधमाह–**ज्ञानस्वरूपस्येति** ।

ननु यथा रज्जुः सर्प इत्यत्र सर्पत्वस्य बाधार्थे तयोः सामानाधिकरण्यं तथा तत्त्वमसीत्यत्रापि जीवत्वस्य बाधार्थमेव सामानाधिकरण्यमिति चेत्तत्राह–**बाधार्थत्वे चेति ।** बाधार्थत्वे हि तत्पदस्याधिष्ठानमात्रे लक्षणा त्वंपदस्य च जीवत्वनिवृत्तौ लक्षणा कल्पनीया स्यादिति भावः । **लक्षणादय इति ।** आदिशब्देन प्रागुक्तसामानाधिकरण्यस्वरूपस्य त्यागः बहु स्यामित्युपक्रमविरोध इत्यादिप्रागुक्तदूषणसंग्रहः । अथ तत्त्वमसीति सामानाधिकरण्यस्य रज्जुः सर्प इत्यत्रेव बाधार्थत्वे रज्जुः सर्प इत्यपेक्षयाऽधिकं दोषान्तरमाह–**इयानिति ।** शुक्तिरजतस्थले नेदं रजतमिति बाधस्य प्रमाणान्तरेण ज्ञातत्वाद्बाधकल्पनम् । तत्त्वमसीत्यत्र तु नायं जीव इति बाधस्य प्रमाणान्तरेणाज्ञानत्वेऽपि स्वमतसिद्धये तत्कल्पनमित्येकोदोषः । किंच यथा शुक्तिरजतस्थले रजतत्वबाधप्रयोजकीभूतस्य रजतत्वविरुद्धस्य शुक्तित्वधर्मस्य शुक्तिशब्दादुपस्थितिस्तथा तत्त्वमसीत्यत्र तच्छब्दस्य केवलाधिष्ठानमात्रलक्षकत्वेन ततो जीवत्वविरुद्धस्य कस्यापि धर्मस्य नानुपस्थितिरिति जीवत्वस्य बाधो न स्यादित्यपरो दोषः । शङ्कते–**अधिष्ठानं त्विति । अतिरोहितस्वरूपम्** । अनाच्छादितस्वरूपम् । एतदेव

यभ्रमबाधयोरसम्भवात् । भ्रमाश्रयमधिष्ठानमतिरोहितमिति चेत् । तदेवा-धिष्ठानस्वरूपं भ्रमविरोधीति तत्प्रकाशे सुतरां न तदाश्रयभ्रमबाधौ । अतोऽधिष्ठानातिरेकिपारमार्थिकधर्मतत्तिरोधानानभ्युपगमे भ्रान्तिबाधौ दुरुपपादौ । अधिष्ठाने हि पुरुषमात्राकारे प्रतीयमाने तदतिरेकिणि पारमार्थिके राजत्वे तिरोहिते सत्येव व्याधत्वभ्रमः । राजत्वोपदेशेन च तन्निवृत्तिर्भवति, नाधिष्ठानमात्रोपदेशेन । तस्य प्रकाशमानत्वेनानुपदेश्यत्वात् । भ्रमानुपमर्दित्वाच्च ।

जीवशरीरकजगत्कारणब्रह्मपरत्वे मुख्यवृत्तं पदद्वयम् । प्रकारद्वयविशिष्टैकवस्तुप्रतिपादनेन सामानाधिकरण्यं च सिद्धम् । निरस्तनिखिलदोषस्य समस्तकल्याणगुणात्मकस्य ब्रह्मणो जीवान्तर्यामित्वमप्यैश्वर्यमपरं प्रतिपादितं भवति । उपक्रमानुकूलता च ।एकविज्ञानेन सर्वविज्ञानप्रतिज्ञोपपत्तिश्च । सूक्ष्मचिदचिद्वस्तुशरीरस्यैव ब्रह्मणः स्थूलचिदचिद्वस्तुशरीरत्वेन कार्यत्वात् । ‘ तमीश्वराणां परमं महेश्वरम् ’ (श्वे. ६।७) ‘ परास्य शक्तिर्विविधैव श्रूयते ’। (श्वे. ६।८) ‘ अपहतपाप्मा ’(छां. ८।७।१) ‘ सत्यकामः सत्यसङ्कल्पः ’ (छां. ८।१।५) इत्यादिश्रुत्यन्तराविरोधश्च ।

जीवत्वविरुद्धं जीवत्वबाधस्य प्रयोजकमित्याशयः । पुनः शङ्कते—**भ्रमाश्रयेति । दुरुपपादाविति** । पारमार्थिको धर्म एव प्रकाशितः सन् बाधं प्रयोजयति अप्रकाशितश्च भ्रान्तिं प्रयोजयतीति भावः । एतदेव दृष्टान्तेन विशदयति—**अधिष्ठाने हीति** ।

अथ स्वपक्षे इमानि दूषणानि न सन्तीत्याह—**जीवशरीरकेति** । **श्रुत्यन्तराविरोध इति** । निर्विशेषब्रह्मवादिनस्तु स्यादेव विरोध इत्याशयः ।

ननु सिद्धान्ते तत्त्वमसीत्यत्रोद्देश्यविधेयभावो न संभवति । तथाहि । तत्पदं नोद्देश्यार्थप्रतिपादकम् । तच्छब्दस्य सर्वज्ञत्वादिगुणविशिष्टब्रह्मवाचकत्वेन तादृशब्रह्मणः प्रत्यक्षत्वाभावात् । एवं त्वंपदमपि नोद्देश्यार्थप्रतिपादकम् । तदर्थस्याप्यचिद्विशिष्टजीवशरीरकब्रह्मणः प्रत्यक्षत्वाभावात् । मिथ्यावादिनो मम मते तु प्रत्यक्षसिद्धं जीवमात्रं त्वंशब्देनोद्दिश्य तत्पदेन तस्य ब्रह्मभावो विधीयत इत्युद्देश्यविधेयभावः संभवति । तथा चागत्या निर्विशेषवस्तु स्वीकार्यमेवेत्याशयेनाशङ्कते—

'तत्त्वमसि' (छां. ६।८।७) इत्यत्रोद्देश्योपादेयविभागः कथमिति चेत्। नात्र किञ्चिदुद्दिश्य किमपि विधीयते । 'ऐतदात्म्यमिदं सर्वम्' (छां. ६।८।७) इत्यनेनैव प्राप्तत्वात्। अप्राप्ते हि शास्त्रमर्थवत्। इदं सर्वमिति सजीवं जगन्निर्दिश्य ऐतदात्म्यमिति तस्यैष आत्मेति तत्र प्रतिपादितम्। हेतुरप्युक्तः। 'सन्मूलाः सौम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः' (छां. ६।८।४) इति। 'सर्वं खल्विदं ब्रह्म तज्जलानिति शान्तः' (छां. ३।१४।१) इतिवत्। तथा, श्रुत्यन्तराणि च ब्रह्मणस्तद्व्यतिरिक्तस्य चिदचिद्वस्तुनश्च शरीरात्मभावमेव तादात्म्यं वदन्ति। 'अन्तः प्रविष्टः शास्ता जनानाम्' 'सर्वात्मा' (कै. १०) 'यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो, यं पृथिवी न वेद, यस्य पृथिवी शरीरम्, यः पृथिवीमन्तरो यमयति, स त आत्मान्तर्याम्यमृतः' (बृ. ३।७।३) 'य आत्मनि तिष्ठन् आत्मनोऽन्तरो, यमात्मा न वेद, यस्यात्मा शरीरं, य आत्मानमन्तरो यमयति, स त आत्मान्तर्याम्यमृतः' 'यः पृथिवीमन्तरे सञ्चरन्–इत्यारभ्य, यस्य मृत्युः शरीरं, यं मृत्युर्न वेद। एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायणः' (ना. २) 'तत् सृष्ट्वा तदेवानुप्राविशत्तदनुप्रविश्य सच्च त्यच्चाभवत्' (तै. २।६।१) इत्यादीनि।

तत्त्वमसीति। उपादेयं विधेयम्। **ऐतदात्म्यम्**। एतत् ब्रह्म आत्मा शरीरि यस्य तदेतदात्म। तदेवैतदात्म्यम्। स्वार्थे ष्यञ्। **सन्मूला इति**। अनेन सर्वप्रजानां ब्रह्मजत्वमुक्तम्। **सदायतना इति**। अनेनाधाराधेयभावउक्तस्तेन शरीरशरीरिभावः सिद्धः। **सत्प्रतिष्ठा इति**। अनेन सर्वप्रजानां ब्रह्मण्येव लय इत्युक्तम्। **तज्जलानिति।** तस्माद्ब्रह्मणो जायते तत्रैव लीयते तत्रैवानिति चेष्टते चेत्यर्थः। अत्रानितीत्यनेन सदायतनत्वं फलितम्। **अन्तः प्रविष्ट इति**। अनेन शरीरशरीरिभावः फलितः। अन्तः प्रविश्य नियाम्यत्वमेव हि शरीरत्वम्। **य आत्मनीति**। अनेन परिशुद्धात्मनो भगवच्छरीरत्वमुच्यते। अचित्संसृष्टजीवस्य भगवच्छरीरत्वं तु य आदित्ये तिष्ठन्नित्यादिश्रुतित एव सिध्यति। **मृत्युः**। तमःशब्दवाच्या प्रकृतिः। एवं श्रुत्यन्तरानुरोधेन ऐतदात्म्यशब्दार्थो निश्चितः। अथात्र छान्दोग्ये एव पूर्वश्रुत्यनुसारेणाय-

अत्रापि 'अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि' (छां. ६।३।२) इति ब्रह्मात्मकजीवानुप्रवेशेनैव सर्वेषां वस्तुत्वं शब्दवाच्यत्वञ्च प्रतिपादितम्। तदनुप्रविश्य सच्च त्यच्चाभवदित्यनेनैकार्थ्यात्। जीवस्यापि ब्रह्मात्मकत्वम् ब्रह्मानुप्रवेशादेवेत्यवगम्यते। अतश्चिदचिदात्मकस्य सर्वस्य वस्तुजातस्य ब्रह्मतादात्म्यमात्मशरीरभावादेवेति निश्चीयते। तस्माद्ब्रह्मव्यतिरिक्तस्य कृत्स्नस्य तच्छरीरत्वेनैव वस्तुत्वात् तस्य प्रतिपादकोऽपि शब्दः तत्पर्यन्तमेव स्वार्थमभिदधाति। अतः सर्वशब्दानां लोकव्युत्पत्त्यावगततत्तत्पदार्थविशिष्टब्रह्माभिधायित्वं सिद्धमित्यैतदात्म्यमिदं सर्वमिति प्रतिज्ञातार्थस्य तत्त्वमसीतिसामानाधिकरण्येन विशेषेणोपसंहारः।

अतो निर्विशेषवस्त्वैक्यवादिनो भेदाभेदवादिनः केवलभेदवादिनश्च वैयधिकरण्येन सामानाधिकरणेन च सर्वे ब्रह्मात्मभावोपदेशाः परित्यक्ताः स्युः।

मर्थो निश्चीयत इत्याह—**अत्रापीति। जीवेनात्मना**। जीवशरीरकेण मया। **ब्रह्मात्मकेति**। ब्रह्म आत्मा अन्तर्यामी यस्य तादृशजीवानुप्रवेशेनेत्यर्थः। नामरूपे इति पदं व्याचष्टे—**वस्तुत्वं शब्दवाच्यत्वं चेति**। तत्तद्देवादिवस्तुत्वं देवादिशब्दवाच्यत्वं चेत्यर्थः। देवादिशब्दानां देवादिशरीरकब्रह्मवाचकत्वात्। एतेन नामरूपयोर्निर्वहितेति श्रुतिप्रतिपादितं ब्रह्मणो नामनिर्वाहकत्वं व्याख्यातम्। **तत्पर्यन्तमेवेति**। यथा गुणवाचकोऽपि शुक्लादिशब्दो गुणिपर्यन्तमर्थमभिदधाति तथेत्यर्थः। **उपसंहार इति**। तथा च तत्त्वमसीत्यत्र न किंचिदुद्दिश्य किमपि विधीयते। किं तु प्राक् प्रतिपादितस्य जगद्ब्रह्मणोः शरीरशरीरिभावस्य सामानाधिकरण्यप्रतिपादनद्वारोपसंहारः क्रियते इति भावः।

अत इति। श्रुतिप्रतिपादितस्य जगद्ब्रह्मणोः शरीरशरीरिभावस्य स्वीकारेणैव द्विविधोपदेशस्य संगतत्वादित्यर्थः। आत्मोपदेशो हि द्विधा। क्वचिद्वैयधिकरण्येन। यथा—अस्यैष आत्मेति। क्वचित्सामानाधिकरण्येन। यथा—तत्त्वमसीति। द्विविधोऽप्ययमुपदेशः शरीरशरीरिभावे स्वीकृते संगच्छते। लोके तथाविधस्थले देवदत्तो गौरः देवदत्तस्य शरीरमिति द्विविधव्यवहारस्य दृष्टत्वात्। **भेदाभेदवादिनः**। औपाधिको भेदः वास्तविकस्त्वभेद इति वादिनः। भेदश्चाभेदश्चेति द्वयमपि वास्तविकमेवेति वादिनश्चेत्यर्थः।

एकस्मिन् वस्तुनि कस्य तादात्म्यमुपदिश्यते । तस्यैवेति चेत्, तत् स्ववाक्येनैवावगतमिति न तादात्म्योपदेशावसेयमस्ति किञ्चित् । कल्पितभेदनिरसनमिति चेत् । तत्तु न सामानाधिकरण्यतादात्म्योपदेशावसेयमित्युक्तम् । सामानाधिकरण्यं तु ब्रह्मणि प्रकारद्वयप्रतिपादनेन विरोधमेवावहेत् । भेदाभेदवादे तु ब्रह्मण्येवोपाधिसंसर्गात् तत्प्रयुक्तजीवगतदोषा ब्रह्मण्येव प्रादुःष्युरिति निरस्तनिखिलदोषकल्याणगुणात्मकब्रह्मात्मभावोपदेशा हि विरोधादेव परित्यक्ताः स्युः । स्वाभाविकभेदाभेदवादेऽपि ब्रह्मणः स्वत एव जीवभावाभ्युपगमात् गुणवद्दोषाश्च स्वाभाविका भवेयुरिति निर्दोषब्रह्मतादात्म्योपदेशा विरुद्धा एव । केवलभेदवादिनाश्चात्यन्तभिन्नयोः केनापि प्रकारेणैक्यासम्भवादेव ब्रह्मात्मभावोपदेशो न सम्भवतीति सर्ववेदान्तपरित्यागः स्यात् ।

निखिलोपनिषत्प्रसिद्धं कृत्स्नस्य ब्रह्मशरीरभावमातिष्ठमानैः कृत्स्नस्य ब्रह्मात्मभावोपदेशाः सर्वे सम्यगुपपादिता भवन्ति । जातिगुणयोरिव द्रव्याणामपि शरीरभावेन विशेषणत्वेन गौरश्वो मनुष्यो देवो जातः कर्मभिरिति सामानाधिकरण्यं लोकवेदयोर्मुख्यमेव दृष्टचरम् । जातिगुण-

---

तत्रादौ निर्विशेषवस्त्वैक्यवादिनः सर्वमिथ्यात्ववादिनो मते उपदेशासंगतिं दर्शयति—**एकस्मिन्निति** । शङ्कते—**तस्यैवेति** । **स्ववाक्येन** । सत्यं ज्ञानमित्यादिना स्वरूपप्रतिपादकवाक्येन । तत्त्वमसीत्याद्युपदेशेन स्वरूपवाक्याद्धिकं किंचिदुच्यते न वा । आद्ये वस्तुनः सविशेषत्वापत्तिः । अन्त्ये उपदेशवैयर्थ्यमित्याशयः । पुनः शङ्कते—**कल्पितेति** । **तत्तु नेति** । सामानाधिकरण्येन तादात्म्योपदेशावसेयं नेत्यर्थः । सामानाधिकरण्यस्य प्रकारद्वयोपस्थापकत्वादिति भावः । प्रत्युतानिष्टमाह—**सामानाधिकरण्यमिति** । अथौपाधिकभेदाभेदवादिनो मते उपदेशासंगतिं दर्शयति—**भेदाभेदेति** । सर्वज्ञत्वादिगुणविशिष्टस्येश्वरस्य तद्विरुद्धजीवतादात्म्यं न संभवति । अथ कथंचित्तत्स्वीकारे तु ब्रह्मणः सदोषत्वमापद्येतेत्याशयः । **गुणवदिति** । यथा ब्रह्मण ईश्वरांशेन सर्वज्ञत्वादिगुणाः स्वाभाविकास्तथा जीवांशेन दोषा अपि स्वाभाविकाः स्युरित्याशयः ।

अथ स्वमते उपदेशसंगतिं दर्शयति—**निखिलेति** । **सम्यक्** । मुख्यत्वेन । यथा गो इति जातिशब्दस्य जातिविशिष्टव्यक्तिपर्यंतमपि शक्तिसत्वात् मत्वर्थीयप्रत्ययं विनाप्ययं गौरिति सामानाधिकरण्यं, यथा वा शुक्ल इति गुणशब्दस्य गुणविशिष्टव्य-

योरपि द्रव्यप्रकारत्वमेव षण्डो गौः शुक्लः पट इति तथासामानाधिकरण्यनिबन्धनम् । मनुष्यत्वादिविशिष्टपिण्डानामप्यात्मनः प्रकारतयैव पदार्थत्वान्मनुष्यः पुरुषः षण्डो योषिद्वाआत्मा जात इति सामानाधिकरण्यं सर्वत्रानुगतमिति प्रकारत्वमेव सामानाधिकरण्यनिबन्धनम् । न परस्परव्यावृत्ता जात्यादयः । स्वनिष्ठानामेव हि द्रव्याणां कदाचित् क्वचिद्द्रव्यविशेषणत्वे मत्वर्थीयः प्रत्ययो दण्डी कुण्डलीति न पृथक्प्रतिपत्तिस्थित्यनर्हाणां द्रव्याणाम् । तेषां विशेषणत्वं सामानाधिकरण्यावसेयमेव ।

यदि गौरश्वो मनुष्यो देवः पुरुषो योषित् षण्ड आत्मा कर्मभिर्जात इत्यत्र षण्डो मुण्डो गौः शुक्लः कृष्णः पट इति जातिगुणवदात्मप्रकारत्वं मनुष्यादिशरीराणामिष्यते । तर्हि जातिव्यक्त्योरिव प्रकारप्रकारिणोः शरीरात्मनोरपि नियमेन सहप्रतिपत्तिः स्यात् । न चैवं दृश्यते । न हि नियमेन गोत्वादिवदात्माश्रयतयैवात्मना सह मनुष्यादिशरीरं पश्यन्ति । अतो मनुष्य आत्मेति सामानाधिकरण्यं लाक्षणिकमेव ।

क्तिपर्यन्तमपि शक्तिसत्वादयं शुक्ल इति सामानाधिकरण्यं तथा सर्वं खल्विदं ब्रह्मेत्यादौ जगद्वाचिसर्वादिशब्दानां शरीरभूतजगद्विशिष्टब्रह्मपर्यन्तमपि शक्तिसत्वादेव सामानाधिकरण्यम् । एवंच यथा गोशुक्लादिशब्दाज्जातिगुणयोर्विशेषणत्वेनैव बोधस्तथा द्रव्यादिवाचकेभ्यो घटपटादिसर्वशब्देभ्यस्तत्तद्द्रव्यादेर्विशेषणतयैव बोधो विशेष्यतया त्वात्मन एवेति बोध्यम् । **द्रव्यप्रकारत्वमेवेति** । द्रव्यनिरूपितविशेषणत्वमेव । विशेषणत्वमेव तादृशसामानाधिकरण्यस्य बीजं न तु जात्यादि । **प्रकारतयैव पदार्थत्वादिति** । यथा गोत्वजातेर्गोपदवाच्यत्वं व्यक्तिविशेषणतयैव तथेत्यर्थः। **परस्परव्यावृत्ता इति** । जातेः सामानाधिकरण्यप्रयोजकत्वेऽयं शुक्ल इत्यादौ सामानाधिकरण्यं न स्यात् । गुणस्य तथात्वेऽयं गौरित्यादौ सामानाधिकरण्यं न स्यादित्याशयः । ननु प्रकारभूतद्रव्यवाचकशब्दानां मत्वर्थीयप्रत्ययनिरपेक्षविशेष्यपर्यन्ताभिधायित्वं न स्वीकर्तुं शक्यम् । दण्डी पुरुष इत्यादौ मत्वर्थीयप्रत्ययं विना सामानाधिकरण्यस्यादृष्टत्वादिति चेत्तत्राह—**स्वनिष्ठानामेवेति** । न तु प्रकारतयैव पदार्थभूतानाम् । तथा चापृथक्सिद्धप्रकारवाचकत्वमेव मत्वर्थीयप्रत्ययनिरपेक्षसामानाधिकरण्ये प्रयोजकमिति सिद्धम् ।

शङ्कते—**यदीति** । **पश्यन्तीति** । तथा च घटादिशब्दाः नापृथक्सिद्धप्रकार-

नैतदेवम् । मनुष्यादिशरीराणामप्यात्मैकाश्रयत्वं तदेकप्रयोजनत्वं तत्प्रकारत्वञ्च जात्यादितुल्यम् । अत्मैकाश्रयत्वमात्मविश्लेषे शरीरविनाशादवगम्यते । आत्मैकप्रयोजनत्वञ्च तत्तत्कर्मफलभोगार्थतयैव सद्भावात् । तत्प्रकारत्वमपि देवो मनुष्य इत्यात्मविशेषणतयैव प्रतीतेः । एतदेव हि गवादिशब्दानां व्यक्तिपर्यन्तत्वे हेतुः । एतत्स्वभावविरहादेव दण्डादीनां विशेषणत्वे दण्डी कुण्डलीति मत्वर्थीयः प्रत्ययः । देवमनुष्यादिपिण्डानामात्मैकाश्रयत्वतदेकप्रयोजनत्वतत्प्रकारत्वस्वभावात्, देवो मनुष्य आत्मेति लोकवेदयोः सामानाधिकरण्येन व्यवहारः । जातिव्यक्त्योर्नियमेन सहप्रतीतिरुभयोश्चाक्षुषत्वात् । आत्मनस्त्वचाक्षुषत्वाच्चक्षुषा शरीरग्रहणवेलायामात्मा न गृह्यते । पृथगग्रहणयोग्यस्य प्रकारतैकस्वरूपत्वं दुर्घटमिति मा वोचः । जात्यादिवत्तदेकाश्रयत्वतदेकप्रयोजनत्वतद्विशेषणत्वैः शरीरस्यापि तत्प्रकारतैकस्वभावत्वावगमात् । सहोपलम्भनियमस्त्वेकसामग्रीवेद्यत्वनिबन्धन इत्युक्तम् । यथा चक्षुषा पृथिव्यादेर्गन्धरसादिसम्बन्धित्वं

वाचकाः सहोपलम्भप्रयोजकत्वाभावादिति नेयां केवलद्रव्यादिवाचकत्वमेव नात्मपर्यन्तार्थवाचकत्वमिति सर्वं खल्विदमिति सामानाधिकरण्यं सिद्धान्तिनोऽपि न मुख्यं संभवतीत्याशयः ।

जात्यादितुल्यमिति । तथा च जात्यादिवच्छरीराण्यपि आत्मनोऽपृथक्सिद्धप्रकारभूतान्येवेति बोध्यम् । ननु तर्ह्यात्मशरीरयोर्जातिव्यक्त्योरिव कुतो न सहोपलम्भ इत्याशङ्क्य जातिव्यक्तिवैलक्षण्यं दर्शयति–**जातिव्यक्त्योरिति** । शङ्कते–**पृथग्ग्रहणेति** । जातेर्व्यक्त्या सहैव ग्रहणेन तस्या व्यक्तिविशेषणत्वैकस्वरूपमस्तु शरीरस्य तु पृथग्ग्रहणयोग्यस्यात्मना सहैव ग्रहणाभावेन कथमात्मविशेषणत्वैकस्वरूपमित्याशयः । **मा वोच इति** । विशेषणतैकस्वभावत्वे न पृथग्ग्रहणायोग्यत्वं प्रयोजकमिति भावः । किं तर्हि तत्प्रयोजकमित्याह–**तदेकाश्रयत्वेति** । ननु यदि तदेकाश्रयत्वाद्येवापृथग्विशेषणत्वे प्रयोजकं तर्हि कथं जात्यादाविव सहोपलम्भनियमो न शरीरादाविति चेत्तत्राह–**सहोपलम्भेति** । **यथेति** । तथाचाक्षुषस्यापि गन्धस्य पृथिवीप्रकारतैकस्वभावत्वं हीयते इति भावः ।

---

१ क. ख. प्रकारतयैक०

स्वाभाविकमपि न गृह्यते । एवं चक्षुषा गृह्यमाणं शरीरमात्मप्रकारैक-स्वभावमपि न तथा गृह्यते । आत्मग्रहणे चक्षुषः सामर्थ्याभावात् । नैतावता शरीरस्य तत्प्रकारत्वस्वभावविरहः । तत्प्रकारैकस्वभावत्वमेव सामानाधिकारण्यनिबन्धनम् ।

आत्मप्रकारतया प्रतिपादनसमर्थस्तु शब्दः सहैव प्रकारतया प्रति-पादयति । ननु च, शाब्देऽपि व्यवहारे शरीरशब्देन शरीरमात्रं गृह्यत इति नात्मपर्यन्तता शरीरशब्दस्य । नैवम् । आत्मप्रकारभूतस्यैव शरीरस्य पदार्थविवेकप्रदर्शनाय निरूपकाणां निष्कर्षकशब्दोऽयम् । यथा गोत्वं शुक्लत्वमाकृतिर्गुण इत्यादिशब्दाः । अतो गवादिशब्दवद्देवमनुष्यादिशब्दा आत्मपर्यन्ताः । एवं देवमनुष्यादिपिण्डविशिष्टानां जीवानां परमात्मशरी-रतया, तत्प्रकारत्वात् जीवात्मवाचिनः शब्दाः परमात्मपर्यन्ताः । अतः परस्य ब्रह्मणः प्रकारतयैव चिदचिद्वस्तुनः पदार्थत्वमिति तत्सामानाधि-करण्येन प्रयोगः । अयमर्थो वेदार्थसंग्रहे समर्थितः । इदमेव शरीरात्म-भावलक्षणं तादात्म्यम् ' आत्मेति तूपगच्छन्ति ग्राहयन्ति च ' (ब्र.

यद्यपि शरीरग्रहणवेलायां नात्मनश्चक्षुषा ग्रहणमसामर्थ्यात्तथापि शब्दप्रमाणेनो-भयोर्युगपद्ग्रहणं भवत्येवेत्याशयेनाह—**आत्मप्रकारतयेति । शब्दः** । देवमनुष्यादि-शब्दः । **नात्मपर्यन्तता** । नात्मपर्यन्तार्थवाचकत्वम् । यथा श्रुतौ यस्य पृथिवी शरीर-मित्यादि । लोके च देवदत्तस्येदं शरीरमित्यादि । तथा च शरीरशब्दाच्छरीरस्यात्म-प्रकारत्वेन बोधो न भवतीति शरीरस्य प्रकारैकस्वभावत्वं न सिध्यतीति शङ्का-शयः । **पदार्थविवेकेति** । यथा व्यक्तेः सकाशाज्जातेः पृथक्त्वेन निरूपणप्रसङ्गे निरूप-कैः पुरुषैर्गोत्वादिशब्दैः सा व्यवह्रियते तथात्मनः सकाशाच्छरीरस्य पृथक्त्वेन नि-रूपणप्रसङ्गे शरीरशब्देन व्यवहार इति नैतावता शरीरस्य प्रकारैकस्वभावत्वहानिरि-ति भावः । **प्रयोग इति** । एवं च तत्त्वमसीत्यत्र चिदचिच्छरीरकस्य कारणावस्थ-स्य तत्पदवाच्यस्य ब्रह्मणः कार्यावस्थस्य च चिदचिच्छरीरकस्य त्वंपदवाच्यस्य ब्रह्मण एकत्वं प्रतिपादितं भवतीति बोध्यम् । पूर्वपक्षिणा स्वमतसाधकत्वेन प्राग्दर्शितं (पृ. ३२ पं. ५) सूत्रं वाक्यकारवचनं च स्वमतानुगुण्येन योजयति—**इदमेवेति** । न तु निर्विशेषवस्त्वैक्यरूपम् । प्रागुक्तश्रुतियुक्त्यादिविरोधादिति भावः । **आत्मेति त्विति** । तुशब्दोऽवधारणे । उपासकेन ब्रह्म आत्मत्वेनैवोपास्यं नान्यत्वेन ।

सू. ४।१।३) इति वक्ष्यति । आत्मेत्येव तु गृह्णीयादिति च वाक्यकारः ।

अत्रेदं तत्त्वम् । अचिद्वस्तुनश्चिद्वस्तुनः परस्य च ब्रह्मणो भोग्यत्वेन भोक्तृत्वेन चेशितृत्वेन स्वरूपविवेकमाहुः काश्चन श्रुतयः ।

'अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया सन्निरुद्धः

मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्' (श्वे. ४।९-१०)

'क्षरं प्रधानममृताक्षरं हरः । क्षरात्मानावीशते देव एकः' (श्वे. १।१०) अमृताक्षरं हर इति भोक्ता निर्दिश्यते । प्रधानमात्मनो भोग्यत्वेन हरतीति हरः । 'स कारणं करणाधिपाधिपः न चास्य कश्चिज्जनिता न चाधिपः' (श्वे. ६।९) 'प्रधानक्षेत्रज्ञपतिर्गुणेशः' (श्वे. ६।१६) 'पतिं विश्वस्यात्मेश्वरं शाश्वतं शिवमच्युतम्' (ना. ११।३) ज्ञाज्ञौ द्वावजावीशानीशौ' (श्वे. १।९) 'नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्' (श्वे. ६।१३) 'भोक्ता भोग्यं प्रेरितारञ्च मत्वा' (श्वे. १।१२)

'तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति' (श्वे. ४।६)

'पृथगात्मानं प्रेरितारञ्च मत्वा जुष्टस्ततस्तेनामृतत्वमेति' (श्वे. १।६)

यतः पूर्वे उपासकास्तथैवाभ्युपगच्छन्ति । तथा च श्रुतिः । 'त्वं वा अहमस्मि भगवो देवतेऽहं वै त्वमसि' (ऐ. आ. २।२।४।६) इति । किंच 'य आत्मनि तिष्ठन्' इत्यादिशास्त्राणि इममर्थमुपासकानविरुद्धत्वेन ग्राहयन्तीति सूत्रार्थः ।

अचिदिति । अचिद्वस्तुनो घटादेर्भोग्यत्वेन चिद्वस्तुनो जीवस्य तद्भोक्तृत्वेन परस्य ब्रह्मणश्च तयोरीशितृत्वेन तेषां स्वरूपतो भेदमाहुरित्यर्थः । **क्षरमिति** । क्षरं विनाशि प्रधानं त्रिगुणात्मकमचिद्रूपं भोग्यम् । हरः जीवात्मा अमृताक्षरस्वरूपो भोक्ता तौ क्षरात्मानौ एको देवः परमेश्वरः ईशते नियच्छतीत्यर्थः । **स इति** । सः परमेश्वरः सर्वस्य कारणं करणानामिन्द्रियाणामधिपस्य जीवस्याधिप इत्यर्थः । **प्रधानेति** । प्रधानक्षेत्रज्ञयोर्भोग्यभोक्त्रोः पतिरित्यर्थः । **ज्ञाज्ञाविति** । ज्ञः ईश्वरः । अज्ञो जीवः । ईशो नियन्ता । तद्भिन्नोऽनीशः **भोक्तेति** । जीवो भोक्ता अचिद्वस्तु भोग्यमिति मत्वा तथा तयोः प्रेरितारं परमेश्वरं च मत्वेत्यर्थः । **पृथगिति** । अनेन भेदज्ञानस्य मोक्षहेतुत्वं सूचितम् । पृथगात्मानं प्रेरितारं च मत्वेत्यस्य 'भ्राम्यते ब्रह्मचक्रे' इत्यनेन

'अजामेकां लोहितशुक्लकृष्णां बह्वीं प्रजां जनयन्तीं सरूपाम् ।
अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः'
(तै. आ. ६।१०)

'समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः ।
जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमितरो वीतशोकः' (श्वे.४।७)

इत्याद्याः । स्मृतावपि ।

'अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥
अपरेयम्, इतस्त्वन्यां प्रकृतिं विद्धि मे पराम् ।
जीवभूतां महाबाहो ययेदन्धार्यते जगत्' (गी. ७।४-५)

'सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम् ।
कल्पक्षये, पुनस्तानि कल्पादौ विसृजाम्यहम् ॥
प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः ।
भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात्' (गी. ९।७-८)

'मयाध्यक्षेण प्रकृतिः सूयते सचराचरम् ।
हेतुनानेन कौन्तेय जगद्विपरिवर्तते' (गी. ९।१०)

'प्रकृतिं पुरुषञ्चैव विद्ध्यनादी उभावपि' (गी. १३।१९)

'मम योनिर्महद्ब्रह्म तस्मिन् गर्भं दधाम्यहम् ।
सम्भवः सर्वभूतानां ततो भवति भारत' (गी. १४।३)

इति । जगद्योनिभूतं महद्ब्रह्म, मदीयं प्रकृत्याख्यं भूतसूक्ष्ममचिद्वस्तु, य-

---

पूर्वेणान्वय इति परेषां व्याख्यानमस्वरसग्रस्तम् । **अजाम्** । मूलप्रकृतिम् । **लोहितशुक्लकृष्णाम्** । त्रिगुणात्मिकाम् । अत्र श्रुतौ मुक्तावपि जीवेश्वरयोर्भेदः सूच्यते । **वृक्षे** । शरीरे । असामर्थ्येन मुह्यमानो जीवः शोचति । यदा सोऽन्यमीशं पश्यति अस्येशस्य महिमानं च पश्यति तदा वीतशोको भवतीत्यर्थः । अनेन जीवेश्वरयोः स्वतो भेदः सिध्यति । **अहङ्कार इति** । भूमिरापोऽनलो वायुः खं मनो बुद्धिरेवचेति पूर्वार्धोपात्तसप्तकमहङ्कारश्चेत्यष्टधा प्रकृतिरित्यर्थः । अनेन श्लोकेन 'सर्वभूतानि' इत्युत्तरश्लोकैश्च कारणावस्थायामपि भेदः सिद्धो भवति । मयाध्यक्षेणेत्यनेन स्वभावासंकरश्च सूच्यते । **भूतसूक्ष्मम्** । कारणावस्थम् ।

स्मिंश्चेतनाख्यं गर्भं संयोजयामि । ततो मतकृताच्चिदचित्संसर्गाद्देवादिस्थावरान्तानामचिन्मिश्राणां सर्वभूतानां सम्भवो भवतीत्यर्थः ।

एवं भोक्तृभोग्यरूपेणावस्थितयोः सर्वावस्थावस्थितयोश्चिदचितोः परमपुरुषशरीरतया तन्नियाम्यत्वेन तदपृथक्स्थितिं परमपुरुषस्य चात्मत्वमाहुः काश्चन श्रुतयः । 'यः पृथिव्यान्तिष्ठन् पृथिव्या अन्तरो, यं पृथिवी न वेद, यस्य पृथिवी शरीरं, यः पृथिवीमन्तरो यमयति ' (बृ. ३।७।३) इत्यारभ्य, य आत्मनि तिष्ठन् आत्मनोऽन्तरो, यमात्मा न वेद, यस्यात्मा शरीरं, य आत्मानमन्तरो यमयति, स त आत्मान्तर्याम्यमृत इति । तथा, ' यः पृथिवीमन्तरे सञ्चरन् , यस्य पृथिवी शरीरं, यं पृथिवी न वेदेत्यारभ्य यो मृत्युमन्तरे सञ्चरन् , यस्य मृत्युः शरीरम् , यं मृत्युर्न वेद, एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायणः' (ना. २)। अत्र मृत्युशब्देन तमःशब्दवाच्यं सूक्ष्मावस्थमचिद्वस्त्वभिधीयते। अस्यामेवोपनिषदि, अव्यक्तमक्षरे लीयते, अक्षरं तमसि लीयत इतिवचनात् । ' अन्तःप्रविष्टःशास्ता जनानाम् ' ' सर्वात्मा ' (कै. १०) इति च ।

एवं सर्वावस्थावस्थितचिदचिद्वस्तुशरीरतया तत्प्रकारः परमपुरुष एव कार्यावस्थकारणावस्थजगद्रूपेणावस्थित इतीममर्थं ज्ञापयितुं काश्चन श्रुतयः कार्यावस्थं कारणावस्थञ्च जगत् स एवेत्याहुः ' सदेव सोम्येदमग्र आसीत् । एकमेवाद्वितीयम् ' (छां. ६।२।१) ' तदैक्षत, बहु स्यां प्रजायेयेति । तत्तेजोऽसृजत ' (छां. ६।२।३) इत्यारभ्य, ' सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः ' (छां. ६।८।४) ' ऐतदात्म्यमिदं सर्वम् । तत् सत्यम् । स आत्मा । तत्त्वमसि श्वेतकेतो ' (छां. ६।८।७) ' सोऽकामयत । बहु स्यां प्रजायेयेति । स तपोऽतप्यत । स तपस्तप्त्वा

सर्वावस्थावस्थितयोः । स्थूलसूक्ष्मरूपसर्वावस्थावस्थितयोः । **इति वचनादिति** । अत्राक्षरस्य तमसि सूक्ष्मावस्थाचिद्वस्तुनि लयबोधनेन तमसोऽक्षरात्परत्वं प्रतीयते । तदनुरोधेन योऽक्षरमन्तरे इत्यक्षरात्परत्र यो मृत्युमन्तरे इति श्रुतौ तम एव प्रत्येतव्यमिति तम एव मृत्युशब्देनाभिधीयते इति बोध्यम् ।

इदं सर्वमसृजत ' (तै. २।६।१) इत्यारभ्य, ' सत्यञ्चानृतञ्च सत्यमभवत् ' (तै. २।६।१) इत्याद्याः । अत्रापि श्रुत्यन्तरसिद्धश्चिदचितोः परमपुरुषस्य च स्वरूपाविवेकः स्मारितः । ' हन्ताहमिमास्तिस्रो देवता, अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि ' (छां. ६।३।२) इति । ' तत् सृष्ट्वा तदेवानुप्राविशत् । तदनुप्रविश्य सच्च त्यच्चाभवत् .... विज्ञानञ्चाविज्ञानञ्च, सत्यञ्चानृतञ्च सत्यमभवत् ' (तै. २।६।१) इति च । अनेन जीवेनात्मनानुप्रविश्येति जीवस्य ब्रह्मात्मकत्वं, तदनुप्रविश्य सच्च त्यच्चाभवत् , विज्ञानञ्चाविज्ञानञ्चेत्यनेनैकार्थ्यादात्मशरीरभावनिबन्धनमिति विज्ञायते । एवम्भूतमेव नामरूपव्याकरणं, ' तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यां व्याक्रियत ' (बृ. १।४।७) इत्यत्राप्युक्तम् ।

अतः कार्यावस्थः कारणावस्थश्च स्थूलसूक्ष्मचिदचिद्वस्तुशरीरः परमपुरुष एवेति कारणात् कार्यस्यानन्यत्वेन, कारणविज्ञानेन कार्यस्य विज्ञाततयैकविज्ञानेन सर्वविज्ञानञ्च समीहितमुपपन्नतरम् । ' हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि ' (छां.

अत्रापीति । छान्दोग्ये तैत्तिरीयके चेत्यर्थः । **तिस्रो देवताः** । पृथिव्यप्तेजोरूपाः । **सच्च त्यच्चेति** । मूर्तं चामूर्तं चेत्यर्थः । **विज्ञानं चाविज्ञानं चेति** । चिद्रूपमाचिद्रूपं चेत्यर्थः । अत्र परमात्मैवानुप्रवेशेन चिदचिद्रूपोऽभवदित्युक्त्या परमात्मनश्चिदचिद्रूपं शरीरमिति प्रतीयते । यद्यपि ' अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि ' इति पूर्वोक्तछान्दोग्यश्रुतौ चिदचिद्रूपशरीरस्यानुल्लेखस्तथापि तैत्तिरीयकश्रुत्यनुरोधात्तत्र तत्स्वीकार्यम् । अतस्तत्र जीवेनात्मनेति पदद्वयप्रतिपादितं जीवस्य ब्रह्मात्मकत्वं शरीरशरीरिभावमूलकमेव न तु सर्वथैक्यमूलकमिति बोध्यम् । तदेवाह—**अनेन जीवेनेति** । **एवम्भूतमेव** । अनुप्रवेशपूर्वकमेव । बृहदारण्यके सामान्येनोक्तमपि नामरूपव्याकरणमुक्तश्रुत्यनुरोधादनुप्रवेशपूर्वकमेव स्वीकार्यमिति भावः । एतेन जीवानामुत्पत्तिर्न स्वरूपनिष्पत्तिः किं तु नामरूपव्याकरणमेव । तथा जीवानां प्रलयो न स्वरूपनाशः किन्तु नामरूपव्याकरणाभाव इति ध्वनितम् ।

अथ सर्वश्रुतीनामस्मिन्नर्थे मुख्यत्वं दर्शयति—**अत इति** । एवमेकविज्ञानेन सर्वविज्ञानप्रतिज्ञामुपपाद्य तत्त्वमसीत्यादिसामानाधिकरण्यमुपपादयति—**हन्ताहमिति** ।

१।३।२) इति तिस्रो देवता इति सर्वमचिद्वस्तु निर्दिश्य, तत्र स्वात्मकजीवानुप्रवेशेन नामरूपव्याकरणवचनात्, सर्वे वाचकाः शब्दा अचिज्जीवविशिष्टपरमात्मन एव वाचका इति कारणावस्थपरमात्मवाचिना शब्देन कार्यवाचिनः शब्दस्य सामानाधिकरण्यं मुख्यवृत्तम्। अतः स्थूलसूक्ष्मचिदचितप्रकारकं ब्रह्मैव कार्यं कारणं चेति ब्रह्मोपादानं जगत्। सूक्ष्मचिदचिद्वस्तुशरीरं ब्रह्मैव कारणमिति ब्रह्मोपादानत्वेऽपि सङ्घातस्योपादानत्वेन चिदचितोर्ब्रह्मणश्च स्वभावासङ्करोऽप्युपपन्नतरः। यथा–शुक्लरक्तकृष्णतन्तुसङ्घातोपादानत्वेऽपि चित्रपटस्य तत्तत्तन्तुप्रदेश एव शौक्ल्यादिसम्बन्ध इति कार्यावस्थायामपि न सर्वत्र वर्णसङ्करः, तथा चिदचिदीश्वरसङ्घातोपादानत्वेऽपि जगतः कार्यावस्थायामपि भोक्तृत्वभोग्यत्वनियन्तृत्वाद्यसङ्करः। तन्तूनां पृथक्स्थितियोग्यानामेव पुरुषेच्छया कदाचित् संहतानां कारणत्वं कार्यत्वञ्च। इह तु सर्वावस्थावस्थयोः परमपुरुषशरीरत्वेन चिदचितोस्तत्प्रकारतयैव पदार्थत्वात् तत्प्रकारः परम-

---

स्वात्मकेति। स्वमात्मा यस्येति बहुव्रीहिः। स्वशरीरभूतजीवानुप्रवेशेनेत्यर्थः। **सर्वे वाचका इति**। अचिद्वस्तुवाचका घटादयः शब्दा अचिद्वस्तुविशिष्टपरमात्मवाचकाः। चिद्वस्तुवाचका जीवादयः शब्दाश्चिद्वस्तुविशिष्टपरमात्मवाचकाः।अत एव श्रुतौ नामरूपव्याकरणात्पूर्वमनुप्रवेशकथनम्। घटादिशब्दानां परमात्मपर्यन्तार्थवाचकत्वाभावे तु नामरूपव्याकरणहेतुत्वेन परमात्मानुप्रवेशकथनमसंगतं स्यादिति बोध्यम्। **मुख्यवृत्तमिति**। तथा च निर्विशेषवस्त्वैक्यं न कार्यकारणयोरैक्यप्रतिपादनेन सिध्यति, न चैकविज्ञानेन सर्वविज्ञानप्रतिज्ञया, नापि सामानाधिकरण्येन। कार्यकारणैक्यपराणां श्रुतीनां तयोरेकद्रव्यत्वमेव प्रतिपाद्यं न तु विशिष्टत्वनिषेध इति बोध्यम्। उपादानत्वेऽपि स्वभावासंकरमाह–**सूक्ष्मेति**। **संघातस्य**। सूक्ष्मचिद्वस्तुसूक्ष्माचिद्वस्तु–ब्रह्म एतत्त्रितयसंघातस्य। एतदेव दृष्टान्तेन विशदयति–**यथा शुक्लेति**। ननु संघातस्य कारणत्वे यथा पटादेः कारणप्रदर्शनवेलायां पुरुषात्पृथक् तन्त्वादीनामुल्लेखस्तथा जगतः कारणप्रदर्शनवेलायां सूक्ष्मचिदचितोः कुतो नोल्लेख इति चेन्न। चिदचितोः पुरुषात्पृथक्स्थितियोग्यत्वाभावेन तदुल्लेखस्यानावश्यकत्वात्। तदाह–**तन्तूनामिति**। **तत्प्रकारतयैव**। परमात्मविशेषणतयैव। यथा गोत्वजातेर्गोपदवाच्यत्वं

पुरुषः सर्वदा सर्वशब्दवाच्य इति विशेषः। स्वभावभेदस्तदसङ्करश्च तत्र चात्र च तुल्यः। एवं च सति, परस्य ब्रह्मणः कार्यानुप्रवेशेऽपि स्वरूपान्यथाभावाभावादविकृतत्वमुपपन्नतरम्। स्थूलावस्थस्य नामरूपविभागविभक्तस्य चिदचिद्वस्तुन आत्मतयावस्थानात् कार्यत्वमप्युपपन्नतरम्। अवस्थान्तरापत्तिरेव हि कार्यता।

निर्गुणवादाश्च परस्य ब्रह्मणो हेयगुणासम्भवादुपपद्यन्ते। 'अपहतपाप्मा विजरो विमृत्युर्विशोकोऽविजिघत्सोऽपिपासः' (छां. ८।१।५) इति हेयगुणान् प्रतिषिध्य, 'सत्यकामः सत्यसङ्कल्पः' (छां. ८।१।५) इति कल्याणगुणान् विदधतीयं श्रुतिरेवान्यत्र सामान्येनावगतं गुणनिषेधं हेयगुणविषयं व्यवस्थापयति।

ज्ञानस्वरूपं ब्रह्मेतिवादश्च, सर्वज्ञस्य सर्वशक्तेरखिलहेयप्रत्यनीककल्याणगुणाकरस्य ब्रह्मणः स्वरूपं ज्ञानैकनिरूपणीयं स्वप्रकाशतया ज्ञानस्वरूपश्चेत्यभ्युपगमादुपपन्नतरः। 'यः सर्वज्ञः सर्ववित्' (मुं. १।१।९) 'परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च' (श्वे. ६।८) 'विज्ञातारमरे केन विजानीयात्' (बृ. २।४।१४) इत्यादिका ज्ञातृत्वमावेदयन्ति। 'सत्यं ज्ञानम्' (तै. २।१।१) इत्यादिकाश्च ज्ञानैकनिरूपणीयतया स्वप्रकाशतया च ज्ञानस्वरूपताम्।

व्यक्तिविशेषणतयैव तथेत्यर्थः। **कार्यतेति**। कार्यावस्थचिदचिन्नियमनरूपावस्थान्तरापत्तिरेव ब्रह्मणः कार्यत्वमिति कार्यत्ववादिनीनां श्रुतीनामर्थो बोध्यः।

अविजिघत्सः। अशनेच्छारहितः।

ज्ञानैकेति। यथा गन्धवत्याः पृथिव्या गन्धेन निरूपणं भवति तथा ज्ञातुरात्मनः ज्ञानेनैव निरूपणं भवतीत्यर्थः। **उपपन्नतर इति**। यद्यपि ज्ञानमात्रस्वरूपब्रह्मवादिनः परस्याप्ययं वाद उपपन्नस्तथापि तस्य ज्ञातृत्वप्रतिपादकश्रुतिविरोधः। अस्माकं तु ज्ञातृत्वप्रतिपादिकाभिर्ज्ञानस्वरूपताप्रतिपादिकाभिश्च श्रुतिभिरविरोध इत्युपपन्नतर इत्युक्तम्। ता उभयविधाः श्रुतीर्दर्शयति—**यः सर्वज्ञ इति**। **ज्ञानस्वरूपतामिति**। आवेदयन्तीति संबन्धः।

'सोऽकामयत बहु स्याम्' (तै. २।६।१) 'तदैक्षत बहु स्याम्' (छां. ६।२।३) 'तन्नामरूपाभ्यां व्याक्रियत' (बृ. १।४।७) इति ब्रह्मैव स्वसङ्कल्पात् विचित्रस्थिरचरस्वरूपतया नानाप्रकारमवस्थितमिति तत्प्रत्यनीकाब्रह्मात्मकं वस्तुनानात्वमतत्त्वमिति तत्प्रतिषिध्यते 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति' (बृ. ४।४।१९) 'नेह नानास्ति किञ्चन' (बृ. ४।४।१९) 'यत्र हि द्वैतमिव भवति····तदितर इतरं पश्यति····यत्र त्वस्य सर्वमात्मैवाभूत्····तत् केन कं पश्येत् ····तत् केन कं विजानीयात्' (बृ. २।४।१४) इत्यादिना। न पुनः 'बहु स्यां प्रजायेय' इत्यादिश्रुतिसिद्धं स्वसङ्कल्पकृतं ब्रह्मणो नानानामरूपभाक्त्वेन नानाप्रकारत्वमपि निषिध्यते। यत्र त्वस्य सर्वमात्मैवाभूदिति निषेधवाक्यादौ च तत् स्थापितम् 'सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेद' (बृ. २।४।६) 'तस्य ह वा एतस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदः' (बृ. २।४।१०) इत्यादिना।

एवञ्चिदचिदीश्वराणां स्वभावभेदं स्वरूपभेदञ्च वदन्तीनां कार्यकारणभावं कार्यकारणयोरनन्यत्वं वदन्तीनाञ्च सर्वासां श्रुतीनामविरोधश्चिदचितोः परमात्मनश्च सर्वदा शरीरात्मभावं शरीरभूतयोः कारणदशायां नामरूपविभागानर्हसूक्ष्मदशापत्तिं, कार्यदशायाञ्च तदर्हस्थूलदशापत्तिं वदन्तीभिः श्रुतिभिरेव ज्ञायत इति ब्रह्माज्ञानवादस्यौपाधिकब्रह्मभेदवादस्या-

---

अथ भेदनिषेधप्रतिपादकश्रुत्युपपत्तिं दर्शयति—**सोऽकामयतेति**। **तत्प्रत्यनीकेति**। तादृशब्रह्मविरुद्धेत्यर्थः। यत्रान्तर्यामित्वेन ब्रह्मणः संबन्धो नास्ति तादृशं ब्रह्मभिन्नं वस्तु नास्त्येव, अतत्त्वमेव तत् इति तदेव श्रुतिषु प्रतिषिध्यते। ऐक्यश्रुतीनां प्रकार्यैक्यपरत्वादैक्यश्रुतिशेषभूतभेदनिषेधोऽपि तदैक्यानुरोधेन प्रकारिभेदनिषेध एव भवितुमर्हतीति भावः। उक्तमर्थमुपक्रमेणैवोपपादयति—**यत्र त्वस्येति**। अत्र सर्वशब्देन ऋग्वेदादिशब्देन च प्रकारभेदस्य स्पष्टमेव प्रतिपादनात्प्रकारिभेदविषयक एव निषेध इत्यवश्यं स्वीकार्यम्। **सर्वं तमिति**। यो ब्रह्मभिन्नं वस्तु ब्रह्मसंबन्धरहितं यथा स्यात्तथा वेत्ति तं पुरुषं तत्सर्वं पराकुर्यादित्यर्थः।

एवमिति। स्वभावभेदं वदन्तीनां श्रुतीनां कार्यकारणभावं वदन्तीभिः श्रुतिभिः सह विरोधो भासते, यश्च स्वरूपभेदं वदन्तीनां कार्यकारणयोरनन्यत्वं वदन्तीभिः

न्यस्याप्यन्यायमूलस्य सकलश्रुतिविरुद्धस्य न कथश्चिदप्यवकाशो दृश्यते। चिदचिदीश्वराणां पृथक्स्वभावतया तत्तच्छ्रुतिसिद्धानां शरीरात्मभावेन प्रकारप्रकारितया श्रुतिभिरेव प्रतिपन्नानां श्रुत्यन्तरेण कार्यकारणभावप्रतिपादनं कार्यकारणयोरैक्यप्रतिपादनञ्च ह्यविरुद्धमिति सिद्धम्। यथाग्नेयादीन् षड्यागानुत्पत्तिवाक्यैः पृथगुत्पन्नान् समुदायानुवादिवाक्यद्वयेन समुदायद्वयत्वमापन्नान् दर्शपूर्णमासाभ्यामित्यधिकारवाक्यं कामिनः कर्तव्यतया विदधाति। तथा चिदचिदीश्वरान् विविक्तस्वरूपस्वभावान्, 'क्षरं प्रधानममृताक्षरं हरः, क्षरात्मानावीशते देव एकः' (श्वे. १।१०) 'प्रधानक्षेत्रज्ञपतिर्गुणेशः' (श्वे. ६।१६) 'पतिं विश्वस्यात्मेश्वरम्' (ना. १३।३) 'आत्मा नारायणः परः' (ना. ११।४) इत्यादिवाक्यैः पृथक् प्रतिपाद्य, यस्य पृथिवी शरीरं, यस्यात्मा शरीरं, यस्याव्यक्तं शरीरं, यस्याक्षरं शरीरम्, 'एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायणः' (ना. २) इत्यादिभिर्वाक्यैश्चिदचितोः सर्वावस्थावस्थितयोः परमात्मशरीरतां परमात्मनस्तदात्मताञ्च प्रतिपाद्य, शरीरिभूतपरमात्माभिधायिभिः सद्ब्रह्मात्मादिशब्दैः कारणावस्थः कार्यावस्थश्च परमात्मैक एवेति पृथक्प्रतिपन्नं वस्तुत्रितयं, 'सदेव सोम्येदमग्र आसीत्' (छां. ६।२।१) 'ऐतदात्म्यमिदं सर्वम्' (छां. ६।८।७) 'सर्वं खल्विदं ब्रह्म' (छां. ३।१४।१) इत्यादिवाक्यं प्रतिपादयति। चिदचिद्वस्तुशरीरिणः परमात्मनः परमात्मशब्देनाभिधाने हि नास्ति विरोधः।

सह विरोधो भासते स वस्तुतो नास्तीति श्रुतिभिरेव ज्ञायते इत्यर्थः। **षड् यागानिति।** आग्नेयः आग्नीषोमीयोपांशुयाजौ ऐन्द्रौ द्वौ ऐन्द्राग्नश्चेति षड् यागाः। **उत्पत्तिवाक्यैः।** अज्ञातार्थबोधकैर्विधिवाक्यैः। **उत्पन्नान्।** प्रतिपादितान्। **वाक्यद्वयेन।** य एवं विद्वान् पौर्णमासीं यजते, य एवं विद्वानमावास्यां यजते इत्यनेन। **अधिकारवाक्यम्।** उक्तदर्शपूर्णमासनामकयागाधिकारः स्वर्गकामस्य मनुष्यस्येत्यधिकारबोधकवाक्यम्। **कामिनः।** स्वर्गकामिनः। **पृथक्प्रतिपन्नमिति।** पृथक्प्रतिपन्नं

यथा मनुष्यपिण्डशरीरकस्यात्मविशेषस्यायमात्मा सुखीत्यात्मशब्देनाभिधान इत्यलमतिविस्तरेण ।

यत्पुनरिदमुक्तं, ब्रह्मात्मैकत्वविज्ञानेनैवाविद्यानिवृत्तिर्युक्तेति । तदयुक्तम् । बन्धस्य पारमार्थिकत्वेन ज्ञाननिवर्त्यत्वाभावात् । पुण्यापुण्यरूपकर्मनिमित्तदेवादिशरीरप्रवेशतत्प्रयुक्तसुखदुःखानुभवरूपस्य बन्धस्य मिथ्यात्वं कथमिव शक्यते वक्तुम् । एवंरूपबन्धनिवृत्तिर्भक्तिरूपापन्नोपासनप्रीतपरमपुरुषप्रसादलभ्येति पूर्वमेवोक्तम् । भवदभिमतस्यैक्यज्ञानस्य यथावस्थितवस्तुविपरीतविषयस्य मिथ्यारूपत्वेन बन्धविवृद्धिरेव फलं भवति ।

'मिथ्यैतदन्यद्द्रव्यं हि नैति तद्द्रव्यतां यतः' (वि. पु. २।१४।२७) इति शास्त्रात् । 'उत्तमः पुरुषस्त्वन्यः' (गी. १५।१७) 'पृथगात्मानं प्रेरितारञ्च मत्वा' (श्वे. १।६) इति जीवात्मविसजातीयस्य तदन्तर्यामिणो ब्रह्मणो ज्ञानं परमपुरुषार्थलक्षणमोक्षसाधनमित्युपदेशाच्च ।

अपि च, भवदभिमतस्यापि निवर्तकज्ञानस्य मिथ्यारूपत्वात् तस्य

यत् वस्तुत्रयं तत् परमात्मैक एव इति सदेवेत्यादिवाक्यं सद्ब्रह्मात्मादिशब्दैः प्रतिपादयतीत्यर्थः ।

अथ सप्तमीं निवृत्त्यनुपपत्तिं दर्शयति–**यत्पुनरिति** । **कर्मनिमित्तेति** । तथा च सुखदुःखानुभवहेतुभूतस्य पुण्यपापरूपस्य कर्मणः सत्यत्वमेवेष्टव्यम् । असत्यस्य निमित्तत्वं न संभवतीति प्राक् (पृ. ८५ पं. ७) उपपादितत्वात् । ततश्च बन्धस्य पारमार्थिकत्वं सिध्यतीति भावः । **एवंरूपेति** । परमार्थस्य ज्ञाननिवर्त्यत्वं दृष्टद्वारा नोपपद्यते, अपि त्वदृष्टद्वारा । यथा सत्यसर्पदष्टविषस्योपासनप्रीतगरुडप्रसादान्निवृत्तिर्न तु मिथ्येति ज्ञानात्तथेत्यर्थः । **यथावस्थितेति** । यथावस्थितं परमात्मनः सकाशाद्भिन्नत्वेनानुभूयमानं चिदचिद्रूपं वस्तु तद्विपरीतविषयकस्याद्वैतज्ञानस्यानुभवविरुद्धत्वेन मिथ्यारूपत्वात्तेन ज्ञानेन बन्धस्य वृद्धिरेव स्यान्न तु निवृत्तिरिति भावः । अद्वैतस्य मिथ्यात्वे प्रमाणमाह–**मिथ्यैतदिति** । प्राक् (पृ. ११५ पं. १८) व्याख्यातम् । अथ भेदज्ञानस्यैव मोक्षसाधनत्वमाह–**उत्तम इति** । **जीवात्मविसजातीयस्य** । न तु जीवात्मरूपस्य ।

अथाविद्यानिवृत्तिस्तर्कविरुद्धेत्याह–**अपि चेति** । **मिथ्यारूपत्वादिति** । ऐक्यविषयकज्ञानं ह्यविद्यानिवर्तकत्वेन तवाभिमतम् । तस्य च मिथ्यात्वं निर्विषयकज्ञान-

निवर्तकान्तरं मृग्यम् । निवर्तकज्ञानमिदं स्वविरोधि सर्वं भेदजातं निवर्त्य क्षणिकत्वात् स्वयमेव विनश्यतीति चेत् , न । तत्स्वरूपतदुत्पत्तिविनाशानां काल्पनिकत्वेन विनाशतत्कल्पनाकल्पकरूपाविद्याया निवर्तकान्तरमन्वेषणीयम् । तद्विनाशो ब्रह्मस्वरूपमेवेति चेत् । तथा सति निवर्तकज्ञानोत्पत्तिरेव न स्यात् । तद्विनाशे तिष्ठति तदुत्पत्त्यसम्भवात् ।

अपि च, चिन्मात्रब्रह्मव्यतिरिक्तकृत्स्ननिषेधविषयज्ञानस्य कोऽयं ज्ञाता । अध्यासरूप इति चेत् , न । तस्य निषेध्यतया निवर्तकज्ञानकर्मत्वात् तत्कर्तृत्वानुपपत्तेः । ब्रह्मस्वरूपमेवेति चेत् । ब्रह्मणो निवर्तकज्ञानं प्रति ज्ञातृत्वं किं स्वरूपम् , उताध्यस्तम् । अध्यस्तश्चेत् , अयमध्यासस्तन्मूलाविद्यान्तरश्च निवर्तकज्ञानाविषयतया तिष्ठत्येव । निवर्तकज्ञानान्तराभ्युपगमे तु तस्यापि त्रिरूपत्वात् ज्ञात्रपेक्षयानवस्था स्यात् । ब्रह्मस्वरूपस्यैव ज्ञातृत्वे अस्मदीय एव पक्षः परिगृहीतः स्यात् । निवर्तकज्ञानस्वरूपं, स्वस्य ज्ञाता च ब्रह्मव्यतिरिक्तत्वेन स्वनिवर्त्यान्तर्गतमिति वचनं, भूतलव्यतिरिक्तं कृत्स्नं देवदत्तेन छिन्नमित्येकस्यामेव छेदनक्रियायामस्य छेत्तु-

---

सत्यत्ववादिनस्तव गले पतितमित्याशयः । शङ्कते—**निवर्तकज्ञानमिति** । यथा विषनाशकं विषं स्वयमेव नश्यति तथेत्यर्थः । **नेति** । निवर्तकज्ञानस्वरूपं तस्योत्पत्तिविनाशश्चासद्रूपः सद्रूपो वा । आद्ये आह—**तत्स्वरूपेति** । **विनाशेति** । विनाशस्य या कल्पना विनाशविषयकभ्रमबुद्धिस्तत्कल्पकाविद्याया इत्यर्थः । अन्त्ये आह—**तद्विनाश इति** । **तिष्ठतीति** । निवर्तकज्ञानविनाशस्वरूपे ब्रह्मणि तिष्ठति सति निवर्तकज्ञानस्योत्पत्तिरेव न स्यादित्यर्थः ।

अथ निवर्तकज्ञानस्यानुपपत्तिं ज्ञात्रभावेन दर्शयति—**अपि चेति** । **निषेधविषयेति** । निर्विषयस्य स्वरूपभूतज्ञानस्य ज्ञात्रपेक्षाऽभावादिदमुक्तम् । **कोऽयमिति** । प्रमाणजन्यज्ञानस्य ज्ञातृसापेक्षत्वादित्याशयः । **स्वरूपम्** । स्वाभाविकम् । **तिष्ठत्येवेति** । निवर्तकज्ञानकर्तृत्वस्य ब्रह्मण्यध्यस्तत्वे तादृशाध्यासस्य तदध्यासप्रयोजकीभूताविद्यान्तरस्य च तेनैव निवर्तकज्ञानेन निवृत्त्यसंभवादिति भावः । **ब्रह्मस्वरूपस्यैव ज्ञातृत्वे** । ज्ञातृत्वस्य ब्रह्मणि स्वाभाविकत्वे । **निवर्तकेति** । 'निवर्तकज्ञानस्य तज्ज्ञातुश्च तेनैव निवर्तकज्ञानेन निवृत्तिस्तयोर्ब्रह्मव्यतिरिक्तत्वात्' इति तु व्याहतमित्याशयः । किं च ज्ञातुरपि निवर्तकज्ञानेन निवृत्तौ स्वीकृतायां तस्य

रस्याः छेदनक्रियायाश्च छेद्यानुप्रवेशवचनवदुपहास्यम् । अध्यस्तो ज्ञाता स्वनाशहेतुभूतनिवर्तकज्ञाने स्वयं कर्ता च न भवति । स्वनाशस्यापुरुषार्थत्वात् । तन्नाशस्य ब्रह्मस्वरूपत्वाभ्युपगमे भेदतद्दर्शनतन्मूलाविद्यादीनां कल्पनमेव न स्यादित्यलमनेन दिष्टहतमुद्गराभिघातेन ।

तस्मादनादिकर्मप्रवाहरूपाज्ञानमूलत्वाद्बन्धस्य तन्निबर्हणमुक्तलक्षणज्ञानादेव । तदुत्पत्तिश्चाहरहरनुष्ठीयमानपरमपुरुषाराधनवेषात्मयाथात्म्यबुद्धिविशेषसंस्कृतवर्णाश्रमोचितकर्मलभ्या । तत्र केवलकर्मणामल्पास्थिरफलत्वम् अनभिसंहितफलपरमपुरुषाराधनवेषाणां कर्मणामुपासनात्मकज्ञानोत्पत्तिद्वारेण ब्रह्मयाथात्म्यानुभवरूपानन्तस्थिरफलत्वञ्च कर्मस्वरूपज्ञानादृते न ज्ञायते । केवलाकारपरित्यागपूर्वकयथोक्तस्वरूपकर्मोपादानञ्च न सम्भवतीति कर्मविचारानन्तरं तत एव हेतोर्ब्रह्मविचारः कर्तव्य इत्यथात इत्युक्तम् ।

अत्र पूर्वपक्षवादी मन्यते । वृद्धव्यवहारादन्यत्र शब्दस्य बोधकत्वश-

---

निवर्तकज्ञानार्थं श्रवणादौ प्रवृत्तिर्न स्यात् । तदेवाह—**अध्यस्त इति** । **दिष्टेति** । **दैवेनैवादौ यो** हतस्तस्य पुनर्मुद्गरेणाभिहननं व्यर्थमेवेति भावः ।

एवं मृषावादिमते निराकृते बन्धस्य सत्यत्वं सिध्यतीति तादृशबन्धनिवृत्तिः कर्मसापेक्षोपासनात्मकज्ञानादेवेत्यतः कर्मविचारस्य ब्रह्मजिज्ञासापेक्षया पूर्ववृत्तत्वं युक्तमित्याशयेनोपसंहरति—**तस्मादिति** । **कर्मप्रवाहरूपाज्ञानेति** । न त्वज्ञानमनिर्वचनीयस्वरूपमित्याशयः । **उक्तलक्षणज्ञानात्** । उपासनात्मकज्ञानात् । **आराधनवेषेति** । आराधनस्वरूपमित्यर्थः । **केवलाकारेति** । केवलाकारः आत्मयाथात्म्यबुद्धिसंस्कारशून्याकारः । तादृशकर्मणः परित्यागः अहरहरित्याद्युक्तविशेषणविशिष्टकर्मणः स्वीकारश्च कर्मस्वरूपज्ञानं विना न संभवतीत्यर्थः ।

अस्मिन्नधिकरणे शङ्कराचार्यैः प्रपञ्चस्य सत्यत्वेन ज्ञाननिवर्त्यत्वाभावाज्ज्ञानाय ब्रह्मविचारो नारम्भणीय इति पूर्वपक्षं कृत्वा प्रपञ्चस्य मिथ्यात्वेन ज्ञाननिवर्त्यत्वाज्ज्ञानाय स आरम्भणीय इति सिद्धान्तितम् । तच्छ्रुत्यादिविरुद्धमिति न सूत्रकृतोऽभिप्रेतम् । अतः सूत्रकृदभिप्रेतमेतत्सूत्रनिरसनायं पूर्वपक्षं प्रदर्शयति—**अत्रेति** । **वृद्धव्यवहारेति** । प्रयोजकवृद्धस्य वाचिको व्यवहारः प्रयोज्यवृद्धस्य कायिकः । वृद्धव्य-

त्त्यवधारणासम्भवात् , व्यवहारस्य च कार्यबुद्धिपूर्वकत्वेन कार्यार्थ एव शब्दस्य प्रामाण्यमिति कार्यरूप एव वेदार्थः । अतो वेदान्ताः परिनिष्पन्ने परस्मिन् ब्रह्मणि न प्रमाणभावमनुभवितुमर्हन्ति । न च, पुत्रजन्मादिसिद्धवस्तुविषयवाक्येषु हर्षहेतूनां कालत्रयवर्तिनामर्थानामानन्त्यात् सुलभसुखप्रसवादिहर्षहेत्वर्थान्तरोपनिपातसम्भावनया च प्रियार्थप्रतिपत्तिनिमित्तमुखविकाशादिलिङ्गेनार्थविशेषबुद्धिहेतुत्वनिश्चयः । नापि, व्युत्पन्नेतरपदविभक्त्यर्थस्य पदान्तरार्थनिश्चयेन वा प्रकृत्यर्थनिश्चयेन वा शब्दस्य सिद्धवस्त्वभिधानशक्तिनिश्चयः । ज्ञातकार्याभिधायिपदसमुदायस्य

वहारं विना प्रथमतः शक्तिग्रहो न भवत्येव । नहि प्रथमत एव 'अस्य शब्दस्याय मर्थ' इत्युक्ते 'अस्य शब्दस्यायमर्थ' इत्येतद्वाक्यस्थपदानामप्यर्थो ज्ञायते । अतएव वृद्धव्यवहारस्य शक्तिग्राहकशिरोमणित्वमुक्तमभियुक्तैः । तादृशव्यवहारेण च शब्दस्य कार्यरूपार्थे एव शक्तिः । गामानयेत्यादिप्रयोजकवृद्धवाक्यश्रवणानन्तरं प्रयोज्यवृद्धस्य प्रवृत्तिं दृष्ट्वा तादृशप्रवृत्तेः कार्यबुद्धिपूर्वकत्वं जानन् व्युत्पित्सुर्बालः 'अयं शब्दः कार्यरूपार्थबोधकः' इति निश्चिनोति । तथा च शब्दस्य कार्यरूपार्थे एव शक्तत्वेन परमब्रह्मरूपसिद्धवस्तुप्रतिपादनपराणां शब्दसमुदायात्मकवेदान्तवाक्यानां प्रामाण्यं न संभवतीति भावः । ननु भाट्टेन सिद्धवाक्यादपि शक्तिग्रहः प्रतिपादितः । तथा हि । पुत्रस्ते जात इति सिद्धवस्तुप्रतिपादकं देवदत्तोच्चारितं वाक्यं श्रुत्वा यज्ञदत्तस्य मुखं प्रसन्नं भवति । तेन च लिङ्गेन पुत्रस्ते जात इति वाक्यस्यार्थं पुत्रजन्मरूपं चैत्रो निश्चिनोतीति चेन्न । मुखप्रसादस्य द्रव्यप्राप्त्यादेरपि संभवेन तेन लिङ्गेन पुत्रजन्मन एव निश्चयासंभवात् । न चासन्नप्रसवां यज्ञदत्तभार्यां-ज्ञातवतश्चैत्रस्य तथानिश्चयः स्यादेवेति वाच्यम् । तावतापि पुत्रजन्मनिश्चयासंभवात् । कन्यायामपि जातायां सुलभप्रसवसुखप्रसवादेरपि मुखप्रसाददर्शनात् । तदेवाह–**न चेति** । मुखविकाशादिलिङ्गेनार्थनिश्चयो न भवति । हर्षहेतूनामानन्त्यादर्थान्तरोपनिपातसंभावनया चेत्यर्थः । ननु नैयायिकैः सिद्धवाक्यादपि शक्तिग्रहः प्रतिपादितः । यथा पिकः कूजतीति वाक्यं श्रुत्वा कूजातिशब्दार्थज्ञानवतः पुरुषस्य पिकपदार्थनिश्चयो भवति । यथा वा तृतीयायाः करणरूपमर्थं ज्ञातवतः पुरुषस्य काष्ठैः पचतीति वाक्यं श्रुत्वा काष्ठशब्दार्थनिश्चयो भवतीति चेत्तत्राह–**नापीति । व्युत्पन्नेति** । व्युत्पन्नः ज्ञातः इतरपदस्य विभक्तेश्चार्थो येन तस्येत्यर्थः । **ज्ञातेति** । इदानीं श्रुतेऽस्मिन् वाक्ये पूर्वं कार्यपरतया व्युत्पन्नवाक्यस्थकतिपयपददर्शनादयमपि पदसमुदायः कार्याभिधायीति

तदंशविशेषनिश्चयरूपत्वात् तस्य । न च, सर्पाद्भीतस्य, नायं सर्पो रज्जुरेषेति शब्दश्रवणसमनन्तरं भयनिवृत्तिदर्शनेन सर्पाभावबुद्धिहेतुत्वानिश्चयः । अत्रापि, निश्चेष्टं निर्विषमचेतनमिदं वस्त्वित्याद्यर्थबोधेषु बहुषु भयनिवृत्तिहेतुषु सत्सु विशेषनिश्चयायोगात् । कार्यबुद्धिप्रवृत्तिव्याप्तिबलेन शब्दस्य प्रवर्तकार्थावबोधित्वमवगतमिति सर्वपदानां कार्यपरत्वेन सर्वैः पदैः कार्यस्यैव विशिष्टस्य प्रतिपादनात् कार्यान्वितस्वार्थमात्रे पदशक्तिनिश्चयः । इष्टसाधनताबुद्धिस्तु, कार्यबुद्धिद्वारेण प्रवृत्तिहेतुर्न स्वरूपेण । अतीतानागतवर्तमानेष्टोपायबुद्धिषु प्रवृत्त्यनुपलब्धेः । इष्टोपायो हि मत्प्रयत्नादृते न सिध्यति । अतो मत्कृतिसाध्य इति बुद्धिर्यावन्न जायते, तावन्न प्रवर्तते । अतः कार्यबुद्धिरेव प्रवृत्तिहेतुरिति प्रवर्तकस्यैव शब्दवाचितया कार्यस्यैव वेदवेद्यत्वात् परिनिष्पन्नरूपब्रह्मप्राप्तिलक्षणानन्तस्थिरफलापातप्रतिपत्तेः, अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवतीत्यादिभिः

ज्ञायते इति भावः । **तदंशविशेषः** । कार्यांशविशेषः । मृषावाद्युक्तं निरस्यति—**न चेति सर्पाद्भीतस्य यज्ञदत्तस्य** नायं सर्प इति देवदत्तवाक्यश्रवणेन भयनिवृत्तिं दृष्ट्वा नायं **सर्प इति वाक्यार्थं** सर्पाभावरूपं चैत्रो निश्चिनोतीत्यर्थः । **इत्यादीति** । आदिना अयं **डुण्डुभ इति** । डुंडुभो हि सर्पाकारा निर्विषजातिः । तज्ज्ञानेनापि भयनिवृत्तिर्दृश्यते । ननु **गामानयेत्यादौ** आनयेत्यादीनां पदानां कार्यरूपार्थे शक्तत्वेपि गामित्यादीनां पदानां **कथं कार्यार्थबोधकत्वमितिचेन्न** । तेषामप्यन्विताभिधानवादिनये कार्यान्वितस्वार्थबोधकत्वात् । **युक्तं चैतत्** । प्रवृत्तिर्हि न केवलमानयेति पदात् । किं तु पदसमुदायात् । **अतः सर्वेषां पदानां** प्रवर्तकार्थावबोधित्वमवगम्यते । प्रवृत्तिश्च कार्यबुद्धिं विना न संभवतीति सर्वत्र कार्यबुद्धिरेष्टव्या । तदेवाह—**कार्येति** । यत्र प्रवृत्तिस्तत्र **कार्यबुद्धिरिति** व्याप्तिः । **व्याप्तिबलेनेति** । अस्य ' सर्वपदानां कार्यपरत्वेन ' इत्यत्रान्वयः । नन्विष्टसाधनताबुद्धेरेव प्रवृत्तिप्रयोजकत्वं न तु कार्यबुद्धेरिति चेत्तत्राह—**इष्टेति** । **वर्तमानेति** । वर्तमानकालिकेऽपि वृक्षाग्रस्थफलादावशक्तस्य प्रवृत्त्यदर्शनात् । तथा च कार्यबुद्धिरेव प्रवृत्तिप्रयोजिका । कार्यबुद्धिर्हि इदं मयाद्य साधयितुं शक्यमिति बुद्धिः । **परिनिष्पन्नम्** । सिद्धम् । **आपातप्रतिपत्तेरिति** । ' अधीतात्स्वाध्यायाद्ब्रह्मप्राप्तिलक्षणानन्तस्थिरफलस्यापाततः प्रतीतिर्भवतीति तन्निर्णयाय ब्रह्मविचारारम्भः ' इति हि प्रागुक्तम् (पृ. ९ पं. ३) । परंतु ब्रह्मणः सिद्धरूपत्वेन

कर्मणामेव स्थिरफलत्वप्रतिपादनाच्च, कर्मफलाल्पास्थिरत्वब्रह्मज्ञानफलानन्तस्थिरत्वज्ञानहेतुको ब्रह्मविचारारम्भो न युक्त इति ।

अत्राभिधीयते । निखिललोकविदितशब्दार्थसम्बन्धावधारणप्रकारमपनुद्य सर्वशब्दानामलौकिकैकार्थावबोधित्वावधारणं प्रामाणिका न बहु मन्यन्ते । एवं किल बालाः शब्दार्थसम्बन्धमवधारयन्ति । मातापितृप्रभृतिभिः अम्बातातमातुलादीन् शशिपशुमृगनरपक्षिसर्पादींश्च, एनमवेहि, इमञ्चावधारयेत्यभिप्रायेणाङ्गुल्या निर्दिश्य तैस्तैः शब्दैस्तेषु तेष्वर्थेषु बहुशः शिक्षिताः शनैः शनैस्तैस्तैः शब्दैरेव तेषु तेष्वर्थेषु स्वात्मना बुद्ध्युत्पत्तिं दृष्ट्वा शब्दार्थयोः सम्बन्धान्तरादर्शनात् सङ्केतयितृपुरुषाज्ञानाच्च तेष्वर्थेषु तेषां शब्दानां प्रयोगो बोधकत्वनिबन्धन इति निश्चिन्वन्ति । पुनश्च,

---

तत्र चोक्तरीत्या शब्दस्य शक्त्यभावेन स्वाध्यायादापाततोऽपि तत्प्रतीतिर्नैव भवतीति ब्रह्ममीमांसारम्भो न युक्त इति भावः ।

अलौकिकैकार्थः । कार्यरूपः । व्युत्पित्सोर्बालस्य व्युत्पत्तिर्द्विधा भवति । बुद्धिपूर्विका यादृच्छिकी च । तत्रान्त्यायां शब्दस्य कार्यरूपार्थकत्वं पूर्वपक्षिणा प्रदर्शितम् । परं त्वाद्यायां सिद्धवस्तुपरत्वमेवेत्याशयेनाह—**अम्बेति** । अम्बादिशब्दाः ससम्बन्धिकार्थप्रतिपादकाः । शश्यादिशब्दाः केवलार्थप्रतिपादकाः । मात्रादिर्हि पुरोवर्तिनं पशुं निर्दिश्य 'अयं गौः' इति वाक्यं प्रयुङ्क्ते । एवं बहुशः शिक्षितो व्युत्पित्सुर्बालो यदा गोशब्दं शृणोति तदा स गोशब्द एव स्वस्वरूपेण श्रोतुस्तस्य तादृशपशुबुद्धिमुत्पादयति । ततोऽस्य पशोर्गोशब्दस्य च कश्चन संबन्धोऽस्तीति सोवधारयति । तत्र च जन्यजनकभावादीनामितरसम्बन्धानामसंभवात्स्वाभाविको बोध्यबोधकभाव एव संबन्ध इति शब्दार्थसम्बन्धग्रहणप्रकारो लोकप्रसिद्धः । ननु न गोशब्दस्तादृशपशुरूपार्थस्य बोधकः । किं तु तत्र तस्य केवलं सङ्केत इति चेत् । अयं सङ्केतः केन कृतः । किं मात्रादिनैवाधुना कृतः किं वा पूर्वमेव केनापि कृतः । नाद्यः । सर्वेषामेव तादृशपशुरूपार्थे गोशब्दप्रयोगदर्शनात् । नान्त्यः । सङ्केतयितुः पुरुषस्याज्ञानेन तस्य वक्तुमशक्यत्वादित्युक्तरीतिरेव साधीयसी । किं च वृद्धव्यवहारेण बोधकत्वशक्त्यवधारणं ससम्बधिकाम्बादिशब्देषु दुर्वचम् । प्रयोजकवृद्धेन यज्ञदत्तं प्रति 'अम्बां वन्दस्व' इत्युक्ते तेन कृतं स्वमातृवन्दनं दृष्ट्वा व्युत्पित्सोश्चैत्रस्य स्वमातृरूपा-

---

१ क. मातृपितृ.

व्युत्पन्नेतरशब्देष्वस्य शब्दस्यायमर्थ इति पूर्ववृद्धैः शिक्षिताः सर्वशब्दानामर्थमवगम्य परप्रत्यायनाय तत्तदर्थाववोधिवाक्यजातं प्रयुञ्जते ।

प्रकारान्तरेणापि शब्दार्थसम्बन्धावधारणं सुशकम् । केनचित् पुरुषेण हस्तचेष्टादिना, पिता ते सुखमास्त इति देवदत्ताय ज्ञापयेति प्रेषितः कश्चित् तज्ज्ञापने प्रवृत्तः, पिता ते सुखमास्त इति शब्दं प्रयुङ्क्ते । पार्श्वस्थोऽन्यो व्युत्पित्सुर्मूकवच्चेष्टाविशेषज्ञः तज्ज्ञापने प्रवृत्तमिमं ज्ञात्वानुगतः तजज्ञापनाय प्रयुक्तमिमं शब्दं श्रुत्वायं शब्दस्तदर्थबुद्धिहेतुरिति निश्चिनोतीति कार्यार्थे एव व्युत्पत्तिरिति निर्बन्धो निर्निबन्धनः । अतो वेदान्ताः परिनिष्पन्नं परं ब्रह्म, तदुपासनञ्चापरिमितफलं बोधयन्तीति तन्निर्णयफलो ब्रह्मविचारः कर्तव्यः ।

कार्यार्थत्वेऽपि वेदस्य ब्रह्मविचारः कर्तव्य एव । कथम् । 'आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' (बृ. २।४।५) 'सोऽन्वेष्टव्यः स विजिज्ञासितव्यः' (छा. ८।७।१) 'विज्ञाय प्रज्ञां कुर्वीत' (बृ. ४।४।२१) 'दहरोऽस्मिन्नन्तर आकाशस्तस्मिन् यदन्तस्तदन्वेष्टव्यम् ।

र्थेऽम्बाशब्दस्य बोधकत्वशक्त्यवधारणासम्भवादिति बोध्यम् । **प्रयुञ्जत इति** । तथा च बुद्धिपूर्वकव्युत्पत्तौ शब्दस्य सिद्धवस्तुपरत्वमेव सिध्यतीति भावः ।

अथ यादृच्छिकव्युत्पत्तावपि शब्दस्य सिद्धवस्तुपरत्वं दर्शयति—**प्रकारान्तरेणेति** । यादृच्छिकव्युत्पत्तिजनकेन वृद्धव्यवहाररूपप्रकारेणापीत्यर्थः । **केन चिदिति** । अत्र प्रयोजकवृद्धस्य कायिको व्यवहारः प्रयोज्यवृद्धस्य वाचिकः इतिपूर्वपक्ष्यभिमतवृद्धव्यवहारोदाहरणाद्विशेषः । **अनुगतः** । तज्ज्ञापने प्रवृत्तं पुरुषमनुगतः । **इमं शब्दम्** । 'पिता ते सुखमास्ते' इमं शब्दम् । अयं हि शब्दो न कार्यार्थप्रतिपादकः । किंतु सिद्धार्थप्रतिपादकः । **निर्बंधः** । आग्रहः । **निर्निबन्धनः** । निर्मूलः ।

अथ तुष्यतु दुर्जनन्यायेन शब्दस्य कार्यार्थपरत्वं स्वीकृत्यापि ब्रह्मविचारस्य कर्तव्यतां प्रतिपादयति—**कार्यार्थत्वेऽपीति** । **आत्मा वारे इति** । यद्यपि ब्रह्म सिद्धरूपं तथाप्युपासनायाः कार्यत्वेन तस्याश्च आत्मा वारे इत्यादिवेदान्तवाक्येषु प्रतिपादितत्वेन तेषां प्रामाण्यमक्षतमेव । तादृशोपासनायाश्च ब्रह्मप्राप्तिफलकत्वेन ब्रह्मप्राप्तिकाम एवाधिकारीत्युपासनारूपकार्यार्थ एव ब्रह्मविचारः कर्तव्यः । **दहर इति** । अस्मिन् ब्रह्मपुरे शरीरे दहरोऽल्पतरः अन्तरः आकाशः तस्मिन्यदन्तस्त-

तद्वाव विजिज्ञासितव्यम्' (छा. ८।१।१) 'तत्रापि दहरं गगनं विशोकस्तस्मिन् यदन्तस्तदुपासितव्यम्' (म. ना. १०।७) इत्यादिभिः प्रतिपन्नोपासनविषयकार्याधिकृतफलत्वेन, 'ब्रह्मविदाप्नोति परम्' (तै. २।१।१) इत्यादिभिर्ब्रह्मप्राप्तिः श्रूयत इति ब्रह्मस्वरूपतद्विशेषणानां दुःखासम्भिन्नसुखविशेषरूपस्वर्गादिवद्रात्रिसत्रप्रतिष्ठादिवदपगोरणशतयातनासाध्यसाधनभाववच्च कार्योपयोगितयैव सिद्धेः।

त् अन्वेष्टव्यं शोधनीयं तदेव विजिज्ञासितव्यमित्यर्थः। **प्रतिपन्नेति।** उक्तश्रुतिभिः प्रतिपन्नं ज्ञातं यदुपासनं तद्विषयकार्यं तदवच्छिन्नकृतिसाध्यमपूर्वं तत्राधिकृतस्य फलत्वेन ब्रह्मप्राप्तिः श्रूयते इत्यर्थः। **ब्रह्मेति।** ब्रह्मणः स्वरूपस्य, तस्य ब्रह्मणो विशेषणानां गुणानां विभूतीनां चेत्यर्थः। ननूक्तरीत्या आत्मा वारे इत्यादिवाक्यानामुपासनारूपकार्यार्थबोधकतया प्रामाण्येन ब्रह्मविचारस्य कर्तव्यत्वे प्राप्तेऽपि ब्रह्मणः सिद्धत्वेन तत्स्वरूपप्रतिपादकानामिदं सर्वं यदयमात्मेत्यादिवाक्यानामप्रामाण्यमेवेति कथं तादृशवाक्यैर्ब्रह्मविचारः कर्तव्य इति चेन्मैवम्। आत्मा वारे इत्यादिविधिवाक्यानां ब्रह्मप्राप्तिरूपफलपर्यंतं तात्पर्यसत्वात् फलबोधकत्वेन विध्यङ्गभूतानामिदं सर्वं यदयमात्मेत्यादिवाक्यानामपि प्रामाण्यसत्वेनादोषात्। न चैवमपि ब्रह्मणो विशेषणीभूता ये सत्यत्वज्ञानत्वादयो गुणास्तत्प्रतिपादकानां सत्यं ज्ञानमित्यादिवाक्यानामप्रामाण्यमेवेति वाच्यम्। फलविशेषणपर्यन्तमपि विधिवाक्यतात्पर्यसत्वात्। यथा ज्योतिष्टोमेन स्वर्गकामो यजेतेति विधिवाक्यस्य यस्मिन्नोष्णं न शीतं नार्तिरितिश्रुत्युक्तस्वर्गविशेषणपर्यन्तमपि तात्पर्यं कल्प्यते तद्वत्। न च ज्योतिष्टोमेनेति विधौ स्वर्गरूपफलस्य निर्देशात्तद्विशेषणपर्यन्तं तात्पर्यकल्पनेऽपि 'आत्मा वारे' इत्यादिविधौ फलस्यानिर्देशात्फलपर्यन्तमपि तात्पर्यं नास्ति किमुत तद्विशेषणपर्यन्तमपीति वाच्यम्। विधिवाक्ये फलस्यानिर्देशेऽपि तावत्पर्यन्तं तात्पर्यसत्वात्। यथा रात्रिसत्रे रात्रीरुपेयादितिविधौ प्रतिष्ठारूपफलस्यानिर्देशेऽपि 'प्रतितिष्ठन्तीह वा एते य एता रात्रीरुपयन्ति' इत्यर्थवादोक्तप्रतिष्ठारूपफलपर्यन्तं तात्पर्यं कल्प्यते तद्वत्। न च तथाप्युपासनाविरुद्धसंसाररूपफलपर्यन्तमात्मा वारे इत्यादिविधिवाक्यानां तात्पर्याभावेन तद्बोधकानां 'यस्त्वविज्ञानवान्भवत्यमनस्कः सदाऽशुचिः। न स तत्पदमाप्नोति संसारं चाधिगच्छति' (का. ३।७) इत्यादिश्रुतीनामप्रामाण्यं स्यादिति वाच्यम्। यत्र विरुद्धमपि फलं विधेयोपकारकं भवति तत्र तत्फलपर्यन्तमपि विधिवाक्यतात्पर्यसत्वात्। यथा 'ब्राह्मणाय नापगुरेत' (तै. सं. २।६।१०।२) इत्यपगोरणनिषेधविधायकवाक्यस्य 'योऽपगुरते शतेन यातयात्' इत्यपगोरणनिषेधावि-

गामानयेत्यादिष्वपि वाक्येषु न कार्यार्थे व्युत्पत्तिः । भवदभिमतकार्यस्य दुर्निरूपत्वात् । कृतिभावभावि कृत्युद्देश्यं हि भवतः कार्यम् । कृत्युद्देश्यत्वं कृतिकर्मत्वम् । कृतिकर्मत्वञ्च कृत्या प्राप्तुमिष्टतमत्वम् । इष्टतमञ्च सुखम् , वर्तमानदुःखनिवृत्तिर्वा । तत्रेष्टसुखार्थिना पुरुषेण स्वप्रयत्नादृते यदि तदसिद्धिः प्रतीता, ततः प्रयत्नेच्छुः प्रवर्तते पुरुष इति न क्वचिदपीच्छाविषयस्य कृत्यधीनसिद्धित्वमन्तरेण कृत्युद्देश्यत्वं नाम किञ्चिदप्युपलभ्यते । इच्छाविषयस्य प्रेरकत्वञ्च प्रयत्नाधीनसिद्धित्वमेव, तत एव प्रवृत्तेः ।

नच पुरुषानुकूलत्वं कृत्युद्देश्यत्वं, यतः सुखमेव पुरुषानुकूलम् । नच,

---

रुद्धशतयातनारूपफलपर्यन्तमपि तात्पर्यम् । अपगोरणं ताडनोद्योग इति सायणाचार्याः । स च शस्त्रोद्यमनरूपः । एतच्च शतयातनारूपं फलमपगोरणनिषेधविरुद्धमपि निषेधविधेरुपकारकम् । मनुष्यो हि शतयातनासंभावनयाऽपगोरणान्निवर्तते । तद्वद्ब्रह्मोपासनाविरुद्धमपि संसाररूपं फलमुपासनामुपकरोति । उपासनाया अभावे संसारप्रवृत्तिं दृष्ट्वोपासनायां मनुष्यस्य प्रवृत्तेरित्यवधेयम् ।

अथ पूर्वपक्ष्यभिमतवृद्धव्यवहारेणापि न कार्यार्थे एव व्युत्पत्तिरित्याह–**गामानयेति । कार्यार्थे ।** भवदभिमतकार्यरूपेऽर्थे । **कृतीति ।** कृतिश्चान्तरः प्रयत्नः । तद्भावानन्तरभावीत्यर्थः । तावन्मात्रोक्तौ स्वेदश्रमादेरपि कार्यत्वापत्तिरतः कृत्युद्देश्यमिति कृत्युद्देश्यमिति वदतः पूर्वपक्षिणोऽभिप्रायः । परंत्वेतादृशं कार्यं निरूपयितुमशक्यम् । कार्ये कृत्युद्देश्यत्वस्यासंभवात् । कृत्युद्देश्यत्वं हि इष्टतमत्वरूपम् । तच्च सुखादौ फले एव संभवति न तु कार्यभुते शब्दार्थे । 'कर्तुरीप्सिततमं कर्म' (पा. सू. १।४।४९) इति पाणिनिसूत्रानुसारेण कर्मत्वं दर्शयति–**कृतिकर्मत्वं चेति । कृत्या प्राप्तुम् ।** क्रियाजन्यफलेन संबन्धुम् । ननु कृतिकर्मत्वं न कृत्या प्राप्तुमिष्टतमत्वम् । किं तु प्रवर्तकत्वम् । तच्च कार्यभूते शब्दार्थे संभवति । शब्दार्थं बुध्वैव प्रवृत्तेरिति चेन्न । एतादृशकृतिकर्मत्वस्य कृतिसाध्येच्छाविषयत्वस्वरूपत्वात् । कृत्यधीनसिद्धित्वमिष्टत्वंचानालोच्य प्रवृत्त्यदर्शनात् । तथा च कृतिसाध्यत्वेच्छाविषयत्वव्यतिरिक्तकृत्युद्देश्यत्ववादिनस्तवैव विरोधः । तदेवाह–**तत्रेष्टेति ।** नन्विष्टवस्तुन एव इच्छाविषयत्वं प्रेरकत्वं चेति रूपद्वयम् । तत्र प्रेरकत्वमेव कृतिकर्मत्वं न त्विच्छाविषयत्वमिति चेत्तत्राह–**इच्छाविषयस्येति ।**

न चेति । यतः सुखमेव पुरुषानुकूलमतः पुरुषानुकूलत्वं कृत्युद्देश्यत्वं नेत्यर्थः । **न च**

दुःखनिवृत्तेः पुरुषानुकूलत्वम् । पुरुषानुकूलं सुखं, तत्प्रतिकूलं दुःखमिति सुखदुःखयोः स्वरूपविवेकः । दुःखस्य प्रतिकूलतया तन्निवृत्तिरिष्टा भवति, नानुकूलतया । अनुकूलप्रतिकूलान्वयविरहे स्वरूपेणावस्थितिर्हि दुःखनिवृतिः । अतः सुखव्यतिरिक्तस्य क्रियादेरनुकूलत्वं न सम्भवति । नच, सुखार्थतया तस्याप्यनुकूलत्वम् । दुःखात्मकत्वात् तस्य । सुखार्थतयापि तदुपादानेच्छामात्रमेव भवति ।

नच, कृतिं प्रति शेषित्वं कृत्युद्देश्यत्वम् । भवत्पक्षे शेषित्वस्यानिरूपणात् । नच, परोद्देशप्रवृत्तकृतिव्याप्त्यर्हत्वं शेषत्वमिति तत्प्रतिसम्बन्धी शेषीत्यवगम्यते । तथा सति, कृतेरशेषत्वेन तां प्रति तत्साध्यत्वस्य शेषित्वाभावात् । नच, परोद्देशप्रवृत्त्यर्हतायाः शेषत्वेन, परः शेषी । उद्देश्यत्वस्यैव निरूप्यमाणत्वात् । प्रधानस्यापि भृत्योद्देशप्रवृत्त्यर्हत्वदर्शनाच्च । प्रधानस्तु भृत्यपोषेऽपि स्वोद्देशेन प्रवर्तत इति चेत्, न । भृत्योऽपि हि प्रधानपोषे स्वोद्देशेनैव प्रवर्तते । कार्यस्वरूपस्यैवानिरूपणात् कार्य-

---

दुःखेति । यद्यपि दुःखनिवृत्तेः पुरुषानुकूलत्वेऽपि पूर्वपक्षिणो न किंचित्सिध्यति । तथापि वस्तुस्थितिकथनमेतत् । **क्रियादेरिति** । तथा च गामानयेत्यादौ धातुवाच्यक्रियादेः कृत्युद्देश्यत्वाभावेन कार्यत्वाभावादशब्दार्थत्वप्रसङ्ग इत्याशयः । **दुःखात्मकत्वादिति** । दुःखं हि नात्मनः स्वतन्त्रो गुणः । किं तु प्रतिकूलतया भासमानं वस्त्वेव दुःखमिति मते इदम् । स्वतंत्रगुणपक्षेऽपि क्रियादेः प्रतिकूलतया भासमानत्वेनानुकूलत्वं नास्त्येवेति बोध्यम् । **इच्छामात्रमेव** । नत्वनुकूलवेदनीयत्वम् ।

शेषित्वमिति । प्रधानत्वमित्यर्थः । तथा च कृतिसाध्यस्यानयनादेः कृतिनिरूपितप्रधानत्वेन तत्र कृत्युद्देश्यत्वरूपकार्यत्वसत्वात्तस्य शब्दार्थत्वमक्षतमिति शङ्काशयः । उत्तरयति—**भवदिति** । **परोद्देशेति** । परस्यानयनादेरुद्देशेन प्रवृत्ता उत्पन्ना या कृतिस्तत्संबन्धयोग्यत्वं शेषत्वमित्यर्थः । **तत्प्रतिसंबन्धी** । तस्य शेषस्य प्रतिसम्बन्धी परपदग्राह्य आनयनादिः । **अशेषत्वेनेति** । कृतिसम्बन्धयोग्यत्वस्य कृतावभावात् । तथा च कृतिसाध्यस्यानयनादेः कृतिनिरूपितप्रधानत्वाभाव इति भावः । **तत्साध्यत्वस्येति** । तत्साध्यत्वस्य शेषित्वरूपत्वाभावादित्यर्थः । **न च परेति** । परस्यानयनादेरुद्देशेन या प्रवृत्तिरुत्पत्तिस्तदर्हत्वं कृतेरिति तस्याः शेषत्वम् । तन्निरूपितशेषित्वं च परपदग्राह्यस्यानयनादेरित्याशयः । **कार्यस्वरूपस्यैवेति** । कार्यत्वं कृत्युद्देश्यत्वम्,

प्रतिसम्बन्धी शेषः, तत्प्रतिसंबन्धी शेषीत्यप्यसङ्गतम् ।

नापि कृतिप्रयोजनत्वं कृत्युद्देश्यत्वम् । पुरुषस्य कृत्यारम्भप्रयोजनमेव हि कृतिप्रयोजनम् । स चेच्छाविषयः । तस्मादिष्टतातिरेकिकृत्युद्देश्यत्वानिरूपणात् कृतिसाध्यताकृतिप्रधानत्वरूपं कार्यं दुर्निरूपमेव ।

नियोगस्यापि साक्षादिच्छाविषयभूतसुखदुःखनिवृत्तिभ्यामन्यत्वात् तत्साधनतयैवेष्टत्वं कृतिसाध्यत्वञ्च । अत एव हि तस्य क्रियातिरिक्तता । अन्यथा क्रियैव कार्यं स्यात् । स्वर्गकामपदसमभिव्याहारानुगुण्येन लिङादिवाच्यं कार्यं स्वर्गसाधनमेवेति क्षणभङ्गिकर्मातिरेकि स्थिरं स्वर्गसाधनमपूर्वमेव कार्यमिति स्वर्गसाधनतोल्लेखेनैव ह्यपूर्वव्युत्पत्तिः । अतः, प्रथममनन्यार्थतया प्रतिपन्नस्य कार्यस्यानन्यार्थत्वनिर्वहणायापूर्वमेव प-

---

उद्देश्यत्वं शेषित्वम्, शेषित्वं शेषप्रतिसंबन्धित्वम् , शेषत्वं च कार्यप्रतिसंबन्धित्वमित्यात्माश्रय इति भावः ।

पुरुषस्येति । कृतिमत्पुरुषप्रयोजनमेव कृतिप्रयोजनमित्यर्थः । **कृतिसाध्यतेति** । कृतिसाध्यत्वकृतिप्रधानत्वरूपकार्यमित्यर्थः । आत्मन्यतिव्याप्तिवारणाय कृतिसाध्यत्वेति । स्वेदादावतिव्याप्तिवारणाय कृतिप्रधानत्वमिति । **दुर्निरूपमिति** । विशेष्यस्य कार्यत्वस्योक्तरीत्या दुर्निरूपत्वाद्विशेषणविशिष्टस्यापि दुर्निरूपत्वं बोध्यम् ।

ननु अपूर्वरूपं कार्यमेव शब्दार्थः । तस्य चेच्छाविषयत्वं स्वत एव न तु स्वर्गादिसाधनत्वेनेति तत्र कृतिप्रयोजनत्वरूपं कृत्युद्देश्यत्वं वर्तते एवेति चेत्तत्राह—**नियोगस्येति** । कार्यस्येत्यर्थः । तस्य न स्वत एवेच्छाविषयत्वं किं तु सुखसाधनत्वेन, दुःखनिवृत्तिसाधनत्वेन वेति तस्येच्छाविषयत्वाभावान्न कृतिप्रयोजनत्वमिति भावः- **अत एव** । कार्यस्य सुखादिसाधनत्वेनैवेच्छाविषयत्वादेव । ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यादौ लिङ्वाच्यं कार्यं किं क्रियारूपं क्रियासाध्यापूर्वरूपं वा । आद्ये स्वर्गकामपदानन्वयः । क्रियायाः क्षणभङ्गित्वेन तस्याः स्वर्गसाधनत्वायोगात् । अतः स्थाय्यपूर्वमेव कार्यं स्वीकृतम् । तस्यापूर्वस्यापि यदि सुखादिसाधनत्वेन प्रतीतिर्न स्यात् चेत्तादृशापूर्वकल्पने मानाभावेन क्रियैव कार्यं स्यादिति भावः । **अपूर्वव्युत्पत्तिः** । अपूर्वं पुण्यविशेषः । तत्र व्युत्पत्तिर्नाम तस्यापूर्वरूपार्थस्य लिङादिवाच्यत्वम् । **प्रथममिति** । पूर्वपक्षिणोऽयमभिप्रायः । स्वर्गकामपदान्वयात्पूर्वं लिङादिवाच्यकार्यस्य प्राधान्येनैव प्रतिपत्तिः । प्राधान्यं चानन्यार्थत्वम् । नहि तदानीमिदं

श्चात् स्वर्गसाधनं भवतीत्युपहास्यम् । स्वर्गकामपदान्वितकार्याभिधायिपदेन प्रथममप्यनन्यार्थतानभिधानात् । सुखदुःखनिवृत्तितत्साधनेभ्योऽन्यस्यानन्यार्थस्य कृतिसाध्यताप्रतिपत्त्यनुपपत्तेश्च ।

अपि च, किमिदं नियोगस्य प्रयोजनत्वम् । सुखवन्नियोगस्याप्यनुकूलत्वमेवेति चेत् , किं नियोगः सुखम् । सुखमेव ह्यनुकूलम् । सुखविशेषवन्नियोगापरपर्यायं विलक्षणं सुखान्तरमिति चेत् । किं तत्र प्रमाणमिति वक्तव्यम् । स्वानुभवश्चेत्, न । विषयविशेषानुभवसुखवन्नियोगानुभवसुखमिदमिति भवतापि नानुभूयते । शास्त्रेण नियोगस्य पुरुषार्थतया प्रतिपादनात् , पश्चात् तु भोक्ष्यत इति चेत् । किं तन्नियोगस्य पुरुषार्थत्ववाचि शास्त्रम् । न तावल्लौकिकं वाक्यम् । तस्य दुःखात्मकक्रियाविषयत्वात् । तेन सुखसाधनतयैव कृतिसाध्यतामात्रप्रतिपादनात् । नापि वैदिकम् । तेनापि स्वर्गसाधनतयैव कार्यस्य प्रतिपादनात् । नापि नित्यनैमित्तिकशास्त्रम् । तस्यापि तदभिधायित्वं स्वर्गकामवाक्य-

---

कार्यं स्वर्गाद्यर्थमिति प्रतीयते । तादृशप्राधान्यं च स्वर्गकामपदान्वयोत्तरमपि रक्षणीयमेवेति तदानीमपि न तस्य स्वर्गादिसाधनत्वेन प्रतीतिः । किं तु तदपूर्वं स्वप्राधान्यसंरक्षणाय स्वयमेव यागकर्तुः स्वर्गं ददातीति तस्यापूर्वस्य स्वत एवेष्टत्वं न तु सुखसाधनत्वेनेति । परं त्वेतदुपहास्यम् । स्वर्गसाधनतोल्लेखेनैव ह्यपूर्वस्वीकारात् । **स्वर्गकामेति** । अन्विताभिधानवादिमतेनेदम् । ननु व्युत्पत्तिदशायामपूर्वस्य साधनतया व्युत्पत्तिः । अभिधानदशायां तु अनन्यार्थं स्थायिकार्यमित्येव प्रतीयते इत्युच्यते इति चेत्तत्राह—**सुखदुःखेति** । यद्यत्साध्यं तत्तत्सुख-दुःखानिवृत्ति—तत्साधनान्यतममेव । निर्विशेषं न सामान्यमिति न्यायादिति भावः ।

नियोगस्य । अपूर्वरूपकार्यस्य । शङ्कते—**सुखवदिति** । **किं नियोग इति** । **सु**-खव्यतिरिक्तस्यानुकूलत्वं न संभवतीत्याशयः । पुनः शङ्कते—**सुखविशेषवदिति** । यथा स्वर्गादिसुखमितरसुखाद्विलक्षणं तथैवेदमपि नियोगपदवाच्यं सुखमितरसुखाद्विलक्षणमित्याशयः । **विषयविशेषः** । चन्दनस्पर्शादिः । शङ्कते—**शास्त्रेणेति** । **पश्चादिति** । यद्यपीदानीं नानुभवस्तथापि मरणानन्तरमस्त्येवेत्यर्थः । **लौकिकं वाक्यम्** । आप्तोक्तं यागं कुर्वित्यादि । **कृतिसाध्यतामात्रेति** । न तु नियोगस्य सुखरूपत्वं प्रतिपाद्यते इति भावः । **वैदिकम्** । ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यादि । **नित्येति** ।

स्थापूर्वव्युत्पत्तिपूर्वकमित्युक्तनीत्या तेनापि सुखादिसाधनभूतकार्याभिधानमवर्जनीयम् । नियतैहिकफलस्य कर्मणोऽनुष्ठितस्य फलत्वेन तदानीमनुभूयमानान्नाद्यरोगतादिव्यतिरेकेण नियोगरूपसुखानुभवानुपलब्धेश्च, नियोगः सुखमित्यत्र न किञ्चन प्रमाणमुपलभामहे । अर्थवादादिष्वपि स्वर्गादिसुखप्रकारकीर्तनवन्नियोगरूपसुखप्रकारकीर्तनं भवतापि न दृष्टचरम् ।

अतो, विधिवाक्येष्वपि धात्वर्थस्य कर्तृव्यापारसाध्यतामात्रं शब्दानुशासनसिद्धमेव लिङादेर्वाच्यमित्यध्यवसीयते । धात्वर्थस्य यागादेरग्न्यादिदेवतान्तर्यामिपरमपुरुषसमाराधनरूपता, समाराधितात् परमपुरुषात् फलसिद्धिश्चेति, 'फलमत उपपत्तेः' (ब्र. सू. ३।२।३८) इत्यत्र प्रतिपादयिष्यते । अतो, वेदान्ताः परिनिष्पन्नं ब्रह्म बोधयन्तीति ब्रह्मोपासनफलानन्त्यं स्थिरत्वञ्च सिद्धम् । चातुर्मास्यादिकर्मस्वपि, केवलस्य कर्मणः क्षयिफलत्वोपदेशादक्षयफलश्रवणं, वायुश्चान्तरिक्षं चैतदमृतमित्यादिवदापेक्षिकं मन्तव्यम् । अतः, केवलानां कर्मणामल्पास्थिरफलत्वात्, ब्रह्मज्ञानस्यानन्तस्थिरफलत्वाच्च, तन्निर्णयफलो ब्रह्मविचारारम्भो युक्त इति स्थितम् ॥ १ ॥

अहरहः संध्यामुपासीतेत्यादि नित्यम् । प्रायश्चित्तबोधकं वाक्यं नैमित्तिकम् । **नियतेति** । पचनरूपस्य कर्मणः अन्नरूपं फलं नियतम् । इह लोके एवोपभोगार्हं च । एवमेवौषधसेवनरूपकर्मणो नीरोगत्वं फलं बोध्यम् । **अर्थवादेति** । अर्थवादवाक्ये यथा स्वर्गादिसुखप्रकाराः कथ्यन्ते तथाऽपूर्वरूपसुखप्रकारा न कथ्यन्ते । तथा चापूर्वस्य सुखस्वरूपत्वे प्रमाणाभावात्तस्य प्रयोजनत्वं न संभवतीति स्थितम् ।

इति स्थितमिति । अस्मिन्नधिकरणे ब्रह्ममीमांसा १ विषयः । सा किमारम्भणीया न वेति २ संशयः । सिद्धवस्तुनि शब्दव्युत्पत्तिर्नास्तीति ३ पूर्वपक्षः । अस्तीति ४ सिद्धान्तः । ब्रह्ममीमांसारम्भः ५ फलम् । एवमग्रेऽप्यङ्गपञ्चकं यथायथमूहनीयम् ॥ १ ॥

किं पुनस्तद्ब्रह्म यज्जिज्ञास्यमुच्यत इत्यत्राह—

जन्माद्यस्य यतः ॥ २ ॥

जन्मादीति सृष्टिस्थितिप्रलयम् । तद्गुणसंविज्ञानो बहुव्रीहिः । 'अस्य' अचिन्त्यविविधविचित्ररचनस्य नियतदेशकालफलभोगब्रह्मादिस्तम्बपर्यन्तक्षेत्रज्ञमिश्रस्य जगतो 'यतो' यस्मात् सर्वेश्वरान्निखिलहेयप्रत्यनीकस्वरूपात् सत्यसङ्कल्पात् ज्ञानानन्दाद्यनन्तकल्याणगुणात् सर्वज्ञात् सर्वशक्तेः परमकारुणिकात् परस्मात् पुंसः सृष्टिस्थितिप्रलयाः प्रवर्तन्ते, तद्ब्रह्मेति सूत्रार्थः ।

जिज्ञास्यम् । विचार्यम् । **जन्मादीति** । जन्म सृष्टिः । आदिशब्देनाद्यावयवमुच्यते । जन्म आदि यस्येति बहुव्रीहिः । **सृष्टिस्थितिप्रलयमिति** । समाहारद्वंद्वः । **तद्गुणेति** । तेषां गुणानां बहुव्रीहिघटकपदार्थानां कार्यान्वयितया संविज्ञानं यत्रेत्यर्थः । यथा लम्बकर्णमानयेति । अत्र लम्बकर्णयोरप्यानयनक्रियासंबन्धः । अथवा तच्छब्देन विशेष्यमुच्यते । गुणशब्देन च विशेषणमुच्यते । समित्यस्यैकीकरणमर्थः । तथा च विशेष्यं विशेषणं चैककार्यान्वितत्वेन यो बहुव्रीहिर्ज्ञापयति स तद्गुणसंविज्ञानः । लम्बकर्णौ विशेषणम् । तद्विशिष्टः पशुर्विशेष्यः । चित्रगुमानयेत्यत्र तु चित्राणां गवामानयनक्रियया सहाऽसंबन्धान्न तद्गुणसंविज्ञानो बहुव्रीहिरिति बोध्यम् । **अचिन्त्येति** । अचिन्त्या जीवकर्तृकत्वाभावेन चिन्तयितुमशक्या आकाशवाय्वादिभेदेन विविधा तत्तदवान्तरभेदेन विचित्रा च रचना संस्थानं यस्येत्यर्थः । अनेनाचिदंशवैचित्र्यमुक्तम् । चिदंशवैचित्र्यमाह—**नियतेति** । अस्मिन्देशे अस्मिन्काले इदं फलमनेन भोक्तव्यमिति नियमो हिरण्यगर्भादारभ्य पिपीलिकापर्यन्तं सर्वजीवेषु साधारण एवेत्यर्थः । **निखिलेति** । निखिलाः ये हेयाः त्याज्याः चिद्गताः क्लेशादयोऽचिद्गताः षड्भावविकाराश्च तत्प्रत्यनीकं स्वरूपं यस्य तस्मादित्यर्थः । **ज्ञानानन्देति** । भावप्रधानो निर्देशः । ज्ञानत्वमानन्दत्वं चेत्यर्थः । आनन्दत्वं स्वानुकूलत्वम् । आदिशब्देन सत्यत्वादिसंग्रहः । अनन्तत्वं देशतः कालतश्चापरिच्छिन्नत्वम् । कल्याणत्वमन्येषामनुभवितॄणामप्यनुकूलत्वम् ।

' भृगुर्वै वारुणिर्वरुणं पितरमुपससार, अधीहि भगवो ब्रह्म ' (तै. ३।१।१) इत्यारभ्य, ' यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद्ब्रह्म ' (तै. ३।१।१) इति श्रूयते । तत्र संशयः । किमस्माद्वाक्याद्ब्रह्म लक्षणतः प्रतिपत्तुं शक्यते, न वेति । किं प्राप्तं, न शक्यमिति । न तावत् जन्मादयो विशेषणत्वेन ब्रह्म लक्षयन्ति । अनेकविशेषणव्यावृत्तत्वेन ब्रह्मणोऽनेकत्वप्रसक्तेः । विशेषणत्वं हि व्यावर्तकत्वम् । ननु, देवदत्तः श्यामो युवा लोहिताक्षः समपरिमाण इत्यत्र विशेषणबहुत्वेऽप्येक एव देवदत्तः प्रतीयते । एवमत्रापि एकमेव ब्रह्म भवति । नैवम् । तत्र, प्रमाणान्तरेणैक्यप्रतीतेरेकस्मिन्नेव विशेषणानामुपसंहारः । अन्यथा, तत्रापि व्यावर्तकत्वेनानेकत्वमपरिहार्यम् । अत त्वनेकेनैव विशेषणेन लिलक्षयिषितत्वात् ब्रह्मणः, प्रमाणान्तरेणैक्यमनवगतमिति व्यावर्तकभेदेन ब्रह्मबहुत्वमवर्जनीयम् ।

वारुणिः । वरुणपुत्रः । **भगवः** । हे भगवन् । **प्रयन्ति** । प्रगच्छन्ति । प्रलयावस्थास्थानीत्यर्थः । जन्मादीनां ब्रह्मलक्षणत्वं किं विशेषणत्वेनोपलक्षणत्वेन वा प्रथमेऽपि किं प्रत्येकं विशेषणत्वेन संभूय विशेषणत्वेन वेति विकल्प्य प्रत्येकपक्षे दूषणमाह—**न तावदिति** । **विशेषणत्वेनेति** । ज्ञाप्यान्तर्भूतो ज्ञाप्यप्रतीत्युपायो विशेषणम् । ज्ञाप्यबहिर्भूतो ज्ञाप्यप्रतीत्युपाय उपलक्षणमिति विशेषणोपलक्षणयोर्भेदः । **प्रसक्तेरिति** । यथा नीलं शुक्लं पीतं वस्त्रमित्यत्र वस्त्रानेकत्वं प्रतीयते यथा वा अजो गजो महिषः प्राणीत्यत्र प्राण्यनेकत्वं प्रतीयते तद्वदेवात्र जगज्जन्मसाधनं ब्रह्म भिन्नं स्थितिसाधनं भिन्नं प्रलयसाधनं च भिन्नमिति प्रतीतिः स्यात् । यतो जगज्जन्म भवति तद्ब्रह्मेत्युक्ते विशेषणस्य व्यावर्तकत्वेन तस्मादितरत्किंचिन्न भवतीति प्रतीतेः । **व्यावर्तकत्वमिति** । विशेष्यते इतरस्माद्भिद्यतेऽनेनेति विशेषणशब्दस्य निरुक्तेः । **प्रमाणान्तरेणेति** । देवदत्ते युवत्वस्य प्रमाणान्तरसिद्धत्वेन न तस्य श्याम इति विशेषणेन बाधः । किं तु नीलत्वादेरेवेति भावः । **उपसंहारः** । पर्यवसानम् । **अनवगतमिति** । सत्यं ज्ञानमित्यत्राप्येवमेव ब्रह्मबहुत्वप्रतीतिः । एकमेवाद्वितीयमित्यत्रैकशब्दस्तु ब्रह्मबहुत्वेऽपि एको

ब्रह्मशब्दैक्यात् अत्राप्यैक्यं प्रतीयत इति चेत्, न । अज्ञातगोव्यक्तिजिज्ञासोः पुरुषस्य षण्डो मुण्डः पूर्णशृङ्गो गौरित्युक्ते, गोपदैक्येऽपि षण्डत्वादिव्यावर्तकभेदेन गोव्यक्तिबहुत्वप्रतीतेर्ब्रह्मव्यक्तयोऽपि बह्व्यः स्युः। अत एव लिलक्षयिषिते वस्तुन्येषां विशेषणानां सम्भूय लक्षणत्वमनुपपन्नम् । नाप्युपलक्षणत्वेन लक्षयन्ति । आकारान्तराप्रतिपत्तेः। उपलक्षणानामेकेनाकारेण प्रतिपन्नस्य केनचिदाकारान्तरेण प्रतिपत्तिहेतुत्वं हि दृष्टम् । यत्रायं सारसः, स देवदत्तकेदार इत्यादिषु । ननु च, सत्यं ज्ञानमनन्तं ब्रह्मेति प्रतिपन्नाकारस्य जगज्जन्मादीन्युपलक्षणानि भवन्ति । न । इतरेतरप्रतिपन्नाकारापेक्षत्वेनोभयोर्लक्षणवाक्ययोरन्योन्याश्रयणात् । अतो, न लक्षणतो ब्रह्म प्रतिपत्तुं शक्यत इति ।

एवं प्राप्तेऽभिधीयते । जगत्सृष्टिस्थितिप्रलयैरुपलक्षणीभूतैर्ब्रह्म प्रतिपत्तुं शक्यते। नच, उपलक्षणोपलक्ष्याकारव्यतिरिक्ताकारान्तराप्रतिपत्तेर्ब्रह्मणोऽप्रतिपत्तिः । उपलक्ष्यं ह्यनवधिकातिशयबृहत् बृंहणञ्च ब्रह्म । बृहतेर्धातोस्तदर्थत्वात् । तदुपलक्षणभूताश्च जगज्जन्मस्थितिलयाः । यतो, येन, यदिति प्रसिद्धवज्जन्मादिकारणनिर्देशेन यथाप्रसिद्धि जन्मादिकारणमनूद्यते । प्रसिद्धिश्च, 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम् । त-

---

व्रीहिरितिवदुपपद्यते इत्याशयः । शङ्कते—**ब्रह्मशब्देति । बह्व्यः स्युरिति । विशेष्यै**कवचनेन विशेषणभेदमूलकाविशेष्यभेदप्रतीतेर्न बाधः । ब्रह्म इत्येकवचनं तु ग्रहं संमार्ष्टीतिवज्जातिपक्षाश्रयेणोपपादनीयम् । संभूयेतिपक्षे दूषणमाह—**अत एवेति** । विशेषणभेदस्य विशेष्यभेदापादकत्वस्वभावादेवेत्यर्थः । उपलक्षणपक्षं दूषयति—**नापीति । यत्रायमिति** । अत्र सारससंबन्धः उपलक्षणम् । देवदत्तसम्बन्धित्वमुपलक्ष्यम् । केदारत्वं च पूर्वप्रतिपन्नाकारः । तथात्र पूर्वप्रतिपन्नाकाराभावेनोपलक्षणं न संभवतीत्यर्थः ।

आकारान्तरेति । अन्तरशब्दो विशेषवाची । तेन व्यतिरिक्तशब्देन न पौनरुक्त्यम् । ब्रह्मणः पूर्वप्रतिपन्नाकाराभावादप्रतिपत्तिरिति न वक्तुं शक्यते इत्यर्थः । तत्र पूर्वप्रतिपन्नाकारमुपलक्ष्याकारादुपलक्षणाकाराच्च पृथक्त्वेन दर्शयितुं **प्रथम**मुपलक्ष्याकारं दर्शयति—**उपलक्ष्यमिति** । पूर्वप्रतिपन्नाकारं दर्शयितुमाह—**यत** इति । यतो वेत्यत्र यत इति निर्देशः । येन जातानीत्यत्र येनेति निर्देशः।

दैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजत' (छां. ६।२।२-३) इत्येकस्यैव सच्छब्दवाच्यस्य निमित्तोपादानरूपकारणत्वेन । तदपि, सदेवेदमग्र एकमेवासीदित्युपादानतां प्रतिपाद्य, अद्वितीयमित्यधिष्ठात्रन्तरं प्रतिषिध्य, तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजतेत्येकस्यैव प्रतिपादनात् । तस्माद्यन्मूला जगज्जन्मस्थितिलयाः स्वनिमित्तोपादानभूतं वस्तु ब्रह्मेति लक्षयन्ति। जगन्निमित्तोपादानताक्षिप्तसर्वज्ञत्वसत्यसङ्कल्पत्वविचित्रशक्तित्वाद्याकारबृहत्वेन प्रतिपन्नं ब्रह्म । इति च जन्मादीनां तथाप्रतिपन्नस्य लक्षकत्वेन नाकारान्तराप्रतिपत्तिरूपानुपपत्तिः ।

जगज्जन्मादीनां विशेषणतया लक्षणत्वेऽपि न कश्चिद्दोषः । लक्षणभूतान्यपि विशेषणानि स्वविरोधिव्यावृत्तं वस्तु लक्षयन्ति । अज्ञातस्वरूपे वस्तुन्येकस्मिंल्लिलक्षयिषितेऽपि परस्पराविरोध्यनेकविशेषणलक्षणत्वं न भेदमापादयति । विशेषणानामेकाश्रयतया प्रतीतेरेकस्मिन्नेवोपसंहारात् । षण्डत्वादयस्तु विरोधादेव गोव्यक्तिभेदमापादयन्ति । अत्र तु कालभेदेन जन्मादीनां न विरोधः ।

'यतो वा इमानि भूतानि' (तै. ३।१।१) इत्यादिवाक्येन प्रतिपन्नस्य जगज्जन्मादिकारणस्य ब्रह्मणः सकलेतरव्यावृत्तं स्वरूपमभिधीयते—

यत्प्रयन्तीत्यत्र यदिति निर्देशः । **तदपीति** । निमित्तोपादानत्वरूपकारणत्वमपीत्यर्थः । **प्रतिपन्नं ब्रह्मेति** । तथा च सामान्यतो बृहत्वं पूर्वप्रतिपन्नाकारः । गुणतो विभूतितश्चानवधिकं यद् बृहत्वं तद्रूपो बृहत्वविशेषस्तूपलक्ष्याकार इति बोध्यम् । **इति चेति** । अतश्चेत्यर्थः ।

अथ विशेषणतया लक्षणत्वमुपपादयति—**जगदिति** । **लक्षणभूतान्यपि** । व्यावर्तकस्वरूपाण्यपि । **स्वविरोधिव्यावृत्तमिति** । न तु स्वेतरयावद्धर्मव्यावृत्तमित्यर्थः। यथा नीलं वस्त्रमित्युक्ते नीलपदेन स्वविरोधिशुक्लत्वादेरेव व्यावृत्तिः । न तु स्वाविरोधिमार्दवादेरिति भावः ।

अथ सत्यज्ञानादीनां लक्षणत्वमुपपादयति—**यतो वेति** । यतो वेति लक्षणवाक्येन

'सत्यं ज्ञानमनन्तं ब्रह्म' (तै. २।१।१) इति । तत्र सत्यपदं निरुपाधिकसत्तायोगि ब्रह्माह । तेन, विकारास्पदमचेतनं, तत्संसृष्टचेतनश्च व्यावृत्तः । नामान्तरभजनार्हावस्थान्तरयोगेन तयोर्निरुपाधिकसत्तायोगरहितत्वात् । ज्ञानपदं नित्यासङ्कुचितज्ञानैकाकारमाह । तेन कदाचित्सङ्कुचितज्ञानत्वेन मुक्ता व्यावृत्ताः । अनन्तपदं देशकालवस्तुपरिच्छेदरहितस्वरूपमाह । सगुणत्वात् स्वरूपस्य, स्वरूपेण गुणैश्चानन्त्यम् । तेन पूर्वपदद्वयव्यावृत्तकोटिद्वयविलक्षणाः सातिशयस्वरूपस्वगुणा नित्या व्यावृत्ताः । विशेषणानां व्यावर्तकत्वात् । ततः, सत्यं ज्ञानमनन्तं ब्रह्मेत्यनेन वाक्येन जगज्जन्मादिनावगतस्वरूपं ब्रह्म सकलेतरवस्तुविसजातीयमिति लक्ष्यत इति नान्योन्याश्रयणम् । अतः सकलजगज्जन्मादिकारणं निरवद्यं सर्वज्ञं सत्यसंकल्पं सर्वशक्ति ब्रह्म लक्षणतः प्रतिपत्तुं शक्यत इति सिद्धम् ।

कारणत्वमेव लक्षणत्वेनोच्यते इत्यस्य कारणवाक्यत्वम् । **निरुपाधिकसत्ता** । निर्विकारत्वम् । विकारात्मना परिणामविशेषेण तत्तदवस्थस्य या सत्ता तस्याः सोपाधिकसत्तात्वात् । **ब्रह्माहेति** । निरुपपदस्य सत्यशब्दस्य शक्तिसङ्कोचे प्रमाणाभावेन स्वरूपतो धर्मतश्चैकरूपत्वमेव सत्यत्वमित्यर्थः । स्वरूपत इत्यनेनाचेतनव्यावृत्तिः । धर्मत इत्यनेन जीवव्यावृत्तिः । **नामान्तरभजनार्हम्** । नामान्तरप्राप्त्यर्हम् । **देशकालेति** । इह ब्रह्म नान्यत्रेत्याकारकपरिच्छेदशून्यत्वं देशपरिच्छेदरहितत्वम् । न तु देशाभावः । तथेदानीं ब्रह्म नान्यदेत्याकारकपरिच्छेदशून्यत्वं कालपरिच्छेदरहितत्वम् । न तु कालाभावः । तथेदं वस्तु ब्रह्म न भवतीत्याकारकपरिच्छेदशून्यत्वं वस्तुपरिच्छेदरहितत्वम् । न तु वस्तुनोऽभावः । ब्रह्मव्यतिरिक्तयोश्चिदचितोः सत्वेऽपि तयोर्ब्रह्मशरीरत्वेन ब्रह्मसामानाधिकरण्येन प्रतीयमानत्वात् 'इदं वस्तु ब्रह्म न भवति' इत्याकारकवस्तुपरिच्छेदो न जायते । **पूर्वपदद्वयम्** । सत्यं ज्ञानमितिपदद्वयम् । **सातिशयेति** । नित्यानां जीवानां स्वरूपमणुत्वात्परमात्मस्वरूपापेक्षया सातिशयम् । तथा नित्यानां जीवानां ज्ञानव्यतिरिक्ता ये ऐश्वर्यादयो गुणास्तेषां जगद्व्यापारानर्हत्वात्परमात्मगुणापेक्षया सातिशयत्वम् ।

ये तु, निर्विशेषं वस्तु जिज्ञास्यमिति वदन्ति। तन्मते, 'ब्रह्मजिज्ञासा,' 'जन्माद्यस्य यतः' इत्यसङ्गतं स्यात्। निरतिशयबृहद्बृंहणश्च ब्रह्मेति निर्वचनात्। तच्च ब्रह्म जगज्जन्मादिकारणमिति वचनाच्च। एवमुत्तरेष्वपि सूत्रगणेषु सूत्रोदाहृतश्रुतिगणेषु चेक्षणाद्यन्वयदर्शनात् सूत्राणि सूत्रोदाहृताः श्रुतयश्च न तत्र प्रमाणम्। तर्कश्च साध्यधर्माव्यभिचारिसाधनधर्मान्वितवस्तुविषयत्वात् न निर्विशेषवस्तुनि प्रमाणम्। जगज्जन्मादिभ्रमाः यतस्तद्ब्रह्मेति स्वोत्प्रेक्षापक्षेऽपि न निर्विशेषवस्तुसिद्धिः। भ्रममूलमज्ञानम्, अज्ञानसाक्षि ब्रह्मेत्यभ्युपगमात्। साक्षित्वं हि प्रकाशैकरसतयोच्यते। प्रकाशत्वं तु जडाद्व्यावर्तकं स्वस्य परस्य च व्यवहारयोग्यतापादनस्वभावेन भवति। तथा सति सविशेषत्वम्। तदभावे प्रकाशतैव न स्यात्। तुच्छतैव स्यात् ॥ २ ॥

ये तु। मायावादिनस्तु। **इति निर्वचनादिति**। न तु निर्विशेषं ब्रह्मेति निर्वचनं कृतमित्याशयः। **इति वचनाच्चेति**। न तु 'जगतोऽध्यासो यतः' इति सूत्रितमित्याशयः। **ईक्षणेति**। 'ईक्षतेर्नाशब्दम्' (ब्र. सू. १।१।५) इत्यत्र ब्रह्मणीक्षणसम्बन्धी दर्शितः। ब्रह्मणो निर्विशेषत्वे तु स न संभवतीत्यर्थः। **तर्कश्च**। अनुमानं च। **साध्येति**। साध्यभूतो यो धर्मस्तदव्यभिचारी तदनधिकरणावृत्तिर्यः साधनभूतो धर्मस्तेन युक्तमेव वस्त्वनुमानस्य विषयो न तु निर्विशेषमिति भावः। **स्वोत्प्रेक्षापक्षेऽपि**। जन्मादिसूत्रस्य स्वोत्प्रेक्षितार्थाङ्गीकारेऽपि। किं चायं मायावाद्यभिमतो विवर्तवादो न श्रुत्यारूढः। यतो यथा सौम्येति श्रुतौ परिणामिघटादिदृष्टान्त एवोक्तो न तु रज्जुसर्पादिः। तथाग्रे सूत्रकृताऽपि 'आत्मकृतेः परिणामात्' (ब्र. सू. १।४।२६) इत्युक्तं न तु विवर्तादित्यवधेयम् ॥ २ ॥

जगज्जन्मादिकारणं ब्रह्म वेदान्तवेद्यमित्युक्तम् । तदयुक्तम् । तद्धि न वाक्यप्रतिपाद्यम् । अनुमानेन सिद्धेरित्याशङ्क्याह—

शास्त्रयोनित्वात् ॥ ३ ॥

'शास्त्रं' यस्य 'योनिः' कारणं प्रमाणं तच्छास्त्रयोनि । तस्य भावः 'शास्त्रयोनित्वम्' तस्मात् । ब्रह्मज्ञानकारणत्वात् शास्त्रस्य तद्योनित्वम् । ब्रह्मणोऽत्यन्तातीन्द्रियत्वेन प्रत्यक्षादिप्रमाणाविषयतया ब्रह्मणः शास्त्रैकप्रमाणत्वात् । उक्तस्वरूपं ब्रह्म, 'यतो वा इमानि भूतानि जायन्ते' (तै. ३।१।१) इत्यादि वाक्यं बोधयत्येवेत्यर्थः ।

ननु, 'शास्त्रयोनित्वं' ब्रह्मणो न सम्भवति, प्रमाणान्तरवेद्यत्वात् ब्रह्मणः । अप्राप्ते तु शास्त्रमर्थवत् ।

किं तर्हि तत्र प्रमाणम् । न तावत् प्रत्यक्षम् । तद्धि द्विविधम् । इन्द्रियसम्भवं योगसम्भवञ्चेति । इन्द्रियसम्भवञ्च, बाह्यसम्भवमान्तरसम्भवञ्चेति द्विधा । बाह्येन्द्रियाणि विद्यमानसन्निकर्षयोग्यस्वविषयबोधजनकानीति न सर्वार्थसाक्षात्कारतन्निर्माणसमर्थपरमपुरुषविशेषविषयबोधजनकानि ।

सिद्धेरिति । अप्राप्ते हि शास्त्रमर्थवदिति न्यायेन प्रत्यक्षादिप्रमाणान्तराविषयवस्तुप्रतिपादकत्वे एव शास्त्रस्य प्रमाणत्वात्प्रमाणभूतवाक्यप्रतिपाद्यत्वं ब्रह्मणो न सम्भवतीत्याशयः ।

शास्त्रं यस्येति । यथा अब्भक्ष इत्यत्राप एव भक्षयतीत्यर्थो गम्यते तथाऽत्र शास्त्रमेव यस्य योनिरित्यर्थो बोध्यः । **कारणम्** । ज्ञप्तिकारणम् । न तूत्पत्तिकारणम् ।

अस्मिन्नधिकरणे मुख्यपूर्वपक्षमुत्थापयति—**नन्विति** ।

सिद्धान्त्येकदेशी मीमांसकः शङ्कते—**किं तर्हीति** । **विद्यमानेति** । विद्यमानो यः सन्निकर्षः देशतः कालतश्च (विषयेन्द्रिययोः) सम्बन्धस्तद्योग्यो यः स्वविषयस्तद्बोधजनकानीत्यर्थः । योग्यपदेन धर्माधर्मादिव्यावृत्तिः । **सर्वार्थेति** । सर्वार्थसाक्षा-

नाप्यान्तरम् । सुखादिव्यतिरिक्तबहिर्विषयेषु तस्य बाह्येन्द्रियानपेक्षप्रवृत्त्यनुपपत्तेः । नापि योगजन्यम् । भावनाप्रकर्षपर्यन्तजन्मनस्तस्य विशदावभासत्वेऽपि पूर्वानुभूतविषयस्मृतिमात्रत्वान्न प्रामाण्यमिति कुतः प्रत्यक्षता । तदतिरिक्तविषयत्वे कारणाभावात् । तथा सति तस्य भ्रमरूपता । नाप्यनुमानं विशेषतो दृष्टं, सामान्यतो दृष्टं वा । अतीन्द्रिये वस्तुनि सम्बन्धावधारणविरहान्न विशेषतो दृष्टम् । समस्तवस्तुसाक्षात्कारतन्निर्माणसमर्थपुरुषविशेषनियतं सामान्यतो दृष्टमपि न लिङ्गमुपलभ्यते ।

ननु च, जगतः कार्यत्वं तदुपादानोपकरणसम्प्रदानप्रयोजनाभिज्ञक-

त्कारः सर्वपदार्थप्रत्यक्षज्ञानं तन्निर्माणं सर्वपदार्थोत्पत्तिस्तदुभयसमर्थो यः परमपुरुषरूपो विशेषविषयस्तद्बोधजनकानि न भवन्तीत्यर्थः । **नाप्यान्तरमिति** । मनोऽपि न परमपुरुषबोधजनकमित्यर्थः । **सुखादीति** । आन्तरसुखदुःखादीति पाठे आन्तरमित्यस्य विवरणं सुखदुःखादीति बोध्यम् । **नापि योगेति** । योगिप्रत्यक्षं किं पूर्वानुभूतापेक्षया अधिकविषयमस्ति न वा । अन्त्ये आह—**भावनेति** । भावनाप्रकर्षपर्यन्तं जन्म यस्येत्यर्थः । अनुभूतानतिरिक्तविषयस्येति यावत् । तथा च यावदेव भावना तावदेव योगिप्रत्यक्षमुत्पद्यते । भावना चानुभूतसंबन्धिन्येवेति । अनधिकविषयस्य योगिप्रत्यक्षस्य भावनाजन्यत्वेन स्मृतिरूपत्वान्न प्रमाणत्वमिति प्रमाणविशेषप्रत्यक्षत्वं दूरोत्सारितं स्यात् । आद्ये आह—**तदतिरिक्तेति** । इन्द्रियसम्बन्धरूपकारणाभावान्नाधिकविषयस्य योगिप्रत्यक्षस्य प्रामाण्यम् । **तथा सतीति** । कारणाभावेप्यतिरिक्तविषयत्वाङ्गीकारे सति तस्य दोषमूलकत्वेन भ्रान्तितैवेत्यर्थः । **विशेषतो दृष्टम्** । कार्यकारणभावरूपविशेषसम्बन्धमूलकम् । यथा कार्येण धूमेन कारणस्य वन्हेरनुमानम् । यथा च कारणेन मेघागमनेन कार्यस्य वृष्ट्यादेरनुमानम् । **सामान्यतो दृष्टम्** । कार्यकारणभावसम्बन्धराहित्येऽपि सामान्यतः सहचारदर्शनजन्यम् । यथा गन्धेन पृथिवीत्वानुमानम् । **सम्बन्धावधारणविरहात्** । कार्यकारणभावसम्बन्धज्ञानाभावात् । **नियतम्** । व्याप्तम् ।

अथ पूर्वपक्ष्येकदेशी परमात्मन्यनुमानं दर्शयति—**ननु चेति** । **तदुपादानेति** । उपादानं समवायिकारणम् । उपकरणं निमित्तकारणम् । संप्रदानं क्रियोद्देश्यं भोक्ता । प्रयोजनं विनियोगः एतदभिज्ञः कर्ता यस्य तत्त्वमित्यर्थः । यत्रयत्र कार्यत्वं तत्रतत्रै-

---

१ ख. आन्तरसुखदुःखादि.

तृकत्वव्याप्तम् । अचेतनारब्धत्वं जगतश्चैकचेतनाधीनत्वेन व्याप्तम् । सर्वं हि घटादिकार्यं तदुपादानोपकरणसम्प्रदानप्रयोजनाभिज्ञकर्तृकं दृष्टम् । अचेतनारब्धमरोगं स्वशरीरमेकचेतनाधीनञ्च । सावयवत्वेन जगतः कार्यत्वम् ।

उच्यते । किमिदमेकचेतनाधीनत्वम् । न तावत्तदायत्तोत्पत्तिस्थितित्वम् । दृष्टान्तो हि साध्यविकलः स्यात् । न ह्यरोगं स्वशरीरमेकचेतनायत्तोत्पत्तिस्थिति । तच्छरीरस्य भोक्तॄणां भार्यादिसर्वचेतनानामदृष्टजन्यत्वात् तदुत्पत्तिस्थित्योः । किञ्च, शरीरावयविनः स्वावयवसमवेततारूपा स्थितिरवयवसंश्लेषविशेषव्यतिरेकेण न चेतनमपेक्षते । प्राणनलक्षणा तु स्थितिः पक्षत्वाभिमते क्षितिजलधिमहीधरादौ न सम्भवतीति पक्षसपक्षानुगतामेकरूपां स्थितिं नोपलभामहे । तदायत्तप्रवृत्तित्वं तदधीनत्वमिति चेत् । अनेकचेतनसाध्येषु गुरुतररथशिलामहीधरादिषु व्यभिचारः । चेतनमात्राधीनत्वे सिध्यसाध्यता ।

तादृशकर्तृकत्वमितिव्याप्त्या कर्ता सिध्यति । स चार्थात्परमात्मैवेत्याशयः । एककर्तृकत्वसिध्यर्थमनुमानान्तरमाह—**अचेतनेति** । उक्तानुमानद्वये क्रमेण दृष्टांतमाह—**सर्वं हीत्यादिना । एकचेतनाधीनं चेति** । दृष्टमित्यनुषज्यते । उक्तानुमानस्य कार्यत्वसिध्यधीनत्वात्कार्यत्वं जगतः साधयति—**सावयवत्वेनेति** ।

सिद्धान्त्येकदेशी दूषयति—**उच्यत इति** । आदौ द्वितीयमनुमानं सन्निहितत्वाद्दूषयति—**किमिदमिति । न तावदिति** । तदायत्तोत्पत्तिस्थितित्वं हि तदिच्छाधीनोत्पत्तिस्थितित्वम् । तच्च दृष्टान्ते शरीरे न संभवति । शरीरस्योत्पत्तेः स्थितेर्वा जीवेच्छाधीनत्वाभावात् । ननु तददृष्टाधीनोत्पत्तिस्थितित्वमेव तदायत्तोत्पत्तिस्थितित्वमितिचेत्तत्राप्याह—**दृष्टान्तो हीति । अवयवसंश्लेषविशेषः** । अवयवानां सम्यक् सम्बन्धः । स एवावयविनः स्थितौ प्रयोजको न तु जीव इत्यर्थः । **पक्षेति** । सर्वं जगत्पक्षः । शरीरं सपक्षः । **तदायत्तेति** । एकचेतनाधीनप्रवृत्तिकत्वमेवैकचेतनाधीनत्वम् । अस्ति चेदं सपक्षे शरीरे । शरीरप्रवृत्तेर्जीवाधीनत्वात् । साध्यकोटौ एकत्वस्याविवक्षायां दोषमाह—**चेतनमात्रेति** ।

किञ्च उभयवादिसिद्धानां जीवानामेव लाघवन्यायेन कर्तृत्वाभ्युपगमो युक्तः। नच जीवानामुपादानाद्यनभिज्ञतया कर्तृत्वासम्भवः । सर्वेषामेव चेतनानां पृथिव्याद्युपादानयागाद्युपकरणसाक्षातकारसामर्थ्यात् । यथेदानीं पृथिव्यादयो यागादयश्च प्रत्यक्षमीक्ष्यन्ते। उपकरणभूतयागादिशक्तिरूपापूर्वादिशब्दवाच्यादृष्टसाक्षात्काराभावेऽपि चेतनानां न कर्तृत्वानुपपत्तिः । तत्साक्षात्कारानपेक्षणात् कार्यारम्भस्य । शक्तिमत्साक्षात्कार एव हि कार्यारम्भोपयोगी। शक्तेस्तु ज्ञानमात्रमेवोपयुज्यते न साक्षात्कारः। नहि कुलालादयः कार्योपकरणभूतदण्डचक्रादिवत् तच्छक्तिमपि साक्षात्कृत्य घटमणिकादिकार्यमारम्भन्ते। इह तु चेतनानामागमावगतयागादिशक्तिविशेषाणां कार्यारम्भो नानुपपन्नः।

किञ्च, यच्छक्यक्रियं शक्योपादानादिविज्ञानञ्च, तदेव तदभिज्ञकर्तृकं दृष्टम् । महीधरमहार्णवादि त्वशक्यक्रियमशक्योपादानादिज्ञानं चेति न चेतनकर्तृकम्। अतो घटमणिकादिसजातीय-शक्यक्रिय-शक्योपादानादिविज्ञान-वस्तुगतमेव कार्यत्वं बुद्धिमत्कर्तृपूर्वकत्वसाधने प्रभवति ।

आद्यमनुमानं दूषयति–**किं चेति। यथेदानीमिति।** एवमेव पूर्वकालेपीति भावः । ननु तथापि धर्माधर्मयोः साक्षात्कारासंभवाज्जीवस्य कर्तृत्वं न संभवतीति चेत्त्राह–**उपकरणेति**। उपकरणीभूतयागादिजन्या स्वात्मातिशयरूपा या शक्तिस्तद्रूपमपूर्वादिपदवाच्यं यददृष्टं तस्य साक्षात्काराभावेपीत्यर्थः। **शक्तिमत्**। शक्तिविशिष्टं दण्डादि, शक्तिजनकं यागादि च। तस्य साक्षात्कारः शक्तिमत्वेनैव रूपेणेति नाग्रहः। **मणिकः**। कमण्डलुः।

अथ सावयवत्वहेतोः सोपाधिकत्वं दर्शयति–**किं चेति**। शक्या क्रिया यस्य कार्यस्य तच्छक्यक्रियम्। शक्यमुपादानादिविज्ञानं यस्य कार्यस्य तच्छक्योपादानादिविज्ञानम्। शक्यक्रियत्वं शक्योपादानादिविज्ञानत्वं चेत्युपाधिद्वयम्। यत्र कार्यत्वं तत्र शक्यक्रियत्वं शक्योपादानादिविज्ञानत्वं चेति घटादौ साध्यव्यापकत्वम् । यत्र सावयवत्वं तत्र शक्यक्रियत्वं शक्योपादानादिविज्ञानत्वं च नियमेन नास्ति। महीधरादौ व्यभिचारादिति साधनाव्यापकत्वम्।

किञ्च, घटादिकार्यमनीश्वरेणाल्पज्ञानशक्तिना सशरीरेण परिग्रहवता-नाप्तकामेन निर्मितं दृष्टमिति तथाविधमेव चेतनं कर्तारं साधयन्नयं कार्यत्वहेतुः सिसाधयिषितपुरुषसार्वज्ञसर्वैश्वर्यादिविपरीतसाधनात् विरुद्धः स्यात् । न चैतावता सर्वानुमानोच्छेदप्रसङ्गः । लिङ्गिनि प्रमाणान्तर-गोचरे लिङ्गबलोपस्थापिता विपरीतविशेषास्तत्प्रमाणप्रतिहतगतयो हि निवर्तन्ते । इह तु, सकलेतरप्रमाणाविषये लिङ्गिनि निखिलजगन्नि-र्माणचतुरे अन्वयव्यतिरेकावगताविनाभावनियमा धर्माः सर्व एवाविशेषे-ण प्रसज्यन्ते । निवर्तकप्रमाणाभावात् तथैवावतिष्ठन्ते । अत आगमादृते कथमीश्वरः सेत्स्यति ।

अत्राहुः । सावयवत्वादेव जगतः कार्यत्वं न प्रत्याख्यातुं शक्यते । भवन्ति च प्रयोगाः । विवादाध्यासितं भूभूधरादि, कार्यं सावयवत्वात् घटादिवत् । तथा विवादाध्यासितमवनिजलधिमहीधरादि, कार्यं महत्त्वे सति क्रियावत्त्वात् घटादिवत् । तनुभुवनादि, कार्यं महत्त्वे सति मूर्तत्वात् घटादिवदिति । सावयवेषु द्रव्येष्विदमेव क्रियते, नेतरदिति कार्यत्वस्य नियामकं सावयवत्वातिरेकि रूपान्तरं नोपलभामहे । कार्यत्वप्रतिनियतं शक्यक्रियत्वं शक्योपादानादिविज्ञानत्वं चोपलभ्यत इति चेत्, न । कार्यत्वे-

---

अथ कार्यत्वहेतुः परमात्मनि विरुद्धधर्मसाधक इत्याह—**किं चेति । अनीश्वरेण ।** कर्मवश्येन । **परिग्रहवता ।** दण्डचक्रादिसाधनसहितेन । **चेतनं कर्तारम् ।** परमात्मानम् । **उच्छेदप्रसङ्ग इति ।** पर्वतो वह्निमानित्यत्रापि वह्नौ सपक्षमहानसदृष्टान्तेन गृहावयवसम्बन्धित्वचुल्लीस्थत्वपाकसाधनत्वादिधर्मप्रसङ्गादित्याशयः **लिङ्गिनि ।** साध्ये । **अन्वयेति ।** अन्वयव्यतिरेकाभ्यामवगतोऽविनाभावनियमो व्याप्तिनियमो येषां तथाभूता इत्यर्थः । सिद्धान्त्येकदेशिमतमुपसंहरति—**अत इति ।**

अथ मुख्यपूर्वपक्षमुपपादयति—**अत्राहुरिति ।** आदौ कार्यत्वहेतुं स्वरूपासिद्धिनि-रसनेन द्रढयति—**सावयवत्वादेवेति । महत्वे सतीति ।** अनेन परमाणुव्यावृत्तिः । **क्रियावत्त्वादिति ।** अनेनाकाशव्यावृत्तिः । **तनुः ।** शरीरम् । यद्यप्यस्मदादिशरीरे कार्यत्वं सिद्धमेव तथापीश्वरशरीरे कार्यत्वज्ञापनार्थं तनूपन्यासः । **मूर्तत्वात् ।** क्रियावत्त्वात् । अनेनाकाशव्यावृत्तिः । उपाधिं शङ्कते—**कार्यत्वेति । कार्यत्वेनेति ।** अयं भावः । त्वदभिमतकार्ये घटादावपि शक्यक्रियत्वं शक्योपादानादिविज्ञानत्वं च

नानुमितेऽपि विषये, ज्ञानशक्ती कार्यानुमेये इति अन्यत्रापि सावयवत्वादिना कार्यत्वं ज्ञातमिति, ते च प्रतिपन्ने एवेति न काश्चिद्विशेषः। तथा हि। घटमणिकादिषु कृतेषु कार्यत्वदर्शनानुमितकर्तृगततन्निर्माणशक्तिज्ञानः पुरुषोऽदृष्टपूर्वं विचित्रसन्निवेशं नरेन्द्रभवनमालोक्यावयवसन्निवेशविशेषेण तस्य कार्यत्वं निश्चित्य, तदानीमेव कर्तुस्तज्ज्ञानवैचित्र्यमनुमिनोति। अतस्तनुभुवनादेः कार्यत्वे सिद्धे, सर्वसाक्षात्कारतन्निर्माणादिनिपुणः कश्चित् पुरुषविशेषः सिध्यत्येव।

किञ्च, सर्वचेतनानां धर्माधर्मनिमित्तेऽपि सुखदुःखोपभोगे चेतनानाधिष्ठितयोस्तयोरचेतनयोः फलहेतुत्वानुपपत्तेः सर्वकर्मानुगुणसर्वफलप्रदानचतुरः कश्चिदास्थेयः। वर्धकिनानधिष्ठितस्य वास्यादेरचेतनस्य देशकालाद्यनेकपरिकरसन्निधानेऽपि यूपादिनिर्माणसाधनत्वादर्शनात्। बीजाङ्कुरादेः, पक्षान्तर्भावेण तैर्व्यभिचारापादनं श्रोत्रियवेतालानामनभिज्ञताविजृम्भितम्। तत एव सुखादिभिर्व्यभिचारदर्शनवचनमपि तथैव। नच, लाघवेनोभयवादिसम्प्रतिपन्नक्षेत्रज्ञानामेवेदृशमधिष्ठातृत्वकल्पनं युक्तम्। तेषां सूक्ष्मव्यवहितविप्रकृष्टदर्शनाशक्तिनिश्चयात्। दर्शनानुगुणैव हि स-

---

न प्रत्यक्षेणोपलभ्यते। तयोः पुरुषतंत्रत्वात्। किंतूत्पन्नं घटादिरूपं कार्यं दृष्ट्वा कार्यत्वहेतुकानुमानेनैव तद्धर्मद्वयमनुमीयते इति त्वयाप्यास्थेयम्। तच्चानुमानं महीधरादावपि तुल्यमिति। **ज्ञानशक्ती**। ज्ञानं कर्तुरतत्कार्योपादानादिविज्ञानम्। शक्तिश्च कर्तुस्तत्कार्यकरणसामर्थ्यम्। **अन्यत्रापि**। महीधरादावपि। **ते**। ज्ञानशक्ती। **प्रतिपन्ने**। ज्ञाने।

परमात्मन्यनुमानान्तरं दर्शयति—**किं चेति**। **तयोः**। धर्माधर्मयोः। **वर्धकिना**। तक्ष्णा। **वास्यादेरिति**। वासिस्तक्षणसाधनं 'वाकस' इति प्रसिद्धम्। **अनेकपरिकरसन्निधानेऽपि**। अनेक साधनसन्निधानेऽपि। **यूपः**। यज्ञस्तम्भः। ननु कथं चेतनानाधिष्ठितमपि बीजमङ्कुरमुत्पादयतीति चेत्तत्राह—**बीजाङ्कुरादेरिति**। तत्राप्युक्तदृष्टान्तेन चेतनाधिष्ठितत्वमनुमेयमेवेति भावः। **श्रोत्रियवेतालानामिति**। परिहासोक्तिः। **तथैवेति**। सुखादिकमपि चेतनाधिष्ठितमेव पुलकाद्युत्पादयतीत्यर्थः। **क्षेत्रज्ञानामेवेति**। जीवा एव धर्माधर्माद्यधिष्ठाय सुखाद्युपभोगं जनयन्तीत्याशयः। **सूक्ष्मेति**। सूक्ष्मं परमा-

र्वत्र शक्तिकल्पना । न च, क्षेत्रज्ञवदीश्वरस्याशक्तिनिश्चयोऽस्ति । अतः प्रमाणान्तरतो न ततसिद्ध्यनुपपत्तिः । समर्थकर्तृपूर्वकत्वनियतकार्यत्वहेतुना सिध्यन्, स्वाभाविकसर्वार्थसाक्षात्कारतन्नियमनशक्तिसम्पन्न एव सिध्यति ।

यत्तु, अनैश्वर्यापादनेन धर्मविशेषविपरीतसाधनत्वमुन्नीतं तदनुमानवृत्तानभिज्ञत्वनिबन्धनम्। सपक्षे सहदृष्टानां सर्वेषां कार्यस्याहेतुभूतानाञ्च धर्मिणां लिङ्गिन्यप्राप्तेः। एतदुक्तं भवति । केनचित् किञ्चित् क्रियमाणं स्वोत्पत्तये कर्तुः स्वनिर्माणसामर्थ्यं स्वोपादानोपकरणज्ञानञ्चापेक्षते । नत्वन्यासामर्थ्यमन्याज्ञानञ्च । हेतुत्वाभावात् । स्वनिर्माणसामर्थ्यस्वोपादानोपकरणज्ञानाभ्यामेव स्वोत्पत्तावुपपन्नायां सम्बन्धितया दर्शनमात्रेणाकिञ्चित्कर-

---

ण्वादि जीवेन न दृश्यते । स्थूलमपि भित्त्याद्यन्तरितं वस्तु न दृश्यते । स्थूलमनन्तरितमपि दूरं पर्वतादिस्थं वस्तु न दृश्यते । तथा च जीवस्यात्यल्पशक्तित्वेन धर्माधर्मदर्शनायोगात्तद्द्रष्टृत्वेन परमात्मैवास्थेय इति भावः । **अत इति** । अनुमानादिप्रमाणान्तरेण परमात्मा सिध्यत्येवेत्यर्थः । **समर्थेति** । यत्र यत्र कार्यत्वं तत्र तत्र समर्थकर्तृपूर्वकत्वमस्त्येवेति व्याप्तिः । तथा च कार्यत्वेन हेतुना सिध्यन् परमात्मरूपः कर्ता सर्वकार्यकरणसमर्थ एव सिध्यतीति न जीववत्परमात्मनो ज्ञानशक्ती सङ्कुचिते इति भावः ।

अथ कार्यत्वहेतोर्विरुद्धधर्मसाधकत्वं प्रागुक्तं (पृ. १९६ पं. १) निरस्यति—**यत्त्विति । लिङ्गिनि** । साध्ये । महानसे सपक्षे दृष्टानामपि गृहावयवसम्बन्धित्वादिधर्माणां पर्वतो वह्निमानित्यत्र वन्ह्यावप्राप्तेः । नच वन्हेः प्रमाणान्तरप्रतिपन्नत्वान्न तद्धर्मप्राप्तिरिति सिद्धान्त्येकदेश्युक्तं युक्तमिति वाच्यम् । धर्माप्राप्तौ प्रमाणान्तरप्रतिपन्नत्वस्याप्रयोजकत्वात् । किंतु धूमरूपकार्यस्य वन्हिरेव हेतुर्न तु तत्र गृहावयवसम्बन्धित्वादिधर्माः । अतो धूमः स्वहेतुभूतं वन्हिमेवानुमापयति नान्यधर्मान्तरम् । एवमत्रापि कार्यं स्वहेतुभूतं परमात्मानं तत्र स्वनिर्माणसामर्थ्यं स्वकारणज्ञानं चानुमापयति । कार्यनिर्माणसामर्थ्यं कार्यकारणज्ञानं चान्तरेण कार्योत्पत्त्यदर्शनात् । न तु कार्यं स्वाहेतुभूताननीश्वरत्वार्थान्तराज्ञानादिधर्मान्परमात्मन्यनुमापयति । अनीश्वरत्वस्यार्थान्तराज्ञानस्यान्येषां चैवंविधानां धर्माणामन्वयव्यतिरेकाभ्यां कार्यनिरूपितकारणत्वाऽभावात् । न हि घटः कुलाले इतरकार्यकरणासामर्थ्यमपेक्षते । न वा स्वव्यतिरि-

स्यार्थान्तराज्ञानादेर्हेतुत्वकल्पनायोगादिति। किञ्च, क्रियमाणवस्तुव्यतिरिक्तार्थाज्ञानादिकं किं सर्वविषयं क्रियोपयोगि उत कतिपयविषयम् । न तावत् सर्वविषयम् । नहि कुलालादिः क्रियमाणव्यतिरिक्तं किमपि न विजानाति । नापि कतिपयविषयम् । सर्वेषु कर्तृषु तत्तदज्ञानाशक्त्यनियमेन सर्वेषामज्ञानादीनां व्यभिचारात् । अतः कार्यत्वस्यासाधकानामनीश्वरत्वादीनां लिङ्गिन्यप्राप्तेरिति न विपरीतसाधनत्वम् ।

कुलालादीनां दण्डचक्राद्यधिष्ठानत्वं शरीरद्वारेण दृष्टमिति जगदुपादानोपकरणाधिष्ठानमीश्वरस्याशरीरस्यानुपपन्नमिति चेत्, न । संकल्पमात्रेणैव परशरीरगतभूतवेतालगरलाद्यपगमविनाशदर्शनात् । कथमशरीरस्येश्वरस्य परप्रवर्तनरूपः संकल्प इति चेत् । न शरीरापेक्षः संकल्पः। शरीरस्य संकल्पहेतुत्वाभावात् । मन एव हि संकल्पहेतुः। तदभ्युपगतमीश्वरेऽपि । कार्यत्वेनैव ज्ञानशक्तिवन्मनसोऽपि प्राप्तत्वात् । मानसः संकल्पः सशरीरस्यैव । शरीरस्यैव समनस्कत्वादिति चेत् । मनसो नित्यत्वेन देहापगमेऽपि मनसः सद्भावेनानैकान्तिकत्वात् । अतो विचित्रावयवसन्निवेशविशेषतनुभुवनादिकार्यनिर्माणे पुण्यपापपरवशः परिमितशक्तिज्ञानः क्षेत्रज्ञो न प्रभवतीति निखिलभुवननिर्माणचतुरोऽचिन्त्यापरिमितज्ञानश-

---

क्पटादिपदार्थाज्ञानं तत्रापेक्षते। अथापेक्षते इति वैयात्येन ब्रूपे चेत्तत्राह—**किं चेति ।** **नापि कतिपयेति।** घटव्यतिरिक्तं कतिपयं वस्तु पटो वा भित्तिर्वा गौर्वा कुसूलं वा यद् गृह्यते तदज्ञानमेव तत्करणासामर्थ्यमेव च घटकर्तुः कुलालस्य वर्तते इति नियमे मानाभावात्, तज्ज्ञानवतोऽपि तत्करणसमर्थस्यापि च कुलालस्य घटहेतुत्वदर्शनाद्व्यभिचार इति भावः ।

शङ्कते—**कुलालादीनामिति ।** **भूतेति ।** भूतवेतालानामपगमः गरलस्य विषस्य विनाश इत्यन्वयः । पुनः शङ्कते—**कथमिति । कार्यत्वेनेति ।** यथा कार्यत्वेन हेतुना उपादानज्ञानं कार्यकरणसामर्थ्यं चेश्वरस्यास्तीत्युक्तं तथा तेनैव हेतुनेश्वरस्य मनोऽप्यस्ति। अङ्गीकृतश्च नैयायिकैकदेशिभिः परमात्मन्यपि मनःसम्बन्ध इति बोध्यम् । पुनः शङ्कते—**मानस इति । अनैकान्तिकत्वात ।** यत्र मनस्तत्र सशरीरत्वमस्त्येवेति नियमस्य व्यभिचरितत्वात्। **क्षेत्रज्ञो न प्रभवति ।** जीवः समर्थो न भवति ।

त्यैश्वर्योऽशरीरः संकल्पमात्रसाधनपरिनिष्पन्नानन्तविस्तारविचित्ररचनप्रपञ्चः पुरुषविशेष ईश्वरोऽनुमानेन सिध्यति। अतः प्रमाणान्तरावसेयत्वात् ब्रह्मणो, नैतद्वाक्यं ब्रह्म प्रतिपादयति।

किञ्च, अत्यन्तभिन्नयोरेव मृद्द्रव्यकुलालयोर्निमित्तोपादानत्वदर्शनेनाकाशादेर्निरवयवद्रव्यस्य कार्यत्वानुपपत्त्या च नैकमेव ब्रह्म कृत्स्नस्य जगतो निमित्तमुपादानञ्च प्रतिपादयितुं शक्नोतीति।

एवं प्राप्ते ब्रूमः। यथोक्तलक्षणं ब्रह्म जगज्जन्मादिवाक्यं बोधयत्येव। कुतः, शास्त्रैकप्रमाणकत्वात् ब्रह्मणः। यदुक्तं, सावयवत्वादिना कार्यं सर्वं जगत्, कार्यञ्च तदुचितकर्तृविशेषपूर्वकं दृष्टमिति निखिलजगन्निर्माणतदुपादानोपकरणवेदनचतुरः कश्चिदनुमेय इति। तदयुक्तम्। महीमहार्णवादीनां कार्यत्वेऽपि एकदैवैकेन निर्मिता इत्यत्र प्रमाणाभावात्। न चैकस्य घटस्येव सर्वेषामेकं कार्यत्वं येनैकदैवैकः कर्ता स्यात्। पृथग्भूतेषु कार्येषु कालभेदकर्तृभेददर्शनेन कर्तृकालैक्यनियमाभावात्। न च क्षेत्रज्ञानां विचित्रजगन्निर्माणाशक्तया कार्यत्वबलेन तदतिरिक्तकल्पनायामनेककल्पनानुपपत्तेश्चैक एव कर्ता भवितुमर्हति। क्षेत्रज्ञानामेवोपचितपुण्यविशेषाणां शक्तिवैचित्र्यदर्शनेन, तेषामेवातिशयितादृष्टसम्भावनया

ननूक्तरीत्या परमात्मनोऽनुमानगम्यत्वेऽपि अनुमानागम्यकतिपयार्थबोधकत्वेन ब्रह्मप्रतिपादकस्य शास्त्रस्य प्रामाण्यमस्त्येव। ब्रह्मैकमेव जगतो निमित्तकारणमुपादानकारणं चेत्यनुमानेन न ज्ञायते। लोके तयोरैक्यस्यादर्शनात्। तथाकाशाद्युत्पादकं ब्रह्मेति शास्त्रेण न ज्ञायते। लोके निरवयवपदार्थस्योत्पत्तेरदर्शनादिति चेत्तत्राह—**किं चेति। नैकमेवेति।** एकमेव ब्रह्म आकाशादेः कृत्स्नस्य जगतो निमित्तकारणमुपादानकारणं च तदेवेत्याकारकं लोकविरुद्धमर्थं प्रतिपादयितुं शास्त्रमपि न शक्नोतीत्यर्थः।

अथ मुख्यसिद्धान्तं दर्शयति-**एवमिति। प्रमाणाभावादिति।** यद्यपि कार्यत्वहेतुकानुमानेन जगतः कर्ता सिध्यति तथापि स एक एव एकदैव च तेनेदं सर्वं निर्मितमिति न सिध्यति। एवं च जगतोऽनेकजीवकर्तृकत्वे स्वीकृतेप्यनुमानं न विरुद्धमिति नानुमानेनेश्वरसिद्धिरितिभावः। **विचित्रेति।** मह्यादिजगतोऽस्मदादिजीवैः कर्तुमशक्यत्वेन अतिविपुलत्वेनातिसूक्ष्मत्वेन च विचित्रत्वं बोध्यम्। **तदतिरिक्तेति।** जीवातिरिक्तैकेश्वरकल्पनायामनेककल्पनारूपदोषाभावादित्यर्थः। **अर्हतीति।** इति न वाच्यमित्यर्थः। तत्र हेतुमाह-**क्षेत्रज्ञानामिति। शक्तिवैचित्र्येति।** योगिनां हि

च तत्तद्विलक्षणकार्यहेतुत्वसम्भवात् । तदतिरिक्तात्यन्तादृष्टपुरुषकल्पनानुपपत्तेश्च । न च युगपत्सर्वोच्छित्तिः सर्वोत्पत्तिश्च प्रमाणपदवीमधिरोहतः । अदर्शनात् । क्रमेणैवोत्पत्तिविनाशदर्शनाच्च । कार्यत्वेन सर्वोत्पत्तिविनाशयोः कल्प्यमानयोर्दर्शनानुगुण्येन कल्पनायामपि विरोधाभावाच्च ।

अतो बुद्धिमदेककर्तृकत्वे साध्ये, कार्यत्वस्य अनैकान्त्यम् । पक्षस्याप्रसिद्धविशेषणत्वम् । साध्यविकलता च दृष्टान्तस्य । सर्वनिर्माणचतुरस्यैकस्याप्रसिद्धेः । बुद्धिमत्कर्तृकत्वमात्रे सिद्धसाध्यता । सार्वज्ञ्यसर्वशक्तियुक्तस्य कस्यचिदेकस्य साधकमिदं कार्यत्वं किं युगपदुत्पद्यमानसर्ववस्तुगतम् , उत क्रमेणोत्पद्यमानसर्ववस्तुगतम् । युगपदुत्पद्यमानसर्ववस्तुगतत्वे कार्यत्वस्यासिद्धिता । क्रमेणोत्पद्यमानसर्ववस्तुगतत्वेऽनेककर्तृकत्वसाधनाद्विरुद्ध-

---

योगबलेन सूक्ष्ममपि दूरस्थमपि वस्तु दृश्यते । इन्द्रादीनां चास्मदाद्यपेक्षयाऽधिकसामर्थ्यं प्रसिद्धमेव । **तदतिरिक्तेति** । सिद्धेष्वेव जीवेषु अदृष्टातिशयकल्पने लाघवम् । अत्यन्तादृष्टस्य पुरुषस्यैव कल्पनं तु गौरवग्रस्तत्वान्नोपपद्यते । धर्मिकल्पनातो वरं धर्मकल्पनेति न्यायादिति भावः । **न चेति** । सर्वस्य जगतो युगपन्नाशो युगपदुत्पत्तिश्च न प्रमाणसिद्धेत्यर्थः । **विरोधाभावाच्चेति** । जगतः क्रमिकोत्पत्तौ क्रमिकनाशे च कल्प्यमाने कश्चन विरोधो नास्तीत्यर्थः ।

अथ फलितं दूषणं दर्शयति—**अत इति** । **अनैकान्त्यम्** । व्यभिचारः । अनेककर्तृकप्रासादादिषु बुद्धिमदेककर्तृकत्वाभावेपि कार्यत्वदर्शनेन कार्यत्वहेतोर्व्यभिचरितत्वान्न तेन बुद्धिमदेककर्तृकत्वं सिध्यतीत्यर्थः । ननु बुद्धिमदेककर्तृकत्वं नाम सर्वज्ञः सर्वशक्तिश्च यः परमात्मा तदेककर्तृकत्वम् । तच्च प्रासादादिष्वप्यन्ततोऽस्तीत्यनुमेयमेवेति न व्यभिचार इति चेत्तत्राह—**पक्षस्येति** । महानसादौ प्रसिद्धस्य वन्हिमत्त्वस्य पर्वतो वन्हिमानित्यत्र पर्वतविशेषणत्वं युक्तम् । जगत्सर्वज्ञसर्वशक्त्येकपरमात्मकर्तृकमिति त्वदुक्तानुमाने तु सर्वज्ञसर्वशक्त्येकपरमात्मकर्तृकत्वस्यान्यत्राप्रसिद्धस्य जगद्विशेषणत्वं न संभवति । सर्वज्ञसर्वशक्त्येकपरमात्मकर्तृकत्वस्याप्रसिद्धत्वादेव च घटादिदृष्टान्तस्य साध्यरहितत्वमिति भावः । तदेवोपपादयति—**सर्वनिर्माणेति** । सकर्तृकत्वमात्रं साध्यमिति पक्षे दूषणमाह—**बुद्धिमादिति** । **सिद्धसाध्यतेति** । वेदान्तिभिरस्माभिरपि जगतो बुद्धिमत्कर्तृकत्वस्याङ्गीकारात् । **सार्वज्ञ्येति** । यथा घटरूपविशेषकार्यनिष्ठकार्यत्वेन, कर्तृविशेषः कुलालः साध्यते न तु सामान्यतः कार्यत्वेन, तथा सर्वज्ञसर्वशक्तियुक्तपरमात्मनः कर्तृविशेषस्य साधकमिदं कार्यत्वं किंचिद्विशेषकार्यनि-

ता। अत्राप्येककर्तृकत्वसाधने प्रत्यक्षानुमानविरोधश्च। शास्त्रविरोधश्च। कुम्भकारो जायते, रथकारो जायत इत्यादि श्रवणात्।

अपि च, सर्वेषां कार्याणां शरीरादीनां सत्त्वादिगुणकार्यरूपसुखाद्यन्वयदर्शनेन सत्त्वादिमूलत्वमवश्यमाश्रयणीयम्। कार्यवैचित्र्यहेतुभूताः कारणगता विशेषाः सत्त्वादयः। तेषां कार्याणां तन्मूलत्वापादनं तद्युक्तपुरुषान्तःकरणविकारद्वारेण। पुरुषस्य च तद्योगः कर्ममूल इति कार्यविशेषारम्भायैव ज्ञानशक्तिवत् कर्तुः कर्मसम्बन्धः कार्यहेतुत्वेनैवावश्याश्रयणीयः।

ष्ठमित्यवश्यं वाच्यम्। तत्किं युगपदुत्पद्यमानसर्ववस्तुगतमुत क्रमेणोत्पद्यमानसर्ववस्तुगतं वा। नाद्यः। सर्वस्य युगपदुत्पत्तेरसंभवेन तन्निष्ठकार्यत्वस्यासिद्धत्वात्। नान्त्यः। क्रमेणोत्पद्यमानघटपटरथादिसर्ववस्तूनामेकस्मादुत्पत्तेर्लोकेऽदर्शनेन तादृशसर्ववस्तुनिष्ठकार्यत्वस्य त्वदुक्तसाध्यविरुद्धत्वात्। **अत्रापीति**। क्रमेणोत्पद्यमानघटपटरथादिसर्ववस्तूनामेकस्मादेवोत्पत्तिरित्यङ्गीकारे तेषां कुम्भकारकुविन्दरथकाराद्यनेककर्तृकत्वं प्रत्यक्षत उपलभ्यमानं विरुद्धं स्यात्। अयं कुलालः न द्वीपान्तरस्थघटकर्ता द्वीपान्तरागमनादित्याद्यनुमानानि च विरुद्धानि स्युः। **कुम्भकार इति**। कुम्भरथयोरेककर्तृकत्वे कुम्भकाररथकारयोरुत्पत्तेः पृथक् वक्तुमशक्यत्वात्।

प्रकारान्तरेण विरोधं दर्शयति—**अपि चेति**। **सत्वादीति**। आदिना रजस्तमसोः सङ्ग्रहः। सत्वादिगुणानां कार्यं यत्सुखादि तत्सम्बन्धः शरीरादिषु सर्वत्र दृश्यते। सुखादीत्यादिशब्देन दुःखमोहग्रहणम्। यथैकस्मिन्नेव कान्ताशरीरे सुखदुःखमोहसंबन्धः। तत्पत्युस्तच्छरीरात्सुखोत्पत्तेः। तां चिन्तयतस्तामप्राप्तवतश्च दुःखोत्पत्तेः। तामाचिन्तयतोऽन्यस्य मोहोत्पत्तेश्च। मोह औदासीन्यम्। एवं सर्वत्र गुणत्रयसम्बन्धो बोध्यः। **सत्वादिमूलत्वम्**। सत्वादिगुणविशिष्टद्रव्यकारणकत्वम्। ननु सत्वादिगुणविशिष्टद्रव्यस्य शरीरं प्रति कारणत्वेपि तत्रत्यानां गुणानां कथं कारणत्वम्। न हि तन्तुरूपं पटं प्रति कारणं भवतीति चेत्तत्राह—**तेषामिति**। शरीरादीनामित्यर्थः। शरीरसंसृष्टमनसि विकारोत्पादकत्वेन गुणानां शरीरकारणत्वमुपचर्यते इत्याशयः। **तद्योगः**। शरीरयोगः। **ज्ञानशक्तिवदिति**। यथा पूर्वपक्षिणा कर्तृसाधकेन कार्यत्वेन हेतुना कर्तुः कार्योपादानज्ञानं कार्यकरणसामर्थ्यं चानुमीयते तथा तेनैव हेतुना कर्तरि कर्मसम्बन्धोऽवश्यमनुमेयः। अन्तरेण कर्म ज्ञानशक्तिवैचित्र्यासंभवात्। तथा चानुमानेन सिध्यन् कर्ता कर्मवश्य एवेति जीव एव स भवितुमर्हति। अतो नानुमानेनेश्वरसिद्धिरित्याशयः। नन्वीश्वर इच्छामात्रादेव जगत्सृजतीति तत्र कर्ममूलकस्य ज्ञानशक्तिवैचि-

ज्ञानशक्तिवैचित्र्यस्य कर्ममूलत्वात् । इच्छायाः कार्यारम्भहेतुत्वेऽपि विषयविशेषविशेषितायास्तस्याः सत्त्वादिमूलत्वेन कर्मसम्बन्धोऽवर्जनीयः । अतः क्षेत्रज्ञा एव कर्तारो, न तद्विलक्षणः कश्चिदनुमानात् सिध्यति । भवन्ति च प्रयोगाः । तनुभुवनादि क्षेत्रज्ञकर्तृकं कार्यत्वाद्घटादिवत् । ईश्वरः कर्ता न भवति, प्रयोजनशून्यत्वान्मुक्तवत् । ईश्वरः कर्ता न भवत्यशरीरत्वात् ,तद्वदेव । नच, क्षेत्रज्ञानां स्वशरीराधिष्ठाने व्यभिचारः । तत्राप्यनादेः सूक्ष्मशरीरस्य सद्भावात् । विमतिविषयः कालो न लोकशून्यः, कालत्वाद्वर्तमानकालवत् ।

अपि च, किमीश्वरः सशरीरोऽशरीरो वा कार्यं करोति । न तावदशरीरः । तस्य कर्तृत्वानुपलब्धेः । मानसान्यपि कार्याणि सशरीरस्यैव भवन्ति । मनसो नित्यत्वेऽप्यशरीरेषु मुक्तेषु तत्कार्यादर्शनात् । नापि सशरीरः । विकल्पासहत्वात् । तच्च शरीरं किं नित्यमनित्यं वा । न तावन्नित्यम् । सावयवस्य तस्य नित्यत्वेन जगतोऽपि नित्यत्वाविरोधादीश्वरासिद्धेः। नाप्यनित्यम् । तद्व्यतिरिक्तस्य तच्छरीरहेतोस्तदानीमभावात् । स्वयमेव हे-

---

च्यस्यानपेक्षितत्वान्न तस्य कर्मवश्यत्वमिति चेत्तत्राह–**इच्छाया इति**। प्रतिकूलानुमानानि दर्शयति–**भवन्ति चेति। तद्वदेव**।मुक्तवदेव । **न चेति**। जीवस्य स्वशरीरकर्तृत्वावस्थायामकर्तृत्वाभावेप्यशरीरत्वस्य सत्वेनाशरीरत्वहेतुर्व्यभिचरित इत्याशयः । **सद्भावादिति** । यथा बालशरीरविशिष्टो जीवो युवशरीरं परिगृण्हाति तद्वदेवेदं बोध्यम् । प्रतिकूलानुमानान्तरमाह–**विमतीति । न लोकशून्य इति** । तथा च जीवविशिष्टलोकस्य सर्वदा सद्भावेन जगन्निष्ठकार्यत्वस्य जीवैरेव सिद्धत्वेन नेश्वरानुमानावसर इति भावः ।

पूर्वपक्ष्युक्तानुमानं प्रकारान्तरेण दूषयति–**अपि चेति । नित्यत्वेऽपीति** । अपिशब्देन स्वमते मनसो नित्यत्वानभ्युपगमं सूचयति । **सावयवस्येति** । ईश्वरशरीरस्य सावयवस्यापि सतो नित्यत्वेऽङ्गीक्रियमाणे सावयवस्य जगतोऽपि नित्यत्वप्रसङ्गः । नित्यत्वे च तस्य जगज्जन्मादिकर्तृत्वाभावेनेश्वरत्वं न सिध्यतीत्यर्थः। **तद्व्यतिरिक्तस्येति।** शरीरस्यानित्यत्वे तदुत्पत्तिवेलायां तच्छरीरहेतुभूतस्य तच्छरीरव्यतिरिक्तस्यान्यस्य शरीरस्याभावादनित्यत्वपक्षो न संभवतीत्यर्थः । **स्वयमेव** । केवलपरमात्मैव ।

वुरिति चेत् , न । अशरीरस्य तदयोगात् । अन्येन शरीरेण सशरीर इति चेत्, न । अनवस्थानात् ।

स किं सव्यापारो, निर्व्यापारो वा । अशरीरत्वादेव न सव्यापारः । नापि निर्व्यापारः कार्यं करोति । मुक्तात्मवत् । कार्यं जगदिच्छामात्रव्यापारकर्तृकमित्युच्यमाने पक्षस्याप्रसिद्धविशेषणत्वं, दृष्टान्तस्य च साध्यहीनता । अतो दर्शनानुगुण्येनेश्वरानुमानं दर्शनानुगुण्यपराहतमिति शास्त्रैकप्रमाणकः परब्रह्मभूतः सर्वेश्वरेश्वरः पुरुषोत्तमः । शास्त्रन्तु, सकलेतरप्रमाणपरिदृष्टसमस्तवस्तुविसजातीयं सार्वज्ञ्यसत्यसङ्कल्पत्वादिमिश्रानवधिकातिशयापरिमितोदारगुणसागरं निखिलहेयप्रत्यनीकस्वरूपं प्रतिपादयतीति न प्रमाणान्तरावसितवस्तुसाधर्म्यप्रयुक्तदोषगन्धप्रसङ्गः । यत्तु, निमित्तोपादानयोरैक्यमाकाशादेर्निरवयवस्य द्रव्यस्य कार्यत्वञ्चानुपलब्धमशक्यप्रतिपादनमित्युक्तं, तदप्यविरुद्धमिति, ‘ प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् ’ (ब्र. सू. १।४।२३) ‘ न वियदश्रुतेः ’ (ब्र. सू. २।३।१) इत्यत्र प्रतिपादयिष्यते । अतः प्रमाणान्तरागोचरत्वेन शास्त्रैकविषयत्वात् ,

---

अनवस्थानादिति । यदि बीजाङ्कुरन्यायेन नानवस्थादोष इत्युच्यते तदापि सशरीरत्वेनेश्वरस्य कर्मवश्यत्वं स्यादेवेति दोषो बोध्यः ।

पुनः प्रकारान्तरेण पूर्वपक्ष्युक्तानुमानं दूषयति—**स किमिति** । स ईश्वरः । **इच्छामात्रेति** । मात्रशब्देन सत्वादिगुणसम्बन्धस्य तन्मूलकर्मसम्बन्धस्य च व्यावृत्तिः । **अप्रसिद्धविशेषणत्वम्** । अप्रसिद्धसाध्यकत्वम् । **साध्यहीनतेति** । घटादौ दृष्टान्ते निर्व्यापारकर्तृकत्वस्यादर्शनात् । **शास्त्रैकप्रमाणक इति** । नन्वेवमपि अव्यापारस्याशरीरस्य च परमात्मनो जगत्कर्तृत्वासंभवस्तदवस्थ एव । लोके तथाऽदर्शनादिति चेन्न । शब्दानपेक्षतया केवलानुमानेनेश्वरं साधयतस्तवैव दृष्टान्तापेक्षा न तु ममेति भावः । तदेव ध्वनयन्नाह—**शास्त्रं त्विति** । **प्रकृतिश्चेति** । प्रकृतिरुपादानकारणम् । ईश्वरो न केवलं जगतो निमित्तकारणं किन्तूपादानकारणमपि । यतस्तथा सत्येव श्रुत्युक्तौ प्रतिज्ञादृष्टान्तौ नोपरुध्येते । ‘ येनाश्रुतं श्रुतं भवति ’ (छां. ६।१।३) इत्यादि प्रतिज्ञा । ‘ यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यात् ’ (छां. ६।१।४) इति दृष्टान्तः । **न वियदिति** । वियन्नोत्पद्यते, श्रुतौ तदुत्पत्तेरप्रतिपादनादिति पूर्व-

'यतो वा इमानि ' (तै. ३।१।१) इत्यादिवाक्यमुक्तलक्षणं ब्रह्म प्रतिपादयतीति सिद्धम् ॥ ३ ॥

यद्यपि प्रमाणान्तरागोचरं ब्रह्म, तथापि प्रवृत्तिनिवृत्तिपरत्वाभावेन सिद्धरूपं ब्रह्म न शास्त्रं बोधयतीत्याशङ्क्याह—

तत्तु समन्वयात् ॥ ४ ॥

प्रसक्ताशङ्कानिवृत्त्यर्थः ' तु ' शब्दः । ' तत् ' शास्त्रप्रमाणकत्वं ब्रह्मणः सम्भवत्येव । कुतः । ' समन्वयात् ' । पुरुषार्थतयान्वयः समन्वयः । परमपुरुषार्थभूतस्य ब्रह्मणोऽभिधेयतयान्वयात् । एवमेव समन्वितो औपनिषदः पदसमुदायः—' यतो वा इमानि भूतानि जायन्ते ' (तै. ३।१।१) ' सदेव सोम्येदमग्र आसीत् । एकमेवाद्वितीयम् । तदैक्षत बहु स्यां प्रजायेयेति । तत्तेजोऽसृजत ' (छां. ६।२।२–३) ' ब्रह्म वा इदमेकमेवाग्र आसीत् ' (बृ. १।४।१०) ' आत्मा वा इदमेक एवाग्र आसीत् ' (ऐ. १।१) ' तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः ' (तै. २।४।१) ' एको ह वै नारायण आसीत् ' (म. १) ' सत्यं ज्ञानमनन्तं ब्रह्म ' (तै. २।१।१) ' आनन्दो ब्रह्म ' (तै. ३।६।१) इत्येवमादिः । न च व्युत्पत्तिसिद्धपरिनिष्पन्नवस्तुप्रतिपादनसमर्थानां पदसमुदायानामखिल-

---

पक्षं कृत्वा सूत्रकारैरग्रे ' आत्मन आकाशः सम्भूतः ' (तै. २।१।१) इति श्रुतेराकाशोत्पत्तिः साधितेति बोध्यम् ॥ ३ ॥

न शास्त्रमिति । सिद्धब्रह्मप्रतिपादकत्वे स्वीकृते तु शास्त्रं न कस्यचित्प्रवर्तकं निवर्तकं वा स्यात् । तथात्वे तु तस्य सुखपर्यवसायित्वं दुःखनिवृत्तिपर्यवसायित्वं वा नास्तीति शास्त्रमपि ब्रह्मण्यप्रमाणं स्यादित्याशयः ।

अभिधेयतया । वाच्यतया । ब्रह्मणि शास्त्रस्य वाचकत्वेन सम्बन्धाद्ब्रह्मणः शास्त्रप्रमाणकत्वं भवत्येवेति फलितोऽर्थः । **व्युत्पत्तिसिद्धेति ।** ब्रह्मणि समन्वितानां श्रुतीनां प्रवृत्तिनिवृत्तिरूपप्रयोजनविरहेणान्यपरत्वं अप्रमाणत्वरूपं कर्तृस्तावकत्वादिरूपं वा न कल्पयितुं शक्यम् । सिद्धे वस्तुन्यपि शब्दानां व्युत्पत्तेरुपपादनादिति भावः । ननु

जगदुत्पत्तिविनाशहेतुभूताशेषदोषप्रत्यनीकापरिमितोदारगुणसागरानवधिकातिशयानन्दस्वरूपे ब्रह्मणि समन्वितानां प्रवृत्तिनिवृत्तिरूपप्रयोजनविरहादन्यपरत्वम् । स्वविषयावबोधपर्यवसायित्वात् सर्वप्रमाणानाम् । न च प्रयोजनानुगुणा प्रमाणप्रवृत्तिः । प्रयोजनं हि प्रमाणानुगुणम् । न च प्रवृत्तिनिवृत्त्यन्वयविरहिणः प्रयोजनशून्यत्वम् । पुरुषार्थान्वयप्रतीतेः । तथा स्वरूपपरेष्वपि, पुत्रस्ते जातो, नायं सर्प इत्यादिषु हर्षभयनिवृत्तिरूपप्रयोजनवत्त्वं दृष्टम् ।

अत्राह—न वेदान्तवाक्यानि ब्रह्म प्रतिपादयन्ति । प्रवृत्तिनिवृत्त्यन्वयविरहिणः शास्त्रस्यानर्थक्यात् । यद्यपि प्रत्यक्षादीनि वस्तुयाथात्म्यावबोधे पर्यवस्यन्ति । तथापि शास्त्रं प्रयोजनपर्यवसाय्येव । नहि लोकवेदयोः प्रयोजनरहितस्य कस्यचिदपि वाक्यस्य प्रयोग उपलब्धचरः । न च, किञ्चित्प्रयोजनमनुद्दिश्य वाक्यप्रयोगः श्रवणं वा सम्भवति । तच्च प्रयोजनं प्रवृत्तिनिवृत्तिसाध्येष्टानिष्टप्राप्तिपरिहारात्मकमुपलब्धम् । अर्थार्थी राजकुलं गच्छेत् । मन्दाग्निर्नाम्बु पिबेत् । स्वर्गकामो यजेत । न कलञ्जं भक्षयेदित्यादिषु ।

प्रवृत्तिनिवृत्त्यन्यतरप्रयोजनविरहे कथं प्रामाण्यमित्यत्राह—**स्वविषयेति** । प्रमाणानां विषयावबोधे तात्पर्यं न तु प्रयोजनपर्यन्तम् । अत एव निष्प्रयोजनस्यापि लोष्ठादिप्रत्यक्षस्य प्रामाण्यमङ्गीकृतमभियुक्तैः । तदेवाह—**न च प्रयोजनेति** । अथ ब्रह्मप्रतिपादकश्रुतीनां प्रवृत्तिनिवृत्त्यन्यतरप्रयोजनविरहेऽपि तद्व्यतिरिक्तं प्रयोजनमप्यस्तीत्याह—**न च प्रवृत्तीति । स्वरूपपरेषु** । सिद्धार्थप्रतिपादकेषु । पुत्रस्ते जात इत्यस्य हर्षः प्रयोजनम् । नायं सर्प इत्यत्र भयनिवृत्तिः प्रयोजनमिति बोध्यम् ।

अथास्मिन्नधिकरणे पूर्वपक्षं विस्तरेण प्रतिपादयति—**अत्राहेति** । मीमांसकमतमेतत् । **प्रवृत्तीति** । अत एवोक्तं वार्तिककृता ' यावत्खलु प्रमातॄणां प्रवर्तननिवर्तने । शब्दा न कुर्वते तावन्न निराकांक्षबोधनम् ' इति । **शास्त्रस्येति** । शासनाद्धि शास्त्रम् । शासनं च प्रवर्तननिवर्तनात्मकमेवेत्याशयः । **प्रयोजनरहितस्येति** । अत एव पुनरुक्तेर्दोषत्वमुक्तं साहित्यशास्त्रे । तत्र हि दोषत्वबीजं प्रयोजनशून्यत्वमेव । **अर्थार्थी** । द्रव्यार्थी । **मन्दाग्निः** । मन्दो जाठराग्निर्यस्य । **अम्बु** । उदकम् ।

यत्पुनः, सिद्धवस्तुपरेष्वापि, पुत्रस्ते जातो, नायं सर्पो रज्जुरेषेत्यादिषु हर्षभयादिनिवृत्तिरूपपुरुषार्थान्वयो दृष्ट इत्युक्तम् । तत्र किं पुत्रजन्माद्यर्थात् पुरुषार्थावाप्तिः, उत तज्ज्ञानादिति विवेचनीयम् । सतोऽप्यर्थस्याज्ञातस्यापुरुषार्थत्वेन तज्ज्ञानादिति चेत् । तर्ह्यसत्यप्यर्थे ज्ञानादेव पुरुषार्थः सिध्यतीत्यर्थपरत्वाभावेन प्रयोजनपर्यवसायिनोऽपि शास्त्रस्य नार्थसद्भावे प्रामाण्यम् । तस्मात् सर्वत्र प्रवृत्तिनिवृत्तिपरत्वेन ज्ञानपरत्वेन वा प्रयोजनपर्यवसानमिति कस्यापि वाक्यस्य परिनिष्पन्ने वस्तुनि तात्पर्यासम्भवात् न वेदान्ताः परिनिष्पन्नं ब्रह्म प्रतिपादयन्ति ।

अत्र कश्चिदाह—वेदान्तवाक्यान्यपि कार्यपरतयैव ब्रह्मणि प्रमाणभावमनुभवन्ति । कथम् । निष्प्रपञ्चमद्वितीयं ज्ञानैकरसं ब्रह्म अनाद्यविद्यया सप्रपञ्चतया प्रतीयमानं निष्प्रपञ्चं कुर्यादिति ब्रह्मणः प्रपञ्चविलयद्वारेण विधिविषयत्वमिति । कोऽसौ द्रष्टृदृश्यरूपप्रपञ्चविलयद्वारेण साध्यज्ञानैकरसब्रह्मविषयो विधिः । ' न दृष्टेर्द्रष्टारं पश्येः, न मतेर्मन्तारं मन्वीथाः ' (बृ. ३।४।२) इत्येवमादिः । द्रष्टृदृश्यभेदशून्यं दृशिमात्रं ब्रह्म कुर्यादित्यर्थः । स्वतःसिद्धस्यापि ब्रह्मणो निष्प्रपञ्चतारूपेण साध्यत्वमविरुद्धमिति ।

तदयुक्तम् । नियोगवाक्यार्थवादिना हि नियोगो, नियोज्यविशेषणं,

अर्थपरत्वाभावेनेति । यद्यपि वेदान्तशास्त्रं मोक्षरूपप्रयोजनपर्यवसायि, तथापि स मोक्षो ब्रह्मज्ञानादेव न तु ब्रह्मस्वरूपादित्यतो मोक्षे ब्रह्मस्वरूपस्यानुपयोगेन शास्त्रस्य ब्रह्मस्वरूपसिद्धवस्तुप्रतिपादकत्वतात्पर्याभावेन न शास्त्रं ब्रह्मसद्भावे प्रमाणमित्याशयः ।

निष्प्रपञ्चमिति । तथा च सिद्धस्यापि ब्रह्मणः प्रपञ्चराहित्यस्वरूपेणाकारान्तरेण साध्यत्वमिति भावः । **कोसाविति** । कतिपयनाशेऽप्यशक्तस्य सकलप्रपञ्चनाशनविधिरशक्य इत्याशयः । **न दृष्टेरिति** । प्रपञ्चस्याविद्यापरिणामरूपत्वाद्बुद्धिनिवृत्तिमात्ररूपः प्रपञ्चलयः शक्य एवेत्याशयः । **दृशिमात्रमिति** । मात्रशब्देनाविद्यानिवृत्तिः ।

पूर्वपक्ष्येतद्दूषयति—**तदयुक्तमिति** । **नियोगेति** । नियोगो विधिः । स एव वाक्यार्थ इति वादिनेत्यर्थः । **नियोज्येति** । नियोज्यस्य नियोक्तुं शक्यस्य विशेषणम् । यथा

विषयः, करणम् , इतिकर्तव्यता, प्रयोक्ता च वक्तव्याः । तत्र हि नियोज्यविशेषणमनुपादेयम् । तच्च निमित्तं, फलमिति द्विधा । अत्र किं नियोज्यविशेषणम् , तच्च किं निमित्तं फलं वेति विवेचनीयम् । ब्रह्मस्वरूपयाथात्म्यानुभव इति चेत् , तर्हि न तन्निमित्तम् । जीवनादिवदस्यासिद्धत्वात् । निमित्तत्वे च तस्य नित्यत्वेनापवर्गोत्तरकालमपि जीवननिमित्ताग्निहोत्रादिवन्नित्यं तद्विषयानुष्ठानप्रसङ्गः । नापि फलम् । नैयोगिकफलत्वेन स्वर्गादिवदनित्यत्वप्रसङ्गात् । कश्चात्र नियोगविषयः । ब्रह्मैवेति चेत् , न । तस्य नित्यत्वेनाभव्यरूपत्वात् । अभावार्थत्वाच्च । निष्प्रपञ्चं ब्रह्म साध्यमिति चेत् । साध्यत्वेऽपि फलत्वमेव, अभावार्थत्वान्न विधिविषयत्वम् । साध्यत्वञ्च कस्य । किं, ब्रह्मण उत प्रपञ्चनिवृत्तेः । न तावद्ब्रह्मणः, सिद्धत्वादनित्यत्वप्रसक्तेश्च । अथ प्रपञ्चनिवृत्तेः, न तर्हि ब्रह्मणः साध्यत्वम् । प्रपञ्चनिवृत्तिरेव विधिविषय इति चेत् , न । तस्याः फलत्वेन

ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यत्र नियोक्तुं शक्यस्य कर्तुर्विशेषणं स्वर्गकाम इति । **विषयः** । विधिविषयो विधेय इति यावत् । स च यागादिः क्रियारूपः । **करणम्** । यागादिरेव भावनारूपकार्यनिष्पत्तौ करणम् । साधनम् । **वक्तव्या इति** । न दृष्टेरिति निष्प्रपञ्चीकरणविधाविति शेषः । आदौ नियोज्यविशेषणं दूषयति—**तत्रेति** । **अनुपादेयम्** । विधेयभिन्नम् । अथवात्र वक्तुमशक्यमित्यर्थः । **निमित्तमिति** । यथा यावज्जीवमग्निहोत्रं जुहुयादित्यत्र नियोज्यस्य कर्तुर्जीवनं विशेषणम् । यथा वा मलिनवपुः स्नायादित्यत्र नियोज्यस्य स्नानकर्तुर्मलिनवपुष्ट्वं विशेषणं निमित्तभूतम् । तस्य सिद्धत्वात् । **फलमिति** । यथा स्वर्गकामो यजेतेत्यत्र स्वर्गरूपं विशेषणं फलभूतम् । तस्यासिद्धत्वात् । **ब्रह्मस्वरूपयाथात्म्यानुभव इति** । तथा चैतादृशानुभववान्निष्प्रपञ्चीकरणविधौ नियोज्य इत्यर्थः । **नित्यत्वेन** । कदाप्यविनाशित्वेन । **नैयोगिकम्** । विधिसम्बन्धि । विषयं दूषयति—**कश्चेति** । **अभव्यरूपत्वात्** । असाध्यरूपत्वात् । **अभावार्थत्वात्** । क्रियारूपत्वाभावात् । शङ्कते—**निष्प्रपञ्चमिति** । तथा च ब्रह्मणो निष्प्रपञ्चत्वस्वरूपेण साध्यत्वमित्याशयः । **साध्यत्वेऽपीति** । त्वदुक्तरीत्या ब्रह्मणः साध्यत्वेऽपि फलत्वं स्यान्न तु विधिविषयत्वम् । क्रियारूपत्वाभावात् । विषयस्य फलव्यतिरिक्तत्वनियमाच्चेति भावः । **न तर्हीति** । तथा च ब्रह्मणः साध्यत्वाभावहेतुकोऽपि विधिविषयत्वाभावः सिद्ध इत्यर्थः । शङ्कते—

विधिविषयत्वायोगात् । प्रपञ्चनिवृत्तिरेव हि मोक्षः । स च फलम् । अस्य च नियोगाविषयत्वे, नियोगात् प्रपञ्चनिवृत्तिः, प्रपञ्चनिवृत्त्या नियोग इतीतरेतराश्रयत्वम् ।

अपि च, किं निवर्तनीयः प्रपञ्चो मिथ्यारूपः, सत्यो वा । मिथ्यारूपत्वे ज्ञाननिवर्त्यत्वादेव नियोगेन न किञ्चित् प्रयोजनम् । नियोगस्तु निवर्तकज्ञानमुत्पाद्य तद्द्वारेण प्रपञ्चस्य निवर्तक इति चेत्, तत् स्ववाक्यादेव जातमिति न नियोगेन प्रयोजनम् । वाक्यार्थज्ञानादेव ब्रह्मव्यतिरिक्तस्य कृत्स्नस्य मिथ्याभूतस्य प्रपञ्चस्य बाधितत्वात् , सपरिकरस्य नियोगस्यासिद्धिश्च । प्रपञ्चस्य निवर्तको नियोगः किं ब्रह्मस्वरूपमेव, उत तद्व्यतिरिक्तः । यदि ब्रह्मस्वरूपमेव निवर्तकं, नित्यतया निवर्त्यप्रपञ्चसद्भाव एव न सम्भवति । नित्यत्वेन च नियोगस्य विषयानुष्ठानसाध्यत्वञ्च न घटते । अथ ब्रह्मस्वरूपव्यतिरिक्तः, तस्य कृत्स्नप्रपञ्चनिवृत्तिरूपविषयानुष्ठानसाध्यत्वेन प्रयोक्ता[1] च न दृष्ट इत्याश्रयाभावादसिद्धिः । प्रपञ्चनिवृत्तिरूपविषयानुष्ठानेनैव ब्रह्मस्वरूपव्यतिरिक्तस्य कृत्स्नस्य निवृत्तत्वात् , न नियोगनिष्पाद्यं मोक्षाख्यं फलम् ।

प्रपञ्चेति । स च फलमिति । तथा च मोक्षरूपायाः प्रपञ्चनिवृत्तेः फलत्वात्फलभूतायास्तस्या न विषयत्वमित्यर्थः । **अस्य चेति ।** प्रपञ्चनिवृत्तेर्विधिविषयत्वेन प्रपञ्चनिवृत्त्या विधिसिद्धिः । प्रपञ्चनिवृत्तेः फलत्वेन च विधिसिध्युत्तरं प्रपञ्चानिवृत्तिसिद्धिरित्यन्योन्याश्रय इति भावः । एतेन निष्प्रपञ्चीकरणनियोगो दूषित इति बोध्यम् ।

अथ निष्प्रपञ्चीकरणविधिं प्रकारान्तरेण दूषयति—**अपि चेति । न किंचिदिति ।** रज्जुज्ञानेनैव सर्पनिवृत्तिसिद्धौ सर्पनिवृत्तिविधिरप्रयोजक इति भावः । शङ्कते—**नियोगस्त्विति । स्ववाक्यात् ।** प्रपञ्चमिथ्यात्वब्रह्मनिर्विशेषत्वप्रतिपादकवाक्यात् । ननु प्रपञ्चस्य सत्यत्वमेवेति द्वितीयपक्ष एवाश्रीयते । तथा च तस्य ज्ञाननिवर्त्यत्वाभावेन तदर्थं विधिरावश्यक इति चेत्तत्राह—**प्रपञ्चस्येति । नित्यतया ।** प्रपञ्चनिवर्तकस्य ब्रह्मस्वरूपस्य नित्यतया । **ब्रह्मस्वरूपव्यतिरिक्तः ।** कृत्स्नप्रपञ्चनिवृत्तिविषयको विधिर्ब्रह्मस्वरूपव्यतिरिक्तश्चेदित्यर्थः । **आश्रयाभावादिति ।** एतेन

---

[1] क. प्रयोक्ता च नष्टः०

किञ्च, प्रपञ्चनिवृत्तेर्नियोगकरणस्येतिकर्तव्यताभावादनुपकृतस्य च करणत्वायोगात् न करणत्वम् । कथमितिकर्तव्यताभाव इति चेत् । इत्थम् । अस्येतिकर्तव्यता भावरूपा अभावरूपा वा । भावरूपा च करणशरीरनिष्पत्तितदनुग्रहकार्यभेदभिन्ना । उभयविधा च न सम्भवति । न हि मुद्गराभिघातादिवत् कृत्स्नप्रपञ्चनिवर्तकः कोऽपि दृश्यत इति दृष्टार्था न सम्भवति । नापि निष्पन्नस्य करणस्य कार्योत्पत्तावनुग्रहः सम्भवति । अनुग्राहकांशसद्भावेन कृत्स्नप्रपञ्चनिवृत्तिरूपकरणस्वरूपासिद्धेः । ब्रह्मणोऽद्वितीयत्वज्ञानं प्रपञ्चनिवृत्तिरूपकरणशरीरं निष्पादयतीति चेत् । तेनैव प्रपञ्चनिवृत्तिरूपो मोक्षः सिद्ध इति न करणादिनिष्पाद्यमवशिष्यत इति पूर्वमेवोक्तम् । अभावरूपत्वे चाभावत्वादेव न करणशरीरं निष्पादयति । नाप्यनुग्रहम् । अतो निष्प्रपञ्चब्रह्मविषयो विधिर्न सम्भवति ।

वक्तव्यतया प्राक् (पृ. २०७ पं. १७) निर्दिष्टेषु नियोगादिषु मध्ये प्रयोक्ता दूषितो भवति ।

अथ करणमितिकर्तव्यतां च दूषयति—**किं चेति** । प्रपञ्चनिवृत्तिरूपं यद्भावनाकरणं तत् किंचित् कृत्वैव भावनां जनयेत् । अन्यथा करणत्वायोगात् । करणस्य व्यापारवत्त्वनियमात् । तथा च करणस्येतिकर्तव्यताऽवश्यं वाच्या । सा चात्र करणस्य प्रपञ्चनिवृत्तिरूपत्वेन न संभवतीत्यर्थः । **अस्य** । प्रपञ्चानिवृत्तिरूपस्य करणस्य । **कार्यभेदभिन्नेति** । भावरूपा इतिकर्तव्यता च क्वचित्करणशरीरं निष्पादयति । यथा ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यत्र यागीयया इतिकर्तव्यतया यागस्वरूपं निष्पाद्यते । क्वचिच्च करणात्कार्यनिष्पत्तिवेलायां प्राक्सिद्धस्वरूप एव करणे अनुग्रहं करोति । यथा चक्षुषा पश्यतीत्यत्र विषयेन्द्रियसम्बन्धरूपा चक्षुष इतिकर्तव्यता दर्शनवेलायां चक्षुष्यनुग्रहं करोति । एवं कार्यभेदेन द्विविधापि भावरूपेतिकर्तव्यताऽत्र न सम्भवतीत्यर्थः । **दृष्टार्थेति** । कृत्स्नप्रपञ्चनिवृत्तिरूपकरणशरीरस्य निष्पादिका भावरूपेतिकर्तव्यता दृष्टार्था नैवोपलभ्यते इत्यर्थः । **अनुग्राहकांशेति** । अनुग्राहकं यत् तत् कृत्स्नप्रपञ्चान्तर्गतमेवेत्यनुग्राहकांशसत्वे कृत्स्नप्रपञ्चनिवृत्तेर्वक्तुमशक्यत्वात् । शङ्कते—**ब्रह्मण इति** । अथाभावरूपेतिकर्तव्यतां दूषयति—**अभावरूपत्वे इति** । एवं निष्प्रपञ्चीकरणविधिवादिनो मृषावादिनो मतं निरस्तम् ।

अन्योऽप्याह—यद्यपि वेदान्तवाक्यानां न परिनिष्पन्नब्रह्मस्वरूपपरतया प्रामाण्यं, तथापि ब्रह्मस्वरूपं सिध्यत्येव। कुतः, ध्यानविधिसामर्थ्यात्। एवमेव हि समामनन्ति। 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' (बृ. २।४।५) 'य आत्माऽपहतपाप्मा···सोऽन्वेष्टव्यः स विजिज्ञासितव्यः' (छां. ८।७।१) 'आत्मेत्येवोपासीत' (बृ. १।४।७) 'आत्मानमेव लोकमुपासीत' (बृ. १।४।१५) इति। अत्र ध्यानविषयो हि नियोगः, स्वविषयभूतं ध्यानं ध्येयैकनिरूपणीयमिति ध्येयमाक्षिपति। स च ध्येयः स्ववाक्यनिर्दिष्ट आत्मा। स किंरूप इत्यपेक्षायां तत्स्वरूपविशेषसमर्पणद्वारेण, 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै. २।१।१) 'सदेव सोम्येदमग्र आसीत्, एकमेवाद्वितीयम्' (छां. ६।२।१) इत्येवमादीनां वाक्यानां ध्यानविधिशेषतया प्रामाण्यमिति विधिविषयभूतध्यानशरीरानुप्रविष्टब्रह्मस्वरूपेऽपि तात्पर्यमस्त्येव। अत 'एकमेवाद्वितीयम्' (छां. ६।२।१) 'तत् सत्यं, स आत्मा' (छां. ६।८।७) 'नेह नानास्ति किञ्चन' (बृ. ४।४।१९) इत्येवमादिभिर्ब्रह्मस्वरूपमेकमेव सत्यं, तद्व्यतिरिक्तं सर्वं मिथ्येत्यवगम्यते। प्रत्यक्षादिभिर्भेदावलम्बिना च कर्मशास्त्रेण भेदः प्रतीयते। भेदाभेदयोः परस्परविरोधे सति, अनाद्यविद्यामूलत्वेनापि भेदप्रतीत्युपपत्तेरभेद एव परमार्थ इति निश्चीयते। तत्र, ब्रह्मध्याननियोगेन तत्साक्षात्कारफलेन निरस्तसमस्ताविद्याकृतवि-

---

अथ ध्यानविधिवादिनो मृषावादिनो मतं खण्डयितुमादौ तद्दर्शयति—**अन्योऽप्याहेत्यादिना**। **नियोगः**। विधिः। **ध्यानशरीरेति**। ध्यानस्य हि सशरीरत्वं ध्यानविषयद्वारैव। विषयीभूतं ब्रह्म च श्रुतावद्वितीयत्वेनोक्तम्। अद्वितीयत्वमेव च भेदमिथ्यात्वम्। अतो ध्यानशरीरानुप्रविष्टभेदनिषेधपर्यन्तं ध्यानविधेस्तात्पर्यमित्याशयः। **प्रत्यक्षादिभिरिति**। अस्य यद्यपीत्यादिः। **भेदाभेदयोरिति**। अस्य तथापीत्यादिः। भेदप्रतीतेर्न सत्यत्वम्। अन्यथापि तस्याः सिद्धत्वात्। अतोऽनन्यथासिद्धशास्त्रावगतोऽभेद एव परमार्थ इति भावः। **तत्साक्षात्कारफलेनेति**। ब्रह्मध्यानविधिर्हि स्वफलीभूतब्रह्मज्ञानद्वारा अविद्यानिवृत्तिं जनयति। तथा च ध्यानविधिवादिनो मते नि-

विधभेदाद्वितीयज्ञानैकरसब्रह्मभावरूपो मोक्षः प्राप्यते। न च, वाक्यार्थज्ञानमात्रेण ब्रह्मभावसिद्धिः। अनुपलब्धेः। विविधभेददर्शनानुवृत्तेश्च। तथा सति, श्रवणादिविधानमनर्थकं स्यात्।

अथोच्येत—रज्जुरेषा न सर्प इत्युपदेशेन सर्पभयनिवृत्तिदर्शनात्, रज्जुसर्पवत् बन्धस्य च मिथ्यारूपत्वेन ज्ञानबाध्यतया तस्य वाक्यजन्यज्ञानेनैव निवृत्तिर्युक्ता, न नियोगेन। नियोगसाध्यत्वे मोक्षस्यानित्यत्वं स्यात्, स्वर्गादिवत्। मोक्षस्य नित्यत्वं हि सर्ववादिसम्प्रतिपन्नम्। किञ्च, धर्माधर्मयोः फलहेतुत्वं स्वफलानुभवानुगुणशरीरोत्पादनद्वारेणेति ब्रह्मादिस्थावरान्तचतुर्विधशरीरसम्बन्धरूपसंसारफलत्वमवर्जनीयम्। तस्मान्न धर्मसाध्यो मोक्षः। तथा च श्रुतिः, 'न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति। अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः' (छां. ८।१२।१) इत्यशरीरत्वरूपे मोक्षे धर्माधर्मसाध्यप्रियाप्रियविरहश्रवणात, न धर्मसाध्यमशरीरत्वमिति विज्ञायते। न च नियोगविशेषसाध्यफलविशेषवत् ध्याननियोगसाध्यमशरीरत्वम्। अशरीरत्वस्य स्वरूपत्वेनासाध्यत्वात्। यथाहुः श्रुतयः—

'अशरीरं शरीरेष्वनवस्थेष्ववस्थितम्।
महान्तं विभुमात्मानं मत्वा धीरो न शोचति' (का. १।२।२२)

'अप्राणो ह्यमनाः शुभ्रः' (मुं. २।१।२) 'असङ्गो ह्ययं पुरुषः' (बृ. ४।३।१५) इत्याद्याः। अतोऽशरीरत्वरूपो मोक्षो नित्य इति न धर्माधर्मसाध्यः। तथा च श्रुतिः—

योगः ध्यानविधिः, नियोज्यस्याधिकारिणो विशेषणं अविद्यानिवृत्तिरूपं फलम्, विषयः ध्यानमेव, तदेव कार्यनिष्पत्तौ करणम्, इतिकर्तव्यता शमादिः, प्रयोक्ता च ध्यातेति सर्वे नियोगादयो वक्तुं शक्यन्ते इति भावः। **अनुपलब्धेरिति**। एतेन वाक्यार्थज्ञानमात्रान्मोक्ष इति परास्तम्।

अवर्जनीयमिति। ध्यानस्य धर्मरूपत्वादिति भावः। **अपहतिः**। सम्बन्धाभावः। न च **नियोगेनेति**। यथा प्रायश्चित्तविधेः पापनिवृत्तिरूपं फलं तथा ब्रह्मध्यानविधेः

'अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात् ,

अन्यत्र भूतात् भव्याच्च यत् पश्यसि तद्वद' (का. १।२।१४) इति ।

अपि च, उत्पत्तिप्राप्तिविकृतिसंस्कृतिरूपेण चतुर्विधं हि साध्यत्वं मोक्षस्य न सम्भवति । न तावदुत्पाद्यः । मोक्षस्य ब्रह्मस्वरूपत्वेन नित्यत्वात् । नापि प्राप्यः । आत्मस्वरूपत्वेन ब्रह्मणो नित्यप्राप्तत्वात् । नापि विकार्यः । दध्यादिवदनित्यत्वप्रसङ्गात् । नापि संस्कार्यः । संस्कारो हि दोषापनयनेन वा गुणाधानेन वा साधयति । न तावद्दोषापनयनेन । नित्यशुद्धत्वात् ब्रह्मणः । नाप्यतिशयाधानेन । अनाधेयातिशयस्वरूपत्वात् । नित्यनिर्विकारत्वेन स्वाश्रयायाः पराश्रयायाश्च क्रियाया अविषयतया, न निघर्षणेनादर्शादिवदपि संस्कार्यत्वम् । न च देहस्थया स्नानादिक्रियया आत्मा संस्क्रियते । किन्त्वविद्यागृहीतस्तत्सङ्गतोऽहं–कर्ता । तत्फलानुभवोऽपि तस्यैव । न चाहं–कर्तैवात्मा । तत्साक्षित्वात् । तथा च मन्त्रवर्णः—

'तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति' (मुं. ३।१।१)

'आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः' (का. १।३।४)

'एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा ।

शरीरानिवृत्तिरूपं फलमित्याशयः । **अन्यत्रधर्मादिति** । अत्र पुरुषार्थस्य धर्माधर्मसम्बन्धराहित्यमुक्तम् । सम्बन्धश्च साध्यसाधनभाव इति मोक्षस्य तदसाध्यत्वं सिद्धमिति भावः ।

आत्मस्वरूपस्य मोक्षस्य विधिसाध्यत्वं प्रकारान्तरेण दूषयति–**अपि चेति** । अथ क्रियाविषयत्वाभावात्संस्कारविषयत्वाभाव इति दर्शयति–**नित्यनिर्विकारेति** । यत्क्रियाविषयं तत् सविकारमिति व्याप्तेर्निर्विकारत्वेन क्रियाऽविषयत्वम् । **यदा** दर्पणो हस्ततलादिषु निर्घृष्यते तदा दर्पणाश्रया क्रिया । यदा दर्पणे हस्ततलं निर्घृष्यते तदा हस्ततलाश्रया क्रियेति स्वाश्रयपराश्रयक्रिययोर्दर्पण उदाहरणम् । नन्वात्मनोऽविकारत्वेपि देहगतस्नानक्रियया तस्य संस्कारो दृश्यते इति चेत्तत्राह–**न चेति । अविद्यागृहीतः** । अविद्यया कल्पितः । नन्वात्मनः फलभोक्तृत्वात्स एव संस्कार्य इति चेत्तत्राह–**तत्फलेति । तस्यैव** । अविद्यागृहीतस्यैव । **तत्साक्षित्वात्** ।

कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च ' (श्वे.६।११) ' सपर्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धम् ।

कविर्मनीषी ' (ई. ८) इति चाविद्यागृहीतादहं—कर्तुरात्मनः स्वरूपमनाधेयातिशयं नित्यशुद्धं निर्विकारं निष्कृष्यते। तस्मादात्मस्वरूपत्वेन न साध्यो मोक्षः। यद्येवं, किं वाक्यार्थज्ञानेन क्रियत इति चेत्। मोक्षप्रतिबन्धनिवृत्तिमात्रमिति ब्रूमः। तथा च श्रुतयः—' त्वं हि नः पिता, योऽस्माकमविद्यायाः परं पारं तारयसि ' (प्र. ६।८) ' श्रुतं ह्येवमेव भगवद्दृशेभ्यः, तरति शोकमात्मविदिति। सोऽहं भगवः शोचामि, तं मां भगवांच्छोकस्य पारं तारयतु ' (छां. ७।१।३) ' तस्मै मृदितकषायाय तमसः पारं दर्शयति भगवान् सनत्कुमारः ' (छां. ७।२६।२) इत्याद्याः। तस्मान्नित्यस्यैव मोक्षस्य प्रतिबन्धनिवृत्तिर्वाक्यार्थज्ञानेन क्रियते। तन्निवृत्तिस्तु साध्यापि प्रध्वंसाभावरूपा न विनश्यति। ' ब्रह्म वेद ब्रह्मैव भवति, ' (मुं. ३।२।९) ' तमेव विदित्वातिमृत्युमेति ' (श्वे. ३।८) इत्यादिवचनं, मोक्षस्य वेदनानन्तरभावितां प्रतिपादयन्नियोगव्यवधानतां प्रतिरुणद्धि। न च, विदिक्रियाकर्मत्वेन ध्यानक्रियाकर्मत्वेन वा कार्यानुप्रवेशः। उभयकर्मत्वप्रतिषेधात्। ' अन्यदेव तद्विदितादथोऽविदितादपि ' (के. १।१।३) ' येनेदं सर्वं विजानाति, तत् केन विजा-

---

अहङ्कारसाक्षित्वात्। **साक्षी**। अहङ्कारे व्याप्रियमाणे स्वयं साक्षिमात्रतयावस्थानान्न भोक्तेति भावः। **केवलः**। फलसम्बन्धरहितः। **निर्गुणः**। अगुणवश्यः। अत एव न तस्य भोक्तृत्वमित्याशयः। **पर्यगात्**। अमन्यत। **शुक्रम्**। अविद्यारहितम्। **अकायम्**। अशरीरम्। **अस्नाविरम्**। स्नावा शिरा यस्मिन्न विद्यते इत्यस्नाविरम्। **मृदितकषायाय**। नष्टरागद्वेषादिदोषाय। ननु प्रतिबन्धनिवृत्तेः साध्यत्वे तस्या उत्पन्नत्वेन कदाचिन्नाशः स्यादित्यत आह—**तन्निवृत्तिरिति**। नाशस्योत्पत्तिव्यापकत्वं भावविषयकमेवेत्याशयः। **प्रतिरुणद्धीति**। तथा च ब्रह्मज्ञानसमकालमेव मोक्षो न तु ज्ञानानन्तरभाविध्यानोत्तरमितिभावः। ननु विधिशेषतया ब्रह्मणः सिद्धिरिति विधेरावश्यकत्वमिति चेत्तत्राह—**न च विदीति**। वेदनं सामान्यज्ञानम्। ध्यानं तु ज्ञानविशेषः। **अन्यदेव तद्विदितादिति**। विदितात्। ज्ञेयात्। अविदितात्। ज्ञातुः।

नीयात् ' (बृ. २।४।१४) इति । तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ' (के. १।१।४) इति च । न चैतावता शास्त्रस्य निर्विषयत्वम् । अविद्यापरिकल्पितभेदनिवृत्तिपरत्वात् शास्त्रस्य । न हीदन्तया ब्रह्म विषयीकरोति शास्त्रम् । अपि त्वविषयं प्रत्यगात्मस्वरूपं प्रतिपादयदविद्याकल्पितज्ञातृज्ञेयज्ञानविभागं निवर्तयाति । तथा च शास्त्रम् — ' न दृष्टेर्द्रष्टारं पश्येर्न मतेः ' (बृ. ३।४।२) इत्येवमादि ।

न च, ज्ञानादेव बन्धनिवृत्तिरिति श्रवणादिविध्यानर्थक्यम् । स्वभावप्रवृत्तसकलेतरविकल्पविमुखीकरणद्वारेण वाक्यार्थावगतिहेतुत्वात्तेषाम् । न च, ज्ञानमात्राद्बन्धनिवृत्तिर्न दृष्टेति वाच्यम् । बन्धस्य मिथ्यारूपत्वेन ज्ञानोत्तरकालं स्थित्यनुपपत्तेः । अत एव न शरीरपातादूर्ध्वमेव बन्धनिवृत्तिरिति वक्तुं युक्तम् । न हि मिथ्यारूपसर्पभयनिवृत्तिः रज्जुयाथात्म्यज्ञानातिरेकेण सर्पविनाशमपेक्षते । यदि शरीरसम्बन्धः पारमार्थिकः, तर्हि तद्विनाशापेक्षा । स तु, ब्रह्मव्यतिरिक्ततया न पारमार्थिकः । यस्य तु बन्धो न निवृत्तस्तस्य ज्ञानमेव न जातमित्यवगम्यते । ज्ञानकार्यादर्शनात् । तस्माच्छरीरस्थितिर्भवतु वा मा वा, वाक्यार्थज्ञानसमनन्तरं मुक्त एवासौ । अतो न नियोगसाध्यो मोक्ष इति न ध्यानविधिशेषतया ब्रह्मणः सिद्धिः । अपि तु, ' सत्यं ज्ञानमनन्तं ब्रह्म ' (तै. २।१।१) ' तत्त्वमसि ' (छां. ६।८।७) ' अयमात्मा ब्रह्म ' (बृ. २।५।१९) इति तत्परेणैव पदसमुदायेन सिध्यतीति ।

तदयुक्तम् । वाक्यार्थज्ञानमाताद्बन्धानिवृत्त्यनुपपत्तेः । यद्यपि मिथ्यारूपो बन्धो ज्ञानबाध्यः, तथापि बन्धस्यापरोक्षत्वान्न परोक्षरूपेण वा-

---

अनेन तत्केन विजानीयादित्यनेन च विदिक्रियाकर्मत्वं निषिद्धम् । **नेदं यदिदमुपासते इति** । अनेन ध्यानक्रियाकर्मत्वं निषिद्धम् ।

न शरीरपातादूर्ध्वमेवेति । किं तु जीवतोऽपि ज्ञानसमकालमेव मुक्तिरित्याशयः ।

अथैतत् ध्यानविधिवादी दूषयति—**तदयुक्तमिति । अपरोक्षत्वात्** । प्रत्यक्षत्वात् ।

क्यार्थज्ञानेन स बाध्यते। रज्ज्वादावपरोक्षसर्पप्रतीतौ विद्यमानायां, नायं सर्पो रज्जुरेषेत्याप्तोपदेशजनितपरोक्षसर्पविपरीतज्ञानमात्रेण भयानिवृत्तिदर्शनात्। आप्तोपदेशस्य तु भयनिवृत्तिहेतुत्वं वस्तुयाथात्म्यापरोक्षनिमित्तप्रवृत्तिहेतुत्वेन। तथा हि। रज्जुसर्पदर्शनभयात् परावृत्तः पुरुषो, नायं सर्पो रज्जुरेषेत्याप्तोपदेशाद्वस्तुत्याथात्म्यदर्शने प्रवृत्त:, तदेव प्रत्यक्षेण दृष्ट्वा भयान्निवर्तते। न च शब्द एव प्रत्यक्षज्ञानं जनयतीति वक्तुं युक्तम्। तस्यानिन्द्रियत्वात्। ज्ञानसामग्रीष्विन्द्रियाण्येवापरोक्षज्ञानसाधनानि। न चास्यानभिसंहितफलकर्मानुष्ठानमृदितकषायस्य श्रवणमनननिदिध्यासनविमुखीकृतबाह्यविषयस्य पुरुषस्य वाक्यमेवापरोक्षज्ञानं जनयति। निवृत्तप्रतिबन्धे तत्परेऽपि पुरुषे ज्ञानसामग्रीविशेषाणामिन्द्रियादीनां स्वविषयनियमातिक्रमादर्शनेन तदयोगात्।

न च ध्यानस्य वाक्यार्थज्ञानोपायता। इतरेतराश्रयत्वात्। वाक्यार्थज्ञाने जाते तद्विषयध्यानं, ध्याने निर्वृत्ते वाक्यार्थज्ञानमिति। न च ध्यानवाक्यार्थज्ञानयोर्भिन्नविषयत्वम्। तथा सति ध्यानस्य वाक्यार्थज्ञानोपा-

---

वस्तुयाथात्म्येति। वस्तुयाथात्म्यस्य यथार्थवस्तुनो यदपरोक्षं प्रत्यक्षज्ञानं तज्जनकीभूता या प्रवृत्तिः सा आप्तोपदेशाद्भवति। भयनिवृत्तिस्तु प्रत्यक्षज्ञानादेवेत्याशयः। **अनिन्द्रियत्वादिति**। अनिन्द्रियस्याप्यालोकस्य प्रत्यक्षज्ञानजनकत्वं तु इन्द्रियानुग्रहद्वारेवेति भावः। **अनभिसंहितेति**। फलानिच्छया कृतेन कर्मणा नष्टा रागादिदोषा यस्य तस्येत्यर्थः। यथाऽव्यवहितवस्तुग्राहकमपीन्द्रियं योगबलेन व्यवहितमपि वस्तु ग्राहयति तथा प्रत्यक्षज्ञानाजनकमपि वाक्यमुक्तविशेषणविशिष्टपुरुषस्य प्रत्यक्षज्ञानजनकं भवतीति न मन्तव्यमित्यर्थः। तत्र हेतुमाह–**निवृत्तेति। स्वविषयेति। स्वसाध्यज्ञानानतिक्रमदर्शनेनेत्यर्थः। शब्दसाध्यं ज्ञानमप्रत्यक्षमेवेति शब्दः स्वसाध्यमप्रत्यक्षज्ञानं नातिक्रामतीति फलितम्। **तदयोगात्**। वाक्यस्य प्रत्यक्षज्ञानजनकत्वायोगात्।

अथ 'वाक्यार्थावगतिहेतुत्वात्तेषाम्' इति प्राक् (पृ. २१५ पं. ८) उक्तं खण्डयति–**न च ध्यानस्येति। भिन्नविषयत्वमिति**। वाक्यार्थज्ञानं हि द्विविधम्। ध्यानात्पूर्वभावि, ध्यानानन्तरभावि च। तयोश्चानेकविषयत्वम्। ध्यानस्य प्राथमिकज्ञानस्य चैकविषयत्वम्। तथा च ध्यानजन्यस्य द्वितीयज्ञानस्य न ध्यानकरणत्वमिति नान्योन्याश्रय इत्याशयः। **तथा सतीति**। भिन्नविषयत्वे हि ध्यानानन्तरभाविवा-

यता न स्यात् । न ह्यन्यध्यानमन्यज्ञानौन्मुख्यमुत्पादयति । ज्ञातार्थस्मृतिसन्ततिरूपस्य ध्यानस्य वाक्यार्थज्ञानपूर्वकत्वमवर्जनीयम् । ध्येयब्रह्मविषयज्ञानस्य हेत्वन्तरासम्भवात् । न च ध्यानमूलं ज्ञानं वाक्यान्तरजन्यं, निवर्तकज्ञानं तत्त्वमस्यादिवाक्यजन्यमिति युक्तम् । ध्यानमूलमिदं वाक्यान्तरजन्यं ज्ञानं तत्त्वमस्यादिवाक्यजन्यज्ञानेनैकविषयं भिन्नविषयं वा । एकविषयत्वे तदेवेतरेतराश्रयत्वम् । भिन्नविषयत्वे ध्यानेन तदौन्मुख्यापादनासम्भवः । किञ्च, ध्यानस्य ध्येयध्यातााद्यनेकप्रपञ्चापेक्षत्वात् निष्प्रपञ्चब्रह्मात्मैकत्वविषयवाक्यार्थज्ञानोत्पत्तौ दृष्टद्वारेण नोपयोग इति वाक्यार्थज्ञानमात्रादविद्यानिवृत्तिं वदतः श्रवणमनननिदिध्यासनविधीनामानर्थक्यमेव ।

यतो वाक्यादपरोक्षज्ञानासम्भवाद्वाक्यार्थज्ञानेनाविद्या न निवर्तते । तत एव जीवन्मुक्तिरपि दूरोत्सारिता । का चेयं जीवन्मुक्तिः । सशरीरस्यैव मोक्ष इति चेत् , माता मे वन्ध्येतिवदसङ्गतार्थवचनम् । यतः, सशरीरत्वं बन्धः, अशरीरत्वमेव मोक्ष इति त्वयैव श्रुतिभिरुपपादितम् । अथ सशरीरत्वप्रतिभासे वर्तमाने, यस्यायं प्रतिभासो मिथ्येति प्रत्ययः, तस्य सशरीरत्वनिवृत्तिरिति । न । मिथ्येति प्रत्ययेन सशरीरत्वं निवृत्तं चेत् , कथं सशरीरस्य मुक्तिः । अजीवतोऽपि मुक्तिः सशरीरत्वमिथ्याप्रतिभासनिवृत्तिरेवेति कोऽयं जीवन्मुक्त इति विशेषः । अथ सशरीरत्वप्रतिभासो

क्यार्थज्ञाननिरूपितकारणत्वं ध्यानस्य न स्यादिति भावः । ननु ध्यानस्य वाक्यार्थज्ञानहेतुत्वेऽपि न वाक्यार्थज्ञानजन्यत्वमिति प्राथमिकज्ञानानपेक्षणान्नान्योन्याश्रय इति चेत्तत्राह–**ज्ञातार्थेति । हेत्वन्तरेति** । ब्रह्मणः प्रत्यक्षाद्यगोचरत्वादित्याशयः । **नचेति** । ध्यानात्पूर्वभावि ज्ञानं भेदस्यानिवर्तकं सत्यज्ञानादिवाक्यजन्यम्, ध्यानानन्तरभावि ज्ञानं तु भेदनिवर्तकं तत्त्वमस्यादिवाक्यजन्यमिति नान्योन्याश्रय इति न युक्तमित्यर्थः । **तदेवेति** । उभयोर्ज्ञानयोर्योरेकविषयत्वे तयोरेकस्य भेदनिवर्तकत्वमपरस्य नेति वक्तुमशक्यमिति बोध्यम् । **ध्यात्रादीति** । आदिना शमादिसंग्रहः ।

अथ 'न शरीपातात्' इत्यादिना प्राक् (पृ. २१५ पं. १०) उक्तां जीवन्मुक्तिं खण्डयति–**यत इति । सशरीरत्वम्** । सशरीरत्वप्रतिभासः ।

बाधितोऽपि यस्य द्विचन्द्रज्ञानवदनुवर्तते, स जीवन्मुक्त इति चेत् , न। ब्रह्मव्यतिरिक्तसकलवस्तुविषयकत्वात् बाधकज्ञानस्य। कारणभूताऽविद्या कर्मादिदोषः सशरीरत्वप्रतिभासेन सह तेनैव बाधित इति बाधितानुवृत्तिर्न शक्यते वक्तुम्। द्विचन्द्रादौ तु तत्प्रतिभासहेतुभूतदोषस्य बाधकज्ञानविषयीभूतचन्द्रैकत्वज्ञानाविषयत्वेनाबाधितत्वात् द्विचन्द्रप्रतिभासानुवृत्तिर्युक्ता। किञ्च 'तस्य तावदेव चिरं यावन्न विमोक्ष्ये। अथ सम्पत्स्ये' (छां. ६।१४।२) इति सद्विद्यानिष्ठस्य शरीरपातमात्रमपेक्षते मोक्ष इति वदन्तीयं श्रुतिर्जीवन्मुक्तिं वारयति। सैषा जीवन्मुक्तिरापस्तम्बेनापि निरस्ता– 'वेदानिमं लोकममुञ्च परित्यज्यात्मानमन्विच्छेत्। बुद्धे क्षेमप्रापणम्। तच्छास्त्रैर्विप्रतिषिद्धम्। बुद्धे चेत् क्षेमप्रापणमिहैव न दुःखमुपलभेत। एतेन परं व्याख्यातम्' (आ. ध. सू. २।९।२१।१३-१७) इति। अनेन ज्ञानमात्रान्मोक्षश्च निरस्तः। अतः सकलभेदनिवृत्तिरूपा मुक्तिर्जीवतो न सम्भवति।

द्विचन्द्रज्ञानवदिति । यथा द्विचन्द्रज्ञानबाधके एकश्चन्द्र इति सत्यज्ञाने सत्यपि द्विचन्द्रज्ञानं चक्षुर्दोषसम्बन्धाद्भवति तथा सशरीरत्वज्ञानबाधके अशरीर आत्मेति सत्यज्ञाने सत्यपि अविद्याकर्मादिदोषसम्बन्धात्सशरीरत्वप्रतिभासो यस्य भवति स जीवन्मुक्तः। स प्रतिभासोऽपि न यस्य भवति स विदेहमुक्त इत्याशयः। **सकलेति**। सशरीरत्वप्रतिभासस्तत्कारणीभूतोऽविद्याकर्मादिदोषश्च सकलवस्त्वन्तर्गत एवेति तस्याप्यात्मैक्यज्ञानेन बाधितत्वात्तदनुवृत्तिर्नयुज्यत इति भावः। **कर्मादीति**। आदिशब्देन वासनासंग्रहः। **तेनैव**। बाधकीभूतेनात्मैक्यज्ञानेनैव। **वेदानिति**। वेदबोधितत्रिवर्गसाधनीभूतकर्माणि। इमं लोकममुं च लोकं परित्यज्यात्मानमन्विच्छेत् उपासीत। 'आत्मनि बुद्धे ज्ञाते सति तदेव ज्ञानं क्षेमं मोक्षं प्रापयति' इति यदौडुलोमिनोक्तं तत् शास्त्रैर्विप्रतिषिद्धम्। शास्त्रेषु हि वाक्यार्थज्ञानोत्तरं ध्यानविधिर्बोध्यते। यावदायुषमिति मरणपर्यन्तं ध्यानानुवृत्तिश्च प्रतिपाद्यते। यावन्न विमोक्ष्ये इति शरीरपातावधिश्च मोक्षस्य क्रियते। तयोर्ध्वमायन्नमृतत्वमेतीति नाडीविशेषनिष्क्रमणं च मोक्षाङ्गत्वेन कथ्यते। अर्चिरादिमार्गेण गतिश्च मोक्षात्पूर्वं श्रूयते। औडुलोमिमते दोषान्तरमाह–**बुद्धे चेदिति**। **न दुःखमिति**। नहि ज्ञानिनां मूर्धाभिषिक्तोऽपि क्षुधादुःखमेव तावत्क्षणमात्रं सोढुं प्रभवतीत्याशयः। तथा च प्रत्यक्षविरोधः। एतेन परम् औडुलोम्युक्तमन्यदपि व्याख्यातं निरस्तमित्यर्थः।

तस्माद्ध्याननियोगेन ब्रह्मापरोक्षज्ञानफलेनैव बन्धनिवृत्तिः । न च नियोगसाध्यत्वेन मोक्षस्यानित्यत्वप्रसक्तिः । प्रतिबन्धनिवृत्तिमात्रस्यैव साध्यत्वात् । किञ्च, न नियोगेन साक्षाद्बन्धनिवृत्तिः क्रियते । किन्तु निष्प्रपञ्चज्ञानैकरसब्रह्मापरोक्षज्ञानेन । नियोगस्तु तदपरोक्षं ज्ञानं जनयति । कथं नियोगस्य ज्ञानोत्पत्तिहेतुत्वमिति चेत् । कथं वा भवतोऽनभिसंहितफलानां कर्मणां वेदनोत्पत्तिहेतुत्वम् । मनोनैर्मल्यद्वारेणेति चेत् । ममापि तथैव । मम तु निर्मले मनसि शास्त्रेण ज्ञानमुत्पाद्यते । तव तु नियोगेन मनसि निर्मले, ज्ञानसामग्री वक्तव्येति चेत् । ध्याननियोगानिर्मलं मन एव साधनमिति ब्रूमः। केनावगम्यत इति चेत् । भवतो वा कर्मभिर्मनो निर्मलं भवति, निर्मले मनसि श्रवणमनननिदिध्यासनैः सकलेतरविषयविमुखस्यैव शास्त्रं निवर्तकज्ञानमुत्पादयतीति केनावगम्यते ।' विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन'(बृ. ४।४।२२) 'श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' (बृ. २।४।५) ' ब्रह्म वेद ब्रह्मैव भवति ' (मुं. ३।२।९) इत्यादिभिः शास्त्रैरिति चेत् । ममापि–' श्रोतव्यो मन्तव्यो निदिध्यासितव्यः ' (बृ. २।४।५)' ब्रह्मविदाप्नोति परम् '(तै. २।१।१) ' न चक्षुषा गृह्यते नापि वाचा ' (मुं. ३।१।८) ' मनसा तु विशुद्धेन ' ' हृदामनीषा, मनसाभिक्लृप्तः ' (का. ६।९) इत्यादिभिः शास्त्रैर्ध्याननियोगन मनो निर्मलं भवति । निर्मलञ्च मनो ब्रह्मापरोक्षज्ञानं जनयतीत्यवगम्यत इति निरवद्यम् । ' नेदं यदिदमुपासते ' (के. ४) इत्युपास्यत्वं प्रतिषिद्धमिति चेत् , नैवम् । नात्र ब्रह्मण उपास्यत्वं प्रतिषिध्यते । अपि तु, ब्रह्मणि

तस्मादिति। ब्रह्मणो यत्प्रत्यक्षज्ञानं तदेव फलं यस्य तादृशेन ध्यानविधिनैव बन्धो निवर्तत इत्यर्थः । **प्रतिबन्धेति** । ज्ञानान्मोक्ष इति वदतस्तवापि मोक्षस्य नित्यत्वमिष्टमेवेति यथा प्रतिबन्धनिवृत्तिरेव ज्ञानसाध्या तथैव ममापि प्रतिबन्धनिवृत्तिरेव ध्यानसाध्येति भावः । **कथं वेति** । प्रतिबन्द्या परिहारोऽयम् । शङ्कते–**मन इति** । पुनः शङ्कते–**मम त्विति । केनावगम्यत इति** । कथमेतज्ज्ञायत इत्यर्थः । पुनः शङ्कते–**विविदिषन्तीति** । पुनः शङ्कते–**नेदमिति । अत्र** । नेदं यदिदमिति श्रुतौ ।

जगद्वैरूप्यं प्रतिपाद्यते । यदिदं जगदुपासते प्राणिनः, नेदं ब्रह्म, तदेव ब्रह्म त्वं विद्धि, यद्वाचानभ्युदितं, येन वागभ्युद्यत इति वाक्यार्थः । अन्यथा 'तदेव ब्रह्म त्वं विद्धि' (के. ४) इति विरुध्यते । ध्यानविधिवैयर्थ्यश्चात्मनः स्यात् । अतो ब्रह्मसाक्षात्कारफलेन ध्याननियोगेनैवापरमार्थभूतस्य कृत्स्नस्य द्रष्टृदृश्यादिप्रपञ्चरूपबन्धस्य निवृत्तिः ।

यदपि कैश्चिदुक्तं, भेदाभेदयोर्विरोधो न विद्यत इति । तदयुक्तम् । न हि शीतोष्णतमःप्रकाशादिवद्भेदाभेदावेकस्मिन् वस्तुनि संगच्छेते । -

अथोच्येत, सर्वमेव हि वस्तुजातं प्रतीतिव्यवस्थाप्यम् । सर्वञ्च भिन्नाभिन्नं प्रतीयते । कारणात्मना, जात्यात्मना चाभिन्नं, कार्यात्मना व्यक्त्यात्मना च भिन्नम् । छायातपादिषु विरोधः सहानवस्थाननियमलक्षणो भिन्नाधारत्वरूपश्च । कार्यकारणयोर्जातिव्यक्त्योश्च तदुभयमपि नोपलभ्यते । प्रत्युतैकमेव वस्तु द्विरूपं प्रतीयते । यथा—मृदयं घटः, षण्डो गौरिति । न चैकरूपं किञ्चिदपि वस्तु लौकिकैर्दृष्टचरम् । न च तृणादेर्ज्वलनादिवदभेदो भेदोपमर्दी दृश्यत इति न वस्तुविरोधः । मृत्सुवर्णगवाश्वाद्यात्मनाव-

---

वाचानभ्युदितम् । वागविषयम् । **अभ्युद्यते** । प्रयुज्यते ।

भेदाभेदवादिभास्करमतं दर्शयति- **यदपीति** ।

कारणात्मनेति । यथा मृद्रूपेणाभेदः घटादिरूपेण भेदः । यथा च घटघटत्वयोर्व्यक्तिजात्योर्मध्ये जातिरूपेणाभेदः व्यक्तिरूपेण भेदः इति भेदाभेदावुभावपि प्रतीयेते इत्यर्थः । भेदाभेदयोर्विरोधस्तु न । यथा छायातपयोर्न युगपदेकत्र स्थितिस्तथात्र भेदाभेदयोर्युगपदेकत्र न स्थितिरिति वक्तुमशक्यत्वात् । अविरोधेनोपलब्धिमाह—**प्रत्युतेति** । **द्विरूपम्** । कारणरूपं कार्यरूपं च । तथा जातिरूपं व्यक्तिरूपं च । **खण्डादयो** गोव्यक्तिविशेषाः । भेदाभेदयोर्मध्ये नाश्यनाशकरूपो वस्तुविरोधोऽपि नास्तीत्याह—**न च तृणादेरिति** । यथाग्निना तृणस्य नाशो भवति तथात्राभेदेन यदि भेदस्य नाशः स्यात्तर्हि वस्तुविरोधः स्यात् । तथा चात्र भेदस्य नाशादर्शनेन न वस्तुविरोध इति भावः । **मृत्सुवर्णेति** । यदा वस्तु घटरूपेणावस्थितं तदापि तत् मृद्रूपेणावस्थितमेव । एवमेव च यदा वस्तु मुकुटरूपेणावस्थितं तदा तत्सुवर्णरूपेणावस्थितमेवेति न

स्थितस्यैव घटमुकुटषण्डमुण्डगवाद्यात्मना चावस्थानात् । न चाभिन्नस्य भिन्नस्य च वस्तुनोऽभेदो भेदश्चैक एवाकार इतीश्वराज्ञा । प्रतीतत्वादैकरूप्यं चेत् । प्रतीतत्वादेव भिन्नाभिन्नत्वमिति द्वैरूप्यमभ्युपगम्यताम् । न हि विस्फारिताक्षः पुरुषो घटशरावषण्डमुण्डादिषु वस्तुषूपलभ्यमानेषु, इयं मृदयश्च घटः, इदं गोत्वमियञ्च व्यक्तिरिति विवेक्तुं शक्नोति । अपि तु, मृदयं घटः षण्डो गौरित्येव प्रत्येति । अनुवृत्तिबुद्धिबोध्यं कारणमाकृतिश्च, व्यावृत्तिबुद्धिबोध्यं कार्यं व्यक्तिश्चेति विविनक्तीति चेत् , नैवम् । विविक्ताकारानुपलब्धेः । न हि सूक्ष्ममपि निरीक्षमाणैरिदमनुवर्तमानमिदञ्च व्यावर्तमानमिति पुरोऽवस्थिते वस्तुन्याकारभेद उपलभ्यते । यथा संप्रतिपन्नैक्ये कार्यविशेषे चैकत्वबुद्धिरुपजायते । तथैव सकारणे ससामान्ये चैकत्वबुद्धिरविशेषोपजायते । एवमेव देशतः कालतश्चाकारतश्चात्यन्तविलक्षणेष्वपि वस्तुषु, तदेवेदमिति प्रत्यभिज्ञा जायते । अतो द्व्यात्मकमेव वस्तु प्रतीयत इति कार्यकारणयोर्जातिव्यक्त्योश्चात्यन्तभेदोपपादनं प्रतीतिपराहतम् ।

अथोच्येत—मृदयं घटः षण्डो गौरितिवत् देवोऽहं मनुष्योऽहमिति सामानाधिकरण्येनैक्यप्रतीतेरात्मशरीरयोरपि भिन्नाभिन्नत्वं स्यात् । अत

भेदोपमर्द इत्याशयः । **अभिन्नस्य** । जातेः । **भिन्नस्य** । व्यक्तेः । जातेरभेद एवाकारः व्यक्तेश्च भेद एवाकारः । तथा च जातिव्यक्त्योरभेदो न सम्भवतीति सर्वत्र भेदाभेदो दुर्वच इति शङ्काशयः । **ईश्वराज्ञेति** । तथा च तयोर्जातिव्यक्त्योस्त्वदुक्तैकैकाकारत्वे प्रमाणं नास्तीति भावः । शङ्कते—**प्रतीतत्वादिति** । **द्वैरूप्यमपि** । तवानिष्टं द्वैरूप्यमपि । **विवेक्तुम्** । भेदेन प्रतिपत्तुम् । **अपि त्विति** । एकमेव वस्तु जात्यात्मनाऽभिन्नं व्यक्त्यात्मना च भिन्नं प्रतीयते इत्यर्थः । शङ्कते—**अनुवृत्तीति** । अनुवृत्तिव्यावृत्तिभ्यां कारणकार्ययोर्जातिव्यक्त्योश्च भेद इत्याशयः । **विविक्ताकारः** । भिन्नाकारः । **यथेति** । संप्रतिपन्नं ज्ञातमैक्यं यस्यैवंभूतेकार्ये एवंभूतायां व्यक्तौ चैकत्वबुद्धिर्यथा भवति तथैव कारणविशिष्टेपि कार्ये जातिविशिष्टायामपि व्यक्तावेकत्वबुद्धिर्भवतीत्यर्थः । **विशेषे** । व्यक्तौ । **अविशेषा** । तुल्या ।

शङ्कते—**अथेति** । **आत्मशरीरयोरिति** । आत्मशरीरयोः सद्द्व्यात्मनैकत्वेऽपि आ-

इदं भेदाभेदोपपादनं निजसदननिहितहुतवहज्वालायत इति ।

तदिदमनाकलितभेदाभेदसाधनसामानाधिकरण्यतदर्थयाथात्म्यावबोधविलसितम् । तथा हि । अबाधित एव प्रत्ययः सर्वत्रार्थं व्यवस्थापयति । देवाद्यात्माभिमानस्त्वात्मयाथात्म्यगोचरैः सर्वैः प्रमाणैर्बाध्यमानो रज्जुसर्पादिबुद्धिवन्नात्मशरीरयोरभेदं साधयति । षण्डो गौर्मुण्डो गौरिति सामानाधिकरण्यस्य न केनचित् क्वचिद्बाधो दृश्यते । तस्मान्नातिप्रसङ्गः । अत एव जीवोऽपि ब्रह्मणो नात्यन्तभिन्नः । अपि तु ब्रह्मांशत्वेन भिन्नाभिन्नः । तत्राभेद एव स्वाभाविको, भेदस्त्वौपाधिकः । कथमिदमवगम्यत इति चेत् ‘ तत्त्वमसि ’ (छां. ६।८।७) ‘ नान्योऽतोऽस्ति द्रष्टा’ (बृ. ३।७।२३) ‘ अयमात्मा ब्रह्म ’ (बृ. २।५।१९) इत्यादिभिः श्रुतिभिः। ‘ ब्रह्मेमे द्यावापृथिवी ’ इति प्रकृत्य—

‘ ब्रह्मदाशा ब्रह्मदासा ब्रह्मेमे कितवा उत ।
स्त्रीपुंसौ ब्रह्मणो जातौ स्त्रियो ब्रह्मोत वा पुमान् ’

इत्याथर्वणिकानां संहितोपनिषादि ब्रह्मसूक्ते अभेदश्रवणाच्च । ‘ नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् ’ (श्वे. ६।१३) ‘ ज्ञाज्ञौ द्वावजावीशानीशौ ’ (श्वे. १।९) ‘ क्रियागुणैरात्मगुणैश्च तेषां संयोगहेतुरपरोऽपि दृष्टः ’ (श्वे. ५।१२) ‘ प्रधानक्षेत्रज्ञपतिर्गुणेशः संसारमोक्षस्थितिबन्धहेतुः ’ (श्वे. ६।१६) ‘ स का-

---

त्मरूपेण शरीररूपेण वा तयोरैक्यस्याप्रामाणिकत्वात्तयोर्भिन्नाभिन्नत्वं नेष्टमित्याशयः ।

अत एव । भेदाभेदयोरविरुद्धत्वादेव । **तत्रेति** । अनेन ‘ जीवब्रह्मणोर्भेदाभेदौ स्वाभाविकौ ’ इति यादवमतं निरस्तम् । अचिद्ब्रह्मणोर्भेदाभेदौ स्वाभाविकाविति तु भास्करयादवयोरुभयोरपि सम्मतम् । **तत्त्वमसीति** । तत्त्वमसीत्यादिश्रुतिभिः ब्रह्म दाशा इत्यादिब्रह्मसूक्तेऽभेदश्रवणाच्च नित्य इत्यादि श्रुतिभिर्भेदश्रवणाच्च जीवब्रह्मणोर्भेदाभेदाववश्याश्रयणीयावित्यन्वयः । **ब्रह्मेति** । दाशाः कैवर्ताः, दासाः भृत्याः, कितवाः द्यूतकृतः एते सर्वे ब्रह्मैवेत्यर्थः । **क्रियेति** । क्रियागुणाः संसारहेतुभूता

रणं करणाधिपाधिपः ' (श्वे. ६।९) ' तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति ' (श्वे. ४।६) ' य आत्मनि तिष्ठन् ' (बृ.३।७।२३) ' प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किञ्चन वेद, नान्तरम् ' (बृ. ४।३।२१) ' प्राज्ञेनात्मनाऽन्वारूढ उत्सृजन् याति ' (बृ. ४।३।३५) ' तमेव विदित्वातिमृत्युमेति ' (श्वे. ३।८) इत्यादिभिर्भेदश्रवणाच्च, जीवपरयोः भेदाभेदाववश्याश्रयणीयौ । तत्र, ' ब्रह्म वेद ब्रह्मैव भवति ' (मुं. ३।२।९) इत्यादिभिर्मोक्षदशायां जीवस्य ब्रह्मस्वरूपापत्तिव्यपदेशात् ' यत्र त्वस्य सर्वमात्मैवाभूत् , तत् केन कं पश्येत् ' (बृ. २।४।१४) इति तदानीं भेदेनेश्वरदर्शनानिषेधाच्चाभेदः स्वाभाविक इत्यवगम्यते ।

ननु च, ' सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता ' (तै.२।१।१) इति सहश्रुत्या तदानीमपि भेदः प्रतीयते । वक्ष्यति च ' जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च ' (ब्र.सू.४।४।१७) 'भोगमात्रसाम्यलिङ्गाच्च' (ब्र.सू. ४।४।२१) इति ।

नैतदेवम् । ' नान्योऽतोऽस्ति द्रष्टा ' (बृ.३।७।२३) इत्येवमादिश्रुतिशतैरात्मभेदप्रतिषेधात् । सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चितेति सर्वैः कामैः सह ब्रह्माश्नुते, सर्वगुणान्वितं ब्रह्माश्नुत इत्युक्तं भवति ।

गुणाः । आत्मगुणाः मोक्षहेतुभूता गुणाः । **तदानीम्** । मुक्तिदशायाम् ।

सह ब्रह्मणेति । सहशब्दो भोक्तृसाहित्यं दर्शयतीति शङ्काभिप्रायः । **जगदिति** । मुक्तस्यैश्वर्यं जगत्सृष्ट्यादिव्यापारवर्जम् । परमात्मप्रकरणे ' यतो वा'(तै. ३।१।१) इत्यादिश्रुतौ जगद्व्यापारप्रतिपादनात् । यदि स व्यापारो मुक्तस्यापि स्यात् तर्हि प्रकरणविरोधः । ब्रह्मलक्षणस्य मुक्तेऽतिव्याप्तिश्च । किं च जगद्व्यापारप्रसङ्गे मुक्तस्य सन्निधानमपि नास्तीति सूत्रार्थः । **भोगेति** । ' सोऽश्नुते ' (तै. २ ।१। १) इति श्रुतौ ब्रह्मयाथात्म्यानुभवरूपभोगमात्रेण मुक्तस्य ब्रह्मसाम्यप्रतिपादनाल्लिङ्गान्मुक्तस्यैश्वर्यं जगद्व्यापारवर्जमेवेति सूत्रार्थः ।

सह ब्रह्मेति । सहशब्दो भोग्यसाहित्यं दर्शयति न तु भोक्तृसाहित्यमिति भावः।

अन्यथा ब्रह्मणा सहेत्यप्राधान्यं ब्रह्मणः प्रसज्येत । जगद्व्यापारवर्जमित्यत्र मुक्तस्य भेदेनावस्थाने सत्यैश्वर्यस्य न्यूनताप्रसङ्गो वक्ष्यते । अन्यथा 'सम्पद्याविर्भावः स्वेन शब्दात्' (ब्र. सू. ४।४।१) इत्यादिभिर्विरोधात् । तस्मादभेद एव स्वाभाविकः । भेदस्तु, जीवानां परस्माद्ब्रह्मणः परस्परश्च बुद्धीन्द्रियदेहोपाधिकृतः । यद्यपि, ब्रह्म निरवयवं सर्वगतञ्च, तथाप्याकाश इव घटादिना, बुद्ध्याद्युपाधिना ब्रह्मण्यपि भेदः सम्भवत्येव । न च भिन्ने ब्रह्मणि बुद्ध्याद्युपाधिसंयोगः, बुद्ध्याद्युपाधिसंयोगाद्ब्रह्मणि भेद इतीतरेतराश्रयत्वम् । उपाधेस्तत्संयोगस्य च कर्मकृतत्वात् तत्प्रवाहस्य चानादित्वात् । एतदुक्तं भवति–पूर्वकर्मसम्बद्धात् जीवात् स्वसम्बद्ध एवोपाधिरुत्पद्यते । तद्युक्तात् कर्म । एवं बीजाङ्कुरन्यायेन कर्मसम्बन्धस्यानादित्वाददोष इति । अतो, जीवानां परस्परं ब्रह्मणा चाभेद एव स्वाभाविकः । भेदस्त्वौपाधिकः । उपाधीनां पुनः परस्परं ब्रह्मणा चाभेदवत्, भेदोऽपि स्वाभाविकः । उपाधीनामुपाध्यन्तराभावात्, तदभ्युपगमेऽनवस्थानाच्च ।

अन्यथा । ब्रह्मणा सह जीवः सर्वान्कामानश्नुते इति व्याख्याने । भोग्यसाहित्यं गृहीत्वा सर्वैः कामैः सह ब्रह्माश्नुते इति व्याख्याने ब्रह्मणः प्राधान्यमेव । ब्रह्मणा सह सर्वान्कामान् इति व्याख्याने यद्यप्यप्राधान्यं ब्रह्मणस्तथापि तस्य भोग्यभूतस्वगुणापेक्षत्वेन तादृशाप्राधान्यं न दोषायेति बोध्यम् । जगद्व्यापारमिति सूत्रस्य स्वाभिमतमर्थमाह–**जगदिति** । 'जीवेश्वरयोर्भेदे मुक्तस्यैश्वर्यं जगद्व्यापार वर्जं स्यात् प्रकरणात् असन्निहितत्वाच्च । अतस्तयोरभेद एव स्वीकार्यः' इति सूत्रार्थ इति भावः । सम्पद्येति । अयं प्रत्यगात्मा अर्चिरादिमार्गेण परं ज्योतिरुपसंपद्य यं दशाविशेषमापद्यते स स्वरूपाविर्भावरूपः नापूर्वाकारोत्पत्तिरूपः । स्वेन शब्दात् । 'परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते' (छां.८।३।४) इति श्रुतौ । स्वेन रूपेणेति विशेषणोपादानात् । आगन्तुकदेहपरिग्रहे हि स्वेन रूपेणेति विशेषणमनर्थकं स्यादिति सूत्रार्थः । जीवब्रह्मणोर्भेदे ह्येतत्सूत्रविरोधः स्पष्ट एव । **परस्परं च** । जीवानां परस्परभेदश्च । **स्वसम्बद्ध इति** । कर्मसम्बद्धे जीवे बुद्ध्याद्युपाधिरुत्पद्यते । तादृशोपाधियुक्ताज्जीवात्कर्मोत्पद्यते इत्यर्थः । एतद्भास्करमतस्य मायावादिमतापेक्षया विशेषमाह–**उपाधीनामिति** । **अनवस्थानादिति** । उपाधिभूतेऽचिदंशे भेदस्यौपाधिकत्वे उपाधेरुपा-

अतो जीवकर्मानुरूपं ब्रह्मणो भिन्नाभिन्नस्वभावा एवोपाधयः उत्पद्यन्ते इति ।

अत्रोच्यते । अद्वितीयसच्चिदानन्दब्रह्मध्यानविषयविधिपरं वेदान्तवाक्यजातमिति वेदान्तवाक्यैरभेदः प्रतीयते । भेदावलम्बिभिः कर्मशास्त्रैः प्रत्यक्षादिभिश्च भेदः प्रतीयते । भेदाभेदयोः परस्परविरोधादनाद्यविद्यामूलतयापि भेदप्रतीत्युपपत्तेरभेद एव परमार्थ इत्युक्तम् । तत्र यदुक्तं, भेदाभेदयोरुभयोरपि प्रतीतिसिद्धत्वान्न विरोध इति । तदयुक्तम् । कस्माच्चित्कस्यचित् विलक्षणत्वं हि तस्मात्तस्य भेदः । तद्विपरीतत्वं चाभेदः । तयोः तथाभावातथाभावरूपयोरेकत्र सम्भवमनुन्मत्तः को ब्रवीति । कारणात्मना जात्यात्मना चाभेदः , कार्यात्मना व्यक्त्यात्मना च भेद इत्याकारभेदादविरोध इति चेत् , न । विकल्पासहत्वात् । आकारभेदादविरोध इति वदतः, किमेकस्मिन्नाकारे भेदः, आकारान्तरे चाभेद इत्यभिप्रायः । उताकारद्वययोगिवस्तुगतावुभावपीति । पूर्वस्मिन् कल्पे, व्यक्तिगतो भेदो जातिगतश्चाभेद इति नैकस्य द्व्यात्मकता । जातिर्व्यक्तिरिति चैकमेव वस्त्विति चेत् , तर्ह्याकारभेदादविरोधः परित्यक्तः स्यात् । एकस्मिंश्च विलक्षणत्वतद्विपर्ययौ विरुद्धावित्युक्तम् । द्वितीये तु कल्पे ' अन्यो-

---

धिः कल्पनीयः । पुनस्तस्याप्यपर इत्यनवस्था स्फुटैव । अतोऽचिदंशे भेदाभेदौ द्वावपि स्वाभाविकावेवाश्रयणीयौ ।

एतद्भेदाभेदवादिभास्करमतं ध्याननियोगवादी दूषयति—**अत्रोच्यत इति** । **विलक्षणत्वम्** । अन्यत्वम् । **तथाभावेति** । तथा च प्रसिद्धयोर्भेदाभेदयोरेकत्र विरोध एवेति सर्वत्र भेदाभेदयोः संभवं वदन्नुन्मत्त एवेत्यर्थः । शङ्कते—**कारणात्मनेति** । **एकस्मिन्नाकारे** । एकस्मिन्पदार्थे । **पूर्वस्मिन्कल्पे इति** । तत्रापि किं जातिव्यक्त्योर्भेदः उताभेदः अथवोभयम् । प्रथमे आह—**व्यक्तिगत इति** । **नैकस्येति** । एकस्य पदार्थस्य भेदाभेदरूपता नेत्यर्थः । द्वितीयं शङ्कते—**जातिरिति** । **आकारभेदात्** । वस्तुभेदात् । तृतीये आह—**एकस्मिन्निति** । **विलक्षणत्वम्** । अन्यत्वम् । **तद्विपर्ययः** । अनन्यत्वम् । **द्वितीये त्विति** । आकारद्वयविशिष्टैकवस्तुनिष्ठौ भेदाभेदौ इति पक्षे अन्योन्यभिन्नं जातिव्यक्तिरूपं आकारद्वयं तस्माद्भिन्नत्वेनानुपलब्धं तदाश्रयभूतं

न्यविलक्षणमाकारद्वयम् , अप्रतिपन्नश्च तदाश्रयभूतं वस्तु ' इति त्रितं-याभ्युपगमेऽपि त्रयाणामन्योन्यवैलक्षण्यमेवोपपादितं स्यात् । न पुनरभेदः। आकारद्वयनिरूप्यमाणाविरोधं तदाश्रयभूते वस्तुनि भिन्नाभिन्नत्वमिति चेत् । स्वस्माद्विलक्षणं स्वाश्रयमाकारद्वयं स्वस्मिन् विरुद्धधर्मद्वयसमावेश-निर्वाहकं कथं भवेत् । अविलक्षणं तु कथन्तराम् । आकारद्वयतद्वतोश्च द्व्यात्मकत्वाभ्युपगमे निर्वाहकान्तरापेक्षयानवस्थानात् । न च सम्प्रतिपन्नै-क्यव्यक्तिप्रतीतिवत् ससामान्येऽपि वस्तुन्येकरूपा प्रतीतिरुपजायते । यत इदमित्थमिति सर्वत प्रकारप्रकारितयैव सर्वा प्रतीतिः । तत्र, प्रका-रांशो जातिः प्रकार्यंशो व्यक्तिरिति नैकाकारताप्रतीतिः । अत एव जी-वस्यापि ब्रह्मणो भिन्नाभिन्नत्वं न सम्भवति । तस्मादभेदस्यानन्यथासि-द्धशास्त्रमूलत्वादनाद्यविद्यामूल एव भेदप्रत्ययः ।

च तृतीयं वस्तु एतद्वस्तुत्रितयाभ्युपगमेऽपि भेद एवोपपादितः स्यान्नाभेदः । अप्रति-पन्नमित्यनेन तृतीयस्य वस्तुनोऽनुपलब्धिरिति दोषः सूचितः । शङ्कते—**आकारेति । भिन्नाभिन्नत्वम्** । भेदाभेदौ । यद्यप्येकस्मिन्वस्तुनि भेदाभेदौ विरुद्धौ तथापि तादृश-वस्तुनिष्ठाकारद्वयेन तयोराविरोध उपपादनीय इत्यर्थः। तत्राकारद्वयमाश्रयापेक्षया भि-न्नमभिन्नं भिन्नाभिन्नं वेति विकल्प्याद्ये आह—**स्वस्मादिति** । स्वशब्दत्रयमाश्रयभूत-वस्तुप्रतिपादकम् । **कथं भवेदिति** । न ह्यग्न्यपेक्षया भिन्नमग्निनिष्ठं पैङ्गल्यमौज्वल्यं चेत्याकारद्वयमग्नौ शीतोष्णत्वरूपाविरुद्धधर्मोपपादकं दृश्यते इति भावः। द्वितीये आह—**अविलक्षणमिति** । आश्रयाद्भिन्नमप्याकारद्वयमाश्रयगतभेदाभेदरूपाविरुद्धधर्मद्वयोप-पादकं न भवति, किमुताश्रयादभिन्नम् । एकस्मादाश्रयादभिन्ने आकारे द्वित्वस्यैव वक्तुमशक्यत्वादिति भावः । तृतीये आह—**आकारद्वयेति** । आकारद्वयं तदाश्रयश्चे-त्यनयोर्मध्ये यदि भेदाभेदौ तदा तयोर्विरुद्धयोरेकत्रासंभवात्तदुपपादकमन्यदाकार-द्वयं वाच्यम् । तस्याप्युक्तरीत्या स्वाश्रयाद्भेदाभेदाविति तादृशभेदाभेदोपपादकमप-रमाकारद्वयमित्यनवस्थेति भावः । ननु विरुद्धावपि भेदाभेदावुपपादकाभावेप्येकत्र स्वीकार्यौ । जातिव्यक्त्योरैक्यस्य दृष्टत्वात् । ' न हि दृष्टेऽनुपपन्नं नाम ' इति न्या-यादिति चेत्तत्राह—**न चेति** । संप्रतिपन्नं ज्ञातमैक्यं यस्या एवंभूताया व्यक्तेः प्रती-तिर्यथा एकाकारा भवति तथा जातिविशिष्टव्यक्तेर्न भवतीत्याशयः । **अत एव** । वि-रुद्धयोर्भेदाभेदयोरेकत्रासम्भवादेव ।

---

१ क. त्रयाणाभ्युपगमेपि०

नन्वेवं, ब्रह्मण एवाज्ञत्वात्तन्मूलाश्च जन्मजरामरणादयो दोषाः प्रादुःष्युः। ततश्च, ‘ यःसर्वज्ञः सर्ववित् ’ (मुं. १।१।९) ‘ एष आत्मापहतपाप्मा ’ (छां. ८।१।५) इत्यादीनि शास्त्राणि बाध्येरन्।

नैवम्। अज्ञत्वादिदोषाणामपरमार्थत्वात्। भवतस्तूपाधिब्रह्मव्यतिरिक्तं वस्त्वन्तरमनभ्युपगच्छतो ब्रह्मण्येवोपाधिसंसर्गः, तत्कृताश्च जीवत्वाज्ञत्वादयो दोषा परमार्थत एव भवेयुः। न हि, ब्रह्माणि निरवयवेऽच्छेद्ये सम्बध्यमाना उपाधयस्तच्छित्त्वा भित्त्वा वा सम्बध्यन्ते। अपि तु, ब्रह्मस्वरूपे संयुज्य तस्मिन्नेव स्वकार्याणि कुर्वन्ति।

यदि मन्वीत—उपाध्युपहितं ब्रह्म जीवः। स चाणुपरिमाणः। अणुत्वञ्चावच्छेदकस्य मनसोऽणुत्वात्। स चावच्छेदकोऽनादिः। एवमुपाध्युपहिते देशे सम्बध्यमाना दोषा अनुपहिते परे ब्रह्मणि न सम्बध्यन्त इति।

इहायं प्रष्टव्यः। १ किमुपाधिना छिन्नो ब्रह्मखण्डोऽणुरूपो जीवः, २ उताच्छिन्न एवाणुरूपोपाधिसंयुक्तो ब्रह्मप्रदेशविशेषः, ३ उतोपाधिसंयुक्तं ब्रह्मस्वरूपम्, ४ अथोपाधिसंयुक्तं चेतनान्तरम्, ५ अथोपाधिरेवेति। अच्छेद्यत्वाद्ब्रह्मणः प्रथमः कल्पो न कल्प्यते। आदिमत्त्वञ्च जीवस्य स्यात्। एकस्य सतो द्वैधीकरणं हि छेदनम्। द्वितीये कल्पे, ब्रह्मण एव प्रदेशविशेषे उपाधिसम्बन्धादौपाधिकाः सर्वे दोषास्तस्यैव स्युः। उपाधौ गच्छत्युपाधिना स्वसंयुक्तब्रह्मप्रदेशाकर्षणायोगादनुक्षणमु-

---

एवम्। जीवब्रह्मणोः स्वाभाविकाभेदस्वीकारे।

उपाधिब्रह्मव्यतिरिक्तम्। चिदचिद्विशिष्टब्रह्मव्यतिरिक्तम्।

सः। जीवः। **अनादिरिति**। अनादित्वानङ्गीकारे हि उपाधिसम्बन्धाज्जीवत्वं जीवत्वाच्चोपाधिसम्बन्ध इत्यन्योन्याश्रयः स्यात्।

दूषयति–**इहायमिति**। **उतोपाधिसंयुक्तमिति**। न चास्मिन्तृतीये पक्षे चतुर्थपञ्चमयोश्च जीवस्याणुत्वाभावात्कथमेषां पक्षाणामुत्थानम्। शङ्काकृता ‘ स चाणुपरिमाणः ’ इत्युक्तत्वादिति वाच्यम्। अणुपरिमाण इत्यस्य सूक्ष्म इत्यर्थाभिप्रायेणै-

पाधिसंयुक्तब्रह्मप्रदेशविशेषभेदात् क्षणे क्षणे बन्धमोक्षौ स्याताम्। आकर्षणे चाच्छिन्नत्वात् कृत्स्नस्य ब्रह्मण आकर्षणं स्यात्। निरंशस्य व्यापिन आकर्षणं न सम्भवतीति चेत्। तर्ह्युपाधिरेव गच्छतीति पूर्वोक्त एव दोषः स्यात्। अच्छिन्नब्रह्मप्रदेशेषु सर्वोपाधिसंसर्गे सर्वेषाञ्च जीवानां ब्रह्मण एव प्रदेशत्वेनैकत्वप्रतिसन्धानं स्यात्। प्रदेशभेदादप्रतिसन्धाने चैकस्यापि स्वोपाधौ गच्छति सति, प्रतिसन्धानं न स्यात्। तृतीये तु कल्पे, ब्रह्मस्वरूपस्यैवोपाधिसम्बन्धेन जीवत्वापातात्, तदतिरिक्तानुपहितब्रह्मासिद्धिः स्यात्। सर्वेषु च देहेष्वेक एव जीवः स्यात्। तुरीये तु कल्पे, ब्रह्मणोऽन्य एव जीव इति जीवभेदस्यौपाधिकत्वं परित्यक्तं स्यात्। चरमे, चार्वाकपक्ष एव परिगृहीतः स्यात्। तस्मादभेदशास्त्रबलेन कृत्स्नस्य भेदस्याविद्यामूलत्वमेवाभ्युपगन्तव्यम्। अतः प्रवृत्तिनिवृत्तिरूपप्रयोजनपरतयैव शास्त्रस्य प्रामाण्येऽपि, ध्यानविधिशेषतया वेदान्तवाक्यानां ब्रह्मस्वरूपे प्रामाण्यमुपपन्नमिति।

तदप्ययुक्तम्। ध्यानविधिशेषत्वेऽपि वेदान्तवाक्यानामर्थसत्यत्वे प्रामाण्यायोगात्। एतदुक्तं भवति। ब्रह्मस्वरूपगोचराणि वाक्यानि किं ध्यानविधिनैकवाक्यतामापन्नानि ब्रह्मस्वरूपे प्रामाण्यं प्रतिपद्यन्ते। उत स्वतन्त्राण्येव। एकवाक्यत्वे ध्यानविधिपरत्वेन ब्रह्मस्वरूपे तात्पर्यं न सम्भवति। भिन्नवाक्यत्वे प्रवृत्तिनिवृत्तिरूपप्रयोजनविरहादनवबोधकत्व-

---

तत्पक्षोत्थानात्। **प्रदेशविशेषभेदादिति**। यथा घटे चलति तत्स्थाकाशो न चलति किं तु प्रतिक्षणमन्य एवाकाशस्तत्र प्रविशति तद्वत्। शङ्कते—**निरंशस्येति**। **पूर्वोक्त एव दोषः**। क्षणे क्षणे बन्धमोक्षरूपः। **एक एव जीवः स्यादिति**। तथा च देवदत्तेन कृतस्य कर्मणोनुसन्धानं यज्ञदत्तस्य स्यात्। **तुरीये**। चतुर्थे। **परित्यक्तं स्यादिति**। तथा च 'उपाध्युपहितं ब्रह्म जीवः' इति स्वोक्तिविरोधः। **चरमे**। पञ्चमे पक्षे। **चार्वाकपक्षः**। जडस्यात्मत्वमिति तत्पक्षः।

एतत् ध्याननियोगवादिमतं मीमांसकः पूर्वपक्षी दूषयति—**तदपीति**। **अर्थसत्यत्वे इति**। तथा च प्रतिपाद्यार्थस्य सिद्धत्वेनापूर्वार्थबोधकत्वाभावात्प्रामाण्यं न स्यादित्याशयः। **एकवाक्यताम्**। महावाक्यैकत्वम्। **अनवबोधकत्वमेवेति**। दुःख-

मव । न च वाच्यम् , ध्यानं नाम स्मृतिसन्ततिरूपम् । तच्च स्मर्तव्यैक-निरूपणीयमिति ध्यानविधेः स्मर्तव्यविशेषाकाङ्क्षायाम् ' इदं सर्वं यद-यमात्मा ' (बृ. २।४।५) ' अयमात्मा ब्रह्म, सर्वानुभूतिः ' (बृ.२।५।१९) ' सत्यं ज्ञानमनन्तं ब्रह्म ' (तै. २।१।१) इत्यादीनि स्वरूपतद्विशेषादीनि समर्पयन्ति तेनैकवाक्यतामापन्नान्यर्थसद्भावे प्रमाणमिति । ध्यानविधेः स्मर्तव्यविशेषापेक्षत्वेऽपि, ' मनो ब्रह्मेत्युपासीत ' (छां.३।१८।१) इत्यादिदृष्टिविधिवदसत्येनाप्यर्थविशेषेण ध्याननिर्वृत्त्युपपत्तेर्ध्येयसत्यत्वानपेक्षणात् । अतो वेदान्तवाक्यानां प्रवृत्तिनिवृत्तिप्रयोजनविधुरत्वात् ध्यानविधिशेषत्वेऽपि ध्येयविषयस्वरूपसमर्पणमात्रपर्यवसानात् , स्वातन्त्र्येणापि बालातुराद्युपच्छन्दनवाक्यवत् ज्ञानमात्रेणैव पुरुषार्थपर्यन्ततासिद्धेश्च परिनिष्पन्नवस्तुसत्यतागोचरत्वाभावात् ब्रह्मणः शास्त्रप्रमाणकत्वं न सम्भवतीति प्राप्तम् ।

तत्र प्रतिपाद्यते—तत्तु समन्वयादिति । समन्वयः सम्यगन्वयः, पुरुषार्थतयाऽन्वय इत्यर्थः । परमपुरुषार्थभूतस्यानवधिकातिशयान-

---

साध्ये श्रवणादौ हि प्रवृत्तिरनेन भाव्या । तदप्रयोजकत्वादनवबोधकत्वमेवेत्याशयः । **स्वरूपेति** । ब्रह्मस्वरूपतद्विशेषप्रतिपादिकानि इदं सर्वमित्यादिवाक्यानि ध्यानविधि-नैकवाक्यतामापन्नानि ध्यानविषयीभूतब्रह्मरूपार्थसद्भावे प्रमाणमिति न वाच्यमिति सम्बन्धः । **असत्येनापीति** । तथा च ध्यानविषयीभूतार्थप्रतिपादकवाक्यानां ध्यानविधिना सहैकवाक्यत्वेऽपि नावश्यं सत्यार्थबोधकत्वमिति न प्रामाण्यम् । फलीभूतार्थप्रतिपादकवाक्यानां तु विध्येकवाक्यत्वेन प्रामाण्यमेव । फलस्यासत्यत्वे विधेरसम्भवात् । अत एव प्रथमसूत्रे (पृ. १८० पं. १५) इदं सर्वमित्यादिवाक्यानां फलबोधकत्वेन प्रामाण्यमुक्तं न विरुध्यते । **विधुरत्वात्** । रहितत्वात् । **स्वरूपसमर्पणमात्रेति** । मात्रशब्देन स्वरूपसत्यत्वव्यावृत्तिः । **बालातुराद्युपच्छन्दनेति** । उपच्छन्दनं सान्त्वनम् । यथा बालस्य केन चिदपराधे कृते येनापराधः कृतस्तस्य गृहमातपे बध्नामीत्युक्त्या बालः सन्तोषितो भवति न तु तदर्थसत्यत्वमपेक्षते तद्वदिति भावः ।

सिद्धान्ती परिहरति । **तत्रेति** । **परमेति** । परमात्मन आनन्दस्वरूपत्वेन

न्दस्वरूपस्य ब्रह्मणोऽभिधेयतयान्वयात् तच्छास्त्रप्रमाणकत्वं सिध्यत्येवेत्यर्थः । निरस्तनिखिलदोषगन्धनिरतिशयानन्दस्वरूपतया परमप्राप्यं ब्रह्म बोधयन् वेदान्तवाक्यगणः प्रवृत्तिनिवृत्तिपरताविरहान्न प्रयोजनपर्यवसायीति ब्रुवाणो राजकुलवासिनः पुरुषस्य कौलेयककुलाननुप्रवेशेन प्रयोजनशून्यतां ब्रूते । एतदुक्तं भवति । अनादिकर्मरूपाविद्यावेष्टनातिरोहितपरावरतत्त्वयाथात्म्यस्वरूपावबोधानां देवासुरगन्धर्वसिद्धविद्याधरकिन्नरकिम्पुरुषयक्षरक्षःपिशाचमनुजपशुशकुनिसरीसृपवृक्षगुल्मलतादूर्वादीनां स्त्रीपुंनपुंसकभेदभिन्नानां क्षेत्रज्ञानां व्यवस्थितधारकपोषकभोग्यविशेषाणां मुक्तानां स्वस्य चाविशेषेणानुभवसम्भवे स्वरूपगुणविभवचेष्टितैरनवधिकातिशयानन्दजनकं परं ब्रह्मास्तीति बोधयदेव वाक्यं प्रयोजनपर्यवसायि । प्रवृत्तिनिवृत्तिनिष्ठन्तु यावत्पुरुषार्थान्वयबोधं न प्रयोजनपर्यवसायि । एवम्भूतं ब्रह्म कथं प्राप्यत इत्यपेक्षायाम् 'ब्रह्मविदाप्नोति परम्' (तै. २।१।१) 'आत्मानमेव लोकमुपासीत' (बृ. १।४।१५) इति वेदनादिशब्दैरुपासनं ब्रह्मप्राप्त्युपायतया विधीयते । यथा, स्ववेश्मनि निधिरस्तीति वाक्येन निधिसद्भावं ज्ञात्वा तृप्तः सन् पश्चात्तदुपादाने च प्रयतते । यथा च, कश्चित् राजकुमारो बालक्रीडासक्तो नरेन्द्रभवनान्निष्क्रान्तो मार्गाद् भ्रष्टो नष्ट इति राज्ञा ज्ञातः स्वयञ्चाज्ञातपितृकः केनचित् द्विजवर्येण वर्धितोऽधिगतवेदशास्त्रार्थः षोडशवर्षः सर्वकल्याणगुणाकरस्तिष्ठन्, पिता ते सर्वलोकाधिपतिर्गाम्भीर्यौदार्यवात्सल्यसौशील्यशौर्यवीर्यधैर्यपराक्रमादिगुणगणसम्पन्नः त्वामेव नष्टं

पुरुषैरर्थ्यमानत्वात्पुरुषार्थत्वम् । अनवधिकातिशयत्वाच्च तस्य परमत्वमित्याशयः । **कौलेयकः** । श्वा तदुपजीवी वा । **स्वस्य चेति** । ब्रह्म स्वेन परेण वाप्यनुभूयमानं निरतिशयानन्दस्वरूपमेवेति तत्प्रतिपादनपरवाक्यस्यैव साक्षात्पुरुषार्थान्वयः । प्रवृत्तिनिवृत्तिपरवाक्यस्य तु तत्साध्यफलसम्बन्धात्पुरुषार्थान्वय इति भावः । **वात्सल्येति** । दोषेषि गुणत्वबुद्धिर्वात्सल्यम् । यथा मातुर्बालकविषये । सौशील्यं सुस्वभावत्वम् । स्वगृह इव संग्रामे प्रवेशनसामर्थ्यं शौर्यम् । अभीरुत्वमिति यावत् । वीर्यमश्रान्तिः ॥४॥

पुत्रं दिदृक्षुः पुरवरे तिष्ठतीति केनचिदभियुक्ततमेन प्रयुक्तं वाक्यं शृणोति चेत् तदानीमेवाहं तावत् जीवतः पुत्रोऽस्मत्पिता च सर्वसम्पत्समृद्ध इति निरतिशयहर्षसमन्वितो भवति। राजा च स्वपुत्रं जीवन्तमरोगमतिमनोहरदर्शनं विदितसकलवेद्यं श्रुत्वा अवाप्तसमस्तपुरुषार्थो भवति। पश्चात् तावुभौ संगच्छेते चेति।

यत्पुनः परिनिष्पन्नवस्तुगोचरस्य वाक्यस्य तज्ज्ञानमात्रेणापि पुरुषार्थपर्यवसानात् बालातुराद्युपच्छन्दनवाक्यवत् नार्थसद्भावे प्रामाण्यमिति।

तदसत्। अर्थसद्भावाभावे निश्चिते ज्ञातोऽप्यर्थः पुरुषार्थाय न भवति। बालातुरादीनामप्यर्थसद्भावभ्रान्त्यैव हर्षाद्युत्पत्तिः। तेषामेव तस्मिन्नपि ज्ञाने विद्यमाने यद्यर्थाभावनिश्चयो जायेत, ततस्तदानीमेव हर्षादयो निवर्तेरन्। औपनिषदेष्वपि वाक्येषु ब्रह्मास्तित्वतात्पर्याभावनिश्चये ब्रह्मज्ञाने सत्यपि पुरुषार्थपर्यवसानं न स्यात्। अतो, 'यतो वा इमानि' (तै. ३।१।१) इत्यादिवाक्यमखिलजगदेककारणं निरस्तनिखिलदोषगन्धं सर्वज्ञसत्यसङ्कल्पत्वाद्यनन्तकल्याणगुणाकरमनवधिकातिशयानन्दं ब्रह्मास्तीति बोधयतीति सिद्धम्॥ ४॥

॥ इति श्रीभाष्ये चतुःसूत्री समाप्ता ॥

इति श्रीमद्विद्वन्मुकुटरत्नभास्करशास्त्र्यन्तेवासिसकलविद्यापारंगतरामशास्त्रिच्छात्रेण तच्चरणप्रसादलब्धज्ञानलवप्रोत्साहितेनाभ्यङ्करोपाह्ववासुदेवशास्त्रिणा विरचितायां श्रीभाष्यव्याख्यायां समासोक्तौ चतुःसूत्री समाप्तिमगमत्॥

चतुःसूत्रीस्थ-श्रीभाष्योद्धृत-श्रुतिसूत्रगीताविष्णु-पुराणनाथमुन्यादिवाक्यानां सूचीपत्रम् ।

ब्रह्मसूत्राणि.

विष्णुपुराणस्थवाक्यानि.

नाथमुन्यादिवाक्यानि

शुद्धिपत्रम्।

शुद्धम्।	पृ.	पं.
श्रीभाष्यसिन्धा	१	१०
धानिकस्यैव	४	१
गृह्यते।	४	१
त्वासम्भवा	५	१२
प्रधानं यस्या	५	१३
श्रेयःसाधनं	५	२३
न्यायैर्निरूप्य	९	२७
रिहरा स्यात्। ...	१०	१०
साधनानुग्रहे	१२	१५
सांहितफल	१३	२६
मुपास्से	१८	७
इत्यनेनैका	१९	१
सिद्धान्त्विति	१९	२१
उक्तम्	२०	३
ब्रह्मलोकः	२२	७
तत्स्थिरत्वा	२४	१०
उपादाना	२४	१६
र्तार्हैव	२५	३
तै. ब्रा. २।८।९।३ ...	२९	१०
तै. ब्रा. २।८।९।४ ...	३०	१
प्रकेतम्। प्रकर्षेण ज्ञानुमशक्यम्।	३०	१६
ज्योतिष्टोमेन	३४	१
तद्बुद्ध्या	३४	१८
धर्मः। अपि तु ..	३६	५
सर्वेषां	३८	२३
तत्स्मरणा	३९	८
भावः।	३९	२७
काराः। विशे	४०	१९
मनुभूते	४१	२
तस्मादिति।	४६	१०
सङ्ख्याय	४७	२१
दर्शनात्।	५०	५
पृथक्स्थि	५२	५
स्मिन् देशे	५५	१२
तस्मिन्काले	५५	२८
नियमोऽस्तीति	५८	७
दित्यिति।	५८	२१
ढश्चेत्	५९	७
साधयत्	५९	९
चेत् तस्याः	६०	१०
मिथ्याभूता	६१	१४
कञ्चित्प्रति	६३	१०
कञ्चित्प्रति	६३	११
एतत्स्वभा	६४	४
प्रकाशो न	६९	२६
प्रतीतेः।	७०	१८
मपेक्ष्यो	७२	४
श्चित्सम्य	७२	१३
तथोक्तम्—	७३	९
साधनानुग्र	७३	२७
त्प्रकाशनम्।	७४	१
भवेत्।	७४	८
साक्षिशून्य	७५	२
ज्ञानाविषयो	७५	१४
बध्नाति	७५	२०
विरुद्धयो	७६	११
यथा तव	७७	१४

शुद्धम् ।	पृ.	पं.	शुद्धम् ।	पृ.	पं.
त्तुनया...	८०	४	नुपपत्ति	१२३	२०
(वि. पु. ६।७।१०) ।	८२	८	तावद्भान्ति	१२४	८
अतिसूक्ष्म	८२	१६	णोऽर्थाना	१३०	२५
चेत्-न । एतद्बु	८६	४	यज्	१३४	१४
नैवम् ।	८६	९	तज्ज्ञान	१३४	१५
तात्पर्यम्...	८८	२४	तज्ज्ञान	१३५	२
भेदेनै	८९	३	दिहेतुभूत	१३५	१४
वाङ्मनस	९३	१२	मयोपलब्धि	१३६	१
ब्देन गन्धा	१००	२४	प्रतीयमान	१३६	२४
विभर्ति	१०२	९	मेवेतर	१३६	२८
करण्येन	१०७	२३	ह्याण्डम्,	१४०	१
कृत्स्नस्या	११०	१	शङ्खादौ	१४२	११
तद्यतिरेके	११०	२	शङ्खादि	१४२	११
षड्जादि	११२	१६	सूत्रार्थः ।	१४२	१६
शब्देन स्वत्य	११२	२१	तद्ग्रहण	१४३	१
त्तद्द्रव्य	११३	१	त्वम्,	१४४	९
कारेण प्र	११३	२२	पारमा	१४४	११
मधीयते	११४	१०	तद्रहितत्वा	१४५	२४
रोयम	११४	१३	ऽचित्सम	१४६	१०
तद्द्रव्य	११५	६	ऽसद्भाव	१४६	१२
सूक्ष्म्–	११५	७	सत्यम्, तमःशब्देनाचित्स	१४६	१४
लिङ्गाच्च	११६	१	सम्यग्व्यव	१५३	६
मान्नी काम	११६	८	तस्तात्कलि	१५४	१
यथोक्तम्–	११९	१	तत्कर्मा	१५४	१७
हितम्	११९	१६	यथोक्तम्–...	१५४	१८
जगत्	१२०	८	पादितम्	१५५	३
वैक्यानुप	१२०	१५	तत्पदं	१५६	६
चेज्ज्ञान	१२१	८	त्सामानाधि	१५६	९
त्तत्मका	१२१	९	ञ्चरन्–	१५९	१४
निवृत्त्यनुपपत्तिरूपसत	१२१	१५	करण्येन	१६०	११
चेन्-न ।	१२२	२	कृत्स्नस्य	१६१	१२
	१२३	३	वाच्यत्वं	१६२	२०
	१२३	५	आत्मैका	१६३	२

शुद्धम् ।	पृ.	पं.
पृथग्ग्रहण	१६३	१०
घत्वानि	१६३	१३
धिकरण्य	१६४	४
देवतेऽहं	१६५	१७
मिंतरो	१६६	५
१ श्वेताश्वतरोपानिषदि ' महिमानमिति ' इति पाठो दृश्यते	१६६	२८
मत्कृताश्चिदचित्सं ...	१६७	१
जीवे	१६८	२
भवत्	१६८	५
जिघत्सो	१७०	७
ऋग्वेदः	१७१	१२
स्यात्तथा	१७१	२५
युभङ्क्ते	१७९	५
तज्ज्ञापना	१७९	७
अन्तराकाश	१७९	१४
स्वर्गादिसाध	१८३	१७
विशेषणत्वे	१८७	१४
तृकत्व	१९४	१

शुद्धम् ।	पृ.	पं.
साक्षात्कारं	१९५	६
येषां	१९६	२२
तत्सित्व्य	१९८	२
त्पत्तये	१९८	८
रागोचर	२०४	१४
हतिर	२१२	११
श्रवणात्, ...	२१२	१२
तदेव कार्यनिष्पत्तौ ...	२१२	२२
निर्विषय	२१५	२
द्वस्तुयाथात्म्य	२१६	५
ध्यानानन्तर	२१६	२७
नयोरेक	२१७	२४
शरीरपातात्	२१७	२६
सकलवस्तु	२१८	२
त्रिवर्गसाध	२१८	२०
यदिदमुपा	२१९	१९
श्रयणीया	२२२	२४
श्रुतो स्वेन	२२४	२२
मेव ।	२२९	१
शौर्यवीर्य	२३०	१०